सौख्याप्तीतरहानिसाधनभूतभगवत्स्वरूपज्ञापकत्वोक्त्यापिदेवत्वंविवृतं। तथाहि। गत्यर्थकाद्दिव्धातोरंतर्णीतण्यर्थात्कर्तर्यच्
प्रत्ययेसतिनिष्पन्नस्यदेवशब्दस्यज्ञापकत्वार्थकत्वात्। सौख्याप्तीतरहानिसाधनेत्यस्ययोग्यतयालाभः । स्वापप्रापकत्वोक्त्या
पिदेवत्वमेवविवृतं। तथाहि। स्वप्नःसुषुप्तिरित्याख्येतिवचनात् । सुप्त्यपरपर्यायस्वप्नार्थकाद्दिव्धातोरंतर्णीतण्यर्थात्कर्तर्य
च्प्रत्ययेसतिनिष्पन्नस्यदेवशब्दस्यस्वापप्रापणार्थकत्वात्। विश्वोत्पत्तिकर्तृत्वोक्त्यापितृत्वं त्राणकर्तृत्वोक्त्यापालकत्वापरपर्या
यंपतित्वं सौख्याप्तीतरहानिसाधनत्वोक्त्यागुरुत्वंच विवृतंज्ञातव्यं । हिताहितप्राप्तिपरिहारोपदेष्टुरेवगुरुत्वात्सौख्यस्यैवहित
त्वात्। इतरस्यैवाहितत्वात् । अलंवक्तीत्युक्त्यागुरुतममितितमबर्थोविवृतइतिसर्वमनवद्यं ॥ १ ॥ अथव्याचिख्यासितमू
लकृत्वोपाधिनापूर्णबोधान्प्रसिद्धचंद्रवैलक्षण्येनप्रार्थयते ॥ लसत्विति । प्रसिद्धेंदुराकाशेलसति अयंतुहृदंबरइतिततोवै
लक्षण्यं ॥ यद्वचश्चंद्रिकेति । यस्यश्रीमदानंदतीर्थेंदोर्वचनलक्षणचंद्रिका स्वांतसंतापं स्वांतंहृन्मानसंमनइत्यभिधाना
न्मनोनिष्ठकामादिकृतसंतापं विनिकृंतति छिनत्ति । प्रसिद्धेंदुस्तु बाह्यसंतापमेवेत्यतोपिवैलक्षण्यमित्यर्थः ॥ २ ॥
यथादेवेतथागुरावितिशास्त्रमर्यादासंरक्षणार्थंकृतंगुरुप्रणाममुपनिबध्नन्स्वचिकीर्षितंप्रतिजानीते ॥ पदवाक्येति । प
दं महाव्याकरणं। वाक्यं वार्त्तिकं। सूत्रव्याख्यानात्मकश्लोकरूपानुव्याख्यानं। प्रमाणं ब्रह्मतर्कादि । गुरून् अक्षोभ्य
तीर्थश्रीमच्चरणान्। विष्णोस्तत्त्वंविशेषेणनिर्णीयतेनेनेतिकरणव्युत्पत्त्या विष्णोस्तत्त्वंविष्णुतत्त्वंतस्यनिर्णयोयस्मादितिव्य
धिकरणबहुव्रीहिणावाविष्णुतत्त्वविनिर्णयशब्दवाच्यंप्रकरणं । आनंदतीर्थभगवद्वचसांविशिष्टव्याख्यानकर्मणिसुराह्य

धिकारिणोत्रेत्यनेनसुराणामेवाधिकारस्यांतेस्वयमेवोक्तत्वादत्रपुनस्तद्व्याख्यानकरणप्रतिज्ञाने कथंनस्वव्याहतिरित्यतउ
क्तं ॥ यथाबोधमिति ॥ ३ ॥ ननुसदागमैकविज्ञेयमित्याद्यपद्यंव्यर्थं । नचमंगलकरणार्थत्वेनसार्थकमितिवाच्यं ।
फलप्रमाणयोरभावेनतस्याकर्तव्यत्वात् । अस्तुवाकर्तव्यत्वं । तथाप्यन्यैरेवतत्कर्तव्यं । तेषांसांतरायत्वात् । नतुभगवत्पादै
स्तेषांनिरंतरायत्वात् । अस्तुवातैरपितत्कर्तव्यं । तथाप्युपनिबंधोव्यर्थइतीमाःशंकाःपरिहरन्नाद्यपद्यमवतारयति ॥ विघ्न
विघातादीति । विघ्नविघातएव आदिः कारणंयस्याःसमाप्तेः तत्साधनतयेत्यर्थः । अत्रप्रचयोप्युपलक्षणीयः । समा
प्त्यादिसाधनतयेत्युक्तसमाप्तेर्विघ्नविघातकारणकत्वोक्त्यासिद्धांतेमंगलस्यसमाप्तिरेवफलं विघ्नध्वंसोवांतरव्यापारइतिसूचितं
भवति । एवंव्याख्याने प्रामाणिकत्वाच्चास्यार्थस्येत्यादिनाग्रिमग्रंथेनमंगलसमाप्त्योरेवव्यभिचारपरिहारेणकार्यकारणभाव
समर्थनमपिसंगच्छते । विघ्नध्वंसफलकत्वेतुनसंगच्छतइत्यवधेयं । अविगीतो धर्मशास्त्राविरुद्धः । तथाचमंगलंनिर्विघ्नपरिस
माप्तिफलकं । अविगीतशिष्टाचारपरंपरावगतत्वात् । यदविगीतशिष्टाचारपरंपरावगतंतत्सफलमितिसामान्यव्याप्तिमूलकम
नुमानंप्रमाणमुक्तंभवति । परंपरादीत्यादिपदेनमंगलाचारयुक्तानांनित्यंचप्रयतात्मनां । जपतांजुह्वतांचैवविनिपातोनविद्य
ते । निर्विघ्नपरिसमाप्तिकामोमंगलमाचरेदित्यादिवचनसंग्रहः । नारायणवंदनं कृतमितिशेषः । अन्यथाअकृतस्यनिवेश
नेप्रतारकत्वप्रसंगइतिभावः । अंतरायो विघ्नः । विघ्नोंतरायःप्रत्यूहइत्यभिधानात् । शिष्यान् असन्निहितशिष्यान् । प्रयो
जनोद्देशेनेत्यनंतरंकिंतुस्वभावेनेतिशेषः । स्वरूपस्य वस्तुनइतिशेषः ॥ निर्धारणमिति । सजातीयविजातीयव्यावृत्तत

यालक्ष्यावधारणमित्यर्थः । निर्दोषत्वस्यगुणविशेषणत्वेसत्पदवैयर्थ्यंस्यात् । तृतीयपरिच्छेदेवर्जितःसर्वदोषैश्चेतिभगवतोनिर्दोषत्वेप्रमाणोदाहरणासंगतिश्चेत्यतआह ॥ [११७]**निर्दोषश्चासाविति** ॥ [११८]**तदर्थमेवेति** । अनंतलक्षणसूचनार्थमेवेत्यर्थः । परमात्मनिष्ठैकैकगुणस्यानन्यसाधारणत्वेनव्यावर्त्याभावादनंतलक्षणसूचनार्थमेवैतत्प्रयोगइतिभावः ॥ [११९]**व्यवहारादिति** । तार्किकाणांमतइतिशेषः ॥ [१२०]**सदितीति** । सद्भावेसाधुभावेचेतिवचनात्सच्छब्दःसाधुत्वार्थकः । दुःखादीनांचासाधुत्वात्तेनतद्व्यावृत्तिरितिभावः । ननुदुःखादीनांदोषत्वेनतेषुगुणत्वव्यवहारस्यतार्किकाणांसंकेतमात्रमूलकत्वेनाप्रामाणिकतया तद्व्यावृत्त्यर्थंसत्पदमनुपादेयमित्यतआह ॥ [१२१]**अथवेति** । ननुगुणादीनांकथंनिर्दोषत्वं चेतनाश्रितपापादिष्वेवदोषशब्दव्यवहारदर्शनेनगुणेषुतत्प्रसक्तेरेवाभावेननिषेधायोगादित्यतउत्पत्तीत्यादिनादोषोव्याख्यातः । उत्पत्त्यादिदोषेत्यर्थः । तथाचभगवद्गुणेषुज्ञानादिषूत्पत्त्यादयोदोषाःप्रसक्ताः । तज्जातीयेषुजीवज्ञानादिषुदर्शनादतस्तन्निषेधोयुक्तइतिभावः । अत्रेदंविचार्यते । ननुदोषात्यंताभावरूपंनिर्दोषत्वंकथंभगवल्लक्षणं । सिद्धांतेप्रामाणिकप्रतियोगिकात्यंताभावाभावेन दोषाणांजीवेप्रामाणिकतयातत्प्रतियोगिकात्यंताभावासंभवादितिचेत् । अत्रब्रूमः । निर्दोषत्वंनामारोपितदोषात्यंताभावः सएवचभगवल्लक्षणमिति । आरोपितदोषाणांचाप्रामाणिकतयातत्प्रतियोगिकात्यंताभावसंभवात् । नचवाच्यंजीवेवास्तवदोषाणामेवविद्यमानत्वेनारोपितदोषात्यंताभावोस्तीतिलक्षणस्यातिव्याप्तिरिति । जीवेवास्तवदोषाणामेवविद्यमानत्वेनारोपितदोषात्यंताभावायोगात् । तथाहि । आरोपितदोषात्यंताभावोनाम दोषारोपपूर्वकप्रतीतिविषयाभावइत्यर्थस्यविवक्षितत्वात् । दोषारोपपूर्वक

प्रतीतिविषयाभावोनाम दोषाआरोप्यनिषिध्यंतइतियावत् । तथाचजीवेदोषारोपपूर्वकप्रतीतिविषयाभावरूपारोपितदोषात्यंताभावोनवक्तुंशक्यः । तत्रदोषारोपेप्रधानभूतवास्तवदोषाणामेवविद्यमानत्वेनजीवेदोषाःनसंतीतिदोषानारोप्यननिषेधः कर्तुंशक्यते । अत्यंताभावस्यप्रतियोगिनेवप्रतियोग्यारोपेयत्प्रधानंतेनापिसाकंविरोधात् । भगवतिचप्रधानभूतवास्तवदोषाणामभावेनदोषानसंतीतिदोषानारोप्यनिषेधःकर्तुंशक्यइत्येवंदोषारोपपूर्वकप्रतीतिविषयाभावरूपारोपितदोषात्यंताभावस्य भगवतिसंभवाज्जीवेचासंभवान्नातिव्याप्तिरिति । अन्येतु स्वसंसृष्टदोषात्यंताभावोलक्षणमितिविवक्षितं । स्वशब्दस्समभिव्याहृतपरः । तथाचेश्वरीयदोषाणामप्रामाणिकत्वेनतत्संसृष्टदोषात्यंताभावसंभवात् । जीवेचनातिव्याप्तिः स्वशब्दोक्तजीवसंसृष्टदोषाणांप्रामाणिकतयास्वसंसृष्टदोषात्यंताभावस्यजीवेऽभावादित्याहुः । इदमेवोपपादनमन्यत्रापिद्रष्टव्यं । तथाहि । सिद्धांतेसत्त्वासत्त्वयोःपरस्परविरहरूपत्वेनविरोधःकथ्यते । सनयुक्तः । सत्त्वस्यसति असत्त्वस्यासतिप्रामाणिकत्वेनतत्प्रतियोगिकात्यंताभावयोरसंभवादितिचेत् न । परस्परविरहरूपत्वोक्तेःपरस्परविरहव्यापकत्वेतात्पर्यं । तथाहि । यत्रारोपितसत्त्वात्यंताभावस्तत्रासत्त्वं । यत्रचारोपितासत्त्वात्यंताभावस्तत्रसत्त्वं । नचसतिघटेवास्तवसत्त्वसद्भावेनारोपितसत्त्वात्यंताभावसद्भावा त्तत्रचासत्त्वाभावाद्व्यभिचारः । एवमेवासतिशशविषाणादौवास्तवासत्त्वसद्भावेनारोपितासत्त्वात्यंताभावसद्भावा त्तत्रचसत्त्वाभावाद्व्यभिचारइतिवाच्यं । आरोपितसत्त्वात्यंताभावोनामसत्त्वारोपपूर्वकप्रतीतिविषय[illegible]

विवक्षितत्वेनसतिघटेप्रधान[illegible]

शविषाणादौप्रधानभूतवास्तवासत्त्वस्यैवसत्त्वेनासत्त्वमारोप्यनिषेधस्यकर्तुमशक्यत्वेनारोपितासत्त्वात्यंताभावस्यैवाभावान्न
व्यभिचारः । अतोयुक्तंसत्त्वासत्त्वयोःपरस्परविरहव्यापकत्वमिति । ननुदोषात्यंताभावस्यकथंभगवल्लक्षणत्वं लक्षणानांभ
गवतात्यंताभिन्नत्वांगीकारादन्योन्याभावस्येवात्यंताभावस्यापिभगवत्स्वरूपत्वानंगीकारादितिचेन्न । दोषात्यंताभाववत्त्व
स्यैवभगवल्लक्षणत्वेनदोषात्यंताभावस्यलक्षणत्वानंगीकारात् । दोषात्यंताभाववत्त्वस्यचभावरूपत्वेनतस्यभगवत्स्वरूप
त्वोपपत्तेरित्यवधेयं । विस्तरस्तुलिंगपादीयसुधायामदृश्यत्वाधिकरणेद्रष्टव्यः ॥ [१।१।०] संभावनार्थमिति । असंभावनाशंकानि
रासार्थमित्यर्थः । निश्चयार्थमितियावत्। तेनोत्कटकोटिकस्संशयस्संभावना । तदर्थमित्यन्यथाप्रतीतिःपरास्तावेदितव्या ।
एवमेवोत्तरत्रापिव्याख्येयं । नन्वत्रशरीरक्षरणाद्ब्रह्मादिचेतनाक्षराः अक्षरदेहवत्त्वादक्षरामहालक्ष्मीः तद्वैलक्षण्यरूपंतदती
तत्वंजडेप्यस्तीतिसंभावकस्यजडेप्यतिप्रसक्तत्वात्तस्यापिनिर्दोषत्वाशेषसद्गुणत्वयोःप्रसक्तिरित्यतआह ॥ [२।१।०] क्षराक्षरपदा
भ्यामिति । अत्रापिशब्दस्समुच्चये । उपलक्ष्यतइत्यस्यप्रतिपाद्यतइत्यर्थः । एवंचक्षराक्षरपदाभ्यांनकेवलंक्षराक्षरेप्रतिपाद्ये
किंतुजडमपीत्येवमपिशब्दस्यक्षराक्षरजडानांप्रतिपादनरूपैकक्रियासंबंधरूपसमुच्चयोर्थः । प्रतिपाद्यत्वंचक्षराक्षरयोर्मुख्यवृ
त्त्याजडस्यतुलक्षणयेतिविवेकः । ननुक्षराक्षरशब्दयोर्मुख्यवृत्त्यास्वार्थप्रतिपादकत्वस्यलक्षणयाजडप्रतिपादकत्वस्यचोक्तावे
कस्यशब्दस्ययुगपद्वृत्तिद्वयविरोधस्स्यादितिचेन्न । सिद्धांतेतावन्नविरोधः । मायामात्रमितिसूत्रेमायाशब्दस्येश्वरप्रज्ञावा

चकत्वस्यवासनालक्षकत्वस्यचांगीकारात् । गंगायांमीनघोषावित्यत्रपरैरपियुगपद्वृत्तिद्वयस्वीकाराच्च । वस्तुतस्तुनकेवलंक्षराक्षरपदाभ्यांक्षराक्षरेलक्ष्येतेकिंतुजडमपिलक्ष्यतइत्येवमपिशब्दस्यक्षराक्षरजडानांलक्षणारूपैकक्रियासंबंधरूपस्समुच्चयोर्थः। नचवाच्यंक्षराक्षरशब्दयोःक्षराक्षरवाचकत्वेनकथंतत्रलक्षणेति । इयंह्यजहत्स्वार्थलक्षणा । तस्यांचाजहत्स्वार्थलक्षणायांवाच्यस्यार्थस्यापिलक्ष्यत्वमेव । यथाकाकेभ्योदधिरक्ष्यतामित्यत्रकाकपदस्यस्वार्थेतदितरत्रचलक्षणा । ननुतत्रशक्यलक्ष्यकाकमार्जालादिसाधारणस्यदध्युपघातकद्रव्यत्वरूपस्योपलक्ष्यतावच्छेदकस्यसत्त्वादुभयत्रलक्षणासंभवति। प्रकृतेतुकथमितिचेत् । उच्यते । प्रकृतेभ्यस्वतंत्रत्वरूपस्य शक्यक्षराक्षर लक्ष्यजड रूपोभयसाधारणस्योपलक्ष्यतावछेदकस्यसत्त्वाल्लक्षणासंभवत्येव । नन्वत्रकाकपदेनघटादेरितरस्यावाच्यत्वात्काकस्यैववाच्यत्वंवाच्यं । काकस्यापिलक्ष्यत्वांगीकारेतस्यकुत्रापिवाचकत्वमेवनस्यादेवंप्रकृतेपीतिचेन्न । स्यादिदंयद्यजहत्स्वार्थलक्षणास्थलेकाकपदाल्लक्षणयाकाकत्वप्रकारकबोधोभवतीत्युच्येत। नचैवं किंतुदध्युपघातकद्रव्यत्वप्रकारकएव। एवंप्रकृतेपियदिक्षराक्षरपदाभ्यांक्षराक्षरत्वप्रकारकएवबोधोलक्षणयाभवतीत्युच्येततदैवोक्तदूषणंस्यात् । नचैवं । किंत्वस्वतंत्रत्वप्रकारकएवबोधः । तथाचोभयत्रापिक्षराक्षरपदाभ्यांकाकपदेनचास्वतंत्रत्वदध्युपघातकद्रव्यप्रकारकबोधस्तुलक्षणयैवभवति । एवंचकाकेभ्योदधिरक्ष्यतामित्यस्यदध्युपघातकद्रव्येभ्योदधिरक्ष्यतामित्यर्थः । एवंप्रकृतेपिसमतीतक्षराक्षरमित्यस्यसमतीतास्वतंत्रमित्यर्थस्संपद्यतइतिज्ञातव्यं । ननुलक्षणाबीजस्यमुख्यार्थ..धस्याभावात्कथमुभयत्रापिलक्षणेतिचेन्न । तात्पर्यानुपपत्तेरपिलक्षणाबीजस्य यष्टीःप्रवेशयेत्यादौदर्शनेनात्रापितदनु

पपत्त्यैवलक्षणास्वीकारात् । तथाहि । काकेभ्यइंत्यत्रकाकपदेनतन्मात्रग्रहणेदध्युपघातकद्रव्येभ्योदधिरक्षणरूपवक्तृतात्पर्य
स्यानुपपत्तिःस्यादतोऽत्रलक्षणा । एवंप्रकृतेपिक्षराक्षरशब्दाभ्यांतन्मात्रग्रहणेऽस्वतंत्रातीतत्वरूपवक्तृतात्पर्यमनुपपन्नंस्यादत
स्तदनुपपत्त्यैवात्रलक्षणेतिध्येयं । ननुक्षराक्षरपदान्यतरपदेनैवलक्षणायास्संभवात्क्षराक्षरपदाभ्यामितिकस्मादुक्तमितिचेत् ।
अत्राहुः । क्षरशब्देनघटादिरूपंक्षरजडमुपलक्ष्यते । अक्षरशब्देनचप्रकृत्यादिरूपाक्षरजडमित्युभयोपादानमिति । तन्न ।
क्षरशब्दस्यक्षरजडलक्षकत्वे अक्षरशब्दस्यचाक्षरजडलक्षकत्वे उपलक्ष्यतावच्छेदकधर्मस्याभावेनोपलक्षणायोगात् । नचब्रह्मा
दिवाचकक्षरशब्देनक्षरजडलक्षणायांक्षरत्वमेवोपलक्ष्यतावच्छेदकं तथालक्ष्मीवाचकाक्षरशब्देनाक्षरजडलक्षणायामक्षरत्वमे
वोपलक्ष्यतावच्छेदकमितिवाच्यं । तयोरेवशक्यतावच्छेदकत्वेनतदाक्रांतयोर्ब्रह्मादिश्रियोरपिक्षराक्षरशब्दलक्ष्यतापातात् ।
यदिचा स्वतंत्रत्वमुभयत्राप्युपलक्ष्यतावच्छेदकं तर्ह्येकेनैवशब्देनोभयोपलक्षणायांसंभवत्यामन्यतरवैयर्थ्यानिस्तारात् । अतोवि
निगमनाविरहादुभयोरपिलक्षकत्वमितिसंप्रदायार्थविदः । नन्वत्रयद्यजहत्स्वार्थलक्षणातर्ह्युपलक्ष्यतइतिपदास्वारस्यं जहत्स्वा
र्थलक्षणायामेवोपलक्ष्यतइतिशब्दस्यवेदाइत्युपलक्षणं पंचाशद्वर्णाअपिगृह्यंतइत्यादौदर्शनादितिचेन्न । अजहत्स्वार्थलक्षणा
यामपिउपलक्ष्यतइतिशब्दप्रयोगस्यबहुलमुपलंभात् । यथाहि । उपजीव्यविरोधेतुनप्रामाण्यममुष्यचेतिब्रह्मतर्कवाक्यव्या
ख्यानावसरेनिरवकाशादेरुपलक्षणमेतदित्युक्तमित्यादिद्रष्टव्यमितिसर्वमकलंकं ॥ ७ ॥ उपलक्षणकरणेनसंपन्नवाक्यार्थमा
ह ॥ जडजीवेति । संशब्दार्थोत्यंतेति । वीत्युपसर्गस्यार्थद्वयमाह ॥ विशिष्टतयेति । निर्दोषाशेषसद्गुणत्वविशिष्टतये

त्यर्थः ॥ [३।३२] विलक्षणतयाचेति । जडजीवप्रकृतिभ्योऽत्यंतविलक्षणतयेत्यर्थः । अतएवपरिच्छेदांतेतथैवाचार्यैरुपसंहारःकृतइतिभावः ॥ [३।३२] प्रत्यक्षानुमानाभ्यामिति । रामकृष्णादौदोषग्राहिप्रत्यक्षं विष्णुर्दोषीचेतनत्वाद्देवदत्तवदित्याद्यनुमानं ताभ्यामित्यर्थः ॥ [३।३२] अन्यथापीति । निर्दोषत्वाशेषसद्गुणत्वसमतीतक्षराक्षरत्वाभाववत्तयेत्यर्थः ॥ [३।३२] आगमानपेक्षस्येति । अयमर्थः । रामकृष्णादिदोषग्राहिप्रत्यक्षेणत्रेधोत्पत्तव्यं । अयंरामकृष्णादिर्विष्णुः सचदोषवान्ततश्चतदभिन्नोविष्णुर्दोषवानितिवा । विष्णोरन्योयंदोषवानितिवा । कश्चिदयंदोषवानितिवा । प्रकारांतराभावात् । तत्रद्वितीयतृतीययोर्नविष्णोर्दोषित्वेआगमानपेक्षंतत्प्रत्यक्षंभवितुंशक्यं । विष्णुर्दोषवानितितेनानवगाहनात् । आद्येरामकृष्णादेरवश्यंविष्णुत्वंज्ञातव्यं । नचैतत्प्रत्यक्षवेद्यं । तस्मात्'देवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाशयः । आविरासीत्'इत्याद्यागमेनैवज्ञातव्यं । तथाचप्रत्यक्षंप्रत्यागमस्योपजीव्यत्वात्तद्विरोधेसतितत्रविष्णोःसदोषत्वादौतस्यप्रत्यक्षस्याप्रामाण्यं । एवंचेतनत्वानुमानस्याप्यागमानपेक्षत्वेविष्णोरेवाभावेनाश्रयासिद्धौचोदितायांनिरनिष्टोनिरवद्यइत्याद्यागमेनतत्सिद्धिर्वक्तव्या । तथाचतेननिर्दोषत्वेनैवविष्णोस्सिद्धत्वात्तंपक्षीकृत्यदोषित्वानुमानेधर्मिग्राहकतयोपजीव्यागमविरोधइत्यर्थः । यथोक्तमनुव्याख्याने । आगमेनहिविष्णुत्वंज्ञात्वादोषोऽत्रकल्प्यते । नचेत्स्याद्दोषवानन्यइति । ननुपूर्वकालैकसर्वजरत्पुराणनवकेवलास्समानाधिकरणेन एतेसमानाधिकरणेनसमस्यंतइत्यनेनसमासे प्रथमानिर्दिष्टंसमासउपसर्जनं । समासशास्त्रेप्रथमानिर्दिष्टमुपसर्जनसंज्ञंस्यादित्यनेनपूर्वसूत्रेपूर्वकालैकसर्वजरत्पुराणनवकेवलाइतिप्रथमानिर्दिष्टस्यैकशब्दस्योपसर्जनसंज्ञायां उपसर्जनंपूर्वं । समासउपसर्जनंप्राक्

प्रयोज्यमित्यनेनोपसर्जनभूतैकशब्दस्यपूर्वनिपातेसंति सदेकागमविज्ञेयमितिस्यादेकशाटीतिवदित्यतआह ॥ [२१२] **संख्यार्थस्यैवेत्यादिना** ॥ [२१२] **पूर्वकालैकेतीति** । पूर्वकालैकेत्यादिसूत्रैरित्यर्थः । तेनपूर्वकालैकेत्यादिसूत्रेणसमासस्यैवविहितत्वात्कथंपूर्वकालैकेतिपूर्वनिपातइत्युक्तमितिशंकानवकाशइतिज्ञातव्यं ॥ [२१३] **नकेवलार्थस्येति** । प्रकृतेचकेवलार्थः । केवलागमविज्ञेयइतिवक्ष्यमाणत्वादितिभावः । केवलार्थकस्यैकशब्दस्यपूर्वनिपातोनास्तीत्यत्रज्ञापकमुक्तं ॥ [२१२] **दोषैकदृगिति** । केवलदोषद्रष्टेत्यर्थः । अमरकोशवाक्यमिदं । ह्लादैकमयीमितिकाव्यप्रकाशीयःश्लोकःह्लादःसुखं केवलाह्लादमयीमित्यर्थः । द्वितीयायाउत्तरेणान्वयः । एवमाद्यपद्ये लक्षण प्रमाण संभावकानि त्रीण्युक्तानि । त्रयाणामपिकथनस्यावश्यकत्वमुपपादयन्नादौलक्षणकथनस्यावश्यकत्वमुपपादयति ॥ [२१३] **शृंगेकर्णेवेति** । अतोलक्षणंवक्तव्यमितिशेषः । प्रमाणकथनस्याप्यावश्यकत्वमाह ॥ [२१३] **लक्षणमपीति** । अतःप्रमाणंवक्तव्यमितिशेषः । अन्यथेतरभेदसाधनायलक्षणस्यहेतूकरणेऽज्ञानासिद्धिस्स्यादितिभावः । ननुसंभावनाकिमर्थंवक्तव्या । असंभावनाशंकापरिहारार्थमितिचेन्न । प्रमाणप्रमितानामसंभावनयानिराकरणायोगादित्यतआह ॥ [२१४] **संतीति** ॥ [२१४] **यथादेवगवानामिति** । अधःकृतपृष्ठभागाऊर्ध्वपादाउत्तानाइत्युच्यंते । इदंचोत्तानावैदेवगवाावहंतीतिप्रमाणप्रमितमितिभावः । ननुदेवगवानामितिकथं देवगवामितिवक्तव्यत्वादितिचेत् । उच्यते । गोरतद्धितलुकि । गोंतात्तत्पुरुषाट्टच्स्यादितिसूत्रेणदेवगोशब्दाट्टच्प्रत्ययेचुटूइतिटकारलोपेहलंत्यमितिचकारलोपेदेवगोअइतिस्थितेएचोयवायावइतिसूत्रेणाचिपरेओकारस्यअवूइत्यादेशेदेवगवेत्यकारांतप्रातिपदिकंभवति । पश्चात्स्वाद्युत्पत्तौदेवगवानामितिषष्ठी

बहुवचनंयुक्तमितिद्रष्टव्यं ॥ अत्रचेति । प्रकृतेनारायणइत्यर्थः ॥ युगपदणुत्वमहत्त्वादीनामिति । अणोरणीयान्महतोमहीयानितिप्रमाणप्रमितानांलक्षणानामित्यर्थः । आदिपदेनास्थूलोऽनणुरमध्यमोमध्यमोऽव्यापकोव्यापकइतिश्रुतिप्रमितानामस्थूलानणुत्वादीनांग्रहणं । अपवादोविरुद्धत्वं माशंकीत्यनंतरंअतःसंभावनावक्तव्येतिशेषः । उपसंहरति ॥ इतीति । इत्येवमित्यर्थः । यदुक्तं निर्विघ्नपरिसमाप्तिरूपफलसद्भावाद्देवतावंदनरूपंमंगलमनुष्ठेयमिति । तदसत् । कादंबर्यादौग्रंथेदेवतावंदनरूपेमंगलेसत्यपिसमाप्तेरभावेनान्वयतोव्यभिचारात् । प्रमत्तनास्तिकानुष्ठितकर्मणिदेवतावंदनरूपमंगलाभावेऽपिसमाप्तेर्जायमानत्वेनव्यतिरेकव्यभिचारात् । अतोमंगलसमाप्त्योःकार्यकारणभावाभावेनतदर्थंमंगलाचरणमयुक्तमित्याशंक्यान्वयव्यभिचारःप्रतिबंधकसद्भावकल्पकोनत्वकारणत्वकल्पकः । नहिप्रतिबद्धंकारणंकार्यमजनयदकारणंभवत्यतिप्रसंगात् । व्यतिरेकव्यभिचारश्चानेककारणत्वकल्पकएव । नतुतस्याकारणत्वकल्पकइत्याह ॥ कृतदेवतावंदनानामपीत्यादिना । ननुकुतएवंकल्प्यते । व्यभिचारान्मंगलसमाप्त्योःकार्यकारणभावएवनास्तीतिकुतोनकल्प्यते । अन्यथारासभादेरपिघटकारणत्वमंगीकृत्यतंत्रप्राप्तान्वयव्यभिचारादेरेवमेवपरिहर्तुंशक्यत्वादित्यतउक्तं ॥ प्रामाणिकत्वाचास्यार्थस्येति । चशब्दोदृष्टांतसमुच्चयार्थः । यागस्वर्गयोःकार्यकारणभाववन्मंगलसमाप्त्योःकार्यकारणभावस्यप्रमाणप्रमितत्वेनरासभादिवैलक्षण्यादन्वयव्यभिचारादिकमुक्तरीत्यैवपरिहर्तव्यमितिभावः । नन्वथापिमंगलमननुष्ठेयं निरधिकारिकत्वात् । विघ्ननिश्चयवतएव हिमंगलेष्वधिकारः । नाशार्थिप्रवृत्तौ...

त्वात् । नह्यात्मनोविघ्नवत्त्वंकेनापिप्रमाणेननिश्चितमित्यतआह ॥ [२१७] श्रेयांसीति । तथाचशंकितानिष्टनिवारणार्थमपिप रीक्षकाणांसर्पदंशजन्यविषसंदेहेनभेषजपानादौप्रवृत्तेर्दृष्टत्वेनतद्वदेवश्रेयांसीतिवाक्यबलेनविघ्नानांसंभावितत्वेनयदिविघ्ना नस्युस्तर्हिमंगलवैयर्थ्यं । यदिचस्युस्तर्हितन्निरासायमंगलंकर्तव्यमेवेत्येवंपाक्षिकोपिमंगलवैयर्थ्यरूपोदोषःपरिहर्तव्यएव । अ तःशंकितविघ्ननिरासार्थंमंगलाचरणरूपःप्रयत्नोयुक्तइत्यर्थः । तथाचविघ्नज्ञानवानेवमंगलेऽधिकारी ज्ञानं निश्चयः शंकाचेति निरधिकारिकत्वहेतोरसिद्धिरितिभावः ॥ [२१८] प्रकरणमेवेदमिति । यस्यनिर्विघ्नेनपरिसमाप्त्यर्थंमंगलाचरणंकर्तव्यंस्यादिति भावः ॥ [२१८] संबंधेति । विषयप्रयोजनाभ्यांप्रकरणस्य विषयप्रयोजनयोश्चपरस्परंसंबंधाभावादित्यर्थः । विषयशून्यतयाऽना रंभणीयत्वेदृष्टांतमाह ॥ [२१८] प्रतीतेति । प्रयोजनशून्यत्वेनानारंभणीयत्वेदृष्टांतमाह ॥ [२१९] काकेति । काकस्यकतिवादंतामेष स्यांडंकियत्पलं । कंबलेकतिरोमाणिकावार्ताचोलमंडलइत्यादिवदित्यर्थः । एतयोरेवसंबंधाभावोदाहरणत्वान्नपृथगुक्तमिति मंतव्यं । स्वरूपासिद्धिपरिहारायविषयशून्यत्वमुपपादयति ॥ [२१९] संहीति ॥ योऽज्ञातइत्यादि । यथाहुःपदार्थविदः संदि ग्धविपर्यस्तान्यतरंप्रत्येवशास्त्रस्यार्थवत्त्वादिति । अस्य प्रकरणस्य । सर्वसंमतत्वमुपपादयति ॥ [२१०] नहीति । तथात्वेपदत्व व्याघातादितिभावः । व्याघातसूचनार्थमेवपदमनर्थकंकोपिनह्यंगीकरोतीत्युक्तं । तथाहि । अर्थवदधातुरप्रत्ययःप्रातिपदि कमितिप्रातिपदिकसंज्ञायां ङ्याप्प्रातिपदिकादितिप्रातिपदिकोपरिस्वादिप्रत्ययेसुप्तिङंतंपदमितिपदत्वविधानात्पदत्वांगीका रेऽर्थवत्त्वप्राप्त्याअनर्थकत्वांगीकारेचतद्व्याहन्येतेत्याशयः । प्रयोजनशून्यत्वमुपपादयति ॥ [२१०] नापीति । प्रयोजनंभवदेहि

कंवास्यात् पारत्रिकंवा। द्वितीयेपिस्वर्गोमोक्षोवा। नाद्यद्वितीयावित्याह ॥ ऐहिकेति । धान्यधनादिरूपेहिकेत्यर्थः। कृष्या दीत्यादिपदेनकुसीदादिग्रहणं । यागादीत्यादिपदेनान्नप्रपादानादिरूपपूर्तसंग्रहः ॥ एतेनेति । तयोःसाधनांतरसाध्य त्वेनैतेनप्रकरणेनजन्यजनकभावरूपसंबंधाभावादित्यर्थः। एवमेवोत्तरत्राप्युपपादनंद्रष्टव्यं । नापितृतीयइत्याह ॥ मोक्ष स्यापीति । अपामसोमममृताअभूमेत्यादिश्रुतेरितिभावः ॥ एतदिति । एतेनप्रकरणेनेत्यर्थः । विषयप्रयोजनाभावा देवाधिकारीचदूरेनिरस्तइत्याह ॥ सकलेति । आत्मकस्येत्यनंतरंमोक्षस्येतिशेषः । एकविंशतिदुःखध्वंसात्मनाशादिरूपत्वा दितिभावः ॥ अपुरुषार्थत्वेनेति । पुरुषेणाप्रार्थ्यमानत्वाभावेनेत्यर्थः । नह्येतादृशेमोक्षेऽर्थिताकस्यापिसंभवतीतिभावः ॥ निरधिकारिकत्वापत्तेरिति । योहियमर्थमर्थयमानोयंविषयंजिज्ञासते तस्यैवाधिकारित्वादितिभावः । केवलार्थकंकश ब्दार्थानुवादोदुरागमाद्यवेद्यत्वमिति । इहेत्यस्यावृत्तिमभिप्रेत्येहग्रंथइत्युक्तं । नन्वत्रवेदप्रामाण्यापौरुषेयत्वादेरप्यत्रसाध नात्तान्येवेतिकथमुच्यतइत्यतआह ॥ तत्प्रसक्तंचेति । सदागमैकविज्ञेयत्वेकथितेवेदानामेवाप्रामाण्यात्तत्कथमेतदित्या शंकायांतत्प्रामाण्यादिसाधनंक्रियतइत्येवमादिरूपेण अन्यत् प्रामाण्यादिसाधनं। सदागमैकविज्ञेयत्वादिकथनप्रसक्तमित्य र्थः ॥ नतुस्वरूपमात्रमिति । नारायणस्वरूपमात्रमित्यर्थः । येनतस्यसर्वसंमतत्वेनविषयत्वंनस्यादितिभावः । विप्रतिप त्तिः । विपरीतनिश्चयः ॥ उक्तइति । इहसाधयिष्यामीत्यनेनेत्यर्थः । शंकते ॥ सत्त्विति । विषयइत्यर्थः । सदागमैक विज्ञेयत्वादिविशिष्टस्यनारायणस्ययद्विषयत्वमुक्तंतदयुक्तमितियावत् ॥ साधकेति । साधयिष्यामीतिसाधकंप्रमाणमुक्तं

तदभावादित्यर्थः । अनुमानादिनत्यत्रादिपदेनप्रत्यक्षग्राह्यं ॥ [२१७] स्ववचनविरोधादिति । एतैर्लक्षणैरनयाचसंभावनयावि शिष्टोभगवान्कुतःप्रतिपत्तव्यइत्याशंकायांसदागमैकविज्ञेयत्वमुक्त्वाऽधुनानुमानादिनावेद्यत्वांगीकारेसदागमैकविज्ञेयमि तिस्ववचनविरोधःस्यादित्यर्थः । सदुक्तिभिरित्यस्यव्याख्यानं ॥ [२१८] सदागमैरिति । वेदादिभिरित्यर्थः । ननुसौगतादिभि र्वेदादिसदागमानांप्रामाण्यानंगीकारात्कथंसौगतादीन्प्रतिसदागमैकविज्ञेयत्वादिविशिष्टनारायणसाधनायतदुपन्यासइत्य तआह ॥ [२१९] तत्प्रामाण्यंचेति । उक्तार्थस्यानुमानादिनाप्यग्रेसाध्यमानत्वात्कथंसदुक्तिभिःसाधयिष्यामीतिप्रतिज्ञेत्यस्वरसा दाह ॥ [२१९] अथवेति । आदिपदेनयशोदादिप्रत्यक्षग्रहणं ॥ [२२०] तैरपीति । वेदानुगृहीतानुमानादिभिरपीत्यर्थः । नन्वेवंपरमा त्मनोनुमानादिगम्यत्वंवक्तुंनशक्यते । सदागमैकविज्ञेयत्ववचनविरोधादित्यतआह ॥ [२२०] सदागमैकविज्ञेयमितिचेति ॥ [२२०] वेदादिविरुद्धेति । नतुवेदानुकूलानुमानाद्यवेद्यत्वं । तादृशानुमानादिभिरेवचसाधनमस्माभिःप्रतिज्ञातमितिभावः । न नुप्रथमपरिच्छेदेसदागमैकविज्ञेयत्वप्रतिपादनमयुक्तं । नियामकाभावात् । नचनिर्देशक्रमानुसारेणतदुपपादनंक्रियतइतिस एवनियामकइतिवाच्यं । निर्देशक्रमापेक्षयाआकांक्षाक्रमस्यबलवत्त्वेननिर्दोषाशेषसद्गुणत्वस्यैवप्रथमपरिच्छेदेप्रतिपाद्यत्वौचि त्यादित्यतआह ॥ [२२१] निर्देशेति । ननुबलवंतमाकांक्षाक्रमंविहायनिर्देशक्रमविवक्षायांकिंबीजमितिचेदुच्यते । सदागमैकवि ज्ञेयत्वोपपादनस्यवेदप्रामाण्याद्युपपादनसापेक्षत्वेनात्यायाससाध्यतयाप्रथममेवतस्योपपाद्यत्वात् । किंचसदागमैकविज्ञेयत्व स्यप्रथमतउपपादनाभावेनिर्दोषाशेषसद्गुणत्वंसाधयितुंनशक्यते । आगमानामप्रामाण्यशंकाकलंकितत्वेनतज्ज्ञापकप्रमाणा

भावात् । प्रथमतःसदागमैकविज्ञेयत्वोपपादनेतुसदागमरूपप्रमाणसद्भावेनतेननिर्दोषाशेषसद्गुणत्वसाधनंसुशकमितिभावः। एतदभिप्रायेणैवनिर्देशक्रमएवात्रविवक्षितइत्यवधारणमितिज्ञातव्यं । सदागमैकविज्ञेयत्वादिविशिष्टनारायणसंविन्मात्रस्य प्रयोजनत्वमुक्तंतदयुक्तमित्याशंकते ॥ नन्विति ॥ व्युत्पाद्यार्थसंविन्मात्रमिति । प्रतिपाद्यार्थज्ञानमात्रमित्यर्थः ॥ काकदंतेति । काकस्याष्टौदंताइतिकाकदंतपरीक्षाग्रंथेत्यर्थः । तथाचदंताष्टकरूपप्रतिपाद्यार्थज्ञानमात्रस्यतत्रापिजायमानत्वेनसप्रयोजनत्वापत्त्यानिष्प्रयोजनत्वंसर्वसंमतंनस्यादितिभावः ॥ येषामित्यादि । एकांतानांनकस्यचित् । अर्थेनारायणोदेवःसर्वमन्यत्तदर्थकमितिवचनादितिभावः ॥ संविदेवेति। प्रार्थ्येतिलिंगविपरिणामेनानुवर्तते । तान्प्रति एकांतभक्तान्प्रति । नन्वेवंसत्यस्मिञ्छास्त्रेएकांतभक्तातिरिक्तभक्तानामधिकारोनस्यादित्यतआह ॥ नहीति । तथाचेष्टापत्तिरितिभावः । एकांतभक्तातिरिक्तभक्ताभिप्रायेणापिप्रयोजनाभिधानपरंसंविदइतिपदंयोजयति ॥ अर्थवेति । तत्साध्यइतिलक्षणाबीजभूतशक्यसंबंधोक्तिः । नन्वस्मदायुक्तेवाक्यप्रयोगेसज्जनमुक्तयइतिमुख्यप्रयोगमकृत्वामोक्षावाचकसंवित्पदप्रयोगोनयुक्तः । प्रयोजनाभावादित्यतआह ॥ मोक्षस्येति । तथाचलक्षणाबीजशक्यसंबंधान्वेषणेसंविन्मोक्षयोर्जन्यजनकभावलाभेनयत्पूर्वंशंकितंमोक्षस्यकर्मसाध्यत्वंतन्निराकरणंसंविद्विषयप्रतिपादकस्यास्यप्रकरणस्यसंवित्साध्यमुक्त्यासहपरंपरयासाध्यसाधनभावसंबंधोपपादनंचकृतंभवति । मुख्यप्रयोगेतदसिद्धेरितिभावः । सज्जनपदमवतारयति ॥ एवंतर्हीति । मोक्षस्यप्रयोजनत्वोक्त्यावित्यर्थः ॥ निरभिकारिकैल्लमिति । एकांतभक्तानांमोक्षापेक्षायाअभावात् तदतिरिक्तभ

क्तानांचाप्रसिद्धत्वान्निरधिकारिकत्वमित्यर्थः । कथमनेनशंकापरिहारइत्यतएकांतभक्तातिरिक्ताअपिभक्तामोक्षापेक्षिणस्संतीत्याह ॥ [२।२६]येखल्विवत्यादिना । सात्विकप्रकृतयः सात्विकस्वभावाः । साधनचतुष्टयसंपन्नएवाधिकारीत्याशयेनसाधनचतुष्टयंदर्शयति ॥ [२।२६]शमादीति । मुमुक्षवइत्युक्तंमुमुक्षुत्वमेवैकांतभक्तातिरिक्तभक्तस्वरूपज्ञापकं । एकांतानांनकस्यचित् । अर्थेनारायणोदेवइतिवचनात्तेषांमुमुक्षायाअभावादितिभावः । तां भगवत्संविदं ॥ [३।१]तेषांसंविदइति । मोक्षसाधनीभूतज्ञानायेत्यर्थः । उपसंहरति ॥ [३।१]तस्मादिति । भारतादीनांपृथगुक्तत्वादाद्यशब्दोवेदमात्रपरइत्याह ॥ [३।३]ऋग्यजुरिति । ननु चाथशब्दाव्यर्थाः प्रयोजनाभावात् । नचसमुच्चयएवप्रयोजनमितिवाच्यं । एकेनैवशब्देनसमुच्चयसंभवेशब्दांतरवैयर्थ्यादित्यतआह ॥ [३।४]चाथशब्दाइति । चशब्दाश्चाथशब्दश्चेतिचाथशब्दाः ऋगादीनांपरस्परसमुच्चयार्थत्वान्नवैयर्थ्यमितिभावः । ननुचशब्दैवशब्दयोःकथमेकत्रसंबंधःचशब्दस्यान्यसमुच्चायकत्वात् । एवशब्दस्यान्यनिषेधकत्वादित्यतोनैकत्रतयोःसंबंइत्याह ॥ [३।४]एवशब्दयोस्त्विति ॥ [३।५]जीवजननादिवाचिनांकेषांचिद्वाक्यानामिति । वासुदेवात्संकर्षणोनामजीवोजायते । संकर्षणात्प्रद्युम्नसंज्ञकंमनोजायतइत्यादिवाक्यानामित्यर्थः । आदिपदेनकर्तृतःकरणोत्पत्तिसंग्रहः ॥ [३।५]अप्रामाण्यमिति । असंभावितायाजीवोत्पत्तेःकर्तृतःकरणोत्पत्तेश्चप्रतिपादकत्वादित्यर्थः । केचित् मायावादिनः ॥ [३।५]अखिलमितीति । उदाहृतवाक्यानां जीवाभिमानिशेषस्यनाम्नासंकर्षणस्यतु । वासुदेवाज्जनिःप्रोक्तेत्याद्यनुव्याख्यानोक्तरीत्याप्रामाण्यसंभवादित्याशयः ॥ [३।६]तुशब्दोविशेषणार्थइति । अत्रविशेषणेतिभावेल्युट् । तथाहि । विपूर्वकात्शिष्लृविशेषण

इतिधातोर्ल्युट्प्रत्ययेलघूपधत्वात्पुगंतलघूपधस्येतिगुणेयुवोरनाकावित्यनादेशेरषाभ्यामितिणत्वेविशेषणमितिभवति । तथा चविशेषणंविशेषस्तदर्थकइत्यर्थः । एवंचविशेषतोऋगादीनामनुकूलाइत्युक्तंभवति । विशेषतइत्यस्यसर्वांशेनेत्यर्थः । सर्वांशेनानुकूलामानवाद्याइति भवतितेषांसदागमत्वं । एवंचश्वपचादपिकष्टत्वं नाहंनचशिवोन्येचेत्यादिना किंचिदंशेनानुकूलानांदुरागमानांताद्दशलौकिकवाक्यस्यचनिरासोविशेषार्थकतुशब्दफलमितिभावः । अन्येतु तुशब्दोविशेषणार्थः । विशेषणेयोर्थोव्यावृत्तिरूपंप्रयोजनंतदर्थकइत्यर्थः । अवधारणात्मकइतियावत् । तथाचैषामेवानुयायिनइत्यर्थउक्तोभवतीत्याहुः । केचित्तु । विशेषणानियानीहेतिसदागमैकविज्ञेयत्वादीनामेवविशेषणतयाव्यवहारात्सदागमैकविज्ञेयत्वादिविशेषणार्थकोत्र तुशब्दः । तस्यचजनार्दनइत्यनेनसंबंधः । तथाचसदागमैकविज्ञेयत्वादिविशेषणविशिष्टोजनार्दनस्तैर्नैवज्ञेयःएतैरेवज्ञेयइत्यर्थोद्रष्टव्यः । नन्वेवंसतिसर्वज्ञंसर्वकर्तारमितिवाक्यावतारिकाग्रंथविरोधः । तत्रहिज्ञेयएतैरितिवाक्यमपिनविशिष्टभगवत्स्वरूपप्रतिपादकत्वंसर्वेषांसदागमानामाचष्टइत्युक्तत्वात् । अत्र तुशब्दस्योक्तविशेषणार्थकस्यजनार्दनइत्यनेनसंबंधकरणेउक्तविशेषविशिष्टंभगवंतंप्रतिपादयंत्येवेतिप्राप्तमितिचेत्सत्यं । स्पष्टंनाचष्टइतितद्वाक्यस्यव्याख्येयत्वाददोषः । तुशब्दसंबंधेनैवप्रतिपादनात्स्पष्टताभावइतिद्रष्टव्यमित्याहुः । तदन्यइत्यत्रनञोविरुद्धार्थकत्वेऋगादिविरुद्धानामेवदुरागमत्वमुच्यतेनतूदासीनानामित्यतआह ॥ [३१६] तदन्यइति ॥ [३१७] कथंतर्हीति । जनार्दनःएतैरेवज्ञेयश्चेदित्यर्थः ॥ वैशेषिकादिभिरिति । ईश्वराष्टगुणत्ववादिभिरित्यर्थः ॥ [३१८] उक्तविशेषणइति । सदागमैकविज्ञेयत्वनिर्दोषाशेषसद्गुणत्वादिविशेषणविशिष्टोज्ञा

दैनइत्यर्थः । अभियोगः आग्रहविशेषः । ननुवैशेषिकादीनांवेदार्थविचाराभावेपिवेदवाक्यार्थज्ञानंतावद्भविष्यतीत्यतआ
ह ॥ [३।८] वाक्यार्थइति । वैशेषिकादीनांचवेदार्थविचारेऽभियोगाभावाद्वेदवाक्यार्थज्ञानमेवतेषांनभवतीतिभावः ॥ [३।९] तर्हिमी
मांसकैरिति । तेषांवेदार्थविचारेसदाभियोगसद्भावादुक्तविशेषणविशिष्टोभगवान्किमर्थंतैर्नज्ञायतइत्यर्थः । कथमनेनो
क्तशंकापरिहारइत्याशंक्य मीमांसकाःवेदार्थभूतभगवज्ज्ञानशून्याः । अत्रानादरवत्त्वेसत्यन्यत्रादरवत्त्वादित्यभिप्रेतानुमा
नेसामान्यतोव्यतिरेकव्याप्तिरुच्यते ॥ [३।९] योहीति । यत्रादरवानित्यनंतरंअन्यत्रानादरवानित्यपिपूरणीयं । अत्रहेत्वभाव
पुरस्सरंव्यतिरेकव्याप्तिकथनेप्येवकारमहिम्नावह्निमत्त्वादेवधूमवत्त्वमित्यादाविवतस्यव्यापकत्वलाभइतिद्रष्टव्यं । अन्वय
व्याप्तिरुच्यते ॥ [३।९] नन्विति । अत्र अपिशब्दस्यकोर्थइतिचेत् । अत्रकेचित्अपिशब्दःसंभावनार्थः । अपिःपदार्थसंभाव
नान्ववसर्गगर्हासमुच्चयेष्वितिसूत्रात् । तथाचयोहियत्रादरवान्तस्यैवविद्यमानं वाक्येप्रतिपाद्यत्वेनविद्यमानं वस्तु प्रमेयं
वाक्यार्थइतियावत् । स्फुरत्यपि स्फुरतीतिसंभावितं अनादरवतोन्यत्रादरवतश्चविद्यमानमपिनस्फुरतीत्यर्थइत्याहुः । सं
प्रदायस्तु । अपिशब्दोवाक्यार्थोपपादकप्रमेयसमुच्चयेकैमुत्येच । तथाचायमर्थः । योहियत्रादरवांस्तस्यैवविद्यमानंवस्तु
वाक्येप्रतिपाद्यत्वेनविद्यमानंप्रमेयं वाक्यार्थइतियावत् । स्फुरति । अपिशब्दात्तद्वाक्यार्थोपपादकंचप्रमेयं स्फुरतीतिग्रा
ह्यं । अनादरवतोन्यत्रादरवतश्चयदाविद्यमानं स्पष्टंवाक्येप्रतिपाद्यत्वेनस्थितमपिप्रमेयं नस्फुरति स्पष्टोपिवाक्यार्थोनप्रती
यतइतियावत् । तदाकिमुवाच्यंतदुपपादकंप्रमेयजातंनस्फुरतीति । एवंव्याप्तिद्वयमुपपाद्योक्तशंकापरिहारायप्रयोगप्रकारं

दर्शयति ॥ नचैवंतथेति । अत्रादरवंतोन्यत्रानादरवंतश्चनसंभवंति । तेषांकर्मरूपार्थएवादरसद्भावात् । अतोनवेदाद्ब्रह्मरूपार्थप्रतीतिरितिभावः । तथाचमीमांसकाः वेदार्थभूतब्रह्मज्ञानशून्याः अत्रानादरवत्त्वेसत्यन्यत्रादरवत्त्वादितिप्रयोगःसूचितोभवतीतिज्ञातव्यं ॥ सुनिष्ठितैरितीति । ष्ठागतिनिवृत्तावितिधातोर्गतिरपगतिः । भक्तेर्योग्यतयालाभः । तन्निवृत्तिःष्ठाधात्वर्थः । सु सम्यक् नितरांस्थितैर्भक्त्यपगमनिवृत्तिमद्भिः कादाचित्कभक्तिशून्यैरित्यर्थलाभादुक्तशंकानिरासइतिज्ञातव्यं ॥ तर्कशब्देनेति । नचकेवलतर्केणेतिनञूशिरस्केणेत्यर्थः । अनेनकेवलतर्कशब्देनकथंदूषणानुमानव्यावृत्तिरितिशंकानवकाशः । यद्वातर्कशब्देनदूषणानुमानंविवक्षितंतच्चनञाव्यावर्तितमित्यर्थः ॥ तदितरानुमानेति । साधनानुमानेत्यर्थः ॥ अनुमानमेवेति । द्वित्वावच्छिन्नमप्यनुमानमित्यर्थः । अर्थापत्त्यादेरनुमानांतर्भावान्नपृथक्तन्निषेधोयुक्तइत्यतआह ॥ सामान्येति । अत्रदृष्टांतः ॥ कुरुपांडववदिति । संतानबीजंकुरुपांडवानामित्यत्रेवेत्यर्थः । यथापांडवानांकौरवविशेषत्वात्पृथग्ग्रहण मेवमर्थापत्त्यादीनामनुमानविशेषत्वात्पृथक्तद्व्यावृत्त्यर्थनकेनचिदित्युक्तमित्यर्थः। ननुकेवलागमविज्ञेयइत्येतन्नर्थं । अनेनोच्यमानार्थस्यऋगाद्यांइत्यनेनैवोक्तत्वादित्याशंक्यऋगाद्याइत्यनेनोक्तस्यसर्वस्याप्यर्थस्योपसंहारोनेनक्रियतइत्याह ॥ केवलेति । अत्रकेवलपदस्यनागममूलकप्रत्यक्षानुमाननिषेधकत्वं येनसदुक्तिभिरित्यस्यद्वितीयंव्याख्यानंविरुद्धंस्यादित्याशयवानाह ॥ केवलग्रहणेनेति । आदिपदेनकेवलानुमानादिग्रहणं । एवशब्दोऽभक्त्यादेरेवव्यावर्तकोनतुपूर्वोक्तसदायुक्तत्वादिव्यावर्तकइत्यभिप्रायेणभक्तपदमुपलक्षणत्वेनोक्तोपसंहारलाभायव्याख्याति ॥ भक्तैस्सदा

युक्तारित्यादिना ॥ संबंधइति । नयातोक्रियायातिशेषः । तमेवसंबंधंदर्शयति ॥ एषेति ॥ शुष्कणीति । निस्सारेणे त्यर्थः । वेदाद्यानुकूल्यरहितेनेतियावत् ॥ [३११९]समानेपीति । दुरागमादिसाधारणेपीत्यर्थः । असाधारण्यमेवदर्शयति ॥ वि[३११९]शिष्टंवस्त्विति । सर्वोत्तमवस्त्वित्यर्थः ॥ [३१२०]एवेति । अन्यथातन्नस्यादितिभावः । नन्वपौरुषेयत्वेनोत्तमत्वाच्छ्रुतयआदावुदाहर्तव्याः पुराणवाक्यंपश्चादुदाहर्तव्यं । तत्कुतोव्यत्यासेनोदाहरणमित्यतआह ॥ विवक्षि[३१२१]तंस्येति । पश्चादित्यत्रलिंगव्यत्ययेनपठितमित्यनुवर्तते । सौगतास्तुसोपनीतिमुदाहृतिमितिवचनादवयवद्वयमेवदर्शयंति ॥ [३१२२]यदनृतमिति ॥ [३१२२]एवंमृदब्रवीदित्यादीति । अप्रमाणमितिशेषः ॥ [३१२२]अनुमानविरुद्धत्वादिति । मृन्नवक्रीजडत्वादित्यनुमानविरुद्धत्वादित्यर्थः ॥ [३१२३]शाखांतरोक्तस्येति । ऋक्शाखायामुक्तस्यैवसहस्रशीर्षेत्यादेर्यजुःशाखायामप्यभिधानादित्यर्थः ॥ [३१२४]वाक्यावृत्तीति । कुवित्सोमस्यापामिति । मरुद्भिरग्नआगहि । उलूखलसुतानां । आतूनइंद्रेत्यादिवाक्यानामावृत्तिदर्शनादित्यर्थः । उदाहृतवाक्यानामनुवादादिरूपत्वेनाप्युपपत्तेर्नपुनरुक्तिज्ञापकत्वमित्यतआह ॥ त्रिः[३१२४]प्रथमामिति । प्रथमां ऋचं त्रि स्त्रिवारमन्वाह अवोचं । उत्तमा मंतिमांऋचं त्रिरन्वाहेत्यर्थः । तथाचानेनवाक्येनवेदेपुनरुक्तिरस्तीत्युच्यते । अतोन वाक्यावृत्तेरर्थांतरंकल्पनीयमितिभावः ॥ [३१२४]निरर्थकंचेति । कचटतपानांजबगडदत्वादित्यादिकमिवेत्यर्थः ॥ [३१२५]प्रमाणांतरसिद्धार्थमिति । प्रमाणांतरसिद्धार्थप्रतिपादकमित्यर्थः ॥ [३१२५]तथाविधंचेति । अग्नेर्हिमनिवारकत्वस्यस्पार्शनप्रत्यक्षसिद्धत्वादितिभावः । ननूक्तरीत्याकेषांचिदेववेदपुराणवाक्यानामप्रामाण्येपिनाशेषवेदाप्रामाण्यंप्राप्तमतस्तेनविष्णोःसदागमैक

विज्ञेयत्वादिसिद्धिर्भविष्यतीत्यतआह ॥ [३।२६]तद्दृष्टांतेनेति । अनृतव्याहतादिवाक्यदृष्टांतेनेत्यर्थः ॥ [३।२६]अनुमातव्यमिति । तथाचावशिष्टोवेदभागःपुराणभागश्चाप्रमाणं वाक्यत्वात्संप्रतिपन्नवेदपुराणवाक्यवदित्यनुमातव्यमित्यर्थः ॥ [४।१]तथाविधं चवेदवाक्यमिति । वेदार्थभूतेश्वरस्वर्गादेःप्रमाणांतरावेद्यत्वस्योक्तत्वादितिभावः । नचैतेषांवचनानामेवेतिमूलंयोजयति ॥ [४।१]एवंचेति । एवकाराभिप्रायंवदन्मूलेऽध्याहार्यंदर्शयति ॥ एतेषामित्यादिना ॥ [४।२]एवमेवेति । एवंवेदपुराणयोरेवाप्रामाण्यात्तदंतर्गतानां वर्जितस्सर्वदोषैर्योगुणसर्वस्वमूर्तिमानित्यादीनांतृतीयपरिच्छेदे द्वितीयपरिच्छेदेचोदाहरिष्यमाणानामपिवाक्यानामप्रामाण्यात्तद्बलाद्विष्णोर्निर्दोषत्वाशेषसद्गुणत्वादिसिद्धिस्तृतीयपरिच्छेदेद्वितीयपरिच्छेदेचक्रियमाणापरास्तेत्यर्थः । ननुकथंचशब्दस्समुच्चयार्थः । एतेषांवचनानामप्रामाण्यंचनास्तीत्येतत्समुच्चेयस्यान्यस्यादर्शनादित्यतआह ॥ [४।३]एतच्चेति । तथाचनकेवलंऋगाद्याइत्युदाहृतप्रमाणेन। सदागमैकविज्ञेयत्वादिरूपविवक्षितार्थसिद्धिः। किन्नामैतेषांवचनानामप्रामाण्यशंकाचनास्तीत्यर्थः । अप्रामाण्यशंकानिरासाभावेउदाहृतप्रमाणेनविवक्षितार्थसिद्धेरयोगादितिभावः॥ [४।४]एवमुत्तरत्रापीति। यत्रसमुच्चेयोनास्ति । समुच्चयार्थश्चशब्दश्चास्ति तत्रैतद्रीत्याशंकानिराससमुच्चितस्यैवोक्तप्रमाणस्यविवक्षितार्थसाधकत्वाददोषइतिबोद्धव्यमित्यर्थः । नन्वेतेन कथमनृतत्वादिहेतूनांवेदाप्रामाण्यसाधकत्वंनिराकृतमित्यतआह ॥ [४।४]अयमभिप्रायइति । नन्वित्यस्यनिश्चयेनेत्यर्थः ॥ [४।५]प्रमाणांतरविसंवादइति । प्रमाणांतरविरोधइत्यर्थः। ननुप्रमाणांतरसंवादाभावइत्यर्थः । तथात्वेसंवादरहितंचाप्रमाणंदृष्टमितिशंकाग्रंथस्य संवादराहित्यंचभागासिद्धमित्युत्तरग्रंथस्यचपौ

नरुक्त्यंस्यादितिध्येयं ॥ [४१५] सर्वत्रेति । केशवंपतितंदृष्ट्वापांडवाहर्षनिर्भराः । रुदंतिकौरवास्सर्वइतिप्रमाणभूतेवाक्यआपात
तःप्रमाणांतरविरोधसद्भावादनैकांत्यमित्यर्थः ॥ [४१५] द्वितीयंइति । उक्तवाक्येतुनसर्वथाप्रमाणांतरविरोधः। केउदके शवंपति
तंदृष्ट्वाबकाःहर्षनिर्भराः काकाश्चसर्वेरुदंतीत्यर्थेप्रमाणांतरविरोधाभावादतोनव्यभिचारइतिभावः। संदिग्धासिद्धिमेवोपपा
दयति ॥ [४१६] किंमंत्रेति । पुत्रकामःपुत्रेष्ट्यायजेतेत्यादौ ॥ [४१६] प्रमाणविसंवादएवेति । तन्निमित्तकमेवफलादर्शनादिकमिति
शेषः ॥ [४१६] वैगुण्येति । कर्तृकर्मादिवैगुण्येत्यर्थः। संदिग्धकालातीतत्वं संदिग्धानैकांतिकत्वंचोपपादयितुमुक्तं ॥ [४१७] अन्यतर
प्रामाण्येपीति । नन्वत्रकथंसंदिग्धकालातीतता । वाक्यद्वयंपक्षीकृत्याप्रामाण्यंसाधनीयं । तत्रद्वित्वावच्छिन्नेयत्रकुत्रचि
देकत्राप्रामाण्यरूपसाध्याभावस्यनिश्चितत्वादितिचेत्सत्यं । द्वित्वावच्छिन्नस्यान्यतरस्यप्रामाण्येपिव्याहतिर्यद्यपिसंभवति
तथापिद्वित्वावच्छिन्नस्यकस्यवाक्यस्याप्रामाण्यंसाध्यतइतिपृष्टेयद्युदितइतिवाक्यस्यानुदितइतिवाक्यस्यवेतिब्रूयात् । त
र्हितस्यवस्तुगत्याप्रामाण्यमेवकिंनस्यादित्युभयोरप्रामाण्यंसंदिग्धबाधितं । यथाहिनदीतीरेपंचफलानांवस्तुतःसत्त्वेऽसत्त्वेवा
पंचफलानिसंतिनसंतीतिवाक्ययोर्व्याहतत्वेपिसंतीत्यस्यवा नसंतीत्यस्यवा प्रामाण्यमेवभवतिनोभयोरप्यप्रामाण्यंतद्वत्। त
थाव्याहतयोरुभयोर्मध्येवस्तुतोयत्प्रमाणंतत्रव्याहतत्वमस्तिनास्तिचाप्रामाण्यमित्यनैकांत्यमित्यर्थः। ननुकथमत्रसंदिग्धबाध
स्यदोषत्वं साध्याभावसंदेहरूपबाधसंदेहस्यग्राह्यसंशयपर्यवसन्नत्वेनतस्यानुमित्यनुकूलत्वेनतदप्रतिबंधकत्वादितिचेदुच्यते।
स्वारसिकसंशयस्यैवानुमानांगत्वं। नत्वाहितसंशयस्य । प्रत्युततस्यानुमितिप्रतिबंधकत्वमेव । प्रकृतेचव्याहतत्वरूपो

हेतुरप्रामाण्यरूपसाध्यंविनान्यतरप्रामाण्येनाप्युपपद्यतइत्यन्यथासिद्ध्या साध्यसंदेहस्याहितत्वेन युक्तंसंदिग्धबाधाभिधानमितिभावः ॥ अनेकांत्यादिति । केशवंपतितमित्यादिवाक्यइत्यर्थः ॥ प्रमाणसंप्लवइति । भिन्नवक्तृकैकार्थप्रतिपादकशब्दरूपप्रमाणानामेवसंप्लवइत्यर्थः । प्रत्यक्षादिप्रमाणसंप्लवइत्यर्थस्तुचिंत्यः तत्रपुनरुक्तत्वहेतोरेवाभावादितिद्रष्टव्यं । ननुपौनरुक्त्यस्याप्रामाण्यसाधकत्वाभावेपिव्यर्थत्वसाधकत्वंतुस्यादित्याशंक्याह ॥ व्यर्थत्वमिति । द्वितीयेयं । अधिकविवक्षादिनानुवादादिरूपत्वान्नव्यर्थत्वसाधकत्वमित्यभिप्रेत्यकथंचिदित्युक्तं । अधिकविवक्षा अधिकविधानं । आदिपदेननिषेधग्रहणं । अनुवादादीत्यादिपदेनदार्ढ्यार्थकाभ्यासरूपत्वग्रहणं ॥ एतेनेति । प्रत्यक्षादिप्रमाणसंप्लवेव्यभिचारेणेत्यर्थः ॥ अनैकांतिकमिति । वाश्वारेड्ध्वजधक्धृतोड्वधिपतिःकुध्रेड्जजानिरित्यादावित्यर्थः ॥ सर्वथेति । वाश्वारेडित्यादौतुनसर्वथानैरर्थक्यं । जलचरेश्वरमकरध्वजदहनकर्ता । भूधरेश्वरहिमवद्गिरिजन्यपार्वतीभार्यकःश्रीमहादेवइत्यर्थसंभवेनहेतोरेवाभावान्नव्यभिचारइतिभावः । तदेवोपपादयति ॥ किमत्रेति । शृण्वेवेत्यादावित्यर्थः । इतोपिनसंवादराहित्यस्याप्रामाण्यसाधकत्वमन्यथासिद्धिसंदेहादित्याह॥ किमयंयथार्थत्वादेवेति॥ नप्रमाणमिति। संवादराहित्यमप्राण्यप्रमापकंनभवतीत्यर्थः । यद्वाऽनृतत्वादिहेतुजातमप्रामाण्येप्रमाणंनभवतीत्यर्थः ॥ तत्संदेहइति । अनृतत्वादिनाऽप्रामाण्यात्फलविसंवादः । उतवैगुण्यादिनिमित्तकइतिफलविसंवादसंदेहेनाप्रामाण्यसंदेहोस्त्येवेत्यर्थः। ननुनफलविसंवादसंदेहःद्वितीयकोटेरेवनिश्चितत्वादितिचेत्तत्राह ॥ वैगुण्यादीति । निमित्तत्वादेः निमित्तकत्वादेः । फलविसंवादस्येतिशे

... वचनानामितिप्रयुज्याप्रामाण्याभावसाधनायपुराणस्यापिपक्षीकारइत्यर्थः ॥ भागासिद्धीति।
अपौरुषेयत्वहेतोस्तत्राभावादितिभावः ॥ तावदिति । पुराणस्याप्रामाण्याभावमुत्तरत्रेतिहासपुराणःपंचमइत्यादिनाप्रकारांतरेणसाधयिष्यामइत्याशयेनेत्यर्थः । पदानांनिरभिधेयत्वेनेत्युच्यमाने अर्थवदधातुरप्रत्ययइत्यर्थवतएवप्रातिपदिकत्वोक्तेःप्रातिपदिकोपर्यैवङ्याप्प्रातिपदिकादित्यधिकृत्यस्वादिप्रत्ययविधानात्स्वादिप्रत्ययांतानामेवसुप्तिङंतंपदमितिपदत्वविधानात् । पदत्वोक्त्यार्थवत्त्वप्राप्तेर्निरभिधेयत्वोक्तौव्याघातःस्यादतःपदाभिमतानामित्युक्तं । पदत्वेनपराभिमतानांकचटतपानांजबगडदत्वादित्यादीनामित्यर्थः ॥ अन्वयाभावेनेति । कुंडमजाजिनंदशदाडिमानिषडपूपाइत्यादावित्यर्थः ॥ विपरीतान्वयेनेति । गिरिर्भुक्तमग्निमान्देवदत्तेन । अंबरमंबुनिपत्रमरातिःपीतमहीशगणस्यददाह । यस्यवधूस्तनयंगृहमब्जापातुसवःशिवलोचनवह्निरित्यादावित्यर्थः । तदिदं पदाभिमतानांनिरभिधेयत्वादि ॥ स्वतंत्रवक्त्रिति । सजातीयोच्चारणमनपेक्ष्योच्चारयितापुरुषःस्वतंत्रवक्तेत्यर्थः ॥ ननुस्वभावइति । विपरीतबोधकत्वादिरूपाप्रामाण्यस्यस्वभावत्वेज्ञानजनकजन्यत्वप्राप्त्याऽप्रामाण्यस्यस्वतस्त्वापत्तिरितिभावः । अस्तुस्वतस्त्वंकोदोषइत्यतआह ॥ अप्रामाण्यस्येति ॥ वक्ष्यामइति । अप्रामाण्यस्यचपरतस्त्वानंगीकारइत्यत्रेत्यर्थः । पदाभिमतानांनिरभिधेयत्वादिकंय त्तत्पुरुषदोषाधीनमित्येतदुपपादयति ॥ पुरुषोहीति ॥ तदभावइति । शब्दस्याबोधकत्वविपरीतबोधकत्वरूपाप्रामाण्याभावइत्यर्थः । वक्तुराप्तत्वानिश्चयेनकथंतदभावनिश्चयइत्यतआह ॥ विवक्षितार्थेति । आदिपदेनकरणपाटवाविप्रलिप्सयोर्ग्रहणं । विव

क्षितार्थतत्त्वज्ञानोक्त्याऽज्ञानविपरीतज्ञानप्रमादानांनिरासः । करणपाटवोक्त्याऽपटुकरणत्वस्य । अविप्रलिप्सोक्त्याविप्रलंभकत्वस्यनिरासइतिज्ञातव्यं । अपौरुषेयत्वेनकथमप्रामाण्याभावनिश्चयइत्यतआह ॥ तत्रवेदस्येति । कारणाभावे दोषरूपकारणाभावे। कार्यस्य अप्रामाण्यस्य अप्रामाण्यकारणदोषशून्यत्वहेतोःस्वरूपासिद्धिपरिहाराय वक्ष्यमाणेवेदोनपुरुषदोषनिबंधनदोषवान् पुरुषाप्रणीतत्वादित्यनुमानेऽप्रयोजकताशंकामादौपरिहरति ॥ शब्देदोषाश्चेति । नन्वस्त्वप्रामाण्यकारणदोषशून्यत्वमप्रामाण्यमेवास्त्वित्यप्रयोजकत्वशंकायांबाधकमाह ॥ विपक्षेत्विति । नन्वनेनाप्रामाण्यसाधकानृतत्वादिहेतूनांकोदोषउक्तइत्यतआह ॥ तथाचेति ॥ प्रागप्रामाण्याभावनिश्चयादिति । साध्यभूतंयदप्रामाण्यंतदभावनिश्चयाभावदशायामित्यर्थः ॥ संदिग्धासिद्धाइति । किमत्रसर्वथाप्रमाणांतरविरोधादेवफलादर्शनमुतवैगुण्यादिनिमित्तकमितिसंदेहापरिहारादित्युक्तरीत्यासंदिग्धासिद्धाइत्यर्थः ॥ निश्चितेत्विति । अपौरुषेयत्वेनेत्यर्थः ॥ निश्चितासिद्धाएवेति । फलविसंवादस्यवैगुण्यादिनिमित्तत्वनिश्चयादित्यर्थः । अपौरुषेयत्वेनेत्यनंतरंसाधितादितिशेषः ॥ तन्निबंधनेति । तच्छब्देनापौरुषेयत्वेनेत्यत्रप्रकृतपुरुषपरामर्शः । सचतद्दोषोपलक्षकः । तथाचापौरुषेयत्वेनहेतुनासाधितंयत्पुरुषदोषनिबंधनाबोधकत्वविपरीतबोधकत्वशून्यत्वंतस्माद्धेतोरित्यर्थः । अन्येतु । तन्निबंधनेत्यत्रतच्छब्देनसन्निहितमपौरुषेयत्वंग्राह्यं । नचतन्निबंधनेत्यनेनैवापौरुषेयत्वस्यहेतुतायालब्धत्वादपौरुषेयत्वेनेत्येतद्व्यर्थमितिवाच्यं । अपौरुषेयत्वेनेतितृतीययोक्तकारणत्वस्यैवतन्निबंधनेत्यादिनासाध्यसाधनभावमुखेनप्रदर्शनादित्याहुः । अयमिहानुमानप्रवृत्तिप्रकारः । वेदःप्रम

णं अबोधकत्वाविपरीतबोधकत्वशून्यत्वात् । प्रत्यक्षादिवत् । नचासिद्धोहेतुः । वेदोऽबोधकत्वाविपरीतबोधकत्वशून्यः । तत्प्रयोजकदोषशून्यत्वात् । प्रत्यक्षादिवत् । नचतत्प्रयोजकदोषवत्त्वमेवास्तीत्यसिद्धिरितिवाच्यं । वेदोऽबोधकत्वविपरीत बोधकत्वप्रयोजकदोषशून्यः । अपौरुषेयत्वादिंद्रियादिवत् । नचाप्रयोजकत्वं । वाक्यदोषाणांपुरुषदोषनिबंधनत्वाद्वेदेचपु रुषस्यैवाभावादिति । सत्प्रतिपक्षमाशंकते ॥ [५१२]वेदोप्रमाणमिति । ननुनानाप्तप्रणीतत्वमुपाधिः । दुष्टेंद्रियेऽप्रामाण्येस त्यप्यनाप्तप्रणीतत्वाभावेनसाध्याव्यापकत्वादित्याशंक्यवाक्यत्वरूपसाधनधर्मावच्छिन्नसाध्यव्यापकोयमुपाधिरित्याशयेनो क्तं ॥ [५१३]वाक्यत्वावच्छिन्नेसाध्यइति । शुद्धसाध्यव्यापकमप्युपाधिमाह ॥ [५१३]केवलेवेति । साध्यइत्यनुवर्तते । ननूपा धिद्वयस्यापिपक्षेसत्त्वात्साधनव्यापकत्वमित्यतआह ॥ [५१३]वेदेचेति । अपौरुषेयत्वेनोपाधिद्वयाभावस्यसाधितत्वादितिभावः । किंच अस्त्वाप्ताप्रणीतत्वं अप्रामाण्यंमास्त्वित्यप्रयोजकता । ननुयद्यप्रामाण्यंनस्यात् प्रामाण्यमेवस्यादितियावत् । तर्ह्या प्ताप्रणीतत्वमेवनस्यात् । आप्तप्रणीतत्वमेवस्यादितियावत् । तथाचवाक्यप्रामाण्यस्याप्तोक्तत्वगुणजन्यत्वेनतदभावेपिप्रा माण्यांगीकारेऽकारणकार्योत्पत्तिस्स्यादित्येवंहेतूच्छित्तिरूपानुकूलतर्कसद्भावान्नाप्रयोजकता । ततएवोपाध्योःपक्षएवसाध्य व्यापकताभंगःसिध्यति । अनुकूलेनतर्केणसनाथेसतिसाधने । साध्यव्यापकताभंगात्पक्षेनोपाधिसंभवइतिवचनादितिचेत् । तत्राह ॥ [५१४]वाक्यप्रामाण्यस्येति ॥ [५१५]निराकरिष्यतइति । आप्तिमूलकत्वाभावेपियादृच्छिकसंवादिवाक्येप्रामाण्यस्यदृष्ट त्वेनव्यभिचारान्नतस्यतत्रकारणत्वमितिनिराकरिष्यतइत्यर्थः । तार्किकोक्तरीत्यावेदप्रामाण्यनिश्चयप्रकारमाशंक्यनिराकरो

ति ॥ आप्तोक्तत्वेनेत्यादिना ॥ निश्चेयइति । वेदस्येतिशेषः । अपौरुषेयत्वहेतुनाकस्मात्क्रियतइत्यर्थः ॥ वक्ष्यतइति। वेदस्यसकर्तृकत्वनिराकरणेनेत्यर्थः ॥ संख्याप्रकर्षइति । शतसहस्रादिरूपबहुत्वसंख्येत्यर्थः । तथाचमहाजनपरिगृहीतत्वादित्यस्यसहस्रसंख्याकजनपरिगृहीतत्वादित्यर्थोद्रष्टव्यः ॥ पूज्यतावेति । महपूजायामितिधातोरित्यर्थः ॥ इयत्तेति । वेदपरिगृहीतारोजनाःशतसंख्याकाएवसहस्रसंख्याकाएवेत्येवंमर्यादापरिज्ञानस्याशक्यत्वादित्यर्थः । देशादिविशेषेकीकटदेशविशेषेबुद्धगयादौ ॥ बौद्धादीनामिति । बुद्धनिर्मितंशास्त्रंबौद्धंतदादीनामित्यर्थः ॥ महाजनेति । संख्याप्रकर्षवत्तद्देशस्थजनैरित्यर्थः ॥ परैरिति । वेदःप्रमाणंपूज्यजनपरिगृहीतत्वादित्येवंवेदाप्रामाण्यवादिनंबौद्धंप्रत्यनुमानंकार्यं । तेनवेदपरिग्रहवतांपूज्यत्वस्यानंगीकृतत्वादन्यतरासिद्धिस्स्यादित्यर्थः । एवमन्यतरासिद्धेनापिहेतुनाचेद्वेदप्रामाण्यंसाध्यते । तर्ह्याभाससमानयोगक्षेमत्वमित्याशयेनाह ॥ स्वशास्त्रेति । तस्य पूज्यत्वस्य । तथाचबौद्धशास्त्रंप्रमाणंमहाजनपरिगृहीतत्वादिति बौद्धेनापिस्वशास्त्रप्रामाण्यंसुखेनसाधयितुंशक्यं । तत्रत्वयावाच्यंबौद्धशास्त्रपरिगृहीतॄणांपूज्यत्वंमयानांगीकृतमित्यन्यतरासिद्धिरिति । तत्त्वापिसमानमितिभावः । परोक्तहेतूनां अप्रामाण्यसाधकानामनृतत्वादिहेतूनां। असिद्धत्वनिश्चयोपि । अस्त्वित्यनुवर्तते । नन्वितिहासश्चपुराणंचेतिहासपुराणेइतिद्विवचनंस्यादित्यतआह ॥ द्वंद्वैकवद्भावइति । सर्वोद्वंद्वोविभाषयैकवद्भवतीतिवचनादितिभावः । ननुतर्हिसनपुंसकं यस्यैकवद्भावःसनपुंसकंस्यादित्येकवद्भावे नपुंसकत्वविधानादितिहासपुराणमितिस्यादित्यतआह ॥ नपुंसकत्वंत्विति । सर्वेविधयश्छंदसिविकल्प्यंतइतितत्त

नादितिभावः । नपुंसकत्वनाश्रितमित्यवनभवति । प्रत्युतपुराणशब्दस्यविशेष्यलिंगत्वाद्विशेष्यभूतवेदशब्दोक्तग्रंथविशेषण
त्वेनपुल्लिंगत्वमेवाश्रितमित्याह ॥ पुराणशब्दस्येति । अत्रवेदशब्दस्यावृत्तिः तत्रप्राथमिकस्यग्रंथपरत्वमंगीकृत्यव्याचष्टे ॥
इतिहासपुराणोवेदइति । इतिहासपुराणाख्योग्रंथइत्यर्थः । अतएवपूर्वग्रंथविशेषणत्वेनेत्युक्तं ॥ पंचत्वसंख्यापूरणइति ।
तस्यपूरणेडडितिसूत्रेणपूरणार्थेडट्प्रत्ययविधानात्पंचमशब्दस्यापिडट्प्रत्ययांतस्यपूरणार्थत्वादित्थंव्याख्यातमित्यवगंतव्यं ।
तथाचानुक्तंपंचभिर्वेदैर्नवस्त्वस्तिकुतश्चनेत्यादौऋगादिवेदानांपंचत्वसंख्योक्ता । तत्रऋगादयः चत्वारोवेदाः प्रसिद्धाः अप
रस्त्वेकोवेदस्तेषांपंचत्वसंख्यापूरकोनदृश्यते सकइतिशंकायामितिहासपुराणलक्षणग्रंथस्यऋगादीनांपंचत्वसंख्यापूरकवेदत्व
मेवविधीयतइतिभावः । तद्गृहीतत्वादित्यत्रमध्यमपदलोपीसमासइत्याशयेनवेदसमानतयेत्युक्तं । नन्वत्रपुराणशब्दस्यसा
मान्यशब्दत्वात्तेनशैवपुराणादीनामपिग्रहणेतेषामपिप्रामाण्यमुक्तंस्यात् । तथाचापसिद्धांतइत्यतआह ॥ अत्रयद्यपीति ॥
सामान्येनेति । इतिहासपुराणइतिसामान्येनोक्तमित्यर्थः ॥ प्रमाणांतरबलादिति । अविरुद्धंतुयत्त्वस्यप्रमाणंतच्च
नान्यथा । एतद्विरुद्धंयत्तुस्यान्नतन्मानंकथंचनेत्यादिप्रमाणांतरबलादित्यर्थः ॥ किंनक्रियतइति । तथाचवेदवाक्येनकि
मर्थमप्रामाण्याभावादिनिश्चयःपुराणस्यक्रियतइत्यर्थः ॥ आसीति । पुराणकर्तुर्व्यासस्येतिशेषः । अतस्तद्धेतोरेवास्तुतद्धेतुत्वं
किंतेनेतिन्यायेनवेदेनैवतन्निश्चयःकृतइतिभावः ॥ एतेनेति । अपौरुषेयत्वेनवेदानांवेदेनतत्समानतयागृहीतत्वेनपुरा
णानांचाप्रमाण्याभावात्तैर्विष्णोर्निर्दोषत्वादिसिद्धिर्यातृतीयपरिच्छेदेद्वितीयपरिच्छेदेचक्रियमाणा सापिसमाहितेत्यर्थः ॥छ॥

वेदादेःप्रामाण्यसमर्थनं ॥७॥ बाह्याः तदप्रामाण्यवादिनः। ननुवाक्यत्वापौरुषेयत्वयोरेकत्रसमावेशंसाधयिष्यामीतिचेत्त त्राह ॥ [५१३८] नचेति। युक्तं युक्तिसिद्धंचनेत्यर्थः। कुतइत्यतआह ॥ [५१३९] संभावितस्यैवेति ॥ [५१३१] प्रतिज्ञायाअर्थइति। साध्यधर्मविशिष्टधर्मिवचनरूपप्रतिज्ञायाअर्थोविशेषणीभूतस्साध्यधर्मइत्यर्थः। पक्षइतिपाठेप्ययमेवार्थः ॥ [५१३३] अतोवेदइति। वेदस्यापिवाक्यविशेषत्वादित्यर्थः॥ [५१३५] सर्वशास्त्राभिमतत्वायोगादिति। सर्वशास्त्रसिद्धांततयाभिमतत्वायोगादित्यर्थः। लोकायत श्चार्वाकः ॥ [६१२] आपादकाभावादिति। आपादकं साधकं मांप्रत्यापादकस्यसंपादकस्य अपौरुषेयवाक्याभ्युपगमसाधकस्य तन्मतेऽभावादित्यर्थः। तेनातींद्रियस्यवस्तुनोऽनंगीकृतत्वेनतत्सिद्ध्यन्यथानुपपत्त्याऽपौरुषेयवाक्यस्यांगीकारयितुमशक्यत्वादितिभावः। ननुकर्तृकरणयोस्तृतीयातिङाद्यनुक्तेकर्तरिकरणेचतृतीयास्यात्। रामेणबाणेनहतोवालीति। तिङाद्युक्तौतुप्रतिषेधः।हरिःकरोति। एवंकर्तरितृतीयायांसत्यांयेनाभिमतावितिस्या न्नयस्येति। नचकर्तृकर्मणोःकृति कृद्योगेकर्तरिकर्मणिचषष्ठीस्यात्। व्यासस्यकृतिः भारतस्यश्रवणं। एवंचप्रकृते कृदतिङिति तिङ्वर्जप्रत्ययस्यकृत्त्वोक्तेःक्तप्रत्ययस्यापिकृत्त्वादभिमतशब्दस्यापिक्तप्रत्ययांतत्वेनकृदंतत्वात्तद्योगेयस्येतिषष्ठीयुक्तेतिवाच्यं। नलोकाव्ययनिष्ठाखलर्थतृनां। एषांयोगेषष्ठीनस्यात् विष्णुनाहतादैत्याः निष्ठोदाहरणमेतत्। एवंचप्रकृतेऽभिमतशब्दस्यक्तप्रत्ययांतस्यक्तक्तवतूनिष्ठेतिनिष्ठाप्रत्ययांतत्वेनतद्योगेषष्ठ्यानिषिद्धतयातदप्राप्तावपवादस्यापवादेपुनरुत्सर्गस्यैवप्राप्तिरितितृतीयैवस्यात्। देवदत्तेनभुक्तमितिवत्। अतोयेनतौनाभिमतावित्येववक्तव्यं यस्येतितुकथमित्याशंकते॥ [६१३] नन्विति। अतीतार्थकनिष्ठाक्तप्रत्यययोगएवनलोके

तिषष्ठीनिषिद्धा । नतुवर्तमानार्थकक्तप्रत्यययोगे । एवंचप्रकृते मतिबुद्धिपूजार्थेभ्यश्च । एतदर्थकेभ्योधातुभ्योवर्तमा नेर्थेक्तप्रत्ययःस्यादितिमत्याद्यर्थकेभ्योधातुभ्यःक्तप्रत्ययविधानात्प्रकृतेचमत्यर्थकादभिपूर्वकान्मनित्यस्माद्धातोःक्तप्रत्ययेकि त्त्वादनुनासिकलोपेसतिअभिमतशब्दोनिष्पन्नः । तथाच क्तस्यचवर्तमाने वर्तमानार्थस्यक्तस्ययोगेषष्ठीस्यात् । सतां मतःराज्ञांमतइत्येवंनलोकेतिसूत्रविहितषष्ठीप्रतिषेधबाधकत्वेनषष्ठीविधानात्सैवात्रयुक्तादेवदत्तस्येष्टमितिवदतोयस्यतावित्यु पपन्नमितिपरिहरति ॥ [६।५] उच्यतइत्यादिना ॥ [६।७] प्रयुज्यतइत्यादि । प्रणेताप्रणयने शास्त्रनिर्माणे येनप्रयुज्यतेतत्प्र योजनंविषयः । श्रोताचशास्त्रश्रवणेयेनप्रयुज्यतेतत्प्रयोजनंसाध्यमित्युभयमपिप्रयोजनशब्देनोच्यतइत्यर्थः । एवंप्रयोजनश ब्दंनिरुच्येदानींप्रयोजनाभावादितिवाक्यार्थमाह ॥ [६।८] विषयादीति ॥ [६।१०] अन्यतइति । धनधान्यादेःकुसीदकृष्यादितोल भ्यत्वादित्यर्थः ॥ [६।१०] संबंधेति । अन्यतोलभ्यत्वादेवानेनशास्त्रेणसाध्यसाधनभावसंबंधोनास्तीत्यर्थः । कुतोशास्त्रत्वमापद्य तइत्यतश्शास्त्रस्वरूपंदर्शयति ॥ [६।११] वक्तृश्रोत्रोरित्यादिना । सिद्धार्थबोधकवाक्यसमूहस्यशास्त्रत्वपरिहारायप्रमाणांतरेत्या द्युक्तं तेनापूर्वतालाभः । काकदंतपरीक्षाग्रंथादिसाधारण्यवारणायोक्तंवक्तृश्रोत्रोरित्यादि । फलस्यान्यसाध्यत्वेतेनसंबंधाभाव प्रसंगादनन्यसाध्यमित्युक्तं । तद्धेतुभूतमितिविषयफलयोःसंबंधोक्तिः । चरकं वैद्यशास्त्रं । इष्टापत्तिंपरिहरति ॥ [६।१३] नचेति । तस्य चार्वाकस्य तत् अशास्त्रित्वंनेष्टमित्यर्थः ॥ [६।१४] स्वभावतएवेति । शास्त्रंविनैवेत्यर्थः । यथापश्वादीनांधर्मादिज्ञा नाभावः स्वभावतएवास्ति । अतोनशास्त्राद्धर्माद्यभावस्तान्प्रतिप्रतिपादनीयः एवंसर्वपुरुषाणामपिधर्मादिज्ञानाभावस्यशास्त्रं

विनास्वतएवसद्भावात्तान्प्रतिशास्त्रेणतदभावप्रतिपादनंव्यर्थमित्यर्थः ॥ [६।१५] नायंसर्पइतिवदिति । रज्ज्वांभ्रांत्यासर्पप्रसक्तौ सत्यामितिशेषः । निरंकुशः अनिवारितः । काम्यतइतिव्युत्पत्त्याकामोविषयः । एवमुत्तरत्रापि । भोगोऽनुभवः ॥ [६।१३] दुःखेति । विषयभोगानंतरंतदप्राप्तिनिमित्तंयद्दुःखं तन्निवृत्तिर्भवतीत्यर्थः । ननुनिरंकुशकामोपभोगादिरूपप्रयोजनेनयद्यपिलोकायत शास्त्रस्यनसाक्षात्साध्यसाधनभावोस्ति । तथापिपरंपरयाप्रयोजकत्वमस्तीत्युपपादयति ॥ [६।१६] यद्यपीत्यादिना । भोजयति विषयभोगान्ददातीत्यर्थः ॥ [६।१७] नापीति । अधीतेपिशास्त्रेदुःखशांत्यदर्शनादितिभावः । ननुसुखदुःखावाप्तिहान्योरन्यतर त्वाभावात्कथंलोकोपकारस्यफलत्वमित्याशंक्यसुखरूपत्वाभावेपिसुखसाधनीभूतसंपदादिहेतुत्वाद्युक्तंतस्यफलत्वमित्याह ॥ [६।१९] उपकृताश्चेति । अनुरागिणः शास्त्रप्रणेतरीतिशेषः । अनुरागस्यापिनस्वतःप्रयोजनत्वमित्यभिप्रेत्यतत्साध्यंप्रयोजनमाह ॥ [६।२०] जनानुरागेति । जितेंद्रियत्वंविनयस्यकारणंगुणप्रकर्षोविनयादवाप्यते ॥ गुणाधिकेपुंसिजनोनुरज्यतेजनानुरागप्रभवाश्च संपदइतिवचनादितिभावः । ननुमूलेशास्त्रप्रणेतृप्रयोजनस्यैवनिराकरणंप्रतीयते नलोकप्रयोजनादेरतोन्यूनतेत्यतआह ॥ [६।२३] लोकप्रयोजनादीति । शास्त्रप्रणेतृकृतधर्माद्यभावप्रतिपादननिमित्तकः कामोपभोगोधर्माद्यनुष्ठानक्लेशनिवृत्तिश्चलोकप्र योजनशब्देनोच्यते । आदिपदेनधर्माद्यभावरूपविषयसंग्रहः । अनेन शास्त्रप्रणेत्रा । ननुधनवनिताद्यपहारेणतात्कालिकसुख भोगस्तावत्प्राप्तएवेत्युपकारित्वमेवतस्येत्यतआह ॥ [६।२४] नहीति । तात्कालिकसुखप्राप्तिःकपर्दिकालाभस्थानीया । लक्षलाभस्थानी यंजीवनमितिज्ञातव्यं ॥ [६।२५] फलेसंबंधिनएवेति । लोकेफलसाधनस्यैवविषयत्वदर्शनान्निरंकुशकामोपभोगस्यचोक्तरीत्याऽप्र...

त्वात्तत्साधनस्यधर्माद्यभावस्यनविषयत्वमित्यर्थः॥ [६।२५] कुतोनुरागइति। कुतश्चतत्प्रयुक्ताःसंपदइत्यपिद्रष्टव्यं ।आमयावी रोगवान्॥ [७।२] समव्ययफलत्वेनेति। अविवेकिद्वेषप्रयुक्तापकारोव्ययः विवेक्यनुरागप्रयुक्तोपकारःफलं तदुभयंसममेवेति। समव्ययफलकशास्त्रकरणायविचक्षणस्यनप्रवृत्तिर्युक्तेत्याशयः। यथोक्तं। असत्यानिदुरंतानिसमव्ययफलानिच। अशक्यानिचवस्तूनिनारभेतविचक्षणइति ॥ [७।२] इदंमिति । समव्ययफलत्वमित्यर्थः ।उपन्यासः नन्वविवेकिनामित्यादिनाकृतः । सर्वेषां विवेकिनामविवेकिनांच । नन्वेवंनिराकरणमयुक्तं। येऽबलिष्ठस्यहिंसयाधनवनितादिकंलभंते तेषांबलवतांपुनरन्येनाहिंसाभावात्तस्यनिरंकुशकामोपभोगःफलंभविष्यत्येव। तदनुरागप्रयुक्तसंपच्छास्त्रप्रणेतुःफलंभविष्यत्येवेत्यतआह ॥ [७।३] येत्विति । तटस्थःशंकते ॥ [७।४] नैवमिति । परस्परधनवनिताद्यपहारेणनिरंकुशकामोपभोगकरणंतत्कर्तुः परस्परहिंसादिनाऽपकारप्राप्तिश्चेत्येतन्नेदानींलोकेदृश्यते ऽतोभवद्भिःकथमेवंनिराक्रियतइत्यर्थः ॥ [७।४] तदेति । यदेवंनदृश्यतेतदानीमित्यर्थः ॥ [७।४] अस्तिकदर्शनानामिति । अस्तिस्वर्गनरकाख्यःपरोलोकस्तत्साधनीभूतौधर्माधर्मौचस्तइत्येवंप्रतिपादकानांशास्त्राणामित्यर्थः । दृष्टं उपकारजनितजनानुरागप्रयुक्तसंपदादिरूपं ॥ [७।८] उक्तप्रकारेणेति । धर्माधर्मज्ञानाभावइत्यादिनोक्तप्रकारेणेत्यर्थः । ननुसर्वविद्वेषविषयत्वाभावोपपादनमुपकारेणदृष्टंप्रयोजनंच प्रकारांतरेणोपपादयिष्यामीतिचेत्तत्राह ॥ [७।८] प्रणाडिकांतरेति। प्रकारांतराभावादित्यर्थः ॥ [७।९] किंतुतस्यापीत्यादि । कृतघ्नतानिमित्तप्रत्यवायानुसंधानेसतिहिशास्त्रप्रणेतुर्लोककृतहिंसाद्यभावस्स्यात् तत्तुत्वयैवत्याजितं। अतोहिंसादिप्राप्तिस्तस्याप्यवर्जनीयैवेत्यर्थः । अंगीकृतमित्यनेनसंक्षेपकरणेकारणं

सूचितं । कथमंगीकृतप्रायमित्यतस्तदुपपादयति ॥ **अदृष्टेत्यादिना** ॥ **वाक्यशेषइति** । वाक्यस्यशेषोवाक्यशेषइति वाक्यरूपःशेषइतिवार्थः । समयित्वलोभात्तेनापिविषयादित्वेनधर्मादिकमंगीकार्यमित्युक्तौधर्मादिरूपप्रमेयव्यवस्थितिस्सम यित्वलोभरूपप्रयोजनाधीनेत्यापन्नं तदुपर्याशंकतेचार्वाकः ॥ **नन्विति** ॥ **किंत्विति** । यथाहुःपदार्थविदोमानाधीनामेय सिद्धिरिति । प्रमेयव्यवस्थितेःप्रयोजनाधीनत्वेऽतिप्रसंगमाह ॥ **नहीति** । मरौ ऊषरभूमौ । तत्रापिपिपासानिवृत्तिरूपप्र योजनसद्भावाद्वारिरूपप्रमेयसिद्धिस्स्यादितिभावः । ननुतर्हिंमयापिप्रमाणेनैवधर्मादिरूपंप्रमेयंव्यवस्थाप्यतइतिचेत्तत्राह ॥ **नचेति** । नहीत्यर्थः । तदुपपादयति ॥ **प्रत्यक्षेणेति** । अयंघटइतिवदयंधर्मइत्यनुभवाभावादितिभावः । एवंचार्वाकेण धर्माद्यंगीकारवादिनस्सर्वान्प्रतिधर्मादिसाधकप्रमाणाभावेशंकितेतंप्रत्युदयनोक्तंधर्मादिसाधनप्र(कारं)(माणं)दूषयितुमनुव दति ॥ **अत्राहोदयनइति** । नस्यादित्यनंतरंतर्हीतिशेषः । इष्टं यजनं । पूर्तं अन्नप्रपादानादि ॥ **प्रागेवंजगदिति** । मूर्खोलोकोनघटतइतिकिंवक्तव्यमित्यर्थः । अयंभावः । अनेनकर्मणास्वर्गादिरूपंफलमस्तुवा मावा । अस्तुवेदंदुःखैकफलकं वि रक्तानामस्माकमुभयमपिसमानमितिज्ञात्वाप्रेक्षावतांप्रवृत्त्याभाव्यमितिकदाचित्संभावितंदृष्टं । लोकेतादृशानामपियदानि ष्फलेदुःखैकफलकेवाकर्मणिप्रवृत्तिर्नास्तितदासुखमेवमेस्यादुःखंमनागपिमाभूदित्येवानुसंधानवतांमूर्खाणांनिष्फलेदुःखैकफ लकेवाकर्मणिप्रवृत्तिर्नास्तीतिकिमुवक्तव्यमितिस्वयंसमाधानंवक्तुमुदयनोक्तंसमाधानंतावद्दूषयति ॥ **अत्रप्रष्टव्यमिति** ॥ **अनेनेति** । यद्यदृष्टंनस्यादित्यादिनाग्रंथेनेत्यर्थः ॥ **अनुमानमर्थापत्तिर्वेति** । इष्टापूर्तमदृष्टफलकं प्रेक्षावत्प्रवृत्तिविषय

त्वात् यदेवंतदेवं । यथासंप्रतिपन्नमित्यनुमानंवा इष्टापूर्तयोःप्रेक्षावत्प्रवृत्तिविषयत्वान्यथानुपपत्त्याऽदृष्टफलकत्वसिद्धिरित्यर्थापत्तिर्वेत्यर्थः। अन्यथेत्यस्ययद्यदृष्टंनस्यादित्यर्थः। तथाचतत्प्रवृत्त्यन्यथानुपपत्त्याऽनुमानेनवाचैत्यवंदनस्याप्यदृष्टसाधनत्वसिद्धिस्स्यादितिभावः। नन्वस्मिन्ननुमानेऽन्यथासिद्धिरर्थापत्तेश्चान्यथाप्युपपत्तिरित्युदयनःशंकते ॥ [७।१८] नैतदेवमिति । तमेवविशेषंव्यनक्ति ॥ [७।१९] जीविकादिकामिति । जीवनोपायसाधनभूतंधनादिकमित्यर्थः। तत्र चैत्यवंदने । चैत्यवंदनेकृते सतिधनादिकंबौद्धैर्दीयतइतिभावः ॥ [७।१९] नचात्रेति । इष्टापूर्तकरणेचनजीविकादिकंहेतुरस्तीत्यर्थः ॥ [७।१९] अनुभवविरोधादिति । तथाचकैश्चिज्जीविकामनपेक्ष्यादृष्टार्थमेवचैत्यवंदनंक्रियतइतितत्प्रवृत्त्यन्यथानुपपत्त्यातस्यापिधर्मसाधनत्वसिद्धिरित्यर्थः। ननुकेषांचित्तावच्चैत्यवंदनादौप्रवृत्तिर्जीविकाद्यपेक्षयैवास्तितत्प्रवृत्त्यन्यथानुपपत्त्यानादृष्टसाधनत्वंतस्यसिध्यतीतिचेत्तत्राह ॥ [७।२०] केषांचिदिति । चैत्यवंदनादिप्रवृत्तेरितिशेषः ॥ [७।२०] तथात्वस्येति । जीविकादिहेतुकत्वकल्पनस्येत्यर्थः ॥ [७।२०] समत्वादिति । इष्टापूर्तकरणेऽयंपरोपकारीसमीचीनइतिमत्वाधनंदास्यंतीतिजीविकादिबुद्ध्यैवकेचिदिष्टापूर्तेकुर्वंत्यतोनतत्प्रवृत्त्यन्यथानुपपत्त्येष्टापूर्तयोरदृष्टफलकत्वमितितदनुमानस्याप्यन्यथासिद्धिरर्थापत्तेश्चान्यथाप्युपपत्तिरितिभावः। उदयनश्शंकते ॥ [७।२१] प्रयोजनाभावादिति । बहुवित्तव्ययायाससाध्येष्टापूर्तविषयकंविप्रलंभनंचैत्यवंदनादाविवनसंभवतीत्यर्थः ॥ [७।२१] परेति । इष्टापूर्तकर्तृपूर्वकालीनपुरुषेत्यर्थः ॥ [७।२१] गुरुतरेति । येनप्रयोजनेनबहुवित्तव्ययायाससाध्येष्टापूर्तविषयकंविप्रलंभनंकरोतितादृशगुरुतरप्रयोजनस्येत्यर्थः। उदयनश्शंकते ॥ [७।२२] त्वयापिकथमिदमिति । इष्टापूर्तविषयकप्रवृत्तेरंधपरंपरामूल

कत्वंविप्रलंभकत्वमूलकत्वंवात्वयापिकथंनिश्चितमित्यर्थः ॥ [७।२३] तावतापीति । इष्टापूर्तयोरंधपरंपरादिमूलकत्वेनादृष्टफलकत्वाभावशंकनेनेत्यर्थः । आदिपदेनार्थापत्तिग्रहणं । अन्यथासिद्धिपदेनान्यथाप्युपपत्तिश्चग्राह्या । तथाचेष्टापूर्तयोःप्रेक्षावत्प्रवृत्तिविषयत्वमदृष्टफलकत्वरूपसाध्यंविनाविप्रलंभादिमूलकत्वेनाप्युपपद्यतइत्यन्यथासिद्धिशंकया ऽन्यथाप्युपपत्तिशंकयावानुमानस्या र्थापत्तेर्वानप्रवृत्तिरित्यर्थः । एवमुदयनोक्तंधर्मादिसाधकप्रमाणंदूषयित्वास्वयंतद्वक्तुंप्रतिजानीते ॥ [७।२३] उच्यतइति ॥ [७।२३] एवंवदतइति । नचधर्मादौप्रमाणमस्ति प्रत्यक्षेणतदनवगमात् । अनुमानादीनांचप्रामाण्याभावादितिवदतइत्यर्थः ॥ [७।२३] आद्येनतत्रप्रवर्तेतेति । तत्रेति बुद्धिस्थपरस्परधनवनिताद्यपहारेणनिरंकुशकामोपभोगपरामर्शः । तथाचयदिधर्माधर्मसद्भावसंदेहस्तवास्तितर्हिपरस्परधनवनिताद्यपहारेणनिरंकुशकामोपभोगेप्रवृत्तिस्तवास्ति सानस्यात् । नहिधर्माधर्मसद्भावशंकायांसत्यांसायुक्तेत्यर्थः ॥ [७।२३] नापिततोनिवर्तेतेति । धर्मादेरित्यर्थः । यदिधर्मेऽधर्मेचतवसंदेहस्तदाधर्माधर्माभाववादिनस्तवधर्मादधर्माच्चनिवृत्तिस्तावदस्ति सानस्यात् । नहिधर्माधर्मादौसंदेहेसतिसायुज्यतइत्यर्थः ॥ [७।२३] कुतोसाविति । धर्माद्यभावनिश्चयः कुतःप्रमाणादित्यर्थः । चार्वाकःप्रमाणंशंकते ॥ [७।२४] घटाद्यभावेति । योग्यत्वेसतियत्प्रत्यक्षेणनोपलभ्यते तन्नास्ति । धर्मादिकंचप्रत्यक्षायोग्यत्वान्नोपलभ्यतइत्यस्यापिसंभवान्नप्रत्यक्षेण धर्माद्यभावनिश्चयइत्याह ॥ [७।२४] अयोग्यतयेति ॥ [७।२५] विशेषणेनेति । अनुपलब्धिविशेषणेनेत्यर्थः ॥ [७।२५] तन्नास्त्येवेति । शशविषाणवदित्यर्थः ॥ [७।२५] अत्रेति । धर्मादिविषयइत्यर्थः । शशविषाणेयथा तथेतिशेषः । तर्ह्येवयन्नोपलभ्यतेतन्नास्तीतिव्याप्तिर्युक्तास्यादित्याशयः ॥ [७।२६] नस्यादिति । तर्ह्येव

योग्यताविशेषणंव्यर्थंस्यादितिभावः। क्वचित् रसादौ ॥ [८११]प्रत्यक्षानुपलब्धिरिति । धर्मादिविषयिणीत्यर्थः ॥ [८११]नास्त्येवेति । शशविषाणवदित्यर्थः ॥ [८१२]अनुपलभ्यमानमपीति । धर्मादिकमितिवर्तते । ननुधर्माद्यभावप्रतिपादकमदीयसमये नैवानुपलंभान्नास्त्येव धर्मादिकमित्येककोटिनिश्चयसंभवादेषसंशयोनिवर्तिष्यतइत्यतआह ॥ [८१२]नहीति ॥ [८१२]न्यायमतिक्रम्येति । संशयकोटिप्रापकन्यायमतिक्रम्येत्यर्थः । तथाचसंशयकोटिप्रापकन्याययोःप्रबलत्वान्नतन्मूलकस्संशयोसमयमात्रनिवर्त्यइतिभावः। अतस्संशयसंपत्तौवाक्यंप्रत्यक्षवत्प्रमेत्यनुव्याख्यानंहृदिनिधायाह ॥ [८१३]तथाचेति । तथाचागमादौप्रमाणतयांगीकृतेसतिद्वितीयकोटिनिश्चयसंभवात्संशयनिरासोभविष्यतीत्याशयः । नन्वस्तुसंशयविधूननार्थमागमप्रामाण्यं कुतोधर्मादिसिद्धिः तदभावावेदकप्रमाणांगीकारेसंशयोत्तारसंभवादित्यतआह ॥ [८१३]तथासतीति । तुल्यन्यायेनतथाधर्मादिबाधकागममात्रस्यप्रामाण्येसिद्धेतेनधर्मादिसिद्धिरप्यविकलेतिभावः॥ [८१३]आगमादीति । आदिपदेनानुमानग्रहणं ॥ [८१४]लोकव्यवहारोच्छेदइति। साक्षिजन्यवचनेनार्थनिश्चयस्यलोकेदर्शनात् । आगमप्रामाण्याभावेसाक्ष्यादिलोकव्यवहारोच्छेदस्स्यात्अनुमानप्रामाण्याभावेचधूमदर्शनानंतरंवह्न्यादिव्यवहारस्यचोच्छेदःप्रसज्यतइत्यर्थः ॥ [८१४]संभावनामात्रेणेति । उत्कटकोटिकस्संशयस्संभावना । तन्मात्रेणेत्यर्थः ॥ [८१४]तत्सिद्धिरिति । अयमत्रार्थेसाक्षीत्यादिलोकव्यवहारस्य धूमदर्शनानंतरंवह्न्यादिव्यवहारस्य(ज्ञानस्य)चसिद्धिरित्यर्थः । तथाचानुमानागमयोःसंशयजनकत्वमेवप्राप्तं नप्रमाजनकत्वं तथाचनप्रामाण्यं नहिसंशयजनकंप्रमाणमित्याशयः। एवंतर्ह्यागमानुमानयोःप्रामाण्यव्यवहारस्यकागतिरित्यतआह ॥ [८१४]संवा

देनचेति । संभावनयाप्रवृत्त्यनंतरंसंवादेनप्रामाण्याभिमानस्स्मृतिवदितिभावः ॥ संवादीति । संवादित्वोक्त्यार्थस्ययथावस्थितत्वंप्राप्तमितिभावः ॥ किमतोधिकमिति । यथावस्थितार्थज्ञेयविषयीकारिज्ञानजनकत्वादन्यदधिकंप्रामाण्यंनाम किमस्तीत्यर्थः । वादार्थमुपसंहरति ॥ तदेवमिति ॥ ७ ॥ इतिचार्वाकनिरासः ॥ ७ ॥ अज्ञानमूलत्वात्तेषामिति । रागद्वेषमोहानांअज्ञानमूलकत्वादित्यर्थः । सर्वज्ञस्यचाज्ञानाभावादितिभावः ॥ अविद्येति । उत्तरेषां रागद्वेषमोहाना मविद्याक्षेत्रत्व मविद्याऽज्ञानं क्षेत्रं मूलंयेषांतेतथोक्तास्तेषांभावस्तत्त्वमित्यर्थः ॥ तस्येति । विप्रलंभस्यरागादिकार्यत्वादित्यर्थः । तत्कुतइत्यतआह ॥ नहीति ॥ एवमेवेति । रागादिकंविनैवेत्यर्थः ॥ एवंभूतस्येति । सर्वज्ञत्वेनरागादिदोषरहितस्येत्यर्थः । आश्वासो विश्वासः । अंगीकुर्वाणाइत्यनंतरंतद्वाक्येनोपपन्नोधर्मादिनिश्चयइत्याहुरितिवाक्यशेषः । तदेवदर्शयति ॥ सार्वज्ञकल्पनायाइति । नरहरितीर्थानांव्याख्यानमनुवदति ॥ अर्थशब्दइति ॥ निवृत्तिवचनइति । अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिष्वितिवचनादितिभावः ॥ आवर्तनीयइति । तथाचतदर्थार्थत्वेनेतिवाक्यवृत्तिः । आवर्त्तितश्चार्थशब्दःप्रयोजनवाचीतिज्ञातव्यं । अज्ञानादिप्राप्तिनिवृत्तिप्रयोजनकत्वेनेतितदर्थइत्यभिप्रेत्याह ॥ तस्यार्थइत्यादिना । ननुभवद्व्याख्यानेपौरुषेयवाक्येनधर्मादिसिद्धिर्वा केषांचिद्व्याख्यानेऽज्ञानादिप्राप्तिनिवृत्तिर्वा कथंसर्वज्ञकल्पनामात्रेणस्यात् । अतस्सर्वज्ञोरागादिदोषरहितोऽविप्रलंभकश्चकल्प्यतइतिवक्तव्यं । नतुसर्वज्ञइत्येवेत्यतआह ॥ उक्तन्यायेनेति । आदिपदेनरागादिग्रहणं । सर्वज्ञेकल्पिते सति । ततएव सर्वज्ञत्वादेव । धर्मादिसाक्षात्कारवतइत्यादिनोक्तन्यायेनरागाद्यभाव

सिद्धौ ततएव विप्रलंभाद्यभावःसेत्स्यतीतियोज्यं ॥ तत्प्रसंगादिति । सार्वज्ञप्रसंगादित्यर्थः । कथमित्यतस्तदुपपादयति ॥ **सर्वंहीति** । ज्ञातव्य मस्माभिः ॥ **वैयर्थ्यादिति** । अस्मदादीनामेवसर्वज्ञत्वेनास्मदादिवाक्येनैवधर्मादिसिद्धिसंभवादितिभावः ॥ **यंद्वीति** । अनुमानंहीत्यर्थः ॥ **तत्सर्वज्ञेति** । यत्सर्वज्ञवाक्येनधर्मादिसिद्धिरभ्युपेयते तत्सर्वज्ञेत्यर्थः ॥ **तेनचेति** । प्रमाणभूततत्प्रणीतागमेनेत्यर्थः । ननुपुरुषांतरस्यसार्वज्ञंसर्वज्ञांतरवाक्येननकल्प्यतेयेनानवस्थास्यादपितुपूर्वसर्वज्ञवाक्येनेत्यतआह ॥ **पूर्वेति** । शाबरोपमानाभिप्रायेणैतत्सदृशोसावित्युक्तं । देशना उपदेशः । अनुपपद्यमानं सार्वज्ञंविनेतिशेषः ॥ **जिनस्यापीति** । अनयैवार्थापत्त्याजिनस्यापिसार्वज्ञंस्यादित्यर्थः ॥ **विप्रतिपत्तीति** । बुद्धजिनयोरुभयोरपिसर्वज्ञत्वेनतत्प्रणीतशास्त्रयोर्विवादाभावप्रसंगात् । नचविवादोनास्त्येवेतिवाच्यं । जिनैर्विश्वस्यसप्तभंगित्वांगीकारात् । वैभाषिकादिभिश्चतुर्भिरपिबौद्धैस्तदनंगीकारादित्यर्थः । अभावोनुपलब्धिः ॥ **भावविषयतायाइति** । अनुपलब्धेरभावविषयकप्रमाजनकत्वेनभावविषयकप्रमाजनकत्वस्यकुत्राप्यदृष्टत्वान्नसार्वज्ञरूपभावधर्मप्रमापकत्वमित्यर्थः ॥ **अभावप्रमाणेति** । अभावविषयकप्रमाजनकानुपलब्धिरूपप्रमाणविषयतयेत्यर्थः ॥ ७ ॥ **तद्ग्रहणस्वभावत्वेसतीति** । सकलपदार्थग्रहणस्वभावत्वेसतीत्यर्थः । एतावताप्रबंधेनान्यत्रादृष्टस्यसर्वज्ञत्वस्यकल्पनमित्येतावंतंवाक्यमनेकप्रकारेणव्याख्याय अतःपरंतद्ग्रहणस्वभावत्वंचेत्यादिनान्यत्रादृष्टस्यकल्पनमित्येतावतएवांशस्ययथोचितविशेष्याध्याहारेणव्याख्यानानिक्रियंतइत्यवगंतव्यं । विशेषणासिद्धिंवक्तुमाह ॥ **तद्ग्रहणस्वभावत्वंचे**

ति ॥ विवक्षितमेति । पक्षीभूतस्यकस्यचिदेवेत्यर्थः ॥ सर्वेषांवेति । पक्षत्वेनसर्वेपिविवक्षिताएवेत्यर्थः ॥ अन्यत्रे
ति । तथाचान्यत्राद्दष्टस्येत्यनंतरंतत्स्वभावत्वस्येतिशेषइत्युक्तंभवति ॥ आत्मत्वादिति । कश्चिदात्मा नसकलपदार्थसा
क्षात्कारस्वभाववान्भवति । आत्मत्वादस्मदादिवदित्यनुमानेनेत्यर्थः ॥ अस्मदादाविति । तथाचविशेषणस्यभागासिद्धि
रितिभावः ॥ तत्स्वभावत्वस्येति । सकलपदार्थग्रहणस्वभावत्वस्येत्यर्थः । भागासिद्धिपरिहारंशंकते ॥ व्याप्तिज्ञानमि
ति । यत्प्रमेयंतदभिधेयमितिव्याप्तिजन्यंज्ञानमित्यर्थः ॥ परोक्षेति । परोक्षंयत्सामान्यज्ञानंव्याप्तिज्ञानंतत्स्वभावत्वेनेत्य
र्थः ॥ अपरोक्षेति । अपरोक्षंयद्विशेषज्ञानंसकलपदार्थसाक्षात्कारित्वंतत्साधनस्येत्यर्थः ॥ अतिप्रसंगित्वादिति । अ
न्यस्वभावेनान्यस्वभावसाधनेचक्षुषोरूपग्रहणस्वभावत्वेनगंधादिग्रहणस्वभावस्यापिसाधनापातइतिभावः । ननुयत्प्रमेयंत
दभिधेयमितिसर्वविषयकव्याप्तिज्ञानस्यास्मन्मतेसाक्षिरूपत्वेनापरोक्षत्वस्य सर्वसामान्यतोयस्मात्साक्षिणैवानुभूयतइत्युक्त
त्वेनकथंपरोक्षत्वमुच्यतइतिचेत् । सत्यं । पररीत्येदमुक्तमित्यदोषः । परोक्षेत्यस्यलौकिकप्रत्यासत्यजन्येत्यर्थः । साक्षिणस्त्व
लौकिकत्वादेवमुक्तमित्यप्याहुः । विशेषणासिद्ध्युपजीवनेनप्राप्तांविशेष्यासिद्धिमप्याह ॥ अन्यत्ररूपसाक्षात्कारस्वभावे
पीत्यादिना । रससाक्षात्कारित्वस्यअतत्स्वभावत्वस्येत्यर्थः । आदौतत्स्वभावत्वस्यासिद्धत्वादित्यादियोज्यं । तद्ग्रहणस्व
भावत्वरूपविशेषणस्यपक्षेऽसिद्धत्वादेवेत्यर्थः । तदुपपादनायोक्तंमूलेऽन्यत्राद्दष्टस्येति । तस्यार्थमाह ॥ अन्यत्ररूपेत्या
दि । तथाचसकलपदार्थग्रहणस्वभावत्वस्यान्यत्रकुत्राप्यद्दष्टत्वात्पक्षेपितद्ग्रहणस्वभावत्वमसिद्धमित्यर्थः ॥ प्रतिबंधके

ति । अयंभावः । सतिपुष्कलकारणेयस्मिन्सतियन्नभवतितत्तत्रप्रतिबंधकं प्रकृतेचपुष्कलकारणमेवनास्ति । पदार्थग्रहणस्व भावरूपयोग्यतायाअपिकारणमध्येप्रविष्टत्वात् तस्याश्चोक्तरीत्याऽभावादेवप्रतिबंधककल्पनायाअनुपपत्तेस्तत्प्रक्षयस्याप्य नुपपत्तिरेव सतएवहिप्रध्वंसोवाच्यः तथाचविशेष्यासिद्धिरिति । ननुपुष्कलकारणमध्येकुतस्तत्स्वभावरूपयोग्यतायाःप्रवे शः। तथाचतत्स्वभावस्यासिद्धत्वेपिप्रतिबंधकंकुतोनकल्पनीयं । येनतत्प्रक्षयस्याप्यनुपपत्तिस्स्यादित्यतआह ॥ [११२] नहीति । अन्यत्र जलादौ। यथाचजलादिनाकुतोनदाहइतिपृष्टेमण्यादिप्रतिबंधकसद्भावादितिकेनचिदुक्तेदाहजनकत्वयोग्यतायाएवत त्राभावेनप्रतिबंधककल्पनानयुज्यतेयोग्यतायाअपिपुष्कलकारणमध्येप्रवेशादितिपरीक्षकैस्समाधीयतेतद्वदित्यर्थः । विशेष्या सिद्धिंप्रकारांतरेणोपपादयति ॥ [११२] किंचेति ॥ [११२] आवरणेति । प्रतिबंधकेत्यर्थः । एवमुत्तरत्रापि ॥ [११३] आवरणत्वादेवेति । विवक्षितात्मसंबंध्यावरणंप्रक्षीयते । आवरणत्वात् । यदावरणंतत्प्रक्षीयतइतिव्याप्तेरित्यर्थः ॥ [११३] कस्यचिदिति । गिरिदरीवि वरवर्तिनइत्यर्थः । तिमिरादेः प्रतिबंधकस्य । तथाचतत्रव्यभिचारइतिभावः । ननुविवक्षितआत्माप्रक्षीणप्रतिबंधकोभवितु मर्हति । कमनीयकांतास्पर्शादौसत्यप्यनुत्पन्नरागादिमत्त्वादित्यनुमीयतइत्याशंकते ॥ [११३] कमनीयेति ॥ [११४] रागाद्यभावस्ये ति । कमनीयकांतास्पर्शादावपीत्यनुवर्तते ॥ [११४] कल्पकाभावादिति । तथाचासिद्धिरितिभावः। ननुनासिद्धिः । विवक्षित आत्माकमनीयकांतास्पर्शादावपिरागाद्यभाववान्बाह्यविक्रियाशून्यत्वादित्यनुमानेनतत्सिद्धिसंभवादित्याशंकते ॥ [११४] बाह्ये ति ॥ [११५] धैर्येणेति । उत्पन्नस्यापिरागादेर्धैर्येण धारकप्रयत्नेन स्थगनसंभवात् । स्थगनं स्तंभनं । अप्रकटीकरणमितियावत् ।

तत्संभवादित्यर्थः । किमर्थमित्यतउक्तं ॥ [११५] जगदिति । तथाचबाह्यविक्रियाशून्यत्वंउक्तसाध्यंविनाधैर्यप्रयुक्तस्थगनेनान्यथासिद्धमितिनरागाद्यभावसाधकमितिभावः । कश्चिदात्मा सकलपदार्थसाक्षात्कारी । तद्ग्रहणस्वभावत्वेसतिप्रक्षीणप्रतिबंधकत्वादित्यनुमानेविशेषव्याप्तिविवक्षायांदृष्टांतेलोचनविज्ञानेसाध्यवैकल्यंसाधनवैकल्यंचेत्याह ॥ [११५] अन्यत्रदृष्टांतइति । नन्वथापिसामान्यव्याप्तौलोचनविज्ञानंदृष्टांतोभविष्यतीत्याशंकते ॥ [११६] यद्यद्ग्रहणेति । तथापिसाध्यवैकल्यमेवेत्याह ॥ [११६] तथापीति । ननुलोचनविज्ञानशब्देनविज्ञायतेऽनेनेतिव्युत्पत्त्यालोचनरूपंज्ञानकारणमेवविवक्षितं अतस्तस्यसाक्षात्कारित्वंयुक्तमितिनसाध्यवैकल्यमित्यस्वरसादाह ॥ [११७] किंचेति । तथाचकश्चिदात्मा सकलपदार्थसाक्षात्कारीनभवति आत्मत्वादस्मदादिवदितिसत्प्रतिपक्षत्वमितिभावः ॥ ७ ॥ आर्हतनिरासः ॥ ७ ॥ प्रत्यक्षःकस्यचिद्धर्मोवस्तुत्वादितिचोदितइत्यनुव्याख्यानंमनसिनिधायाह ॥ [११८] नन्विति ॥ [११९] कस्यचिदिति । धर्मःकस्यचित्प्रत्यक्षोऽधर्मश्चापरस्येत्यपिप्रतिज्ञार्थोपपत्त्यैकस्यैवधर्मादिविषयकप्रत्यक्षासिद्धिरित्यर्थांतरतेत्यर्थः । तदेवोपपादयति ॥ [१२०] नचेति । नहीत्यर्थः । सर्वस्य घटादेः । तथाचसाध्यवैकल्यमितिभावः ॥ [१२१] एकोघटइति । प्रत्यग्रोत्पन्नविनष्टोघटइत्यर्थः । सएवचममदृष्टांतइतिभावः ॥ [१२२] अथानुमानमिति । अयमधर्मद्रष्टा धर्मद्रष्टृत्वादित्यनुमानमित्यर्थः । असाधकत्वात् । संभावनामात्रस्येतिशेषः ॥ [१२३] योसीति । योधर्मद्रष्टासोधर्मद्रष्टेत्यत्रदृष्टांताभावेनविशेषव्याप्त्यभावादितिभावः । सामान्यव्याप्तिमाशंकते ॥ [१२३] योशक्यमिति । अपरं अन्यदप्यशक्यं । तथाचाशक्यधर्मदर्शनवानशक्याधर्मदर्शनवानपिभविष्यत्येवेतिभावः । वराहेदूरस्थशब्दग्रहणसामर्थ्यं गृध्रेदूरस्थ

रूपग्रहणसामर्थ्यमितिविवेकः । तथाचसामान्यव्याप्तौव्यभिचारइतिभावः । विप्रतिपन्नं धर्माधर्मस्वर्गनरकादिकं । सएव धर्मादिद्रष्टैव । संप्रतिपन्नं घटादिकंजगत् । तथाचनसार्वज्ञसिद्धिरितिभावः । तत् संप्रतिपन्नघटादिदर्शनं ॥ [९।२५] तद्बीजेति । कैमुत्यबीजभूतव्याप्त्यभावादित्यर्थः । बीजंशंकते ॥ [९।२५] योहीति । तथाचाशक्यधर्मादिद्रष्टृत्वेसुशकघटादिजगद्द्रष्टृत्वंप्राप्तमेवेतिभावः ॥ [९।२५] कंटकानिति । तथाचव्यभिचारइतिभावः ॥ [९।२६] प्रकृतोपयोगादिति । धर्मादिज्ञानस्यैवप्रकृतबुद्धसार्वज्ञोपपादकत्वादितिभावः ॥ [९।२६] कीटकेति । तस्यास्मदादिसाधारण्येनसार्वज्ञानुपपादकत्वादित्यर्थः ॥ [९।२६] धर्मादीति । कीटकसंख्यादेरपिसाक्षात्परंपरयावायथाकथंचिद्धर्मादिसाध्यसाधनांतर्गतत्वादितिभावः । तथाचसंप्रतिपन्नघटादिजगज्ज्ञानस्यापेक्षितत्वेनधर्मादिद्रष्टैवतत्पश्यतीत्यत्रप्रमाणाभावात्सार्वज्ञासिद्धिर्नसंभवतीतिज्ञातव्यं । ननूपादानादिसाक्षात्कारसिद्धावपिकथंसर्वविषयकज्ञानसिद्धिरित्यतआह ॥ [१०।१२] सर्वस्यापीति ॥ [१०।१२] घटादीनामित्यादि । तथाचसाध्यवैकल्यमितिभावः । तदेवोपपादयति ॥ [१०।१३] नहीति । पलपरिमाणयोरियत्ताविशेषोमर्यादाविशेषस्तद्वत्त्वं ॥ [१०।१४] कुतःसिद्धिरिति । क्षितिकर्तैकोऽपरोजलस्यकर्तेत्येवंप्रतिज्ञार्थस्योपपत्तेरर्थांतरतेतिभावः ॥ [१०।१५] कल्पनालाघवादिति । क्षित्यादेरेककर्तृकत्वकल्पनेकल्पनालाघवं अनेककर्तृकत्वेकल्पनागौरवं ॥ [१०।१५] अतिबहुतरेति । दृष्टानुसारिणीहिकल्पनाअतिबहुतरप्रासादाद्युपेतगृहादिकार्यजातस्यानेककर्तृतायाएवदृष्टत्वेनप्रकृतक्षित्यादिकार्यजातस्यापितथात्वकल्पनस्यैवोचितत्वेनैककर्तृकत्वस्यासिद्ध्यानतस्यसा

र्वज्ञसिद्धिरितिभावः ॥ **तद्रहितेष्वपीति** । रागादिदोषरहितेष्वित्यर्थः ॥ **बुद्धादिष्विति** । धर्माद्युपदेष्टृतयासर्वज्ञत्वेनत्वदं गीकृतेष्वित्यर्थः । रागादिदोषाभावोपपादनायेश्वरावतारेष्वित्युक्तं । तथाचबाधइतिभावः । किंचरागाद्यभावस्यनविप्रलं भकत्वाभावसाधकत्वं व्यभिचारादित्याह ॥ **वीतरागाणामपीति** ॥ **छलादिनेति** । सद्दूषणेनप्रतिवादिनिराकरणेऽ योग्यानामपिज्ञानप्राप्त्यासज्ज्ञानांकुरसंरक्षणंनस्यादितिभावः ॥ **एवंभूतइति** । सर्वज्ञोऽविप्रलंभकश्चेत्यर्थः ॥ **नानुपदि श्येति** । धर्मादिकमितिशेषः । तथाचधर्माद्युपदेशरूपस्यवाक्यस्यान्यस्याभावात्तदुपदेशरूपंवाक्यमिदमेवेतिधर्माद्युपदेश रूपवाक्यविशेषस्यतत्कृतत्वसिद्धिरित्याशयः ॥ **एवंभूतानामपीति** । स्वीयहिताहितप्राप्तिपरिहारमविदुषोनानाविध व्यसनसागरेनिमग्नान्जंतूनवलोकयतामपीत्यर्थः ॥ **अंगीकृतत्वादिति** । तद्वदस्यापिबुद्धस्योदासीनत्वोपपत्तेरित्याश यः ॥ **आप्तत्वमिति** । सर्वज्ञत्वाविप्रलंभकत्वरूपमित्यर्थः । बुद्धादयोपौरुषेयवाक्यार्थभूतस्यधर्मादेरनुवादकाइत्यत्रसंमति माह ॥ **शौद्धोदनीति** । शुद्धोदनस्यापत्यंपुमान्शौद्धोदनिर्बुद्धस्तत्प्रभृतयइत्यर्थः ॥ **स पक्षइति** । ग्राह्यइतिशेषः ॥ **दुष्टस्येति** । अल्पकल्पनयापिदुष्टस्येत्यर्थः ॥ **गत्यंतरेति** । धर्मादिनिश्चयइतिशेषः । अयं कल्पनागौरवरूपः । परेषां अपौरुषेयवाक्यानंगीकारिणां ॥ **यथेति** । अल्पकल्पनादोषोपियथास्माकंनास्तितथेत्यर्थः ॥ **वक्ष्यतइति** । अपौरुषेयत्वं चेत्यादिनाऽनुपदमेवेत्यर्थः ॥ ७ ॥ **अनायासेनैवेति** । अतएवपूर्ववेदस्यापौरुषेयत्वमित्यादिनाऽऽयासाभावउपपादित इतिद्रष्टव्यं । वेदकर्तुरित्यत्रवेदंकर्तेतिकर्मणिद्वितीयाप्राप्ता तत्रकर्तृशब्दस्तृजंतस्तृन्नंतश्च तत्रतृजंतत्वपक्षेद्वितीयापवादकत्वे

नकर्तृकर्मणोः कृति । कृद्योगेकर्तरिकर्मणिचषष्ठीस्यादित्यनेनकर्मणिवेदस्येतिषष्ठीप्राप्ता । तृजंतत्वे नलोकेतिषष्ठीप्रतिषेधस्या त्राप्रवृत्तेः । कृदतिङितितिङ्वर्जप्रत्ययस्यकृत्त्वोक्तेस्तृचोपितथात्वेनकृत्त्वात्तदंतकर्तृशब्दयोगेप्राप्तायाःषष्ठ्याः षष्ठी । षष्ठीस मर्थेनसुबंतेनसमस्यतइतिसमासेवेदकर्तेतिभवति । अत्रषष्ठ्यास्समासानुपपत्तिमाशंक्यसमाधत्ते ॥ [१०।२२] कर्तरिचेत्यादिना । कर्तरिच । कर्त्रर्थतृजकाभ्यांषष्ठीनसमस्यतइत्यर्थः । अपांस्रष्टा सतामर्चकइत्युदाहरणं । तथाचकर्त्रर्थकतृजंतकर्तृशब्देनवे दस्येतिषष्ठ्यास्समासस्यप्रतिषिद्धत्वाद्वेदस्यकर्तेत्येवस्यान्नवेदकर्तेतिसमासइत्यर्थः ॥ [१०।२३] याजकादिभ्यश्चेति । याजकादिभि ष्षष्ठीसमस्यतइत्यर्थः । द्विजस्ययाजकोद्विजयाजकः । आकृतिगणोयं । एवमाकारकाश्शब्दाएतद्गणस्थाइत्याकृतिगणः । तथाचपुनःप्रसवसामर्थ्याद्वेदकर्तेतिसमासोयुक्तइत्यर्थः । कर्तृशब्दस्यतृन्नंतत्वपक्षमंगीकृत्यापिसमाधत्ते ॥ [१०।२३] द्वितीयांतस्ये ति । तृन्नंतेन कर्तृशब्देन । अयंसमासो वेदकर्तेतिसमासः । ननुनलोकेतिसूत्रेणतृन्नंतशब्दयोगेषष्ठ्याःप्रतिषिद्धतयातत्प्रा प्तेरेवाभावेनतस्याःसमासस्यदूरोत्सारितत्वात्कथमेतदित्यतउक्तं ॥ [१०।२३] द्वितीयांतस्येति । वेदशब्दस्येत्यर्थः । द्वितीयाश्रिते तिसूत्रेणेतिशेषः । द्वितीयायाश्चसमासप्रतिषेधकंकिमप्यत्रनास्तीत्याशयः । ननुतृनोपिकृत्त्वात्तद्योगेकर्मणिप्राप्तद्वितीयापवा दकत्वेनकर्तृकर्मणोरितिषष्ठीप्राप्तौतस्यास्समासोभविष्यतीतिचेन्न । तृनोयोगे नलोकेतिषष्ठीनिषेधेनषष्ठीप्राप्तेरेवाभावात्त स्यास्समासोदूरेनिरस्तएव । एतत्सूचयितुमेवतृन्नंतेनवेत्युक्तमितिज्ञातव्यं । ननुद्वितीयाश्रितेतिसूत्रेणद्वितीयायाःकथंकर्तृश

ब्देनसमासः । द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरितिसूत्रेश्रितादिभिरेवद्वितीयायास्समासोक्तेःकर्तृशब्दस्यतत्रानुपादानादित्यतआह ॥ श्रितादिष्विति । ग्रामगमीग्रामगामीत्यादिप्रयोगसिद्ध्यर्थंगम्यादेरिष्टिरित्युक्तत्वेनगम्यादेश्चाकृतिगणतयातन्मध्येकर्तृशब्दस्यापिपठनीयत्वान्नकोपिदोषइतिभावः । ननुकिमनेननिश्चायकंप्रमाणमुक्तमित्यतोनुमानमेवेत्याह ॥ वेदइति। अप्रयोजकतामाशंकते॥ननुयथेति॥ इत्यतआहेति। इत्यप्रयोजकताशंकायांकल्पनागौरवरूपानुकूलतर्कमाहेत्यर्थः । ननुअप्रयोजकताशंकायत्रक्रियतेतत्रसाध्याभावशंकैवकर्तव्या नतुसाध्याभावकल्पनमित्यतस्तत्प्रकृतोपयोगितयाव्याचष्टे॥कल्पनेशंकायामिति॥गत्यंतरेति। धर्मादिनिश्चायकोपायांतराभावादित्यर्थः।ननुकथंगत्यंतराभावः। अनुमानादिनातन्निश्चयसंभवादित्यतआह ॥ अनुमानादीनामिति। नचानुमानादीनामागमंविनाप्रामाण्यंधर्मादिष्वित्यादिनानिराकरिष्यमाणत्वादित्यर्थः। ननुधर्मादिनिश्चयरूपप्रयोजनसद्भावात्तदनुरोधेनतन्निश्चायकंकिंचित्प्रमाणंकल्प्यतइत्याशंक्यनिराकरोति॥ नचेति।तथात्वेदेवदत्तःपिपासितइत्येतावतामरावपिवारिसिद्धिप्रसंगइतिभावः।अन्यत् प्रमेयं।प्रकृतेचधर्मादिनिश्चायकंप्रमाणंनकिंचिन्निश्चितमस्तीत्याशयः।प्रतियोगिग्राहकप्रमाणाभावेतर्केणप्रतियोगिशंकायाअपिनिरासेतत्प्रतियोगिकाभावःसिध्यतीत्यत्रदृष्टांतमाह॥यथेत्यादिना॥तर्कबलेनेति। सउपाधिर्योग्योवाऽयोग्योवा।योग्यस्यानुपलभ्यमानत्वादयोग्यस्यशंकितुमशक्यत्वादितितर्कबलेनेत्यर्थः।अनुकूलस्तर्कःकल्पनागौरवरूपः।लौकिकवाक्यं कालिदासादिवाक्यंकुमारसंभवादि। पक्ष

हेत्वोरनुक्तेर्न्यूनतेत्यतआह॥वेदस्येति॥[११।१०]समानेपीति।पक्षदृष्टांतयोरितिशेषः॥[११।१३]साध्येति। साध्यधर्मवत्त्वेनसाधयितुंयोग्यंसा ध्यंपक्षइत्यर्थः । एवमुत्तरत्रापिसाध्यशब्देनपक्षोग्राह्यः॥ [११।१२]धर्मविकल्पेनेति । वेदत्वावेदत्वरूपधर्मविकल्पेनेत्यर्थः। एतत् अ प्रयोजकताशंकनं ॥ [११।१२]तथासतीति । एतादृशाप्रयोजकताशंकायाजात्युत्तरत्वइत्यर्थः ॥ [११।१२]कुत्रापीति । धूमानुमानादावपी त्यर्थः । तथाहि । महानस्यापर्वतत्वादस्तुवह्निमत्त्वंअस्यचपर्वतत्वान्मास्त्वित्यप्रयोजकताशंकायांनेयमप्रयोजकताशंका किं नामविकल्पसमाख्यंजात्युत्तरमितिवक्तुंशक्यते । तथाचाप्रयोजकताशंकानिरासायतत्रानुकूलतर्कव्युत्पादनंपरीक्षकैःक्रिय माणंव्यर्थमेवस्यात् । कुतःसद्दूषणत्वेहितत्परिहारायत्नःकर्तव्यः । एतादृशाप्रयोजकत्वशंकनस्यजात्युत्तरत्वेनासद्दूषणतया तत्परिहारासंभवात् । असदुत्तरंजातिरित्युक्तेरितिभावः । नन्वनुकूलतर्कस्यैवविपक्षबाधकतर्कत्वेनद्वयोःकथंपृथगुक्तिः । नचविशेषणविशेष्यभावेनोपपत्तिरितिवाच्यं । चशब्दवैयर्थ्यापत्तेरितिचेदुच्यते । पक्षादिप्रविभागात्पूर्वंव्याप्त्यादिग्रहणद शायामप्रयोजकत्वप्राप्तौतत्परिहारायस्तर्कःप्रवर्ततेसोनुकूलतर्कइत्युच्यते । सचव्याप्तिनिश्चयैकफलकः । पक्षादिप्रविभागो त्तरमप्रयोजकताशंकायांयस्तत्परिहारायतर्कःप्रवर्ततेसविपक्षबाधकस्तर्कइत्युच्यते । सचपक्षेविपक्षजिज्ञासाविच्छेदफलकइति भेदमभिप्रेत्यानुकूलतर्कस्यविपक्षेबाधकस्यचेत्युक्तं । इदंविकल्पसमजातिलक्षणंनचेत्किंतर्हिलक्षणमितिपृच्छति ॥ [११।१३]किंत्वि ति । उत्तरमाह ॥ [११।१३]साध्येवेत्यादि । साध्यवत्तयासाधयितुंयोग्यंसाध्यंपक्षः । तथाचसाधनस्यसाध्ये पक्षे दृष्टांते । पक्ष दृष्टांतयोर्वाधर्मविकल्पात्किंचिद्धर्मेणव्यभिचारदर्शनात्साध्यव्यभिचारप्रतिपादनं तथाकस्यचिद्धर्मस्यकिंचिद्धर्मव्यभिचार

दर्शनात्साधनस्यापिसाध्यव्यभिचारप्रतिपादनंविकल्पसमाजातिरित्यर्थः । तथाहि । साधनस्यधूमवत्त्वस्यपक्षेऽपर्वतत्वव्यभिचारदर्शनात्साध्येनवह्निनापिव्यभिचारोस्त्वितिप्रतिपादनं । तथासाधनस्यधूमस्यदृष्टांतेऽमहानसत्वव्यभिचारदर्शनात्साध्यव्यभिचारप्रतिपादनं तथासाधनस्यधूमस्यपक्षदृष्टांतयोरद्रव्यत्वेनव्यभिचारदर्शनात्साध्येनापिव्यभिचारप्रतिपादनं तथाकस्यचिद्धर्मस्यरूपस्यकिंचिद्धर्मेणरसेनव्यभिचारदर्शनात्साधनस्यापिधूमस्यसाध्यव्यभिचारापादनंविकल्पसमाजातिः। यथाहुः । धर्मस्यैकस्यकेनापिधर्मेणव्यभिचारतः। हेतोःसाध्याभिचारोक्तेर्विकल्पसमजातितेति । नह्येतल्लक्षणंप्रकृतेस्त्यतोनेतद्विकल्पसमाख्यंजात्युत्तरमित्याशयः। प्रश्नस्यासंगतिंपरिहरति॥ यद्भावाभ्याभावाभ्यामिति[११।१४]।यस्यवेदत्वस्यभावेनपक्षेसकर्तृकत्वरूपस्यसाध्यस्याभावोव्यवस्थाप्यते यस्यवेदत्वस्याभावेनसपक्षेलौकिकवाक्येसाध्यस्यसकर्तृकत्वस्यभावोव्यवस्थाप्यते तद्वेदत्वंनामकिमित्यर्थः ॥ बौद्धादीति[११।१५] । बौद्धवाक्यस्यापिवाक्यत्वात्केशोल्लुंठनंधर्मः । सप्तघटिकातःप्राग्भोजनंधर्मइत्यदृष्टविषयवाक्यत्वाच्चतत्रातिव्याप्तिरित्यर्थः ॥ व्यवस्थाप्यमानेति[११।१६] । वेदत्वात्सकर्तृकत्वंमास्त्वितिवेदत्वेनसकर्तृकत्वाभावोव्यवस्थाप्यते । तत्रव्यवस्थापकीभूतंवेदत्वंनामयद्यपौरुषेयत्वंतर्हितदेवव्यवस्थाप्यमानसकर्तृकत्वाभावरूपं तथाचापौरुषेयत्वादपौरुषेयमस्त्वित्युक्तंस्यादित्यर्थः ॥ अकर्तृकत्वप्रसिद्धिमत्त्वंवेदत्वमिति[११।१८] । अकर्तृकत्वप्रसिद्धिमद्वाक्यत्वमित्यर्थः । अन्यथागगनादावतिव्याप्तिस्स्यादित्यवधेयं । अतएवोत्तरत्राकर्तृकत्वप्रसिद्धिमद्वाक्यत्वंवेदत्वमितियद्वेदलक्षणमुक्तमितिवदिष्यतीति । साध्यविकल्पः पक्षसपक्षयोस्साध्याभरवभावरूपः । विप्रलंभादिकमित्यत्रादिपदेनभ्रांतिसंग्रहः । ननुकथमिदं

वेदलक्षणं । केनापिपरीक्षकेणानंगीकृतत्वादस्यलक्षणस्येत्याशंकायांवेदस्यसकर्तृकत्ववादिनोदयनेनाप्यंगीकृतमितिवक्तुमकर्तृकत्वप्रसिद्धिमत्त्वंतावन्निर्वक्ति ॥ [११।१९] अकर्तृकत्वप्रसिद्धमत्त्वंनामेति । नन्वकर्तृकत्वप्रसिद्धिमत्त्वशब्दात्कथमयमर्थोलभ्यतइतिचेदुच्यते । योहियमर्थंप्रत्यक्षादिप्रमाणेनोपलभ्यतत्प्रतिपादकंवाक्यंरचयति विप्रलंभेनवा सतस्यकर्तेत्युच्यते । तादृशकर्तृप्रसिद्धिमत्त्वाभावोह्यकर्तृकत्वप्रसिद्धिमत्त्वं तथाचार्थात्प्रत्यक्षादिप्रमाणमूलकत्वाभावएवोक्तोभवतीतिद्रष्टव्यं ॥ [११।१९] अनुपलभ्यमानमूलत्वेसतीति । महाजनपरिगृहीतेमन्वादिवाक्येतत्प्रत्यक्षादिप्रमाणमूलकेतिव्याप्तिपरिहारायसत्यंतं। विप्रलंभकवाक्येतिव्याप्तिपरिहारायविशेष्यभागइतिद्रष्टव्यं। इत्थमेवपदकृत्यंहृदिनिधायोपपादयति ॥ [११।२०] तत्रेत्यादिना । मूलत्वस्य मूलकत्वस्य । तथाचमन्वादिवाक्यव्यावृत्तिरितिज्ञेयं ॥ [११।२१] विप्रलंभादीति । नहिविप्रलंभादिमूलकंवाक्यंमहाजनपरिगृहीतंभवतीतिभावः । तथाचानुपलभ्यमानमूलत्वेसतिमहाजनपरिगृहीतवाक्यत्वंवेदत्वमित्युक्तेऽर्थात्प्रत्यक्षादिप्रमाणं विप्रलंभादिकंवास्यमूलंनोपलभ्यतइतिप्रसिद्धिविषयत्वमेवप्राप्तमितिद्रष्टव्यं । नन्वनुपलभ्यमानप्रत्यक्षादिप्रमाणमूलकत्वंकथमुदयनेनशक्यतेवक्तुं । ईश्वरस्सर्वज्ञः सचप्रत्यक्षेणार्थमुपलभ्यवेदंरचयतीत्यंगीकारेणप्रमाणभूतेश्वरप्रत्यक्षमूलकत्वांगीकारादित्याशंक्याह ॥ [११।२१] सर्वज्ञज्ञानेति । ईश्वरप्रत्यक्षेत्यर्थः । वदता उदयनेन । तस्य ईश्वरज्ञानरूपप्रत्यक्षस्य ॥ [११।२१] प्रमाणत्वाभावादिति । प्रामाण्यस्यतन्मतेगुणजन्यत्वेनेश्वरज्ञानरूपप्रत्यक्षस्यनित्यत्वेनतत्प्रामाण्यस्यगुणजन्यत्वाभावेनतस्यप्रमाणत्वाभावादित्यर्थः । यथोक्तमुदयनेनगुणकिरणावल्यां । गुणदोषाजन्यतयानित्यत्वादीश्वरीप्रमा । प्रमाप्रमाबहिर्भूता

परतस्त्वात्तयोर्ममेति ॥ [११।२२]**एवंवक्तुमिति** । अनुपलभ्यमानप्रत्यक्षप्रमाणमूलकत्वंवक्तुंशक्यतएवेत्यर्थः ॥ [११।२२]**एतच्चेति** । वेदः सकर्तृकइत्यनुमानमित्यर्थः ॥ [११।२२]**वैशेषिकादीनामिति** । आदिपदेननैय्यायिकसौगतादिग्रहणं ॥ [११।२३]**साध्यविकल्पशंकेति** । पक्षसपक्षयोस्साध्याभावभावशंकाऽस्माभिःपरंप्रतिक्रियमाणोपपद्यतइत्यर्थः ॥ [११।२३]**सौगतादीन्प्रतितिवति** । वेदानांविप्रलंभादिमूलकत्वांगीकारेणप्रत्यक्षादिप्रमाणंविप्रलंभादिकंवास्यमूलंनोपलभ्यतइतिप्रसिद्धिविषयत्वंवेदत्वमितितान्प्रतिवेदत्वंनिर्वक्तुंनशक्यतइत्यर्थः ॥ [११।२४]**तैरंगीक्रियतइति** । विप्रलंभादिनावेदोबुद्धरचितइतिसौगतैरंगीकृतत्वादिदंसकर्तृकत्वानुमानंसौगतैरपिवक्तुंशक्यतएव। अतस्तैःपक्षतावच्छेदकतयावेदत्वंकिंचिन्निर्वक्तव्यमेव। अन्यथापक्षीकरणस्यैवासंभवात्। अतस्सौगतैः पक्षतावच्छेदकतयायद्वेदत्वंनिरुच्यतेतद्भावाभावाभ्यामेवपक्षसपक्षयोस्साध्याभावभावसत्त्वंशक्यं । नतुवैशेषिकादीन्प्रतीव वेदशब्दार्थंनिरुच्यतद्भावाभावाभ्यामित्यर्थः ॥ [११।२४]**अप्रयोजकोन्यथासिद्धोवेत्यादि** । अस्तुवाक्यत्वं सकर्तृकत्वंमास्त्वित्यप्रयोजकता सकर्तृकत्वंविनापिवाक्यत्वमुपपद्यतइत्यन्यथासिद्धिर्वास्यात् विपक्षेबाधकाभावादितिभावः । यथाहुः । यस्यानुकूलस्तर्कोस्तिसएवस्यात्प्रयोजकः । तदभावेन्यथासिद्धिस्तस्यास्सहिनिवारकइति ॥ [११।२४]**व्याप्यत्वासिद्धोवेति** । व्याप्तिग्राहकप्रमाणाभावादितिभावः । यथाहुः। व्याप्यत्वासिद्धोद्विविधः। एकोव्याप्तिग्राहकप्रमाणाभावादपरस्तूपाधिसद्भावादिति । ननुनोक्तानुमानेऽप्रयोजकत्वादि यदिसकर्तृकत्वंनस्यात्तर्हिप्रामाण्यमेवनस्यात् । वाक्यप्रामाण्यस्याप्तोक्तत्वगुणजन्यत्वादित्यनुकूलतर्कसद्भावात् । अतएवोपाधेरपिपक्षएवसाध्यव्यापकताभंगस्सेत्स्यति । अतोनव्याप्यत्वासिद्धिरपीत्याशंक्य

परिहरति ॥ [१।१।२५] सकर्तृकत्वाभावइति । परतंत्रत्वात् पराधीनत्वात् । गुणजन्यत्वेनपरतस्त्वादितियावत् ॥ निराकरि [१।१।२५] ष्यतइति । प्रामाण्यंचस्वतएवेत्यादिनाप्रामाण्यस्यस्वतस्त्वप्रतिपादनेनेत्यर्थः । ननुगूढकर्तृकवाक्यस्यकर्तुरप्रसिद्धत्वेप्यक तृकत्वप्रसिद्ध्यभावात्कथंतस्योक्तलक्षणवेदत्वप्रसंगइत्यतउक्तं ॥ [१।१।२६] कृताकर्तृकत्वप्रसिद्धिकस्यापीति ॥ [१।१।२६] अन्यथेति । वेद त्वानंगीकारइत्यर्थः ॥ [१।२।१३] विच्छेदइति । अध्येतृपरंपराविच्छेदइत्यर्थः ॥ [१।२।१४] संप्रतिपन्नमिति । कुमारसंभवादिकंकालिदासादौ विच्छिन्नपरंपरात्वात्तत्प्रत्यक्षादिमूलकमित्यर्थः ॥ उक्तंवेद[१।२।१४]लक्षणमिति । अनुपलभ्यमानप्रत्यक्षादिमूलकत्वरूपाकर्तृकत्वप्र सिद्धिमत्त्वरूपमुक्तंवेदलक्षणमित्यर्थः । शंकते ॥ [१।२।१५] नाध्येत्रिति । मूलंयोजयति ॥ [१।२।१६] ततश्चेत्यादिना । दृष्टस्य वाक्यस्य ॥ [१।२।१६] अन्यथेति । तस्यापिवेदलक्षणमंगीकृत्यवेदत्वांगीकारेभवन्मतेऽनैकांत्यप्रसंगात् । वैशेषिकादिभिर्वसिष्ठादीनांस्वयंप्रतिभा तवेदत्वानंगीकारात् । अतएवपूर्वंभवदंगीकारादित्युक्तं । तथाचतत्रविच्छिन्नपरंपरत्वेसत्यप्यनुपलभ्यमानप्रत्यक्षादिमूलक त्वादिरूपवेदलक्षणमंगीकृत्यवेदत्वांगीकारेणसाध्याभावादितिभावः । प्रतिपत्तिः प्रतीतिःगूढकर्तृकस्य वाक्यस्य ॥ [१।२।१०] अतइ ति । परंपरासिद्धवेदवाक्यांतरवत्प्राक्तनमेवैतदितिप्रतीतिविषयत्वेनानुपलभ्यमानप्रत्यक्षादिमूलत्वरूपवेदलक्षणसद्भावादि त्यर्थः ॥ [१।२।११] नापीति । परंपरानामेत्यादिनानिरुक्तपरंपराभावरूपहेतोरेवाभावादितिभावः ॥ [१।२।१२] तथेति । पूर्वतनमेवेदमधीम हइत्यादिरूपेणसत्यमेववदंतीतिकुतोनिश्चयइतिसंबंधः । तथाचसंदिग्धानैकांतिकमनेनोपपादितंभवतीतिद्रष्टव्यं । संदिग्धा सिद्धिमुपपादयति ॥ [१।२।१३] अयंत्विति । अद्रष्टैव पूर्वतनमेवेत्यादिप्रतिपत्तिशून्यएव ॥ [१।२।१४] तद्वत्त्वादिति । आगमोक्तवेदद्रष्टृ

गुणवत्त्वादित्यर्थः ॥ निश्चेतुंशक्यतइति । तथाचनसंदिग्धानैकांत्यमितिभावः । चशब्दसमुच्चेयमाह ॥ इतरस्येत्यिति । गूढकर्तुरित्यर्थः । तदभावात् । आगमोक्तवेदद्रष्टृत्वगुणवत्त्वाभावादित्यर्थः ॥ निश्चीयतइति । तथाचनसंदिग्धासिद्धिरितिभावः । ननूक्तपदस्यवेदद्रष्टृपदेनसापेक्षत्वात्कथंगुणपदेनसमासः । समर्थःपदविधिरितिसमर्थस्यसुबंतस्यसमर्थेनसुबंतेनसमासोक्तेस्सापेक्षमसमर्थवद्भवतीतिवचनात् । यद्यत्पदेनसापेक्षंतेनैवतस्यसमासोभवितुंयुक्तः । अन्येनसमासेतदसमर्थमेवातोवेदद्रष्टृक्तगुणवत्त्वादितिवक्तव्यं । नतुवेदद्रष्टृणामुक्तगुणवत्त्वादिततत्राह ॥ उक्तशब्दस्येति ॥ नित्यसापेक्षत्वादिति । उत्थिताकांक्षावत्त्वादित्यर्थः । सापेक्षमसमर्थवद्भवतीत्ययंनियमोऽनित्यसापेक्षविषयः । उत्थाप्याकांक्षास्थलविषयइतियावत् । अस्यतुनित्यसापेक्षत्वात् उत्थिताकांक्षावत्त्वादितियावत् । अन्यपदेनसमासेपिपूर्वपदेनाकांक्षानविहन्यते । देवदत्तस्यगुरुकुलमितिवदित्यर्थः । अतएवास्वरसादाह ॥ अर्थेचेति । ननुवेदद्रष्टृणांतेषामित्यन्वये उक्तगुणवत्त्वादित्यनेनआगमोक्तयत्किंचिल्लक्षणवत्त्वमेवलभ्यते नतुवेदद्रष्टृलक्षणवत्त्वमतोसंगतमेतदित्यतआह ॥ गुणशब्देनेति । तथाचवेदद्रष्टृणांतेषामुक्तगुणवत्त्वात् आगमोक्तवेदद्रष्टृलक्षणवत्त्वादित्यर्थोद्रष्टव्यः । नन्वेवमाकांक्षायामुक्ताश्चब्रह्मांडइतिवक्तव्यं उक्तंचेतिकथमुक्तमित्यतआह ॥ एवंलक्षणकाइति ॥ इत्येतदिति । प्रमेयमित्यर्थः । ननुपङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतमितिसूत्रेविंशतीतिनिपातनात् । विंशदितिकथमुक्तमित्यतआह ॥ विंशतिशब्दपर्यायइति । पश्येदित्यनंतरंसवेदइतिशेषः। नन्वत्रपुँल्लिंगप्रयोगात्पुरुषाणामेववेदद्रष्टृत्वंप्रतीयते । नतुस्त्रीणां । तथात्वेशच्या

दीनामपिसपत्नींमेपराधमपतिंमेकेवलंकुर्वित्यादिवेददर्शनसद्भावेनतद्विरोधापत्तेरित्यतआह ॥ [१२।१९]अन्त्रेलिंगमिति । अनू
नस्तपस्वीत्यादिपुँल्लिंगमित्यर्थः । नन्वत्रैवंविधलक्षणवतापुरुषेणदृष्टवाक्यस्यवेदत्वमेवविधीयते नत्वेवंलक्षणकावेदस्य
द्रष्टारइति अतःकथंप्रकृतोपयोगइत्यतआह ॥ [१२।१९]अर्थादिति । अत्र वाक्ये । एतादृशलक्षणविशिष्टपुरुषदृष्टवाक्य
स्यवेदत्वविधानेपितद्द्रष्टारएतादृशलक्षणकाइत्यर्थतःप्राप्तमेवेतिप्रकृतोपयोगइतिभावः । नन्वत्रविंशल्लक्षणतोनूनलक्षण
वानितिवसिष्ठादिवेदद्रष्टॄणांविंशल्लक्षणवत्त्वमुक्तं । तत्सिद्धांतविरुद्धं । तथाहिबृहद्भाष्ये । ब्रह्मणोद्वात्रिंशल्लक्षणोपेतत्व
मुक्त्वातत्त्वाभिमानिदेवाःकियल्लक्षणवंतइतिशंकायां षोडशादासुराःस्मृताइत्युक्तं । षोडशात्आ षोडशलक्षणपर्यंतं ।
यत्रषोडशलक्षणानि वर्ततेतेसुराःप्रतिपत्तव्या इत्युक्तं । अतोविंशल्लक्षणवत्त्वंदेवानामप्यसंभावितंकथंवेदद्रष्टॄणांवसिष्ठा
दीनामुच्यतइतिचेत् । अत्राहुः । षोडशलक्षणंद्वात्रिंशल्लक्षणांतर्गतमित्यभिप्रेत्यबृहद्भाष्यंप्रवृत्तं । विंशल्लक्षणतइति
वाक्यंतुतदितरवेदद्रष्टृलक्षणापेक्षयाप्रवृत्तं । वेदद्रष्टृलक्षणान्यपिद्वात्रिंशत्संख्याकान्येवसंतीत्यविरोधइति ॥ [१२॥२१]तदभाव
स्येति । वाक्यत्वाददृष्टविषयवाक्यत्वाभावयोर्बौद्धादिवाक्ये स्वदृष्टविषयकप्रमाणवाक्यत्वाभावस्यमन्वादिवाक्येषु
साध्याव्यापकत्वादित्यर्थः ॥ [१२।२२]तदभावस्यैवेति । अपौरुषेयत्वंवेदत्वं । तदभावःपौरुषेयत्वं । तदेवचसकर्तृकत्वरूपं
साध्यं । अतोनस्वस्मिन्स्वयमुपाधिरित्यर्थः । ननुवैदिकशब्दलक्षणानिकानि यदुपेतत्वंभारतपंचरात्रादिषुतिष्ठतीत्यत
आह ॥ [१२।२२]यथोक्तमिति । नन्वध्ययननियमविशेषवत्त्वमेववेदत्वमस्त्वित्यतआह ॥ [१२।२३]अध्ययननियमविशेषाद्

ति । सामगोवद्रुमुंडीअधीयीत अन्यगःशिखीत्यादयइत्यर्थः ॥ [१२।२४] नोपसंगृहीतुमिति । अवच्छेदकधर्मेणक्रोडीकर्तुमित्यर्थः । तथाचवेदस्सकर्तृकोनभवति अध्ययननियमविशेषवत्त्वादितिप्रतिपक्षपर्यवसानेहेतोर्भागासिद्धिस्स्यादितिभावः ॥ [१२।२४] नियमसामान्यमिति । प्राङ्मुखत्वादिरूपनियमसामान्यवत्त्वंवेदत्वमित्यर्थः ॥ [१२।२४] भारतादाविति । उत्पत्त्यनंतरंविनाशशून्येभारतेपिनियतक्रमस्यसद्भावादित्यर्थः ॥ [१२।२५] क्रमव्यत्यासइति । यथाक्रमव्यत्यासेऽयंवेदएवनभवतीत्युच्यते तथास्मिन्कल्पेभारतेपिदैवात्क्रमव्यत्यासेभारतमेवनभवतीत्युच्यतेमहद्भिरित्यर्थः ॥ [१२।२६] तद्भावादिति । इतिहासपुराणःपंचमोवेदानांवेदइतिश्रुतेरितिभावः ॥ [१२।२६] मुख्यतइति । इतिहासपुराणादौनमुख्यतोवेदव्यवहारविषयत्वं तत्रतद्व्यवहारस्यामुख्यत्वादितिभावः ॥ [१२।२६] तदभावस्यपक्षेतरत्वादिति । वेदःसकर्तृकइत्यनुमानेमुख्यतोवेदव्यवहारगोचरत्वस्यैवपक्षतावच्छेदकत्वात्तदभावस्यपर्वतत्वाभाववत्पक्षेतरत्वपर्यवसन्नत्वादित्यर्थः । तथाचसर्वानुमानोच्छेदस्स्यादितिभावः ॥ [१२।२६] असाधारणत्वादिति । वेदःसकर्तृकोनभवति वेदत्वादितिसत्प्रतिपक्षोन्नयनेगगनादावसाधारण्यमित्यर्थः ॥ [१३।१] इत्युक्तमिति । नन्वकर्तृकत्वप्रसिद्धिराहित्योपाधेरपिप्रतिपक्षेपर्यवसानेऽसाधारण्याभावेपिपक्षेतरत्वमत्रापिसमानमेवेतिचेन्न । इष्टापत्तेः । अनुकूलतर्कसद्भावदशायामेवहिपक्षेतरत्वस्यनोपाधित्वं पक्षएवसाध्यव्यापकताभंगात् । अनुकूलेनतर्केणेत्याद्युक्तेः । अनुकूलतर्काभावेतुतस्योपाधित्वमिष्टमेव पक्षेसाध्यव्यापकताभंगाभावात् । यथाहुः । तदभावेतस्येष्टत्वादिति । प्रकृतेचवाक्यत्वानुमानेऽनुकूलतर्काभावात्पक्षेतरत्वभूतस्याप्यकर्तृकत्वप्रसिद्धिराहित्यस्योपाधित्वंयुक्तमेव । नन्वत्रापिसकर्तृकत्वाभावेवाक्यत्वंनस्यात् । वाक्यत्वा

पौरुषेयत्वयोरेकत्रसमावेशस्यघटत्वनीरूपत्वयोरिवविरुद्धत्वात् सकर्तृकत्वाभावेप्रामाण्यंनस्यात् । तस्याप्तोक्तत्वगुणजन्यत्वादितिवानुकूलतर्कोस्तीतिचेन्न । उक्तंमाविस्मार्षीः । यतोवाक्यत्वापौरुषेयत्वयोरेकत्रसमावेशःपूर्वंसमर्थितइत्याद्यस्तर्कोनयुक्तः । प्रामाण्यस्यस्वतस्त्वसमर्थनेनद्वितीयस्तर्कोप्ययुक्तइत्यालोचनीयं । एतेनेत्युक्तंविशदयति ॥ [१३१५] अकर्तृकत्वप्रसिद्धिमत्त्वस्येति ॥ [१३१६] मूलतयेति । अनुपलभ्यमानप्रत्यक्षादिमूलतारूपत्वेनेत्यर्थः । नन्वनुपलभ्यमानप्रत्यक्षादिप्रमाणमूलत्वरूपाकर्तृकत्वप्रसिद्धिमत्त्वरूपोपाध्यभावस्येश्वरप्रत्यक्षप्रमाणमूलतांगीकारेणसकर्तृकत्वनिरासात्प्रागसिद्धतयापुनस्साधनव्यापकतैवेत्यतआह ॥ [१३१६] तस्याश्चेति । अनुपलभ्यमानप्रत्यक्षादिप्रमाणमूलतायाइत्यर्थः । ईश्वरप्रत्यक्षमूलकत्वांगीकारेपितस्यनित्यतयाप्रमाणत्वाभावादनुपलभ्यमानप्रमाणमूलकत्वमक्षतमेवेत्याशयः ॥ [१३१७] पूर्वोक्तेति । अन्यत्रादृष्टस्येत्यादिनोक्तेत्यर्थः ॥ [१३१८] वक्ष्यमाणेति । वाचाविरूपनित्ययेत्यादिनावक्ष्यमाणेत्यर्थः ॥ [१३१९] प्रामाण्यनिश्चयइति । आप्तोक्तत्वरूपगुणलाभादितिभावः ॥ [१३११०] सार्वज्ञनिश्चयइति । प्रमाणभूतेनयस्सर्वज्ञइत्यादिनावेदेनसार्वज्ञनिश्चयइ त्यर्थः ॥ [१३११०] ततश्चेति । अन्यथासर्वज्ञत्वरूपविशेषणस्याप्रसिद्धत्वेनानुमानस्यैवाप्रवृत्तेरितिभावः । ननुप्रामाण्यनिश्चयेसतिप्रमा णभूतेनवेदेनसार्वज्ञनिश्चयइतिनांगीक्रियते येनोक्तरीत्याचक्रकप्रसंगः । किंनामक्षित्यादिकंसकर्तृकंकार्यत्वादित्याद्यनुमाने नसार्वज्ञसिद्धिर्भविष्यतीत्याशंक्यनिराकरोति ॥ [१३११०] प्रकारांतरेणेति । नन्वथापिवेदस्याप्रमितकर्तृकत्वमसिद्धं । अग्नेर्वावऋग्वेदोवायोर्यजुर्वेद आदित्यात्सामवेदः ऋचःसामानिजज्ञिरइत्यादिप्रमाणांतरैर्वेदकर्तुःप्रमितत्वादित्याशंक्यनिराकरोति ॥ [१३१११] प्रमाणांतराणित्वि

त्ति । तदुत्पत्तिवचश्चैवभवेद्व्यक्तिमपेक्ष्यतु । वेदानांसृष्टिवाक्यानिभवेयुर्व्यक्त्यपेक्षया । अवांतराभिमानानांदेवानांवाव्यपे क्षयेत्यादिनोत्पत्तिवाक्यानामर्थांतरोक्त्यानिरसिष्यंतइत्यर्थः ॥ ७ ॥ इत्यपौरुषेयत्ववादः ॥ ७ ॥ **संवादश्चसजाती येनविजातीयेनवेति** । साक्षात्स्वविषयविषयकमानांतरसंवादोहिसजातीयसंवादः । स्वशब्देनेदंजलमितिज्ञानंतद्विषयो जलं तद्विषयकंयन्मानांतरंइदंजलमितिज्ञानांतरंतत्संवादस्सजातीयसंवादः । स्वनिष्ठप्रामाण्यव्यवस्थापनद्वारास्वविषयविष यकमानांतरसंवादोविजातीयसंवादः । स्वशब्देनेदंजलमितिज्ञानं तन्निष्ठंयत्प्रामाण्यंयथावस्थितार्थज्ञेयविषयीकारित्वरूपं तद्व्यवस्थापनद्वाराइदंजलमितिज्ञानविषयभूतंजलविषयकंयन्मानांतरं इदंजलमितिज्ञानंप्रमाणंसमर्थप्रवृत्तिजनकत्वादित्यनु मानरूपं तत्संवादोहिविजातीयसंवादः । इदमनुमानंयथावस्थितार्थज्ञेयविषयीकारित्वरूपप्रामाण्यविषयीकरणद्वाराजलस त्तावगाहि । उक्तरूपप्रामाण्यस्यार्थसत्ताघटितत्वादितिद्रष्टव्यं ॥ **तद्विषयस्येति** । वेदप्रतिपाद्यस्येश्वरादेरित्यर्थः ॥ **अर्थ क्रियासामर्थ्येति** । समर्थप्रवृत्तिजनकत्वमित्यर्थः ॥ **मोक्षादेरिति** । मोक्षस्वर्गादिरूपार्थक्रियायाइत्यर्थः ॥ **प्रमाणज न्यत्वेनैवेति** । वेदप्रामाण्यस्याप्तोक्तत्वेनैवानुमेयत्वाद्वेदस्याकर्तृकत्वआप्तोक्तत्वगुणाभावेनतत्प्रामाण्यासिद्धौप्रमाणजन्य त्वाभावेनवेदजन्यज्ञानप्रामाण्यमपिनसिध्येत् । नचान्यतएवतत्सिद्धिरितिवाच्यं । प्रमाणजन्यत्वेनैवतस्यानुमेयतयातदति रिक्तोपायांतराभावादित्यर्थः । अतएवसिद्धांतेज्ञानग्राहकग्राह्यत्वोक्त्योपायांतरंवक्ष्यतइतिद्रष्टव्यं । भावबोधेतु । ननुवेद स्याप्तोक्तत्वाभावेपियथार्थज्ञानजनकत्वलक्षणंप्रामाण्यं [illegible]

द्धिस्तत्सकर्तृकत्वमाक्षिपतीत्यतआह ॥ प्रमाणजन्यत्वमेवेति । स्यादेतदेव । यदिवेदजन्यज्ञानप्रामाण्यस्यप्रमाणभूतवे
दजन्यत्वंविनाऽन्यतस्सिद्धिस्स्यात् । नचैवंप्रमाणभूतवेदजन्यत्वेनैवतत्सिद्धेः । तथाचतदन्वयव्यतिरेकाभ्यांवेदप्रामाण्या
नुमानेऽन्योन्याश्रयस्स्यादित्यर्थइतिव्याख्यातं ॥ ७ ॥ [१३।१५] तद्वचनादिति । ईश्वरवचनत्वादित्यर्थः । तेनेश्वरेणप्रणयनादि
तिवा ॥ [१३।१६] तत्प्रामाण्यमिति । आप्तस्येश्वरस्यप्रामाण्यात् प्रमाश्रयतयाप्रमाणभूतेनाप्तेनोक्तत्वादितियावत् । तस्यवेदस्य
प्रामाण्यंसिद्धमित्यर्थः ॥ [१३।१७] अतएवेति । सकर्तृकत्वानुमानेऽप्रयोजकत्वाभावादेवेत्यर्थः ॥ [१३।१७] प्रतिकूलतर्केति । सकर्तृकत्वा
नुमानेऽप्रयोजकत्वशंकापरिहारकबाधकतर्कस्यैवाकर्तृकत्वानुमानेप्रतिकूलतर्कत्वादित्यर्थः ॥ [१३।१७] उपाधेरपीति । अनुकूलतर्के
णपक्षीभूतेवेदेसकर्तृकत्वस्यैवसिद्धत्वेनाकर्तृकत्वप्रसिद्ध्यभावरूपोपाधेःपक्षएवव्यभिचारात्साध्यव्यापकताभंगस्सिध्यतीत्य
र्थः । नन्वनुकूलतर्कसिद्धसकर्तृकत्वोपेतेपक्षीभूतेवेदेकथमेतदुपाध्यभावसिद्धिः । अकर्तृकत्वप्रसिद्ध्यभावाभावेऽकर्तृकत्वप्र
सिद्धिमत्त्वस्यैवप्राह्याविरोधादितिचेन्न । अकर्तृकत्वप्रसिद्धिमत्त्वस्यानुपलभ्यमानप्रत्यक्षादिप्रमाणमूलकत्वरूपत्वेनव्या
ख्यातत्वात् । अस्यचसकर्तृकत्वेप्युपपत्तेः । ईश्वरप्रत्यक्षस्यप्रमाणत्वाभावादित्यवगंतव्यं । मानसंमनः ॥ [१३।२१] तच्चेति । ज्ञान
स्यसाक्षिवेद्यत्वमित्यर्थः ॥ [१३।२१] अन्वयेति । सतिनिर्दुष्टेंद्रियादौयथार्थज्ञानमुत्पद्यते अन्यथातुनेत्यन्वयव्यतिरेकगम्यमित्यर्थः॥
[१३।२२] कुत्रापीति । ज्ञाने करणेवेत्यर्थः । वक्ष्यमाणानुमानेविशेष्यासिद्धिंपरिहरति ॥ [१३।२३] प्रामाण्यमिति ॥ [१३।२३] तदभावेति । वस्तु
सिद्धेर्ज्ञानाधीनत्वादितिभावः । वक्ष्यमाणप्रयोगेविशेषणासिद्धिंपरिहरति ॥ [१३।२३] नचेति । अतिरिक्तेन अनुमानादिना न

नुकियद्दूरंगत्वाततत्प्रामाण्यस्यस्वतस्त्वमंगीक्रियतइतिनानवस्थेत्यतआह ॥ [१३।२४]तस्येति। अनुपपद्यमानग्रहणं सत् ॥ [१४।१२]ज्ञानस्यै
वेति। त्रिपुटीप्रत्यक्षवादिनःप्राभाकरस्यमतेआत्मांशःस्वात्मांशोवेद्यांशश्चेत्यंशत्रयंज्ञानेप्रतीयते इदमहंजानामीतिहितन्म
तेज्ञानाकारः। तथाचज्ञानस्यैवस्वप्रकाशत्वमंगीकृत्यतथाभावस्यात्मगोचरत्वंस्वप्रामाण्यगोचरत्वंचकस्मान्नाभ्युपगम्यते
किंसाक्षिणस्तदभ्युपगमेनेत्यर्थः ॥ [१४।१३]जडत्वेनेति। एतावंतंकालंसुखमहमस्वाप्समित्यौत्तरिकानुस्मृतिसिद्धात्मादिविषयक
सौषुप्तिकानुभवस्तावदस्ति सचनतावन्मनआदींद्रियैर्भवितुंयुक्तः। तेषामुपरतत्वात्। तस्मात्साक्षिरूपएवेति साक्षिरूपचैतन्यज्ञानस्यस्वप्रकाशत्वसाधिकायुक्तिरस्ति। सेयंयुक्तिरंतःकरणवृत्तिरूपेजडेज्ञानेनप्रवर्ततइत्यर्थः। अप्रकाशस्वरूपत्वाज्जडेज्ञा
नंनमन्यतइत्युक्तेः। एतद्युक्त्यभावसूचनार्थमेवजडत्वेनेत्युक्तमितिज्ञातव्यं ॥ [१४।१३]सांशयिकत्वादिति। स्वतस्त्वेज्ञानग्राहके
णैवप्रामाण्यस्यापिगृहीतत्वात्संशयोनस्यादतस्तदन्यथानुपपत्त्यापरतस्त्वमित्याशयः। अभ्यासदशापन्नज्ञानप्रामाण्येसांश
यिकत्वाभावेनासिद्धिवारणार्थंअनभ्यासदशायामित्युक्तं। व्यभिचारवारकविशेषणवदसिद्धिवारकविशेषणस्याप्यसिद्धिप
रिहारद्वाराव्याप्तिग्रहोपयुक्तत्वस्य चक्षुस्तैजसंरूपादिषुपंचसुमध्येरूपस्यैवाभिव्यंजकत्वादित्यत्रदर्शनाददोषः। तत्रहिरूपत्व
स्यापिव्यंजकत्वेनासिद्धिपरिहारायरूपादिषुपंचसुमध्यइत्युक्तमस्तीतिद्रष्टव्यं। यद्वापक्षविशेषणमेतत्। अनभ्यासदशापन्न
ज्ञानप्रामाण्यंपक्षइतिभावः। दृष्टांतेसाध्यमुपपादयति ॥ [१४।१४]अप्रामाण्यमिति ॥ [१४।१४]अनवस्थेति। प्रामाण्यस्यानुमेयत्वे प्रा
माण्यानुमितिप्रामाण्यमपिपुनरनुमित्यंतरेणग्राह्यं। एवंतत्प्रामाण्यमपीत्येवंफलमुखी एवंप्रामाण्यस्यानुमेयत्वेलिंगव्याप्त्यादि

ज्ञानप्रामाण्यनिश्चयार्थंलिंगांतरं । तज्ज्ञानप्रामाण्यनिश्चयश्चस्वीकार्यः । एवंतत्रतत्रापीतिकारणमुखीत्यनवस्थाद्वयलक्षणप्रतितर्कपराहतमित्यर्थः । ततएव निर्दोषवेदजन्यत्वादेव विषयेणेत्याद्युक्त्यालक्षणाबीजभूतशक्यार्थसंबंधोदर्शितः ॥ [१४।७] ज्ञानस्येति । प्रामाण्यज्ञप्तेरित्यर्थः ॥ [१४।९] कारणांतरोपनिपातजेनेति । अनृतव्याघातादिदोषदर्शनरूपकारणांतरसन्निपातजन्येनेत्यर्थः । मानसापराधोऽप्रामाण्यशंकारूपः ॥ [१४।१३] प्रामाण्यज्ञानार्थमिति । प्रामाण्यज्ञापनार्थमित्यर्थः । नन्वेवंप्रामाण्यस्यस्वतस्त्वहानिः । अप्रामाण्यशंकादशायांसाक्षीज्ञानमात्रंगृहीत्वाप्रामाण्यग्रहणस्यनेष्टइत्युक्तत्वेनज्ञानग्राहकग्राह्यत्वालाभादितिचेन्न । अप्रामाण्यग्राहकसामग्र्यसमवहितज्ञानग्राहकसामग्रीग्राह्यत्वस्यविवक्षितत्वाददोषः । स्वतो ज्ञानग्राहकेणैव ॥ [१४।१४] संशयइति । ज्ञानइतिशेषः ॥ [१४।१४] ज्ञानत्वेति । ज्ञानरूपेधर्मिणिगृहीतेसतिज्ञानत्वेसंशयोनभवति । जातिभानसामग्र्याःव्यक्तिभानसामग्रीनियतत्वादितिभावः ॥ [१४।१४] निश्चितइति । प्रामाण्येनिश्चितइत्यर्थ । तदनवकाशात् संशयानवकाशात् । एककोटेर्निश्चितत्वादितिभावः । ननुज्ञानत्वादिसाधारणधर्मदर्शनादेवसंशयोभविष्यतीत्यतआह ॥ [१४।१४] नहीति । लोकेसाधारणधर्मदर्शनादेवनसंशयः । किंतुसाधकबाधकप्रमाणाभावसहकृतादेव । स्थाणुत्वनिश्चायकप्रमाणाभावेस्थाणुत्वानंगीकारेपुरुषत्वांगीकारइतियावत् । बाधकप्रमाणाभावेचसत्येवतत्सहकृतोर्ध्वत्वरूपसाधारणधर्मदर्शनादेवदृष्टः । नतुसाधकप्रमाणाभावंबाधकप्रमाणाभावंचावधूय निराकृत्य विनेतियावत् । ऊर्ध्वत्वरूपसाधारणधर्मदर्शनादेवनदृष्टइत्यर्थः । समानधर्मदर्शनमात्रादेवकुतोनसंशयइत्यतआह ॥ [१४।१५] तथासतीति । साधारणधर्मस्यसर्वत्रसत्त्वेनसर्वत्रसंशयस्स्यात् । तथा

साधारणधर्मस्यविशेषदर्शनेनाप्यनिवृत्त्यासंशयोच्छेदएवनस्यादित्यर्थः। इदमत्राकूतं। अत्रप्रष्टव्यं ज्ञानंगृहीतंनवेति। नेति
पक्षेधर्मिज्ञानाभावादेवनसंशयः । यदिगृहीतं तर्हितत्रप्रामाण्यंनिश्चितंनवा नेतिपक्षेस्वतस्त्वभंगः । निश्चितंचेत्संदेहएवन
युज्यते । एककोटेर्निश्चितत्वात् संयुक्तसमवायसन्निकर्षरूपजातिभानसामग्र्याव्यक्तिभानसामग्रीनियतत्वात् । ज्ञानरूपध
र्मिप्रतीतौज्ञानत्वस्यापिनिश्चितत्वेनतत्रयथानसंदेहस्तद्वत् । भवतिचायंसंशयोतस्तदन्यथानुपपत्त्याज्ञानंगृहीतंतत्रप्रामाण्यं
नगृहीतमतःसंशयोयुक्तइत्येवंपरतस्त्वेसांशयिक(त्वयुक्तिरिति)त्वंयुक्तमितिज्ञातव्यं । ननुइदंजलमितिज्ञानप्रामाण्येस्वारसि
कसंशयाभावेप्याहितसंशयोभवत्येव । तथाहि । यत्प्रमाणभूतमयंघटइतिज्ञानंतत्रापीदंज्ञानंप्रमाणमितिप्रामाण्यप्रत्ययोभ
वति । यदप्रमाणभूतमिदंरजतमितिज्ञानं तत्रापीदंज्ञानंप्रमाणमितिप्रामाण्यप्रत्ययोभवति । अतएवाहुः । अप्रमापिप्रमेत्येव
गृह्यतइति । अन्यथातज्ज्ञानात्प्रवृत्तिरेवनस्यात् । इयांस्तुविशेषः । अत्रप्रामाण्यज्ञानंभ्रमरूपं तत्रप्रमारूपमिति । यथाकथं
चित्प्रामाण्यज्ञानंतुभवति इदंचप्रामाण्यज्ञानंतस्मात्प्रमाणमप्रमाणंवेत्येवंजलज्ञाननिष्ठप्रामाण्यज्ञानेप्रामाण्याप्रामाण्यसंदेहा
हितोर्थेजलज्ञानप्रामाण्येपिसंदेहोभविष्यतीत्याशंकते ॥ [१४।१५]अथेति ॥ [१४।१५]प्रमाणवदिति । अयंघटइत्यादिप्रमाणभूतज्ञानइ
वेत्यर्थः ॥ [१४।१५]अप्रमाणेपीति । अप्रमाणभूतेइदंरजतमित्यादिज्ञानेपीत्यर्थः ॥ [१४।१५]तत्प्रत्ययदर्शनादिति । प्रामाण्यप्रत्ययद
र्शनादित्यर्थः । अन्यथाप्रवृत्तिरेवनस्यादितिभावः ॥ [१४।१५]विशेषादर्शनादिति । एककोटिनिश्चायकतद्व्याप्यधर्मादर्शनादि
त्यर्थः ॥ [१४।१५]भवतिशंकेति । जलज्ञानप्रामाण्येप्याहितशंकाभवतीत्यर्थः । भवन्मतेप्रामाण्यज्ञानगतप्रामाण्यस्यापिस्वत

स्त्वेनाधायकसंशयएवादौनोपपद्यते यदाहितस्संशयस्स्यात् । तथाहि । अत्रापिपृच्छामःजलज्ञाननिष्ठप्रामाण्यज्ञानरूपं ध
र्मिज्ञानमस्तिवानवेति । नेतिपक्षेधर्मिज्ञानाभावादेवनसंशयः । आद्येतत्रप्रामाण्यंप्रतीतंनवा । आद्येएककोटेर्निश्चितत्वान्न
संशयः । द्वितीयेस्वतस्त्वहानिरित्येवमाधायकस्संशयोनोपपद्यतइत्याह ॥ तत्किमित्यादिना [१४।१६] । जलज्ञाननिष्ठप्रामाण्य
ज्ञानेपिप्रामाण्यसंदेहमंगीकुर्वतस्तवमतइत्यर्थः ॥ प्रामाण्यज्ञानोपलंभेपीति [१४।१६] । इदंजलमितिज्ञाननिष्ठंयत्प्रामाण्यंतज्ज्ञा
नरूपधर्म्युपलंभेपीत्यर्थः ॥ नतत्प्रामाण्यमिति [१४।१६] । प्रामाण्यज्ञाननिष्ठंप्रामाण्यंनोपलब्धमतःसंशयोभवतीत्यर्थः । यद्युपल
ब्धंस्यात्तर्ह्येककोटेर्निश्चितत्वात्संदेहोनभवतीतिभावः ॥ प्रमाणज्ञानमेवेति [१४।१६] । धर्मिभूतंप्रामाण्यज्ञानमेवेत्यर्थः । कुतइत्य
तोज्ञानग्राहकग्राह्यत्वाभावादित्याह ॥ प्रत्ययेति [१४।१६] । प्रामाण्यज्ञानरूपधर्मिणःसाक्षिणाप्रतीतावपीत्यर्थः । तदप्रतीतेः प्रामा
ण्याप्रतीतेः । तत्र प्रामाण्यज्ञाने । अनुपलब्धेरित्येतदप्येतेनैवनिरस्तमित्यन्वयः । एतेनेत्युक्तंविशदयति ॥ धर्म्युपलब्धा [१४।१७]
वपीति । साक्षिणिप्रतिबद्धेसति । प्रामाण्यविषयेसंशयाद्युपपत्तेः । प्रामाण्यविषयसंशयादेर्मनस्युपपत्तेरित्यर्थः । तथाच
प्रामाण्यज्ञानरूपंधर्मि साक्षिणाप्रतीतं प्रामाण्यंचनप्रतीतं नचस्वतस्त्वहानिः । असतिप्रतिबंधेसाक्षिवेद्यत्वनियमोवा सा
क्षिवेद्यत्वयोग्यतावा स्वतस्त्वमित्यंगीकारात् । प्रकृतेचप्रामाण्यज्ञानरूपंधर्मिणंगृह्णतासाक्षिणाऽनृतव्याघातादिदर्शनेनश
क्तिप्रतिबंधात्प्रामाण्याग्रहेप्यस्मदुक्तस्वतस्त्वाहान्याप्रामाण्यज्ञानरूपधर्मिज्ञानस्यप्रामाण्यानिश्चयस्यसंभवेनसंशयोयुक्तएव ।
नचैवं प्रतिबंधकाभावरूपस्याधिकस्यहेतोरनुप्रवेशात्स्वतस्त्वहानिरितिवाच्यं । उत्सर्गापवादन्यायभंगापत्त्याप्रतिबंधकाभा

वस्यकारणत्वाभावादित्याशयः ॥ [१४।२१]उक्तव्यवस्थैवेति । युक्तीनांबुद्धिदोषनिरासमात्रकारणत्वमेव नवेदप्रामाण्यज्ञप्तिकारणत्वमित्युक्तव्यवस्थैवेत्यर्थः । अनेनेत्युक्तंविशदयति ॥ [१४।२१]व्यतिरेकाभावस्येति । संवादेसतिप्रामाण्यज्ञप्तिस्तदभावेप्रामाण्यज्ञप्त्यभावइतिह्यन्वयव्यतिरेकानुविधानंवक्तव्यं । तच्चासिद्धं । संवादाभावेपि युक्त्यपेक्षांविनैवेतियावत् प्रामाण्यज्ञप्तेरदुष्टबुद्धीनामनुभवसिद्धत्वेनव्यतिरेकव्याप्त्यभावइत्यर्थः । एतेनेत्युक्तमेवविशदयति ॥ [१४।२२]बुद्धिदोषाभावइति । नन्वभ्यासदशापन्नज्ञानप्रामाण्येकदाचित्संशयोपिदृश्यतेऽतस्तद्विरोधइत्यतआह ॥ [१४।२३]क्वचिदिति । कदाचिदितिशेषः ॥ [१४।२३]अन्यथेति । मनोदोषेणेत्यर्थः ॥ [१४।२४]प्रवृत्तिसामर्थ्यमित्यादि । अनभ्यासदशापन्नज्ञानप्रामाण्यनिश्चायकंसमर्थप्रवृत्तिजनकत्वं अभ्यासदशापन्नज्ञानप्रामाण्यनिश्चायकंसमर्थप्रवृत्तिजनकंयत्पूर्वतनंज्ञानंतज्जातीयत्वमितिविवेकः ॥ [१४।२५]अतइति । यज्ज्ञानप्रामाण्येशंकैवनोदेतितस्यागृहीतप्रामाण्यकस्यैवस्वार्थनिश्चयरूपत्वादित्यर्थः ॥ [१४।२५]परतस्त्वेपीति । ज्ञानग्राहकातिरिक्तग्राह्यत्वेपीत्यर्थः । ननुयज्ज्ञानप्रामाण्येविवादोनास्त्येतादृशोर्थःकइतिशंकायांसुखादिज्ञानमेवेत्याशयेनाह ॥ [१४।२५]अस्तिचेति ॥ [१४।२६]नव्यभिचरतीति । शंकास्पदोनभवतीत्यर्थः ॥ [१४।२६]प्राप्तिरिति । जलसमीपप्राप्तिरित्यर्थः ॥ [१४।२६]उदन्येति । अशनायोदन्यधनायाबुभुक्षापिपासागर्धेषु बुभुक्षादिषुत्रिष्वर्थेषुविवक्षितेषुसत्सु अशनायाउदन्याधनायाइतित्रयश्शब्दाःनिपात्यंतइतिसूत्रार्थः । तथाचपातुमिच्छारूपा या पिपासासाउदन्येत्यर्थः । अत्रजलज्ञानादित्यादौकार्यभूतानिप्रवृत्त्यादीनिलिंगभूतानिसंति

जलज्ञानादीनांकारणभूतानामप्रामाण्यशंकानिरासद्वारातत्सत्तानिश्चायकानीतिज्ञातव्यं । मरुमरीचिका मृगतृष्णा ।(बिसल दोरी)विलाससारीत्यपभ्रष्टभाषा ॥ [१५।२] व्यभिचारादर्शनादिति । अजातेसुखेदुःखाभावेवाहंसुखीत्यादिज्ञानादर्शनादित्यर्थः ॥ [१५।४] दुर्वारत्वादिति । तथाचयावत्साक्षिवेद्येसुखादौनावतार स्तावत्पर्यंतमेवपरीक्षापेक्षा । साक्षिवेद्यसुखादिज्ञानेतुनतदपेक्षेतिपरीक्षाऽनवस्थापरिहारोभवद्भिःकर्तव्यः । सोस्माकमपिसमानइतिभावः । अस्मान्प्रतिपरोनुव्याख्यानसंमतिमाह ॥ [१५।५] उक्तंचेति । मूलेआकांक्षायामेवेति । आकांक्षाचनसर्वत्रेतिभावः ॥ [१५।६] एवंवदतेति । यत्प्रामाण्येतुशंकैवनोदेति तत्रप्रमाणांतरसंवादोपिनापेक्ष्यतइतिवदतेत्यर्थः । अन्यथेत्यस्यैवविवरणं[१५।८]शंकाभावेपीति । पूर्वमप्रामाण्यशंकायामेवप्रामाण्यस्यावश्यवेद्यत्वं । यस्मिन्ज्ञानेचाप्रामाण्यशंकानास्तितदगृहीतप्रामाण्यकमेवस्वार्थनिश्चयरूपमित्यनवस्थापरिहारश्शंकितः । अधुनात्वप्रामाण्यशंकायांसत्यामपिप्रामाण्यस्यावश्यवेद्यत्वाभावमभ्युपेत्यानवस्थापरिहारमाशंकते ॥ [१५।९] अवश्यवेद्यत्वाभावादिति । प्रामाण्यस्येतिशेषः । निश्शंकप्रवृत्तौ तदर्थत्वेनेत्यर्थः । तत्कुतइतिशंकायामवश्यवेद्यत्वाभावेनिश्शंकप्रवृत्तिरेवनस्यादित्युपपादयति ॥ [१५।९] ज्ञानेहीत्यादिना । जलज्ञानइत्यर्थः । ज्ञाते सतिमनसेतिशेषः ॥ [१५।१०] अनुपलब्धाविति । अनुमित्येतिशेषः । यथाहुः । ज्ञानंमनसागृह्यतेप्रामाण्यंपुनरनुमानेनेति ॥ [१५।१०] संशयइति । इदंजलज्ञानंप्रमाणंनवेतिप्रामाण्यसंशयइत्यर्थः ॥ अर्थ[१५।१०]संशयइति । इदंजलंभवतिनवेतिसंशयइत्यर्थः । प्रामाण्यस्यार्थसत्ताघटितत्वात्तत्संशयेसत्यर्थसंशयोप्यावश्यकइतिभावः ॥ [१५।१०] तथाचेति । अर्थेजलादावेवसंशयात्कथंजलादौनिश्शंकाप्रवृत्तिःस्यादित्यर्थः ॥ [१५।११] संशयतइति ।

धान्यादिरूपार्थसंदेहादपीत्यर्थः । प्रवृत्तिः कृष्यादौ । तथाचप्रकृतेपिप्रामाण्यसंदेहात्प्रवृत्तिरस्त्विति भावः ॥ [१५।११] पारत्रिकीति । ज्योतिःष्टोमेनस्वर्गकामोयजेतेतिवाक्यजन्यज्ञानसाध्यस्वर्गरूपपरलोकसाधनीभूतयागादौप्रवृत्तिर्ज्ञानेप्रामाण्यनिश्चयं विनातत्संदेहमात्रान्नभवितुमर्हतीत्यर्थः ॥ [१५।११] तथेति । संशयतइत्यर्थः ॥ [१५।१२] नतुतज्ज्ञानमपेक्षतइति । प्रवृत्तिजननेस्वज्ञानं नापेक्षितमित्यर्थः । यद्यपेक्षितंस्यात्तर्ह्येवज्ञानेहिज्ञातइत्यादिनोक्तंदूषणंस्यादित्याशयः । सामग्र्यां आत्ममनःसन्निकर्षादिरूरूपायां दृष्टांतोसंप्रतिपन्नइत्याशंकते ॥ [१५।१२] सुखादिकमिति ॥ [१५।१३] नतुतथेति । ज्ञास्यामीतिबोद्धुमिच्छारूपायांबुभुत्सायांसत्यामेवज्ञानंगृह्यते नतदभावे । तथाचसामग्र्यांसत्यामपिक्वचिद्बुभुत्सायाअभावान्नतज्ज्ञानमपेक्षितमित्याशयः ॥ [१५।१३] अन्यथेति । ज्ञानस्याबुभुत्सितग्राह्यत्वांगीकारेसर्वदाज्ञानपरंपरासद्भावनिवारकाभावेनसर्वदातत्सद्भावप्राप्त्यातदर्थंतद्ग्राहकमनसस्सर्वदा जागरूकत्वेवक्तव्येतदुपरमाभावप्राप्त्यासुप्तिमूर्च्छाद्युच्छेदएवस्यात् । मनसउपरमेण सर्वज्ञानोपरमस्यैवसुप्तित्वादतस्तदन्यथानुपपत्त्याज्ञानस्यबुभुत्सितत्वग्राह्यत्वेवक्तव्ये बुभुत्सायास्सर्वदाऽभावेनज्ञानग्रहणाभावात्सुप्त्याद्युत्पत्तिरित्याशयः । तथाचज्ञानंस्वरूपेणैवप्रवृत्तिहेतुरितिनोक्तदूषणावकाशइतिहृदयं ॥ [१५।१३] तथासतीति । तथाचयत्रबुभुत्सानास्तिताद्दशंप्रवर्तकंयज्ज्ञानंतदसदेवेतिप्राप्तं । कुतः अप्रामाणिकत्वात् । वस्तुसद्भावेज्ञानस्यैवप्रमाणत्वात् । एवंचाबुभुत्सितग्राह्यत्वेवाच्येतस्य ज्ञानस्यस्वरूपेणैवप्रवर्तकत्वाभावेनज्ञातस्यैवप्रवर्तकत्वंवाच्यं । तथाचज्ञानेज्ञातेतत्प्रामाण्यानुपलब्धौतत्संशयद्वाराऽर्थसंशये ननिश्शंकाप्रवृत्तिर्नस्यात् । अतस्तदन्यथानुपपत्त्याप्रामाण्यस्यावश्यवेद्यत्वंवाच्यमित्यनवस्थासुस्थैवेतिभावः । ननुज्ञानस्या

बुभुत्सितग्राह्यत्वेभवत्पक्षेप्युक्तरीत्यासुप्त्याद्यभावप्रसंगस्स्यादेवेत्यतआह ॥ [१५।१३] साक्षीति । ज्ञानस्याबुभुत्सितग्राह्यत्वेपित्वन्म
तेज्ञानस्यमनोवेद्यत्वांगीकारेणमनसउपरमासंभवात्सुप्त्याद्यभावप्रसंगस्स्यात् । अस्मन्मतेतुज्ञानस्याबुभुत्सितग्राह्यत्वेपिसाक्षि
वेद्यत्वांगीकारेणसुखकालात्मस्वरूपज्ञानानांसुषुप्तौसत्त्वेपिसाक्षिणैवतद्ग्रहणसंभवेनसुप्त्युच्छेदाभावान्मनसउपरमसंभवेनसु
षुप्त्युपपत्तेः । तदुपरमस्यैवसुप्तित्वादितिभावः । ज्ञानस्यबुभुत्सितग्राह्यत्वमंगीकृत्यापिसमाधत्ते ॥ [१५।१४] किंचेति । बुभुत्सा ज्ञा
नज्ञानेच्छा ॥ [१५।१४] अन्यथेति । बुभुत्सितग्राह्यत्वाभावेक्वचिद्बुभुत्साया अभावेनज्ञानस्यैवाभावात् । तस्मिन्ज्ञानेप्रामाण्यनिश्च
याय इदंज्ञानंप्रमाणं समर्थप्रवृत्तिजनकजातीयत्वादिति समर्थप्रवृत्तिजनकजातीयत्वरूपविजातीयसंवादोवासजातीयसंवा
दोवापरीक्षकैरन्विष्यमाणोव्यर्थएवस्यात् । धर्मिज्ञानाभावेनानुमानप्रवृत्तेरेवायोगादितिभावः । अत्रबुभुत्साप्यवर्जनीयेत्यं
गीकृत्योक्तं । वस्तुतस्तुबुभुत्सितग्राह्यत्वपक्षेप्यनवस्थास्यादेव । बुभुत्सायाइच्छारूपत्वेनज्ञानजन्यत्वात्तज्ज्ञानस्यपुनर्बुभुत्सां
तरजन्यत्वात् । तस्याश्चपुनर्ज्ञानांतरजन्यत्वादिति ॥ [१५।१७] स्वभावस्येति । प्रामाण्यग्राहकत्वस्वभावस्येत्यर्थः ॥ [१५।१७] सचेति ।
बौद्धादिवाक्यजन्यज्ञानप्रामाण्यग्राहकस्साक्षीत्यर्थः ॥ [१५।१७] अन्यथेति । साक्षिणोऽव्यभिचारित्वाभावेसाक्षिवेद्यसुखादिज्ञाने
प्यप्रामाण्यशंकापत्त्यातत्रापिपरीक्षांतरापेक्षाप्राप्तौ नपरीक्षानवस्थास्यात्साक्षि(सिद्धे)वेद्येत्वसंशयादित्येवंपरीक्षानवस्थापरि
हारोभवद्भिःक्रियमाणोनुपपन्नस्स्यादित्यर्थः ॥ [१५।१८] तदपीति । बौद्धादिवाक्यजन्यज्ञानमपीत्यर्थः ॥ [१५।२०] कदलीकांडेति । कां
डोदंडः । कांडोऽस्त्रीदंडबाणार्ववर्गावसरवारिष्वित्यमरकोशात् । कदलीदंडेत्यर्थः । अत्रबुद्धिशब्दोमनःपरइत्यभिप्रायेणो

र्क ॥ [१५।२२] कलुषितमनसामिति । ननुदुष्टबुद्धीनामेवेतिवाक्यंकथंदृष्टांतप्रतिपादकं । तज्ज्ञापकाभावात् । इतिशब्दश्चानर्थ
कइत्याशंक्यदृष्टांतत्वज्ञापनायशंकेत्यनंतरंदृष्टेतिपदमध्याहार्यं । तेनै वशब्दसंबंधः इतिशब्दश्चहेत्वर्थः । अतोनासंगतिरि
त्याह ॥ [१५।२२] दृष्टैवेति । दुष्टबुद्धीनामित्युक्तेरभिप्रायमाह ॥ [१५।२२] नात्रेति । अत्र वेदजन्यज्ञाने । तस्यनिश्चयरूपत्वादितिभावः ।
अत्रानुव्याख्यानसंमतिमाह ॥ [१५।२३] यत्किंचिदिति । ननुकथमयंदृष्टांतः । दोषकलुषितमनसांवेदजनितविज्ञानेऽप्रामाण्यशंका
यादृष्टत्वात्प्रकृतेपिविसंवादरूपापवादसहकृतसाक्षिणाबौद्धादिवाक्यजन्यज्ञानेऽप्रामाण्यनिश्चयइत्यस्यासंगतत्वादित्यतआ
ह ॥ [१५।२३] अतइति । विसंवादसहकृतसाक्षिणाबौद्धादिवाक्यजन्यज्ञानेऽप्रामाण्यनिश्चयइत्यत्रविसंवादरूपदोषकलुषितमनसां
वेदजन्यज्ञानेऽप्रामाण्यशंकादृष्टेतिविशेषेदृष्टांतत्वायोगादित्यर्थः ॥ [१५।२३] सामान्यमात्रइति । विसंवादरूपदोषदर्शनमप्रामा
ण्यग्रहणकारणमित्यत्रैवायंदृष्टांतइत्यर्थः । शंकायाअपिग्रहणत्वादितिभावः ॥ [१५।२५] आपन्नमिति । तथाचाप्रामाण्यस्यापिस्व
तस्त्वापत्तिरितिभावः ॥ [१५।२६] कुतोयंविभागइति । प्रामाण्याप्रामाण्ययोर्ज्ञानधर्मत्वेपिप्रामाण्यस्यज्ञानग्राहकमात्रग्राह्यत्वं अ
प्रामाण्यस्यतुनेत्ययंविभागःकुतइत्यर्थः । किमनेनास्मिन्विभागेप्रमाणमुक्तमित्यतोन्वयव्यतिरेकावेवेत्याह ॥ [१६।१] अनेनेति ॥
[१६।१] युक्त्यनुसंधानएवेति । अनृतव्याघाताद्यसद्युक्त्यनुसंधानएवेत्यर्थः । ननुबौद्धादिवाक्यजन्यज्ञानेविसंवादसहकृतसाक्षि
णाऽप्रामाण्यनिश्चयइतिवक्तव्ये दुष्टबुद्धीनामिति शंकेतिचकस्मादुक्तमसंगतत्वादित्यतआह ॥ [१६।१] दुष्टबुद्धीनामितिशंके
तिचेति । वेदजन्यज्ञानेसाक्षिणाऽप्रामाण्यनिश्चयायोगादितिभावः ॥ [१६।१] ज्ञप्तिरिति । इतिसामान्यमात्रमेवविवक्षितं ।

शंकानिश्चययोरुभयोरपिज्ञप्तित्वादितिभावः ॥ [१६।३] **अनुमेयमेवेति** । विसंवादलक्षणहेत्वनुसंधानाधीनसाक्षिविषयएवेत्यर्थः । साक्षिणोप्रामाण्यविषयीकारित्वेविसंवादसापेक्षतानियमात् । नतुसाक्ष्यग्राह्यमित्यर्थः । अन्यथाअत्रग्रंथांतरेचविसंवादसहकृतसाक्षिग्राह्यत्वस्योक्तत्वेन तद्विरोधापत्तेरित्यवगंतव्यं । नन्वप्रामाण्यग्रहणेविसंवादापेक्षावत्प्रामाण्यग्रहणेपिसंवादरूपयुक्त्यनुसंधानापेक्षास्यात् । तथाचप्रामाण्यस्यापिपरतस्त्वापत्तिरित्यतआह ॥ [१६।३] **प्रामाण्यग्रहणस्यत्विति** ॥ [१६।४] **एवंसतीति** । विसंवादस्याप्रामाण्यग्रहणकारणत्वइत्यर्थः । ततो दाहाभावात् ॥ [१६।६] **स्वमहिम्नैवेति** । एवमेवप्रकृतेपिविसंवादाभावेसत्येवसाक्षीप्रामाण्यंगृह्णातीत्येतावताविसंवादाभावोपिनप्रामाण्यज्ञप्तिकारणंभवति । किंतुततोविसंवादादप्रामाण्यज्ञप्तिरूपविपरीतकार्यानुत्पादेसतिसाक्षीस्वमहिम्नैवप्रामाण्यंगृह्णातीत्याशयः ॥ [१६।६] **अन्यथेति** । विसंवादाभावस्यापिप्रामाण्यज्ञप्तिकारणत्वइत्यर्थः ॥ [१६।६] **उत्सर्गापवादाविति** । वेत्रांकुरंवेत्रबीजंजनयतीतिवत् नहिंस्यात्सर्वाभूतानीतिभूतहिंसात्वावच्छेदेनाकर्तव्यत्वमुत्सर्गः । तत्रदाहःप्रतिबंधकः । अत्रत्वग्नीषोमीयंपशुमालभेतेतिविहितहिंसारूपोऽपवादोदाहस्थानीयः । तत्रदाहाभावरूपप्रतिबंधकाभावस्यापिकारणत्वमंगीकृत्यदाहाभावविशिष्टवेत्रबीजस्यकारणत्वांगीकारेऽत्राप्यविहितहिंसात्वावच्छेदेनाकर्तव्यत्वनियमएवस्यान्नोत्सर्गः । सव्यभिचारनियमस्यैवोत्सर्गत्वात् । नह्यस्यनियमस्यव्यभिचारोस्ति । एतादृशोत्सर्गाभावेचतन्नियमेव्यभिचारप्रदर्शनार्थंप्रवृत्तस्यापवादस्याप्यसंभवएव । उक्तरीत्याऽव्यभिचारस्यैवसंभवादितिभावः।कारणाभावस्य विसंवादाभावस्य॥ [१६।७] **नप्रकृतेकाचिदस्माकंहानिरिति**।प्रामाण्यस्यविसंवादाभावसहकृतसाक्षिवेद्यत्वांगीकारेपिनप्रकृत

स्यवेदापौरुषेयत्वस्यहानिः।विसंवादाभावस्यैवसहकारित्वप्राप्त्या आप्तोक्तत्वस्यकुत्राप्युपयोगाभावात्।तदेवहानिस्स्यात् यद्या प्तोक्तत्वेनैवतत्प्रामाण्यमनुमातव्यमितित्वदुक्तरीत्याऽऽप्तोक्तत्वस्यसहकारित्वंस्यान्नचैवं।अतस्सकर्तृकत्वाभावेप्रामाण्यासिद्धि लक्षणबाधकाभावादप्रयोजकंवाक्यत्वानुमानमितिनप्रकृतस्यवेदापौरुषेयत्वस्यहानिरित्यर्थः । अंगीकृत्येदमुक्तं । वस्तुतस्तु कारणीभूताभावप्रतियोगित्वंहिप्रतिबंधकत्वं । तथाचप्रतिबंधकज्ञानेतदभावज्ञानं अभावज्ञानेप्रतियोगिज्ञानस्यकारण त्वात्प्रतिबंधकाभावज्ञानेचप्रतिबंधकत्वज्ञानं तस्यतद्घटितशरीरत्वादित्यन्योन्याश्रयान्नप्रतिबंधकाभावस्यकारणत्वमितिहृद यम् ॥ ७ ॥ **इतिप्रामाण्यवादः** ॥ ७ ॥ वर्णानित्यत्ववादीवैशेषिकादिःशंकते ॥ **नन्विति** । ननुसमुदायिनांवर्णानामुत्प द्यमानत्वेपितत्समुदायरूपस्यवेदस्यनोत्पत्तिरितिचेत्तत्राह ॥ **नचेति** । नहीत्यर्थः । उच्चारणेनोत्पत्तिर्नास्तीतिसिद्धांतीशं कते ॥ **नचवाच्यमिति** । ननूपलब्ध्यनुपलब्धिभ्यामेवोत्पत्तिविनाशौसाध्यावित्याशंक्यनिषेधति ॥ **नचेति** ॥ **उपल भ्येति** । आदौउपलब्धिविषयोभूत्वेत्यर्थः ॥ **तदैवेति** । उपलब्ध्यादिसमयएवेत्यर्थः ॥ **प्रसंगादिति** । नचवाच्यमित्य न्वयः । कुतोनवाच्यमितिचेदुच्यते । प्रागुच्चारणादनुपलब्धावर्णाउच्चारणेसत्युपलब्धाःपुनर्नोपलभ्यंतइत्येतावदेवानुभव सिद्धमित्युक्तंयत्तत्सत्यमेव । तथाप्युच्चारणानंतरोपलब्धिर्वर्णानांतदुत्पाद्यत्वेनैवोपपद्यते नान्यथेतिवक्तुंप्रसक्तप्रतिषेधंताव त्करोति ॥ **वर्णास्तावदित्यादिना** । उच्चारणानंतरं अन्यतो देशांतरा दागत्योच्चारणोपरमेसति अन्यत्र देशांतरंप्रति

गताइत्यर्थः ॥ [१६।१२] अमूर्तत्वादिति । अमूर्तानांगमनागमनादिक्रियायाअयोगादित्यर्थः । स्वरूपासिद्धिपरिहारायाह ॥ [१६।१२] तदपी
ति । अमूर्तत्वमपीत्यर्थः । वर्णाअमूर्ताः गुणत्वात् । मूर्तत्वंहीयत्तावच्छिन्नपरिमाणयोगित्वंवक्तव्यं । तच्चनसंभवति । गुणेगु
णानंगीकारादितिभावः । ननुवर्णानांद्रव्यत्वांगीकाराद्गुणत्वंस्वरूपासिद्धमितिचेत्तत्रपृच्छामः । द्रव्यत्वेकिंगगनादिवत्सर्वगत
त्वमंगीक्रियते परमाणुवदणुपरिमाणवत्त्वंवा घटादिवन्मध्यमपरिमाणवत्त्वंवा । आद्येसर्वगतत्वाद्गमनागमनादिक्रियानुपपत्ति
स्तदवस्थेत्याशयेनाह ॥ [१६।१२] द्रव्यत्वेपीति । सर्वगतत्वान्नान्यतआगत्यान्यत्रगताइतिसंबंधः । नद्वितीयइत्याह ॥ [१६।१२] अणुत्वइति ।
वर्णानांश्रोत्रेंद्रियग्राह्यत्वस्यानुभवसिद्धत्वेनतद्विरोधइतिभावः । नापितृतीयइत्याह ॥ [१६।१२] मध्यमपरिमाणत्वइति । भवदं
गीकृतंनित्यत्वंविरुध्येतेत्यर्थः । अन्यथाघटादेरपिनित्यत्वंस्यादितिभावः ॥ [१६।१३] प्रागिति । उच्चारणात्प्रागित्यर्थः ॥ [१६।१४] अमूर्त
त्वेनेति । भवन्मतेवर्णानांव्याप्तद्रव्यत्वाद्गगनादिवदावरणानुपपत्तिरित्यर्थः ॥ [१६।१४] इंद्रियदोषादिति । श्रोत्रेंद्रियदोषादित्य
र्थः । तथाचेंद्रियदोषस्यैवावरकत्वमितिभावः ॥ [१६।१४] वर्णांतरेति । श्रोत्रेंद्रियस्यैवदुष्टत्वेवर्णमात्रंनोपलभ्येत । नहीदमनुभूयते
(ककारा)नुपलंभेपिगकारोपलब्धेरनुभूयमान(त्वात्)एकवर्णानुपलंभेपिवर्णांतरानुभवस्यसर्वजनसिद्धत्वात् । तथाचयएको
वर्णोनोपलभ्यतेतत्रावरकंइंद्रियदोषातिरिक्तंनास्तीत्यर्थः । ननुइंद्रियदोषातिरिक्तंवर्णांतरानुपलंभेश्रोतुरनवधानंविषयांतर
संचाररूपोमनोव्यासंगएवनिमित्तमित्याशंक्यनिषेधति ॥ [१६।१४] नचेति । अवधानेपि मनोव्यासंगाभावेपि ॥ [१६।१५] अनुपलंभादि
ति । एकवर्णोपलब्धिकालेवर्णांतरस्येत्यर्थः ॥ [१६।१५] अतींद्रियाइति । उच्चारणात्प्रागतींद्रियत्वान्नोपलभ्यंतइत्यर्थः ॥ [१६।१५] उच्चार

णेपीति । नह्यतींद्रियंकदाप्यैंद्रियकंभवितुंयुक्तमितिभावः ॥ [३६।३५] सहकार्यभावइति । कारणमितिशेषः । उच्चारणात्प्राक्स हकार्यभावान्नोपलभ्यंतइतिभावः । तस्य सहकारिणः ॥ [३६।३६] अकिंचित्कुर्वतइति । यद्धिकार्योत्पत्तौकिंचिदुपकारि तदेवहि सहकारीत्युच्यतइतिभावः । ननुअकिंचित्कुर्वतउच्चारणस्यसहकारित्वानुपपत्तेरितियदुक्तंतन्न । उच्चारणस्यवर्णव्यंजकतयो पकारित्वादकिंचित्करत्वाभावात्सहकारित्वोपपत्तिरित्याशंक्यनिषेधति ॥ [३६।३६] नचव्यंजकमिति ॥ [३६।३६] भिन्नदेशत्वादिति । समानदेशयोरेवहिव्यंग्यव्यंजकभावोदृष्टइतिभावः । भिन्नदेशत्वमेवोपपादयति ॥ [३६।३७] उच्चारणंहीति ॥ [३६।३८] अन्यथेति । प्रकारां तरानुपपत्तावुपलब्धिस्तदुत्पाद्यत्वेनैवोपपद्यतइत्यनंगीकारइत्यर्थः ॥ [३६।३९] पुरुषव्यापारेति । ताल्वोष्ठपुटव्यापारजन्योच्चारणे त्यर्थः ॥ [३६।३९] वीचीतरंगन्यायेनेति । तरंगन्यायेनेत्यर्थः । यथाहिस्तिमितजलोपेतवाप्यांमध्येपाषाणप्रक्षेपेकृतेसतिमंडलाका रएकस्तरंगोजायते तस्माच्चतरंगात्पुनस्तरंगांतरंजायते एवंक्रमेणांतिमोमंडलाकारस्तरंगस्तीरसंबद्धोभवति । एतन्न्यायेनश ब्दाच्छब्दांतरोत्पत्तिक्रमेणोत्पन्नोंऽतिमोवर्णात्मकश्शब्दएकएवसर्वपुरुषश्रोत्रसंबद्धोभवति । अस्मिन्पक्षेयएवशब्दस्त्वयाश्रुत स्सएवमयापीतिप्रत्यभिज्ञाप्रमैव ।कदंबमुकुलन्यायपक्षेतुदशदिक्षुदशमुकुलवत्दशदिक्षुदशशब्दसंतानानिप्रत्येकंजायंते तत्रद शदिक्षुजातेषुशब्दसंतानेषुजातोंऽतिमश्शब्दस्तत्तद्दिगवस्थितैःपुरुषैश्श्रूयते। अस्मिंश्चपक्षेयएवशब्दस्त्वयाश्रुतस्सएवमयापीति प्रत्यभिज्ञाभ्रमरूपेतिवीचीतरंगन्यायकदंबमुकुलन्याययोर्विशेषोद्रष्टव्यः । तेषां श्रोत्रदेशउत्पन्नानांवर्णांतराणां । ननुपरेणो च्चारणस्यवर्णकारणत्वांगीकारात्कथमुच्चारणकालेवर्णानामुत्पत्तिरितिसमानकालत्वमुच्यतइत्यतआह ॥ सामीपिकाधि

[१६।२१]करणइति । सामीप्यमेवसामीपिकंतद्रूपेऽधिकरणइत्यर्थः । वैयाकरणानांमतेलक्षणावृत्त्यभावेनगंगायांघोषोवटेगावइत्या
दौसामीप्यरूपाधिकरणेसप्तमीत्युक्त्वागंगासमीपेघोषोवटसमीपेगावइति आधारोधिकरणमितिसूत्रव्याख्यानसमयेसामीप्या
दिरूपेणाधारश्चतुर्धेत्युक्तत्वात् । एवंचप्रकृतेउच्चारणकालइत्यस्योच्चारणकालसमीपइत्यर्थः । उच्चारणकालसामीप्यंचानंतर
कालस्यास्तीतिभावेनाह ॥ [१६।२१]उच्चारणकालानंतरमेवेत्यर्थइति । उच्चारणकालइतिसप्तम्याआनंतर्यंलभ्यतइतिव्याख्याये
दानीमुच्चारणकालइत्यत्रषष्ठीविग्रहबलादेवानंतर्यंलभ्यतइतिभावेनव्याचष्टे ॥ [१६।२१]उच्चारणस्यकालइति ॥ [१६।२२]द्रष्टव्यमिति ।
उच्चारणोपरमानंतरमित्यर्थः ॥ [१६।२३]नाभसाइति । तेचध्वनयोभूताकाशगुणाइत्यर्थः । तथाचभूताकाशमेवश्रोत्रं तद्गुणएव
ध्वनि रतस्तत्प्रदेशवर्तीध्वनिस्तदवच्छिन्नमेववर्णंव्यंजयतीतिनव्यंग्यव्यंजकयोर्भिन्नदेशत्वमितिभावः । इत्यादीत्यादिपदेनव
र्णानांकदाचिदेवोपलब्धिर्नसर्वेषांसर्ववर्णोपलब्धिरित्यादिकंग्राह्यं ॥ [१६।२३]वक्तुमिति । अतआकाशगुणेशब्दइत्यादिनेतिशेषः ॥
[१६।२४]हेतुत्वेनेति । उच्चारणकालेवर्णानामुत्पत्तिरितिनचवाच्यमित्यत्रहेतुत्वेनेत्यर्थः ॥ [१६।२५]तच्छब्देति । सचासौशब्दश्चेतितच्छब्दो
गकाररूपशब्देत्यर्थः । कथंविरुणद्धीत्यतआह ॥ [१६।२६]नहीति । प्राक्तनस्य गकारस्य । इदानींतनेन उच्चारणेन ॥ [१६।२६]एवंपूर्वंपूर्वत
रमिति । पूर्वकालेतत्पूर्वकालेचेत्यर्थः । सएवायंगकारइतिप्रत्यभिज्ञासर्वेषांजायतइतिशेषः ॥ [१७।१]प्रत्यभिज्ञैवेयमिति । ज्ञानमे
वेदमित्यर्थः ॥ [१७।३]जातिविषयेति । सएवायंगकारइत्यस्यतदेवेदंगत्वमित्यर्थः ॥ [१७।३]सामान्यनित्यतायाइति । जातेर्नित्य
तायाः मासेनशूद्रोभवतिब्राह्मणोरसविक्रयात् । जातेरपायोभवतिमहापातककारिणइत्यादिप्रमाणविरुद्धत्वादित्यर्थः । जाति

व्यक्त्योरभेदस्यान्यत्रसमर्थितत्वेनानित्यव्यक्त्यभिन्नजातेरप्यनित्यतयातन्नित्यत्वावगाहिप्रत्यभिज्ञायाःजात्यनित्यत्वग्राहि
प्रमाणविरुद्धत्वादित्यर्थइत्यप्याहुः। किंचगत्वंजातिरेवनभाति । यद्विषयकतयाप्रत्यभिज्ञायाअन्यथासिद्धिस्स्यात् । तारत्वा
दिनासांकर्यात्। तारत्वंगत्वंविहायतारककारेवर्ततेगत्वंचतारत्वंविहायमंदगकारे समावेशस्तुतारगकारइतिद्रष्टव्यं॥[१७।१४]वर्णविषय
त्वस्येति । सएवायंगकारइतिप्रत्यभिज्ञायागकाररूपधर्मिविषयत्वमेवप्रतिभासतेनतुगत्वरूपजातिविषयत्वमित्यर्थः ॥ [१७।१६]सं
भवादिति । तथाचैकंपदमितिप्रत्यक्षमौपाधिकैकत्वावगाहीत्यर्थः । उपाधिनिमित्तएकत्वव्यवहारःकुत्रदृष्टइत्यतआह ॥
[१७।१६]एकदेशेति । इदमुपलक्षणं । गौरित्युक्तेगकारौकारविसर्जनीयवर्णातिरिक्तस्यक्वचिदप्यनुभवानारोहात् । भवानपिचक्षुषी
निमील्यपरिभावयतु । गौरित्युक्तेकिंवर्णाएवानुभूयंतेततोतिरिक्तंवाकिंचनेति । तस्मान्नस्फोटेप्रत्यक्षंप्रमाणमिति चन्निभट्टयु
क्तंदूषणमपिद्रष्टव्यं । ननुवर्णानामर्थाभिधायकत्वंकेनपदेनसूचितमित्यतआह ॥ [१७।१६]तदपीति । नचोच्चारणकालएववर्णा
नामुत्पत्तिरितिप्रतिज्ञावाक्येवर्णत्वरूपधर्मपुरस्कारेणवर्णानामुक्तत्वात्तएवामीवर्णाइतितद्धर्मपुरस्कारेणैवतेषांवक्तव्यत्वेवचन
मितिपदार्थाभिधायकत्वलक्षणधर्मपुरस्कारेणवर्णानामुक्त्यासूचितमित्यर्थः । एवमभिप्रायाभावेप्रतिज्ञाहेतुवाक्ययोर्भिन्नवि
षयत्वंस्यादितिभावः ॥ वर्णानामेकार्थाभिधायकत्वोपाधिरेवनसंभवत्यतोवर्णव्यंग्यःपदस्फोटोऽवश्यमंगीकार्यइत्याशंकते ॥
[१७।१७]नवर्णाइति ॥ [१७।१७]अनेकेति । एकेनवर्णेनार्थस्याभिहितत्वाद्वर्णांतरोच्चारणंव्यर्थंस्यादित्यर्थः । क्रमवतांवर्णानां । आशुतर
विनाशिनांचेत्यपिद्रष्टव्यं । क्रमवतांस्थायित्वेसमुदायसंभवात् ॥ [१७।१८]नित्यत्वेपीति । वर्णानामित्यर्थः ॥ [१७।१८]अतोवर्णैरित्या

दि । यथोक्तंचन्निभट्टिकारेण । तस्माद्वर्णानांसमासव्यासाभ्यांवाचकत्वानुपपत्तौयद्बलादर्थप्रतिपत्तिःसस्फोटोवर्णातिरिक्तो वर्णाभिव्यंग्योर्थप्रत्यायकोनित्यश्शब्दःस्फोटइतितद्विदोवदंति । अतएववैयाकरणाःस्फुट्यतेव्यज्यतेवर्णैरितिस्फोटोवर्णाभि व्यंग्यः । स्फुट्यतिस्फुटीभवत्यर्थइतिस्फोटोऽर्थप्रत्यायकइतिस्फोटशब्दार्थंद्वेधानिरुक्तवंतः । तथाचोक्तंपतंजलिनामहाभा ष्ये । अथगौरित्यत्रैकश्शब्दोयेनोच्चारितेनसास्नालांगूलखुरककुदविषाणानांसंप्रत्ययोभवतिसस्फोटशब्दइति ॥ [१७।१०] तदिदमुक्तं वचनमितीति । वर्णानामितिप्रकृतत्वेपिपदार्थाभिधायकत्वलक्षणधर्मपुरस्कारेणवर्णानामुक्त्यावर्णानामेवावस्थाविशेषवि शिष्टानांपदार्थाभिधायकत्वंवचनमित्युक्त्याज्ञापितमित्यर्थः । ननुमास्तुपदस्फोटः । तथापिपदव्यंग्योवाक्यस्फोटस्तावदव श्यमंगीकार्यएव । तथाहि । नपदानिप्रत्येकंसंसर्गरूपवाक्यार्थमभिदधति । अनेकपदोच्चारणवैयर्थ्यापत्तेः । नापिसमुदिता नि । क्रमवतामाशुतरविनाशिनांचसमुदायानुपपत्तेः । नित्यत्वेपिप्रतीतानामेवपदानांसंसर्गाभिधायकत्वंप्रतीतयश्चक्रमभा विन्यइतिनसमुदायस्संभवति । अतःपदैरनुपपद्यमानंवाक्यार्थाभिधानंतदतिरिक्तंवाक्यस्फोटंकल्पयतीतिचेत् । तत्राह ॥ [१७।१०] एवमेवेति । प्रतिज्ञावाक्येवर्णत्वपुरस्कारेणवर्णानांगृहीतत्वेनोपसंहारवाक्येपितेषांतथैवग्राह्यत्वेसंसर्गरूपवाक्यार्थवेदनक रणत्वरूपवेदत्ववाक्यत्वलक्षणधर्मपुरस्कारेणवर्णग्रहणंकरिष्यतीत्यर्थः । एवमभिप्रायाभावेउपक्रमोपसंहारयोर्भिन्नविषयत्वं स्यादितिभावः । एवमेवेत्यतिदिष्टंवेदादिग्रहणलब्धंहेतुमाह ॥ [१७।११] वर्णानामेवेत्यादिना ॥ [१७।११] अन्वितस्वार्थेति । योग्येतरा न्वितस्वार्थेत्यर्थः ॥ [१७।११] वेदनेति । वे(वि)द्यतेऽनेनेतिवेदनंवेदनहेतुत्वमित्यर्थः । नन्वेकंवाक्यमितिप्रत्यक्षमेववाक्यस्फोटेप्रमा

णमितिचेन्न । भिन्नेष्वपिपदेषुसंसर्गविशेषरूपैकार्थाभिधानोपाधिनैकत्वस्यसंभवेनैकंवाक्यमितिप्रत्यक्षोपपत्तेरितिचद्रष्टव्यं ॥ **अन्यथेति** । पदबुद्धिविषयाणांवर्णानांवाक्यार्थवेदनकरणत्वानंगीकारइत्यर्थः ॥ **तत्रापीति** । वर्णानांस्फोटव्यंजकत्वपक्षेपीत्यर्थः । तथाहि । नवर्णाःप्रत्येकंस्फोटंव्यंजयंति । अनेकवर्णोच्चारणवैयर्थ्यापत्तेः । नापिसमुदिताः । क्रमवतामाशुतरविनाशिनांचसमुदायानुपपत्तेरितिभावः । वर्णानांप्रत्येकमेवस्फोटव्यंजकत्वमित्यंगीकृत्यतत्रोक्तदोषपरिहारमाशंकते ॥ **प्रथमेति** । अभिव्यक्तः ईषदभिव्यक्तोनविशदइत्यर्थःस्फोटः । पदस्फोटः ॥ **निरवयवस्येति** । अखंडस्येत्यर्थः । वैशद्यावैशद्ययोरवयवविशेषप्रतीत्यधीनत्वादितिभावः । प्रथमोच्चारितवर्णेनाभिव्यक्तइत्येतदेवायुक्तमित्याह ॥ **नचेति** । नहीत्यर्थः । पदप्रतीतिः पदस्फोटप्रतीतिः ॥ **वर्णविषयैवेति** । नस्फोटविषयेत्यर्थः । परिलूनाः परितश्छिन्नाः । लूञ्छेदनइतिधातोः ॥ **एवमेवेति** । बाधकप्रत्ययाभावेपीत्यर्थः ॥ **अतिप्रसंगइति** । सोयंदेवदत्तइत्यादिप्रत्यभिज्ञायाअपिभ्रांतित्वंस्यादित्यर्थः । तीव्रत्वं तारत्वं ॥ **भेदानुमानमिति** । श्रुतश्रूयमाणौतीव्रमंदगकारौ भिन्नौ तीव्रत्वमंदत्वरूपविरुद्धधर्माधिकरणत्वाद्यद्विरुद्धधर्माधिकरणंतद्भिन्नमितिव्याप्तेरित्यर्थः । अनुमानेऽप्रयोजकताशंकापरिहारायानुकूलतर्कमाह ॥ **विरुद्धेति**। कुत्रापिजगति ॥ **यादृशतादृशइति** । अविशेषितइत्यर्थः । अध्यासोऽधिकरणत्वं ॥ **भावभेदहेतुरिति** । पदार्थभेदहेतुरित्यर्थः । भाववोधेतु अभावोनिर्धर्मकइतिपक्षे नविरुद्धधर्माधिकरणत्वेनभावभेदस्संभवति । किंतुप्रतियोग्यादिभेदेनेत्यभिप्रेत्य

भावग्रहणंकृतमितिद्रष्टव्यमितिव्याख्यातं ॥ [१७।२१]विशिष्टइति। देशकालपुरुषावस्थादिभेदरूपव्यवस्थापकाभावविशिष्टइत्यर्थः ॥ [१७।२३]तत्रैवेति । यत्रदेशादिव्यवस्थापकसद्भावस्तत्रविरुद्धधर्माध्यासोनभावभेदहेतुः । तद्यथाएकस्यैवदेवदत्तस्यसत्त्वासत्त्वयोर्देशभेदेन शिखित्वमुंडित्वयोःकालभेदेन एकस्यैवघटस्यैकदैवज्ञातत्वाज्ञातत्वयोःपुरुषभेदेन एकस्यैवदेवदत्तस्यनीलशुक्लकेशवत्त्वयोर्यौवनाद्यवस्थाभेदेनोपपन्नत्वादित्यवधेयं ॥ [१७।२३]जीवेश्वरयोरिति । जीवेसार्वज्ञस्येश्वरेऽल्पज्ञत्वस्यचदेशादिभेदेनकदापिव्यवस्थायाअसंभवादितिभावः। तथाविधो व्यवस्थापकाभावविशिष्टः ॥[१७।२४]कालभेदेनेति। एकएवदेवदत्तःकदाचिद्गकारंतीव्रतयोच्चारितवान्कदाचिन्मंदतयेतिकालभेदेनेत्यर्थः ॥ [१७।२४]उच्चारयितृपुरुषभेदेनेति । एकमेवगकारमेकःपुमांस्तीव्रतयोच्चारयति अपरस्तुमंदतयेत्यर्थः ॥ [१७।२४]नासिकादीति । नासिकाध्वनिनोच्चारितेसतिगकारोमंदस्संपद्यते । सम्यगुच्चारितेसतितीव्रस्संपद्यतइत्यर्थः ॥ [१७।२४]उपपत्तेरिति । तथाचविशिष्टस्यहेतुत्वेऽसिद्धिरितिभावः । ननुतारोगकारोमंदोगकारइतितारत्वमंदत्वरूपविरुद्धधर्मावगाहिज्ञानद्वयमध्येएकस्यज्ञानस्याप्रामाण्यमेवांगीकृत्यविरुद्धधर्माधिकरणत्वमेवनास्तीतिहेतोस्स्वरूपासिद्धिरित्येवकस्मान्नोच्यते । किंविशिष्टस्यहेतुत्वमंगीकारयित्वातस्यस्वरूपासिद्ध्युक्त्येत्यतआह ॥ [१७।२५]केनापिप्रकारेणेति । प्रकृतेचोक्तप्रकारेणज्ञानद्वयस्यापिप्रामाण्यंयुक्तमितिभावः । आदिपदंसंगमयितुमाह ॥ [१७।२५]नन्विति । वैशेषिकादयइत्यत्रादिपदेननैयायिकाग्राह्याः । देवदत्तादेः । एषचेतनयायुक्तोजीवइत्यभिधीयतइतिवचनाद्देवदत्तशरीरस्येत्यर्थः ॥ [१७।२६]पाकेनेति । आतपादिरूपतेजस्संयोगेनेत्यर्थः ॥ [१७।२६]अंगीकुर्वाणाइति । पीलुपाकप्रक्रिययेत्यर्थः ॥ [१७।२६]तत्कथमिति । वर्णानित्यत्ववादिनो

वैशेषिकादीन्प्रतिहीदमापादनंकर्तव्यं तन्नसंभवति । अनिष्टत्वाभावादित्यर्थः ॥ [१८।१] रूपादिपरिवर्तनेनेति । पार्थिवपरमाणु गतरूपादीनांपाकजत्वादितिभावः ॥ [१८।१] प्रासंस्यातिप्रसंगस्येति । वैशेषिकमतेयोगीश्वराणांसत्त्वेनतेषांसोयंपरमाणुस्सोय माकाशइतिप्रत्यभिज्ञाभवति । तस्याभ्रांतित्वंस्यात् । रूपादिपरिवर्तनशब्दभावाभावादिरूपविरुद्धधर्माधिकरणत्वस्यपरमा ण्वादावपिसत्त्वादित्यर्थः । मूले भगवत्पादैस्सोयंदेवदत्तइतिप्रत्यभिज्ञायाभ्रांतित्वमंगीकृत्येत्यादेरित्युक्तं । वस्तुतस्तुसाप्र त्यभिज्ञाभ्रांतिर्नभवत्येवेत्याशयेनाह ॥ [१८।२] किंचेति । अभ्युपगमो वैशेषिकादीनां ॥ [१८।३] सौगतैस्सहेति । देहदीपफलादि दृष्टांतेनसर्वस्यापिघटादिप्रपंचस्यक्षणिकत्वेसौगतैःप्रतिपादितेसतिसोयंदेवदत्तस्सोयंघटइत्यादिप्रत्यभिज्ञास्थायित्वंतान्प्रतिवै शेषिकादिभिःप्रतिपादनीयं । देवदत्तादेरपिपाकेनप्रतिक्षणमुत्पत्तिविनाशावंगीकृत्यप्रत्यभिज्ञायाभ्रांतित्वांगीकारेस्थायि त्वसाधकाभावेनसौगतमतमेवांगीकृतंस्यात् । तथाचतैस्सहवैशेषिकादीनांविवादोनस्यादित्यर्थः । ननुकथंविवादाभावः । देवदत्तादेःपाकेनप्रतिक्षणमुत्पत्तिविनाशांगीकारेपिघटादिपार्थिवद्रव्यस्यक्षणिकत्वंसौगतैरुच्यते । तत्रस्थायित्वंप्रत्यभिज्ञया साध्यतइतिपार्थिवद्रव्यमेवविवादपदंभविष्यतीतिवैशेषिकेणोक्तेसत्याह ॥ [१८।३] पार्थिवंहीति ॥ [१८।४] समानमिति । तत्रापिपाके नदेवदत्तदेहवत्प्रतिक्षणमुत्पत्तिविनाशयोस्सत्त्वादित्यर्थः । तथाचप्रत्यभिज्ञाभ्रांतिरितिभावः । नन्वाप्यतैजसवायवीयपदा र्थानांक्षणिकत्वेतैरभिहितेप्रत्यभिज्ञयास्थायित्वंसाधयिष्यामीतितेषामेवविवादपदत्वंभविष्यतीत्यतआह ॥ [१८।४] आप्येति । अवयवापगमइति । तथाचतत्रप्रत्यभिज्ञाभ्रांतिरेवेतिभावः । नन्वस्तुतर्ह्याकाशेविवादः । तस्यक्षणिकत्वेपरैरभिहितेप्र

त्यभिज्ञयास्थायित्वंतत्रसाधयिष्यामीतिचेत्तत्राह ॥ [१८।४] आकाशस्येति । तैः सौगतैः ॥ [१८।४] अंगीकृतमिति । आकाशोद्वौविनाशौचनित्यंत्रयमसंस्कृतमिताितद्वचनादित्यर्थः । तथाचस्थायित्वस्योभयसंमतत्वान्नतत्रविवादइतिभावः । नन्वस्तुतर्ह्यात्मनि कर्मसामान्यविशेषसमवायेषुचविवादः । तेषांतैःक्षणिकत्वेभिहितेप्रत्यभिज्ञयास्थायित्वंतेषांमयासाध्यतइतिचेत्तत्राह ॥ [१८।५] आत्मात्विति । समवायाः स्वरूपतएवनांगीकृताइतिवर्तते । ननुकथमेतत् । वैभाषिकसौत्रांतिकाभ्यामात्मनोऽगीकृतत्वात् । यथोक्तमनुव्याख्यानेतन्मतानुवादावसरे । आत्मानंचक्षणस्थितमितिउच्यते । स्वरूपतएवनांगीकृतइत्यस्याकाशादिवत्पंचस्कंधातिरिक्तोनांगीकृतइत्यर्थः । तौहिआत्मानंपंचस्कंधानांमध्येसंज्ञास्कंधेंतर्भावयतः । ततश्चताभ्यामात्मनःक्षणिकतयांगीकृतत्वेनपंचस्कंधातिरिक्तस्यस्थायिनआत्मनस्स्वरूपेणैवानंगीकारात्कुत्रविवादस्स्याद्धर्मिणएवाभावात् । अतएवोदाहृतानुव्याख्यानावसरेसुधायामुक्तं । संतन्यमानंज्ञानमेवात्मेति । अन्योन्यापेक्षयापुंसस्समुदायत्ववेदनमित्येतद्व्याख्यानसमयेप्युक्तं ज्ञानंहिद्विविधं । प्रवृत्तिज्ञानमालयज्ञानंचेति । तत्रालयज्ञानमेवप्रवृत्तिज्ञानदुःखसंस्कारास्पदंपुमानित्युच्यतइति । तथाचात्मनःपंचस्कंधांतर्गतत्वेनसौगतैःक्षणिकत्वांगीकारात्त्वयापिदेवदत्तादेरात्मनःपाकेनक्षणिकत्वांगीकारान्नतत्रप्रत्यभिज्ञयास्थायित्वंसाधयितुंशक्यमितिहृदयं । अस्तुतर्हिरूपादिगुणेषुविवादस्तेषांक्षणिकत्वेसौगतैरुक्तेप्रत्यभिज्ञयास्थायित्वंसाधयिष्यामीतिचेत्तत्राह ॥ [१८।५] गुणाश्चेति । द्रव्येषुचपार्थिवादिषुविवादोनसंभवतीत्युक्तमेवेतिभावः ॥ [१८।६] अस्मादिति । योगिसद्भावेमानाभावादितिभावः ॥ [१८।६] प्रत्यभिज्ञाऽगोचरत्वेनेति । प्रत्यभिज्ञाविषयत्वाभावादितिभावः ॥ [१८।६] निबिडेति । तथाचस्फटिकादेः

क्षणिकत्वेतरभिहितेप्रत्यभिज्ञयास्थायित्वंसाध्यतेतस्यनिबिडावयवत्वेनावयवापचयाभावात्प्रत्यभिज्ञायानभ्रांतित्वमितिभावः॥ तस्यापीति । तथाचतत्रापिप्रत्यभिज्ञायाभ्रांतित्वमेवेतिभावः । ननूक्तरीत्यापार्थिवादिद्रव्यस्यक्षणिकत्वंसौगतवद्वैशेपिकैरप्यंगीकृतमेवेतिनविवादस्तथापिक्षणिकत्वलक्षणेविवादोस्तीत्याशयेनशंकते ॥ पूर्वापरेति । कला विभागः । अयंपूर्वभागोयमपरभागोयंमध्यभागइतिविभागोयत्रकर्तुंनशक्यतेऽसौपूर्वापरकलाविकलकाल स्तत्रवर्तित्वंक्षणिकत्वमित्यर्थः । पूर्वमध्यापरकलारहितःक्षणइष्यतइत्युक्तत्वादितिभावः ॥ आशुतरविनाशित्वमिति । (आशुतरविनाशित्वं)त्रिक्षणावस्थायित्वमित्यर्थः । तथाचाऽऽशुतरविनाशित्वग्राहिप्रत्यभिज्ञयातदभिमतंक्षणिकत्वंनिरस्यतइतिभावः ॥ अयंतुविवादइति । इदंवस्तुनपूर्वापरकलाविकलकालवर्ति किंत्वाशुतरविनाशीत्यर्थेप्रत्यभिज्ञायाअप्रवृत्तेःप्रत्यक्षेणातिसूक्ष्मकालभेदानाकलनादितिभावः । शिष्यःशंकते ॥ नन्विति । अवयवोपचयापचयाभ्यांप्रतिक्षणंदेवदत्तादेरुत्पत्तिविनाशांगीकारेणभेदांगीकारादस्मन्मतेपिसोयंदेवदत्तइतिप्रत्यभिज्ञाभ्रमरूपेवेत्यर्थः । तथाचवैशेपिकादिभिरिवास्माभिरपिप्रत्यभिज्ञायाभ्रांतित्वांगीकारात्तान्प्रतिप्रत्यभिज्ञायाभ्रांतित्वापादनंभवतांयुक्तमित्याशयः ॥ परिणामवादइति । अवयवोपचयापचयाभ्यांपरिणामवादइत्यर्थः ॥ अभेदस्यापीति । भेदाभेदांगीकारादितिभावः ॥ प्रत्यभिज्ञानस्येति । अभेदावगाहिप्रत्यभिज्ञायाइत्यर्थः । अतएवसएवायंदेवदत्तइत्यत्यंताभेदावगाहिप्रत्यभिज्ञायाभ्रांतित्वेपिसोयमितितुनभ्रमइत्युपपादितमन्यत्रेतिद्रष्टव्यं । ननुवर्णेषुप्रत्यभिज्ञयाऽभेदस्सिध्यतुदेवदत्तादाविवभेदोप्यस्तिकिमित्याशंकायांप्रत्यभिज्ञाबलादत्यंताभेदएवसिध्यती

त्याह ॥ **अवयवेति** ॥ **किमपीति** । निरवयवत्वेनतदुपचयापचयकल्पनायोगादित्याशयः । कूटस्थनित्यत्वं निर्विकारि त्वेसतिनित्यत्वं। अत्रज्ञापकमाह॥ **अतएवेति**। यतःपरिणामवादिनांमतेदेवदत्तादौभेदोप्यस्तिवर्णेषुचात्यंताभेदोतएवेत्यर्थः। बौद्धःशंकते ॥ **विरुद्धेति** ॥ **मात्रस्येति** । व्यवस्थापकाभावरूपविशेषणेनाविशिष्टस्येत्यर्थः ॥ ७ ॥ **तथांगीकारेपी** ति । विरुद्धधर्माधिकरणत्वमात्रस्यैवभावभेदहेतुत्वांगीकारेपीत्यर्थः । ननुतन्मतेआकाशोद्वौविनाशौचेत्याकाशस्यैवस्थायि त्वेनांगीकारात्सोयमाकाशइतिप्रत्यभिज्ञायाइतिवक्तव्यं सेयंदिगितिकस्मादुक्तमित्यतआह ॥ **दिक्शब्देनेति** । ननुकंठरवे णाकाशइत्यनुक्त्वादिक्शब्देनतस्यग्रहणेकिंनिमित्तमित्यतआह ॥ **अव्याकृतेति** । स्वमतइतिशेषः ॥ **समनंतरप्रत्ययइ** ति । स्मृतिरित्यर्थइतिकेचित् । अन्येतुसं समानःपूर्वानुभवसमानविषयकोनंतरप्रत्ययःप्रत्यभिज्ञादिरूपोयस्मात्ससमनं तरप्रत्ययः । प्रत्यभिज्ञादिजनकस्संस्कारएवसंस्कारस्कंधइत्यर्थइत्याहुः । अपरेतुसमनंतरप्रत्ययोरूपादिस्कंधानांवासने त्यर्थइत्याहुः । समनंतरप्रत्ययःपूर्वविज्ञानमितिवाचस्पतिः । नचपूर्वविज्ञानस्यसंस्कारजनकस्यकथंसंस्काररूपत्वमितिवाच्यं। तन्मतेवैशेषिकादिमतइवविज्ञानजन्यसंस्काराश्रयस्यस्थायिनआत्मनोऽभावाद्विज्ञानमेवसंस्कारइत्यभ्युपगमादितिवाचस्पति पक्षस्यविवरणटीकायामुपपादितत्वात् । समनंतरप्रत्ययःसजातीयपूर्वविज्ञानमित्यर्थः । आकाशोद्वौविनाशौच इतित्रयं नित्यं स्थायि । असंस्कृतं अविकारीत्यर्थः । विनाशद्वयस्वरूपंच इतिश्लोकेनोक्तमित्यन्वयः ॥ **बुद्धिपूर्वेति** । ते षांपंचस्कंधानांबुद्धिपूर्वविनाशे देवदत्तेनमुद्गरप्रहारादिनासंतानसाहित्येनबुद्धिपूर्वंक्रियमाणेविनाशे प्रतिसंख्यानिरोधगीः

प्रतिसंख्यानिरोधशब्दव्यवहारः सनाशःप्रतिसंख्यानिरोधइत्युच्यतइतियावत् । अयमेवचससंताननाशइत्युच्यते । प्रतिसंख्यानिरोधधीरित्यपिक्कचित्पाठः । तेषांपंचस्कंधानामेव अबुद्धिपूर्वकः देवदत्तकृतमुद्गरप्रहारादिकंविनेतियावत् । संतानमंतराप्रतिक्षणंजायमानोयोनिरोधो विनाशःसः अप्रतिसंख्यया निरोधइतिवर्तते । अप्रतिसंख्यानिरोधइत्युच्यते । अयमेवचनिस्संताननाशइत्युच्यतइतिश्लोकार्थः ॥ तस्मादिति । पंचस्कंधेभ्योन्यत्वादित्यर्थः ॥ यादृशताद‍ृशेति । शब्दभावाभावादीत्यर्थः ॥ यद्यप्यत्रेति । विरुद्धधर्माधिकरणत्वमात्रस्यभेदहेतुत्वमंगीकृत्यप्रत्यभिज्ञाभ्रांतित्वांगीकारेतिप्रसंगइतिभवेदेषाविभीषिकेत्यादिशंकायामित्यर्थः ॥ अतिप्रसंगकथनप्रस्तावइति । सादृश्यात्प्रत्यभिज्ञाभ्रांतिरितिवैशेषिकेणशंकिते यादृशतादृशविरुद्धर्माधिकरणत्वस्यभावभेदहेतुत्वांगीकारेसोयंदेवदत्तइत्यादेरपितथात्वप्राप्तेरितितंप्रत्यतिप्रसंगकथनप्रस्तावइत्यर्थः ॥ तद्व्युत्पादनस्येति । अतिप्रसंगव्युत्पादनस्येत्यर्थः । ननुपंचस्कंधेभ्यइतिकथं । पंचानांस्कंधानांसमाहारइतिसमाहारविवक्षायां तद्धितार्थोत्तरपदसमाहारेच । तद्धितार्थोत्तरपदसमाहारेवाच्ये दिक्संख्येएकार्थेनसमस्येतेइत्यनेनसमासे संख्यापूर्वोद्विगुः । संख्यापूर्वोद्विगुसंज्ञस्स्यादितिसमासस्यद्विगुत्वे द्विगुरेकवचनं द्विगोरर्थस्समाहारएकवत्स्यादित्येकवद्भावे अकारांतोत्तरपदोद्विगुस्समाहारेस्त्रियामिष्टइतिस्त्रीत्वविवक्षायां द्विगोः। द्विगोर्ङीप्स्यादितिङीपि ङकारपकारयोर्लोपेपंचस्कंध ई इतिस्थिते यस्येतिच। भस्येवर्णावर्णयोर्लोपस्स्यादीकारेतद्धितेचपरइत्यनेनभसंज्ञकस्यधकारस्थाऽकारस्यईकारेपरेलोपेपंचस्कंधीतिप्रातिपदिकसिद्धौस्वाद्युत्पत्त्यनंतरंपंचस्कंध्याइतिस्यादित्यतआह ॥

पंचस्कंधेभ्य[१८।२३]इतीति । विशेषणंविशेष्येणबहुलं । भेदकंभेद्येनसमस्यतइतिसूत्रार्थः । तथाचपंचचतेस्कंधाश्चपंचस्कंधास्ते भ्यःपंचस्कंधेभ्यइतिकर्मधारयसमासोविवक्षितइतिनदोषइतिभावः । अत्रयद्यपिपात्रादिभ्यःप्रतिषेधइतिवार्तिकेनपात्रादिग णोपरिङीषःप्रतिषेधात् । पंचानांपात्राणांसमाहारःपंचपात्रमितिवत्पंचस्कंधेभ्यइतिभविष्यति । तथापिपात्रादिगणमध्येऽस्य पाठाभावात् । आकृतिगणत्वकल्पनस्यचागतिकगतित्वात्पंचपात्रमितिवत्पंचस्कंधमित्येवभवितव्यत्वेनपंचस्कंधेभ्यइतिबहु वचनानुपपत्तेश्चेत्थंसमाहितमितिज्ञातव्यं ॥ मूलगतैवकाराभिप्रायमाह ॥ कुतस्तस्यां[१८।२६]इत्यादिना । सत्यं स्वाभाविकं । आद्येपिकिंप्रपंचमिथ्यात्वप्रमाणमेवदिशांभ्रांतिकल्पितत्वेप्रमाणंदिशामपिप्रपंचांतर्गतत्वादित्युच्यते । किंवादिशामेवभ्रां तिकल्पितत्वसाधकमसाधारणंप्रमाणंकिंचिदुच्यते । नाद्यइत्याह ॥ [११।३]प्रपंचेति । नद्वितीयइत्याह ॥ असाधारणेति[११।४] । दिशांभ्रांतिकल्पितत्वेऽसाधारणप्रमाणमाशंकते ॥ [११।५]नन्विति । सौगतास्तुसोपनीतिमुदाहृतिमितिवचनात् । यस्येत्यादि नाव्ययवप्रयोगइतिज्ञातव्यं । अनेनदिशोभ्रांतिकल्पिताः परोपाधिनिबंधनस्वरूपवत्त्वात् । अंगुल्यवष्टब्धनयनोपाधि निमित्तापरचंद्रइवेत्यनुमानमुक्तंभवति । अनुमानेस्वरूपासिद्धिंवक्तुमाह ॥ किंदिक्सामान्येत्यादि[११।८] । नन्वंधकारेपी तिकथमुक्तं परेणह्यादित्योदयादिनैवदिक्कल्पनोक्ता । नत्वालोकेन । तथाचांधकारेसत्यालोकाभावोवर्ततइत्येवप्राप्तं नतु दिगुपाधित्वेनपराभिमतानामादित्योदयादीनांसर्वेषामभावः । नहिसूर्योदयाद्यभावोंधकारः । तथाचादित्योदयादीनां दिक्कल्पकत्वांगीकारेकथमेतद्व्यभिचारप्रदर्शनमित्यतआह ॥ [११।८]पराभिमतेति । कथमादित्योदयाभावेपिदिक्स्वरूपमुप

लभ्यतइत्यतस्तदुपपादयति ॥ [१।१।१०] अवकाशमात्रमिति । केवलाव्याकृताकाशमेवेत्यर्थः ॥ [१।१।११] दिगित्युच्यतइति । दिक्सामान्यमित्युच्यतइत्यर्थः ॥ [१।१।११] परनिरपेक्षेणेति । आदित्योदयादिरूपोपाधिनिरपेक्षेणेत्यर्थः ॥ [१।१।११] सर्वावस्थास्विति । आदित्योदयसद्भावदशायांतदभावदशायांचेत्यर्थः ॥ [१।१।११] अन्यथेति । साक्षिणावकाशमात्ररूपदिक्सामान्यस्वरूपस्यासिद्धत्वइत्यर्थः । अंधकारे दिक्सामान्यस्वरूपकल्पकादित्योदयाद्युपाध्यभावदशायां ॥ [१।१।१२] अवकाशभागा एवेति । अव्याकृताकाशस्यांशाएवेत्यर्थः ॥ [१।१।१३] अन्यथेति । अव्याकृताकाशप्रदेशरूपदिग्विशेषस्वरूपस्यसाक्षिणाप्रतीत्यनंगीकारइत्यर्थः । तदभावेपि दिग्विशेषस्वरूमात्रकल्पकादित्योदयाद्युपाध्यभावेपि ॥ [१।१।१३] मूर्तांतरेति । कुड्यादीत्यर्थः । ननुदिग्विशेषस्वरूपत्वेनाभिमतानामवकाशभागानामौपाधिकत्वेपरोपाधिकत्वेनदिग्विशेषस्वरूपाणांमिथ्यात्वमेवप्राप्तमित्याशंक्य निषेधति ॥ [१।१।१४] नचभागानामिति ॥ [१।१।१५] संबंधाभावादिति । उपाधिसंबंधार्थंपुनरौपाधिकभागांतरकल्पनेचानवस्थेतिभावः । तदीयंदिग्विशेषस्वरूपसंबंधियत्प्राच्यादित्वंतदादित्योदयादिनाकल्प्यमिति द्वितीयपक्षंदूषयितुमाह॥ [१।१।१५] प्राच्यादित्वंचेति॥ [१।१।१५] तत्स्वरूपेति । दिग्विशेषस्वरूपेत्यर्थः ॥ [१।१।१५] अंधकारेपीतीति । दिग्विशेषस्वरूपंचाऽऽदित्योदयादिनिरपेक्षेणसाक्षिणैवप्रतीयते । कथमन्यथामूर्तांतरावष्टब्धावकाशभागपरित्यागेनभागांतरेकरप्रसारणादिकंकुर्युरित्युक्तमेवोत्तरमित्यर्थः। तदपि प्राच्यादिशब्दवाच्यत्वमपि। नकाल्पनिकमित्यन्वयः। नकाल्पनिकं अस्माच्छब्दादयमर्थोबोद्धव्यइतिपरमेश्वरेच्छारूपस्संकेतोनेत्यर्थः । येनप्राच्यादिशब्दवाच्यत्वस्यपरमेश्वरेच्छारूपपरोपाधिकत्वप्राप्त्यापुनर्मिथ्यात्वंस्यादितिभावः । कुतोनकाल्पनिकमि

त्यतउक्तं॥ [११।१६] शब्दार्थसंबंधस्यौत्पत्तिकत्वेनेति । स्वाभाविकत्वेनेत्यर्थः। यथोक्तंजैमिनिना। औत्पत्तिकस्तुशब्दस्यार्थेनसं
बंधइति। उक्तंचानुव्याख्याने । नित्ययोगोपिशब्दानामर्थैर्नैवनिषिध्यतइति। संकेतपक्षस्तुसुधायांदूषितइत्यवधेयं ॥ [११।१६] एवंत
र्हीति। अवकाशभागभूतानांदिशामनौपाधिकत्वइत्यर्थः ॥ [११।१६] दिक्प्रतीतीति । प्राच्यादिदिक्प्रतीत्यर्थिनइत्यर्थः॥ [११।१६] किमि
तीति। दिक्स्वरूपस्यादित्योदयकल्पितत्वएवह्युपाधिभूतादित्योदयादिप्रतीक्षोपपद्यते नान्यथेतिभावः । दिगंतरे प्राच्यां ।
दिगंतरत्वभ्रांतिं प्रतीचीत्वभ्रांतिं । तत्प्रतीक्षणं आदित्योदयप्रतीक्षणं ॥ [११।१८] तेनेति । कादाचित्कभ्रांतिनिवृत्त्यर्थमेवादि
त्योदयप्रतीक्षावचनेनेत्यर्थः ॥ [११।१८] अनेनेति । आदित्योदयदर्शनस्यप्राच्यधिष्ठानकप्रतीचीत्वप्रकारकभ्रांतिनिवारकत्वरूपव्या
प्यधर्मकथनेना ऽऽदित्योदयस्यप्राचीशब्दप्रवृत्तिनिमित्तत्वलाभात्तदर्थमपिप्राच्यादिशब्दवाच्यवाचकभावलक्षणसंबंधज्ञान
लक्षणव्युत्पत्त्यर्थमपिप्रवृत्तिनिमित्तभूतानामादित्योदयादीनामुपयोगइतिव्यापकंसूचितमित्यन्वयः । एवंचयद्यदधिष्ठानक
भ्रमनिवर्तकंतत्तच्छब्दप्रवृत्तिनिमित्तं । यथाशुक्त्यधिष्ठानकरजतत्वप्रकारभ्रांतिनिवर्तकंशुक्तित्वं । शुक्तिशब्दप्रवृत्तिनिमि
त्तं । प्रवृत्तिनिमित्तभूतेनचतेनशुक्तिशब्दवाच्यत्वज्ञानंभवति । एवमादित्योदयस्यापिप्राच्यधिष्ठानकप्रतीचीत्वप्रकारकभ्रां
तिनिवर्तकत्वात्प्राचीशब्दप्रवृत्तिनिमित्तत्वं । प्रवृत्तिनिमित्तभूतेनचतेनप्राचीशब्दवाच्यत्वज्ञानंभवतीत्याशयः । ननुगवादि
शब्दप्रवृत्तिनिमित्तस्यसास्नादेर्यावद्द्रव्यभावित्वदर्शनेनादित्योदयादीनांतथात्वाभावात्कथंप्रवृत्तिनिमित्तत्वमित्यतउक्तं ॥ प्रा

च्यादिशब्दव्युत्पत्तावादित्योदयादीनामुपलक्षणत्वेनोपात्तत्वादिति । व्युत्पित्सुभिरितिशेषः । प्रवृत्तिनिमित्तं हिद्विविधं । विशेषणमुपलक्षणंचेति । तत्राद्यंसास्नादि । द्वितीयंकाकादि । तत्रदेवदत्तगृहादौकाकादेरिवप्राच्यादिशब्दव्युत्पत्तावप्यादित्योदयादेःकादाचित्कत्वेनव्युत्पत्तिसमयेऽविद्यमानत्वरूपोपलक्षणत्वेनप्रवृत्तिनिमित्तत्वमित्यर्थः। ननुयद्यदधिष्ठानकभ्रमनिवर्तकंतत्तच्छब्दप्रवृत्तिनिमित्तमितिव्याप्तिरयुक्ता । तथाहि । धूमवत्त्वंपर्वताधिष्ठानकनिर्वह्नित्वप्रकारकभ्रमनिवर्तकमितिपर्वतशब्दप्रवृत्तिनिमित्तंस्यात् । तेनतच्छब्दवाच्यत्वज्ञानंचस्यात् । तथाशुक्त्यधिष्ठानकरजतत्वप्रकारकभ्रमनिवर्तकत्वंरजताभावज्ञानस्याप्यस्तीतिरजताभावोपिशुक्तिशब्दप्रवृत्तौनिमित्तंस्यात्तेनतच्छब्दवाच्यत्वज्ञानंचस्यात् । तथाचव्यभिचारइत्याशंक्यव्याप्तौकिंचिद्विशेषणंदेयमित्यभिप्रेत्यतद्विशेषणंप्रकृतउपपादयति ॥ दिगंतरेदिगंतरभ्रमंस्यतद्विषयत्वादिति । दिगंतरे प्रतीच्यां । दिगंतरभ्रमस्य प्राचीत्वभ्रमस्यतद्विषयत्वात् । तद्विषयोयस्यतत्तद्विषयंतस्यभावस्तद्विषयत्वंतस्मात्तद्विषयत्वात् । तद्विषयकत्वात् । आदित्योदयप्रकारकत्वादित्यर्थः। इदमत्राकूतं । यद्यदधिष्ठानकभ्रमनिवर्तकंयदारोपेचयत्प्रकारत्वेनभासतेतत्तत्रप्रवृत्तिनिमित्तमितिव्याप्तिरभिप्रेता । यथाशुक्तित्वंशुक्त्यधिष्ठानकरजतत्वप्रकारकभ्रमनिवर्तकंयदारोपेयस्यशुक्तिरूपाधिष्ठानस्यान्यत्रवं(रं)गादावारोपेचशुक्तित्वंप्रकारत्वेनभासतइतिशुक्तित्वंशुक्तिशब्दप्रवृत्तौनिमित्तंभवति । एवंचनव्यभिचारः । धूमवत्त्वस्यरजताभावस्यवापर्वतशुक्त्यधिष्ठानकनिर्वह्नित्वरजतत्वप्रकारकभ्रमनिवर्तकत्वसद्भावेपिपर्वतस्यशुक्तेर्वाऽन्यत्रारोपेधूमवत्त्वस्यरजताभावस्यवाप्रकारत्वेनभासमानत्वाभावान्नतयोस्तच्छब्दप्रवृत्तिनिमित्तत्वं ।

प्रकृतेचप्रतीच्यांप्राचीत्वारोपेप्यादित्योदयस्यप्रकारत्वेनभासमानत्वाद्युक्तंतच्छब्दप्रवृत्तिनिमित्तत्वमिति । अत्रयद्यदधिष्ठानकभ्रमनिवर्तकंतत्तच्छब्दप्रवृत्तिनिमित्तमित्यंशोमूलेभ्रांतिनिवर्तकत्वोक्त्यासूचितः । दिगंतरइत्यादिनासूचितोयदारोपेचयद्भासतइत्यंशः । कादाचित्कभ्रांतीतिमूलेसामान्योक्त्यासूचितइत्यवधेयं ॥ [१९।२१] किंदिक्स्वरूपमित्यादि । किंदिक्स्वरूपस्यवास्तवत्वेस्तंभादिवद्व्यवस्थितत्वंस्यादित्यापाद्यते । उतप्राच्यादिशब्दवाच्यत्वस्यवास्तवत्वेस्तंभादिवद्व्यवस्थितत्वंस्यादितिवेत्यर्थः ॥ [१९।२१] व्यवस्थितत्वादिति । तथाचेष्टापत्तिरितिभावः । नन्वस्तुप्राच्यादिशब्दानांसंबंधिशब्दत्वं तथाप्यव्यवस्थितत्वादवास्तवत्वंदिशांदुष्परिहरमित्यतआह ॥ [१९।२२] नहीति । कस्यचित्पितुरेवान्यंप्रतिपुत्रत्वात्कस्यचित्पुत्रस्यैवान्यंप्रतिपितृत्वादित्यर्थः । दिशोमिथ्याभूताः भ्रांतिविषयत्वाच्छुक्तिरजतादिवदित्यनुमानंदिशांमिथ्यात्वेप्रमाणमित्याशंकते ॥ [१९।२३] नन्विति ॥ [१९।२४] साधारणमिति । आरोप्याधिष्ठानसाधारणंभ्रांतिविषयत्वमात्रमित्यर्थः । सिद्धसाधनत्वमेवविवृणोति ॥ [१९।२४] आरोप्याया इति । नन्वारोप्यायादिशोमिथ्यात्वेदिक्स्वरूपस्यसत्यत्वांगीकारोभग्नइतिचेत्तत्राह ॥ [१९।२४] आरोप्यस्येति । दिक्स्वरूपस्येत्यर्थः । तथाचारोप्यस्यरूप्यस्यमिथ्यात्वेपिप्रधानभूतापणस्थरूप्यस्यसत्यत्ववदारोप्यदिक्स्वरूपस्यमिथ्यात्वेपिप्रधानभूतदिक्स्वरूपस्यसत्यत्वमेवेत्यर्थः ॥ [१९।२६] कथमितीति । अधिष्ठानतयाभ्रांतिविषयत्वंसाधारणंवाकथंविज्ञानशून्ययोरस्तीत्याशंकायामाहेत्यर्थः ॥ [२०।१] नोक्तरूपमिति । ज्ञानमेवैकमखिलज्ञेयाकारंप्रभासते । तत्रसंततिभेदश्चस्वभेदोभेदएवच । कल्पिताःप्रतिभासंते । शून्यंमनोवाचामगोचरमित्यादिनाविज्ञानवादिशून्यवादिभ्यामुक्तरूपमित्यर्थः । तत्किमनेनानुमानस्यदूषणमु

कमित्यतआह ॥ [२०१३] तथाचेति ॥ [२०१३] उक्तविधयेति । विज्ञानंशून्यंवानतत्त्वमित्येवमतत्त्वताप्रकारकभ्रमाधिष्ठानत्वस्यविज्ञान शून्ययोरपिसद्भावेनाधिष्ठानतयाभ्रांतिविषयत्वमनैकांतिकमित्यर्थः । दिशइत्यनंतरंसत्याएवेतिशेषपूरणं । स्थैर्योपसंहारो वर्णस्थैर्योपसंहारः ॥ [२०१४] तत्रातईतीति । तत्रद्वितीयेस्थैर्योपसंहारे अतइत्यस्यप्रत्यभिज्ञानादित्यर्थोद्रष्टव्यइत्यर्थः । विज्ञान शून्ययोरुभयोरपिप्रकृतत्वाद्विज्ञानपरित्यागेनशून्यवदेवेत्युक्तौकिंनिमित्तमित्यतआह ॥ [२०१४] कैश्चिदिति ॥ [२०१५] अनेनेति । दिशां सत्यत्वोपसंहारपरेणानेनमूलवाक्येनेत्यर्थः ॥ [२०१५] प्रागुक्तस्येति । प्रमाणंविनैवमेवदिशांभ्रांतिकल्पितत्वंचेदुच्यतेतर्हिसत्यत्वेन त्वदभ्युपगतयोर्विज्ञानशून्ययोरपिभ्रांतिकल्पितत्वंस्यादितिप्रागुक्तस्यातिप्रसंगस्य नहिविज्ञानशून्ययोःकल्पितत्वंत्वदभिम तं अतोनदिशामेवमेवभ्रांतिकल्पितत्वमितिविपर्ययपर्यवसानंचोक्तंभवतीत्यर्थः॥ [२०१६] वर्णाएवोच्यंतईति । पदादिबुद्धिविषया णांवर्णानामेवार्थवेदनकरणत्वेनवेदादिशब्दवाच्यत्वादितिभावः ॥ [२०१६] प्रक्रांतत्वादिति । नचोच्चारणकालएववर्णानामुत्पत्तिरि त्युपक्रांतत्वादित्यर्थः ॥ [२०१६] तात्पर्यत्विति । पदातिरिक्तवाक्यस्फोटनिराकरणायवेदशब्दवाक्यशब्दग्रहणमितितात्पर्यवचनप दप्रयोजनोक्तिसमयएवोक्तमित्यर्थः ॥ [२०१८] परिहृतत्वादिति । प्रत्यभिज्ञाविरोधेनेत्यर्थः ॥ [२०१८] बाधकाभावादिति । अपौरुषेय त्वांगीकारइतिशेषः। अपौरुषेयत्वंसिध्यतीत्यनुवर्तते॥ [२०१९] उक्तानुमानमात्रादिति । वेदकर्तुरप्रसिद्धेरित्यनेनोक्ताद्वेदोपौरुषेयो प्रमितकर्तृकत्वाद्गगनवदित्युक्तानुमानमात्रादित्यर्थः। स्वातंत्र्याभावः सजातीयोच्चारणमनपेक्ष्योच्चारयितृत्वाभावः॥ [२०२०] एवंपूर्व मित्यादि। एवमेवपूर्वकालेतत्पूर्वकालेचप्रत्यभिज्ञानादित्यर्थः। नन्वादिसृष्टौकस्याप्युपदेष्टुरभावेनकेषामपिवेदाध्ययनाभावे

नैतादृशप्रत्यभिज्ञायाअयोगादर्वाचीनपुरुषस्वातंत्र्यस्यैवप्रतीतेस्तदाकथंवेदस्यापौरुषेयत्वसिद्धिरित्यतआह ॥ **आदिसृष्टौ
त्विति**।सर्गेसर्गेमुनैवैतउद्गीर्यतइत्यादिनाविष्णोरेवब्रह्मादीन्प्रत्युपदेष्टृत्वस्यवक्ष्यमाणत्वात्तस्यापिमहोपाध्यायतुल्यत्वेनोक्तप्र
त्यभिज्ञानोपपत्त्यानिरुक्तस्वातंत्र्याभावाद्व्यत्यासाभावएवसिध्यतीतिवक्ष्यामइत्यर्थः।वक्ष्यमाणानुमानेआश्रयासिद्धिस्वरूपा
सिद्धिपरिहारमाह॥ **अस्तितावदित्यादिना** ॥ **पूर्वोक्तप्रकारेणेति** । यस्यतौनाभिमतौनासौसमयीत्यादिनापूर्वोक्तप्रकारे
णेत्यर्थः॥ **तच्चेति** । सर्ववादिसंप्रतिपन्नाधर्माद्याइत्यर्थः॥ **वस्तुत्वादिति** । सर्ववादिसंप्रतिपन्नत्वमेवेहवस्तुत्वमभिप्रेतं । तथा
चवस्तुत्वात्सर्वसंप्रतिपन्नत्वादित्यर्थः । पक्षतावच्छेदकमेवात्रहेतुरितिभावः । अत्राप्रयोजकताशंकापरिहारायहेतूच्छित्तिरूप
मनुकूलतर्कमाह ॥ **नहीति** । कुतोनसंभवतीत्यतआह ॥ **अतिप्रसंगादिति** । अन्यथाशशविषाणादावपिसर्वसंप्रति
पत्तिस्स्यादित्यतिप्रसंगादित्यर्थः । संप्रतिपत्तिंप्रतिमूलभूते । आगमंविनानुमानादीनामित्यन्वयः । आगमंविनास्थिता
नां आगमातिरिक्तानामित्यर्थइत्यभिप्रेत्यव्याचष्टे ॥ **अपौरुषेयेति** । किमनेनोक्तंभवतीत्यतआदिपदार्थंदर्शयन्नपौ
रुषेयवाक्यातिरिक्तत्वोक्त्यालब्धमर्थंचदर्शयन्नाह ॥ **तत्श्चेति** । प्रत्यक्षादीनामितिवक्तव्येऽनुमानस्यादित्वेनग्रहणे
निमित्तमाह ॥ **प्रत्यक्षस्येत्यादिना** ॥ **पूर्वोक्तन्यायादिति** । पौरुषेयागमस्यापिधर्मादिप्रतिपादकत्वमसंभावितं ।
अज्ञानविप्रलंभयोःप्राप्तेरित्याद्युक्तरीत्यातत्प्रणेतर्याप्त्यनिश्चयादित्यर्थः । असंभावितत्वेकिमर्थंतदुभयग्रहणमितिपृच्छति ॥
किंत्विति । उत्तरमाह ॥ **प्रमाणत्वमात्रेणेति** ॥ **योयद्गोचरोनभवतीति** । सत्यांव्याप्तौव्यधिकरणत्वमाकिं

चित्करमित्याशयः । व्यधिकरणत्वशंकानर्हप्रयोगद्वयंमूलाभिप्रेतंदर्शयति ॥ [२०।१८] अर्थवेत्यादिना ॥ [२०।१९] एवमपीति । प्रयोगद्वयेव्यधिकरणत्वाभावेपीत्यर्थः ॥ [२०।२०] साध्याविशिष्टेति । अतद्गोचरत्वादित्यस्यहेतोरनुमानादीनांधर्मादिविषयकप्रमाजनकत्वाभावादित्यर्थः । धर्मादिविषयकप्रमितिकरणत्वाभावएवचसाध्यइतिप्रथमप्रयोगेसाध्याविशिष्टत्वं । द्वितीयप्रयोगेपि धर्मादीनामनुमानादिजन्यप्रमाविषयत्वाभावःसाध्यः । अनुमानादिजन्यप्रमाविषयत्वाभावरूपंतदगोचरत्वं हेतुरितिद्वितीयप्रयोगेचसाध्याविशिष्टत्वमित्यर्थः । उभयत्रापिसमाधानमाह ॥ [२०।२०] फलाभावस्येत्यादिना । फलोपधानाभावस्येत्यर्थः । सामर्थ्ययोग्यता । तदभावस्येत्यर्थः । तथाचानुमानादीनिधर्मादिविषयप्रमारूपफलजनकानिनभवंति । धर्मादिविषयकप्रमाजनकत्वयोग्यतारूपसामर्थ्यशून्यत्वात् । यद्यज्जनकत्वयोग्यताशून्यंतत्तज्जनकंनभवति यथादंडःपटस्य । तथाधर्मादीन्यनुमानादिजन्यप्रमारूपफलविषयभूतानिनभवंति अनुमानादिजन्यप्रमाविषयत्वयोग्यताशून्यत्वात् । यद्यज्जन्यप्रमाविषयत्वयोग्यताशून्यंतत्तज्जन्यप्रमाविषयोनभवति । यथारूपंघ्राणस्येतिसामान्यव्याप्तिमूलकप्रयोगद्वयस्यात्राभिप्रेतत्वेननसाध्याविशिष्टतेत्याशयः । प्रसक्तप्रतिषेधप्रकारंदर्शयति ॥ [२०।२०] प्रत्यक्षमिति । धर्मादिविषयकंप्रत्यक्षमित्यर्थः । तदीयेषु तदाश्रितेषु ॥ [२०।२३] सामर्थ्यादिति । धर्मादीनांचरूपादिरहितत्वाद्रूपादिमद्द्रव्याश्रितत्वाभावाच्चनबाह्यप्रत्यक्षविषयत्वमितिभावः ॥ [२०।२१] मानसमिति । धर्मादिकंमनोजन्यानुभवविषयइत्यर्थः ॥ [२०।२३] अनुभवेति । अनुभवानुव्यवसाययोरभावादित्यर्थः । धर्मादिविषयकानुभवाभावेहेतुस्तदवगाह्यनुव्यवसायाभावादिति॥ [२०।२३] अन्यथेति । सुखादिवद्धर्मादे

र्मानसप्रत्यक्षविषयत्वइत्यर्थः ॥ [२०।२२]इतिस्यादिति । इत्येवंमनोजन्यानुभवावगाह्यनुव्यवसायस्स्यादित्यर्थः । ननुधर्मादावनु भवानुव्यवसाययोरभावेपि । यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं । अभिलाषोपनीतंचतत्सुखंस्वःपदास्पदमितिवचनेनस्वर्गस्य सुखरूपत्वावगमात् नरकस्यचदुःखरूपत्वान्मनसातद्विषयकोनुभवोनुव्यवसायश्च स्यादेवेत्यतआह ॥ [२०।२२]स्वर्गादीनांत्विति । परलोकेजायमानानांसुखादीनांविप्रकृष्टत्वेनैतद्देहावच्छेदेनमनसाऽनुभवितुमयोग्यतयानमानसप्रत्यक्षविषयत्वमित्यर्थः । योगिप्रत्यक्षमेवधर्मादिसद्भावेप्रमाणमित्याशंक्यनिराकरोति ॥ [२०।२२]नचेति । तस्यापि योगादिसिद्धानांप्रत्यक्षस्यापि । अनुमानादीनामित्यत्रादिपदोक्तयोगिप्रत्यक्षस्यापिआगमंविनाअपौरुषेयंवाक्यंविनासिद्ध्या धर्मादिविषयेप्रामाण्यं प्रमापकत्वंनास्तीति मूलयोजनामभिप्रेत्याह ॥ [२०।२३]तदिदमुक्तमिति । तेषां योगादिसिद्धानां । तेन स्वकीयप्रत्यक्षेण । ननुतर्हितदीयप्रत्यक्षेणैवास्माकमपितन्निश्चयोऽनंतरमनुष्ठानंचसंभवतीतिचेत्तत्राह ॥ [२०।२४]नहीति । एवंप्रमाणत्वमात्रेणप्रसक्तंप्रत्यक्षंनिराकृत्यानुमानं निराचष्टे ॥ [२०।२४]नापीति ॥ [२०।२५]तत्प्रतिबद्धेति । धर्मादिव्याप्तलिंगाभावादित्यर्थः । ननुविशिष्यधर्मादिव्याप्तलिंगाभावेपि ज्योतिष्टोमादिकंधर्मादिसाधनंतदुद्देशेनप्रेक्षावद्भिःक्रियमाणत्वात् । यद्यदुद्देशेनप्रेक्षावद्भिःक्रियतेतत्तत्साधनं । यथाकृष्यादिकंधान्यादिसाधनमितिसामान्यतोदृष्टेनधर्मादिसिद्धिर्भविष्यतीत्यतआह ॥ [२०।२५]सामान्यतोदृष्टेनेति । सामान्यव्याप्तिमूलकत्वादस्यसामान्यतोदृष्टत्वंज्ञातव्यं । वैशेषिकादिभिस्साध्याप्रसिद्धेर्दूषणत्वांगीकारान्नैवमनुमातुंशक्यतइतिज्ञापयितुंकथं

चिदित्युक्तं । अन्येतु । ननुदेवदत्तशरीरादिकंदेवदत्तविशेषगुणजन्यं कार्यत्वेसतिदेवदत्तस्यभोगहेतुत्वात् । देवदत्तप्रयत्न जन्यस्रगादिवदित्यनुमानेनधर्मादिसिद्धिर्भविष्यतीत्यतआह ॥ [२०।२५] सामान्यतोदृष्टेनेति । अस्यप्रत्यक्षायोग्यार्थानुमापकत्वा त्सामान्यतोदृष्टत्वं । यथाहुः । दृष्टंसामान्यतोदृष्टमितिचास्यविधाद्वयं । पूर्वप्रत्यक्षयोग्यार्थंतदयोग्यार्थमुत्तरमिति । देवद त्तशरीरादिकंधर्मातिरिक्तदेवदत्तविशेषगुणजन्यमित्यपिसाधयितुंशक्यत्वेनातिप्रसंगित्वान्नैवमनुमातुंयुक्तमित्याशयेनकथंचि दित्युक्तमित्याहुः । केचित्तु । ननुतथापिसुखदुःखादिकमसाधारणकारणजन्यं भावत्वेसत्युत्पत्तिमत्त्वात् । घटादिवदिति सामान्यतोदृष्टेनपरिशेषाद्धर्मादिस्वरूपसिद्धिर्भविष्यतीत्यतआह । सामान्यतोदृष्टेनेतीत्याहुः ॥ [२०।२५] साधनेत्यादि । पूर्वाग्रदू र्वास्थापनादिसाधनजनितमदृष्टमीदृशंफलमुपजनयतीत्येवंरूपोधर्मविशेषइत्यर्थः । अनुमातुंशक्यः अनुमानेननिश्चेतुंशक्यः । ननुमास्तुतन्निश्चयः । तथापितत्स्वरूपज्ञानमात्रेणैवालमित्याशंक्यनिषेधति ॥ [२०।२६] नचेति । नन्वनुमानस्यधर्मज्ञापकत्वाभावे अथातोधर्मजिज्ञासेत्यादिनाधर्ममीमांसाकरणवैयर्थ्यस्यात् । मीमांसायायुक्त्यनुसंधानरूपतयाऽनुमानरूपत्वादित्याशंक्यप्र तिषेधति ॥ [२०।२६] नचैवमिति । अनुमानस्य आगमं अपौरुषेयागमंविना । स्वातंत्र्येणधर्मादिषुप्रामाण्यं तत्प्रमापकत्वंनास्तीति मूलयोजनामभिप्रेत्यतत्फलितमर्थमाह ॥ अपौरुषेयं[२०।२६]वाक्येनेति । यथाहुः । धर्मेप्रमीयमानेहिवेदेनकरणात्मना । इति कर्तव्यताभागंमीमांसापूरयिष्यतीति । प्रमाणत्वमात्रेणप्रसक्तंपौरुषेयागमंनिराचष्टे ॥ [२३।१] नचेति ॥ [२३।२] ईदृशंयतइति । तथाचत

द्वाक्येनधर्मादिसिद्धिर्भविष्यतीतिभावः । आगमंविनानुमानादीनामित्यस्यापौरुषेयागमव्यतिरिक्तानामित्यर्थस्योक्तत्वात् । तल्लब्धस्यपौरुषेयागमस्यमन्वादिप्रणीतस्यधर्मादिषुप्रामाण्यं धर्मादिप्रमापकत्वं । नास्ति । कुतः । आगमंविना अपौरुषेय वाक्यमूलकत्वंविना । तेष्वाश्वासाभावादितिशेषइतिमूलयोजनामभिप्रेत्याह ॥ [२९१२] अपौरुषेयेति ॥ [२९१३] अत्रेत्यादि । अनेन धर्मादिकमपौरुषेयवाक्यैकप्रमाणकं अनुमानप्रत्यक्षपौरुषेयवाक्याप्रमाणकत्वेसतिसप्रमाणकत्वाद्व्यतिरेकेणघटवदितिपरिशे षरूपव्यतिरेक्यनुमानप्रदर्शनपरंमूलवाक्यमित्युक्तंभवतीतिज्ञातव्यं । नन्वस्त्वपौरुषेयवाक्यं तद्वेदएवेतिकुतइत्यतआह ॥ [२९१४] तच्चेति । अपौरुषेयमित्यर्थः ॥ [२९१५] नचैवमिति । कर्तृप्रसिद्धिशून्योधर्मादिव्यवस्थापरश्चेत्यर्थः ॥ [२९१६] नन्वेवमिति । अपौरु षेयवाक्येनैवधर्मादिसिद्ध्यंगीकारइत्यर्थः । सर्वेषां वादिनां । तथाचतेषांधर्मादावानुमानिकत्वादिविप्रतिपत्तिर्नस्यादिति भावः । वेदेन धर्मंचरतमाधर्ममित्यादिवेदेन । प्रतीते सामान्येनसर्ववादिनांप्रतीतेसति । तद्विशेषेषु अग्नीषोमीयपश्वालंभ नादिरूपधर्मविशेषेषु । तं अग्नीषोमीयंपशुमालभेतेत्यादिवेदं । अतिक्रम्य नहिंस्यादित्यादेरुत्सर्गाभिप्रायेणप्रवृत्तत्वमज्ञात्वा स्वबुद्धिदोषाद्बौद्धादिनां अहिंसैवपरमोधर्मः । केशोल्लुंठनंधर्मः । सप्तघटिकातःप्राग्भोजनंधर्मइत्यादिरूपाविप्रतिपत्तयः । प्र तीयंते प्रतीताभवंतिविस्तृताभवंतीत्यर्थः । एवंचधर्मादेरानुमानिकत्वादिविप्रतिपत्तिस्स्वमतिदोषाद्युक्तेतिभावः ॥ [२९१७] अन्यथे ति । सामान्यतोधर्मादिस्वरूपस्यवेदात्प्रतीत्यभावइत्यर्थः ॥ [२९१७] बुद्धाविति । तथाचधर्मादावनुमानप्रवृत्तिरपिनसंभवति । आश्रयासिद्धिप्रसंगादितिभावः ॥ [२९१८] अतएवेति । वाक्यप्रामाण्यस्यगुणजन्यत्वादेवेत्यर्थः ॥ [२९१९] प्रामाण्यंनस्यादिति ।

यथार्थज्ञानजनकत्वरूपंप्रामाण्यंनस्यादित्यर्थः । ननुगुणाभावेप्यस्तुवेदस्यप्रामाण्यमित्यतआह ॥ [२।१।९] नहीति । बीजेनकलमांकुरेजननीयेकलमत्वस्येववेदेनयथार्थज्ञानेजननीयेगुणस्यकारणत्वेनतदभावेतज्जनकत्वासंभवादितिभावः । अतएव वेदस्यापौरुषेयत्वादेव ॥ [२।१।१०] कारणाभावादिति । वाक्यगताप्तोक्तत्वगुणजन्यत्वाभावादित्यर्थः । क्वचित् पौरुषेयवाक्ये। सावकाशेन यादृच्छिकतयासावकाशेन । एकेन गुणसन्निधानेन । बहूनां अपौरुषेयत्वप्रतिपादकागमानां । प्रमाणानांबहुत्वोपपादनायैवप्राग्वेदस्यापौरुषेयत्वमुक्तवक्ष्यमाणानेकप्रमाणसिद्धमित्युक्तमितिज्ञातव्यं ॥ [२।१।१४] वैपरीत्यस्यैवेति । निरवकाशेनैकेनसावकाशानेकबाधस्यैवयुक्तत्वादित्यर्थः। आप्तोक्तत्वगुणेसतिवाक्यस्ययथार्थज्ञानजनकत्वरूपंप्रामाण्यं तदभावेतदभावइतिनसंभवति । यादृच्छिकसंवादिस्थलेआप्तोक्तत्वगुणाभावेपिभ्रांतप्रतारकवाक्यस्ययथार्थज्ञानजनकत्वदर्शनेनव्यतिरेकतोव्यभिचारादित्याह ॥ [२।१।१५] दृश्यतेचेति । ननुयादृच्छिकसंवादिस्थलेयथार्थज्ञानोत्पत्तौवाक्यस्यकारणत्वमेवनास्तीत्याशंक्यनिषेधति ॥ [२।१।१६] नचतत्रेति । प्रामाण्यस्योत्पत्तौज्ञानजनकातिरिक्तजन्यत्वरूपपरतस्त्वसाधकमनुमानमाशंक्यनिराकरोति ॥ [२।१।१६] एतेनेति । अधीनत्वं जन्यत्वं । ननुप्रमायाअपिज्ञानत्वेनज्ञानहेतुजन्यतयातदतिरिक्तहेतुजन्यत्वाभावाद्व्याघातइतिचेन्न । ज्ञानहेतुजन्यत्वेसतितदतिरिक्तहेतुजन्येत्यभिप्रेतत्वात् । अप्रमायादोषजन्यत्वेनसाध्यपर्यवसानं पक्षेतुगुणजन्यत्वेनेतिविवेकः । ईश्वरप्रमायांव्यभिचारवारणायकार्यत्वेसतीतिविशेषणं । तावत्युक्तेनिर्विकल्पकज्ञानेव्यभिचारः । तस्यनिर्विकल्पकप्रत्यक्षस्यभूयोवयवेंद्रियसन्निकर्षरूपगुणजन्यत्वाभावेनसाध्याभावादतस्तद्विशेषत्वादित्युक्तं । सप्रकारकज्ञानत्वंतदर्थइतिन

व्यभिचारः । अथवाघटादौव्यभिचारवारणायतद्विशेषत्वादित्युक्तं । ज्ञानविशेषत्वादित्यर्थः । ज्ञानसामान्येव्यभिचारवारणायविशेषपदमितिद्रष्टव्यं । एतेनेत्यस्यविवरणं ॥ [२१।१७] **बाधितविषयत्वेनेति** । प्रकृतेज्ञानहेतुजन्यत्वेसतितदतिरिक्तहेतुजन्यत्वंसाधयताहिगुणजन्यत्वेनपर्यवसानंवक्तव्यं । तस्यपक्षीभूतयादृच्छिकसंवाद्यनाप्तवाक्यजन्यप्रमायामभावाद्बाधितविषयत्वमित्यर्थः । तस्य बौद्धादिवाक्यस्य ॥ [२१।१८] **अज्ञानेत्यादि** । अज्ञानविप्रलंभप्रमादापटुकरणत्वरूपपुरुषदोषमूलकत्वेनेत्यर्थः । नन्वधिकंप्रविष्टंनतुतद्धानिरितिन्यायेनबौद्धादिवाक्यस्यप्रमाजनकत्वंतुस्यादेवेतिचेत्तत्राह ॥ [२१।१९] **वाक्यगताहीति** । दोषाः अज्ञानविप्रलंभमूलकत्वादयः ॥ [२१।२३] **अप्रामाण्याभावेनेति** । तस्य वाक्यस्य । अप्रामाण्यस्यैवाभावेनपुरुषदोषाणांवाक्याप्रामाण्यनिमित्तत्वाभावइत्यर्थः ॥ [२१।२४] **अप्रामाण्यस्येति** । सत्यप्यप्रामाण्येतस्यज्ञानजनकजन्यत्वरूपस्वतस्त्वेन पुरुषदोषाणांवाक्याप्रामाण्यनिमित्तत्वंनास्ति । तथात्वेपरतस्त्वापत्तेरित्यर्थः । पक्षद्वयेपिप्रतिबंद्योत्तरंवक्तुंप्रवृत्तंदुष्टेंद्रियादेरपीत्यादिवाक्यंयोजयति ॥ [२१।२४] **आद्यइत्यादिना** । दुष्टेंद्रियादेरपीत्यत्रेंद्रियविशेषणतयाप्रविष्टदोषाणांबुद्ध्याविवेकंकृत्वाऽपिशब्दंतैस्संयोज्यद्वितीयपक्षोत्तरत्वेनाप्येतदेवयोजनीयमित्याह ॥ [२१।२४] **द्वितीयइति** । वाक्याप्रामाण्यस्यस्वतस्त्वेनपुरुषदोषाणांवाक्याप्रामाण्यनिमित्तत्वंनास्तीतियद्युच्यते तर्हिकाचादिदोषाणामप्ययथार्थज्ञानजनकत्वरूपेंद्रियाद्यप्रामाण्ये हेतुत्वं निमित्तत्वंनस्यात् । तत्रापींद्रियाद्यप्रामाण्यस्यस्वतस्त्वेनकाचादीनांतन्निमित्तत्वंनास्ति । तथात्वेपरतस्त्वापत्तेरितिवक्तुंशक्यत्वादितिभावः । विपर्ययपर्यवसानंदर्शयति ॥ [२१।२५] **अस्तिचेति** ॥ [२१।२५] **उभयस्येति** । दुष्टेंद्रियादेरप्रामाण्यस्य काचादिदोषाणामपींद्रि

यादिनिष्ठायथार्थज्ञानजनकत्वलक्षणाप्रामाण्यहेतुत्वस्यचानभ्युपगमइत्यर्थः। तथाचतर्कद्वयेपीष्टापत्तिरितिभावः॥ ज्ञाने
ति। दुष्टेंद्रियादेर्ज्ञानकरणत्वाभावेनैवायथार्थज्ञानसाधनत्वरूपाप्रामाण्यंनास्तीत्यर्थः ॥ याथार्थ्येवेति । दुष्टेंद्रियादेर्य
थार्थज्ञानसाधनत्वादेवनिरुक्तमप्रामाण्यंनास्तीत्यर्थः । ज्ञानकारणत्वाभावरूपाद्यपक्षेपिज्ञानमुत्पद्यतेपरंत्विंद्रियादेस्तत्कार
णत्वाभावादेवदुष्टेंद्रियादेस्तत्कारणत्वंनास्तीत्यर्थः । उतज्ञानस्वरूपमेवनास्तीतिकृत्वादुष्टेंद्रियादेस्तत्कारणत्वंनास्तीत्यर्थइति
द्वेधाविकल्प्यंहृदिनिधायाद्येदूषणमाह ॥ ज्ञानस्येति । इदंरजतमित्यादिज्ञानस्येत्यर्थः । दुष्टेंद्रियेसतीदंरजतमित्यादिज्ञा
नंजायतेतदभावेतदभावइत्यन्वयव्यतिरेकानुविधानावगाह्यनुभवविरोधइत्यर्थः । द्वितीयेदूषणमाह ॥ ज्ञानस्यैवेति ।
शुक्तिकांरजतत्वेनजानामीतिभ्रमरूपज्ञानस्वरूपावगाहिसाक्षिरूपानुभवविरोधइत्यर्थः ॥ द्वितीयइति। इदंरजतमित्यादि
ज्ञानस्ययथार्थत्वेनदुष्टेंद्रियादेरयथार्थज्ञानहेतुत्वानंगीकारेनेदंरजतमितिरजताभावावगाहिबाधस्वरूपानुभवविरोधइत्यर्थः ।
काचादेर्दोषस्येंद्रियादेरयथार्थज्ञानहेतुत्वरूपाप्रामाण्येनिमित्तत्वंनांगीक्रियतइतिपक्षेदोषमाह ॥ तृतीयेत्विति । दुष्टेंद्रि
यादेर्ज्ञानगतायाथार्थ्यहेतुत्वंनांगीक्रियतइतिप्रथमपक्षस्यद्वेधाविकल्पितत्वाद्द्वितीयस्याप्यस्यतृतीयत्वमित्यवगंतव्यं ॥ काचा
दीति । काचादिदोषेसतींद्रियादेरयथार्थज्ञानहेतुत्वं तदभावेतदभावइत्यन्वयव्यतिरेकानुविधानानुभवविरोधइत्यर्थः ।
तस्य दोषस्य। उत्पादो ऽप्रामाण्यस्य । अप्रामाण्यमुत्पद्यतेचेत्तर्हिदोषसद्भावएवोत्पादोनासद्भावइतिकार्यमुखान्वयव्यतिरे
कयोर्विवक्षितत्वान्नयादृच्छिकसंवादादिस्थलेव्यभिचारः। तत्राप्रामाण्योत्पत्तेरेवाभावादितिभावः । किंचैतादृशान्वयव्य

तिरेकयोर्बहुसांव्यवहारिकत्वाभावात्पूर्वोक्तौकारणमुखान्वयव्यतिरेकावेवाभिप्रेतौ । तर्हियादृच्छिकसंवादादिषुव्यभिचारइ
त्यतआह ॥ [२२।४] कारणेसतीति । मंगलस्यसमाप्तिंप्रतिहेतुत्वेकादंबर्यादौग्रंथेऽन्वयव्यभिचारेप्राप्तेयथासमाधीयते अन्वयव्य
भिचारोनसमाप्तिंप्रतिमंगलस्याकारणत्वकल्पकः । किंनामतत्रतावन्मात्रेमंगलेसत्यपिविघ्नसमसंख्याकमंगलरूपसामग्र्यभा
वादंतराविघ्नोत्पत्तिरूपप्रतिबंधकेनवासमाप्त्यभावोयुक्तः । नहिप्रतिबद्धंकारणं कार्यमजनयदकारणंभवति । अतिप्रसंगा
दिति । तथाप्रकृतेयादृच्छिकसंवादादिस्थलेदोषरूपेकारणेसत्यपिविषयासत्त्वस्याप्रामाण्योत्पत्तौसामग्रीत्वात्तदभावेनवावि
षयसत्त्वस्याप्रामाण्योत्पत्तौप्रतिबंधकत्वेनप्रतिबंधकीभूतविषयसत्त्वस्यसत्त्वाद्वाऽप्रामाण्यरूपकार्यानुत्पादोयुक्तइतिनान्वय
व्यभिचारोदोषस्याकारणत्वकल्पकइत्याशयः॥ [२२।५] दोषाभावइति। दोषस्याप्रामाण्यकारणत्वेन तदभावःप्रामाण्योत्पत्तौकारण
मितिनेत्यर्थः। अतएवेत्युक्तंविशदयति ॥[२२।५] यादृच्छिकेति। दोषाभावेसतिप्रामाण्योत्पत्तिर्दोषेसतिप्रामाण्योत्पत्त्यभावइतिवक्तुं
नयुज्यते। व्यतिरेकव्यभिचारादित्यर्थः ॥७॥ [२२।६] अनुमानादिनेति । वेदोऽपौरुषेयोप्रमितकर्तृकत्वादित्यनुमानं आदिपदेनसा
मान्यसिद्धिपरिशेषसंग्रहः ।अन्येतुप्रमेयसमर्थनंस्वपक्षसाधनेनबाधकपरिहारेणचभवति । तथाचानुमानग्रहणेनाप्रमितकर्तृ
कत्वसामान्यसिद्धिपरिशेषरूपस्वपक्षसाधकसंग्रहः । आदिपदेनसकर्तृकत्वाभावेप्रामाण्यंनस्यात्।तस्यपरतंत्रत्वादित्यादिबाध
कपरिहारसंग्रहइत्याहुः ।। [२२।८] वर्षिष्ठइति। भक्ताभिलषितसेचकायेत्यर्थः ॥ [२२।८] प्रेरयेति। चुदप्रेरणइतिधातोरित्यर्थः ।तत्तात्पर्यमा
ह॥ [२२।८] कुर्वीति। विरूपनामाऋषिःस्वात्मानंप्रतिवक्तीत्यर्थः।वाचाविरूपनित्ययेत्यस्य नित्ययानित्ययेत्यनेनैकवाक्यताभ्रमंवार

यितुंवाचाविरूपनित्ययेत्यनंतरमध्याहार्यमाह ॥ **इतिश्रुतिरितिशेषइति** ॥ **प्रसिद्धइति** । नस्पष्टंवेदवागर्थकइतिभावः। अर्चिरादीनांकार्यब्रह्मणश्चप्राप्यत्वात्परममित्युक्तं । शब्दविषयं शब्दप्रतिपाद्यं ॥ **प्रधानंप्रमेयमिति** । प्राधान्येनज्ञेयमित्यर्थः ॥ **उभयोपपादनमिति** । ब्रह्मणोनादिनित्यत्वेनधर्मादिप्रमेयवैलक्षण्यात्परमविज्ञेयत्वं । श्रुतेश्चानादिनित्यत्वेनेतरप्रमाणवैलक्षण्यात्परमप्रमाणत्वमित्येवंब्रह्मणःपरमविज्ञेयत्वं श्रुतेःप्रधानप्रमाणत्वंचेत्युभयोपपादनं अनादिनित्यासातच्चेत्यनेनकृतमित्यर्थः ॥ **युक्त्यंतरमिति** । श्रुतिःपरमाज्ञापिका प्रधानंप्रमाणं । इतरप्रमाणावेद्यवस्तुप्रमापकत्वात् व्यतिरेकेणप्रत्यक्षादिवदितियुक्त्यंतरमनेनोक्तमित्यर्थः । नेंद्रियाणिनानुमानमित्यादिवाक्याद्धेतुसिद्धिरितिभावः । ननुविनातांनतद्गम्यतइतिवक्तव्यंनतुसइतिपुल्लिंगप्रयोगइत्यतआह ॥ **सब्रह्मशब्दोक्तइति** ॥ **एतदिति** । ब्रह्मवत्सर्वदेशकालव्याप्तिरूपमाहात्म्यमित्यर्थः ॥ **नकोपीति** । तथाचवेदार्थस्यज्ञातादुर्लभइत्यर्थः ॥ **बुद्धिपूर्वामिति** । वेदार्थसम्यग्ज्ञात्वेतियावदित्यर्थः ॥ **नकोपीति** । तथाचव्याख्यातापिदुर्लभइत्यर्थः । इतिचेत्यनेनास्याःकात्यायनश्रुतित्वंप्रतीयतेऽतआह ॥ **इतिचश्रुतिरितिशेषइति** । वाचाविरूपनित्ययेतिश्रुतिः । पैंगीश्रुतिः । कात्यायनश्रुतिः । सहस्रधेतिचश्रुतिरभिमतमर्थंवेदापौरुषेयत्वमाहेतिप्रत्येकमध्याहारःकार्यइत्यर्थः ॥ ७ ॥ **विध्युद्देशानामिति** । विधिरेवोद्देशःप्रयोजनमेषांतेतथातेषां। प्रातस्संध्यामुपासीतेत्यादिवाक्यानामित्यर्थः । लौकिकवत् । इदंकुर्वित्यादिलौकिकवाक्यवत् ॥ **स्वतंत्रवक्तृकत्वमेवेति**। सजातीयोच्चारणमनपेक्ष्योच्चारयितापुरुषस्स्वतंत्रस्तद्वक्तृकत्वंतत्कर्तृकत्वमितियावदित्यर्थः। अनेनवैदिकानिविध्युद्देशवाक्या

निस्वतंत्रवक्तृपूर्वकाणिविध्युद्देशवत् । लौकिकविध्युद्देशवाक्यवदितिवेदस्यपौरुषेयत्वेऽनुमानमुक्तंभवति । अस्मिन्ननुमानेऽ
प्रयोजकताशंकापरिहाराय[२२।१८]विधिर्नियोगइतिपूर्ववाक्यमितिज्ञातव्यं । पौरुषेयत्वेऽर्थवादपक्षकानुमानमाह ॥ [२२।१८]तथार्थवादा
नामपीति ॥ हानेत्यादि । विधिबोधितार्थइतिशेषः । प्रयोगप्रकारस्तु निंदास्तुत्यर्थवादवाक्यानिविधिबोध्यार्थेहानोपा
दानाभिप्रायपूर्वकाणि तथाविधार्थवादवाक्यत्वात् लौकिकार्थवादवदिति । मंत्रभागस्यापिपौरुषेयत्वेनुमानमाह ॥ वेदेऽ
[२२।१९]हमादिपदानीति । अहंरुद्रेभिरित्यादिवाक्येष्वित्यर्थः । आदिपदेनवसुभिश्चरामीत्याद्युत्तमपुरुषोपेतपदसंग्रहः । प्रयोग
प्रकारस्तु वैदिकाहमादिपदानिस्वतंत्रवक्तृकाणि[२२।२०] अहमादिपदत्वाल्लौकिकाहमादिपदवदिति ॥ [२२।२०]वेदाइत्युक्त्वेति । बहुवच
नेनैवसामस्त्यस्यलब्धत्वादितिभावः ॥ कथमितिचेदिति । समस्ताइत्यनेनकथमुक्तशंकापरिहारइत्यर्थः । अनुमानानांदू
षणानुक्तेरितिभावः[२२।२०] । उक्तानुमानानांपुरुषाभिप्रायपूर्वकत्वमात्रसाधकत्वेसिद्धसाधनत्वं समस्ताइतिवदतस्स्मृतिकर्तुरभिप्रे
तमित्याह ॥ नहीत्यादिना ॥ [२२।२१]संकल्पप्रार्थनादिवाक्यानामिति[२२।२१] । स्तुविष्यामित्वामहमित्यादिसंकल्पप्रतिपादकवा
क्यानां । आयाहिपिबमत्स्वेत्यादिप्रार्थनावाक्यानांचेत्यर्थः ॥ कथंतर्ह्यपौरुषेयत्वमिति । पुरुषाभिप्रायपूर्वकत्वंसाधय
तामस्माकंवैदिकविध्युद्देशादावभिप्रायंप्रवेष्टुःपुरुषस्यस्वातंत्र्यमेवविवक्षितं । तथाचस्वतंत्रपुरुषाभिप्रायपूर्वकत्वसाधनान्नसि
द्धसाधनं । तथाचकथमपौरुषेयत्वमित्याशयः ॥ [२२।२१]आहेति । तथात्वेऽप्रयोजकत्वंस्यादित्याहेत्यर्थः ॥ [२२।२२]नत्वपूर्वाणीति ।

तथाचनस्वतंत्रपुरुषाभिप्रायप्रवेशपूर्वकत्वमित्यप्रयोजकतेतिभावः ॥ [२२।२३] **नित्यत्वादित्यादि** । नित्यत्वान्नकालिकःक्रमः सर्वग
तत्वान्नदैशिकःक्रमइत्यर्थः । अस्तुक्रमशून्यत्वं ततःकिमित्यतआह ॥ [२२।२३] **नचेति** । बोधोपयुक्तक्रमवद्वर्णसमूहस्यैवपदत्वात्ता
दृशक्रमवत्पदसमूहस्यैववाक्यत्वादितिभावः । मास्तुपदादिभावोपीतिचेत्तत्राह ॥ [२२।२३] **नापीति** । पदवाक्यभावाभावेप्रमाकरण
त्वाभावात्प्रामाण्यमेवनस्यादित्यर्थः । पौरुषेयः कृतकः । वेदस्य जन्यक्रमविशेषविशिष्टवर्णसमुदायरूपस्य । एतेनेत्युक्तंवि
शदयति ॥ [२२।२४] **नहीति** । कूटस्थनित्यतां निर्विकारतां । क्रमस्यजन्यतयाविकारित्वेक्रमविशेषविशिष्टवर्णसमुदायरूपवेदस्या
पिविकारित्वादितिभावः । तर्ह्यपौरुषेयत्वोक्तेःकोभिप्रायइत्यतआह ॥ [२२।२५] **ततश्चेति** ॥ [२२।२५] **स्वतंत्रेवक्तुरिति** । तथाचसजाती
योच्चारणमनपेक्ष्योच्चारयितापुरुषस्स्वतंत्रस्तत्पूर्वकत्वाभावएवापौरुषेयत्वमित्यर्थः । अत्रकेचित् । तत्तद्वर्णादिविषयकबुद्धि
क्रमएववर्णपदादिक्रमोनातिरिक्तोस्ति नचवर्णक्रमस्यश्रावण(तया)तायाअनुभूयमानत्वाद्बुद्धिगतक्रमस्यश्रावणत्वासंभवः ।
बुद्धेस्साक्षिवेद्यत्वेनतत्क्रमस्यापितद्वेद्यत्वेनसाक्ष्युपनीतस्यैवतस्यवर्णेषुश्रोत्रेणभानांगीकारात् । व्यक्तिक्रमंब्रह्मबुद्धावपेक्ष्यक्र
मउच्यतइतितंत्रसारोक्तेरित्याहुः । तेषां क्रमस्तुवर्णधर्मइतिसुधाविरोधःस्पष्टः । व्यक्तिक्रममित्यादिवाक्यंतुवर्णसमुदाया
त्मकेवेदेक्रमप्रतिपादनायनप्रवृत्तं । किंतुपूर्वक्रमेणअष्टमहामंत्रोद्धारेकृतेमंत्राणांनित्यत्वेनयुगपत्सर्वमंत्रसद्भावेनक्रमाभावा
त्कथमेकानंतर्यमपरस्योच्यतइतिशंकापरिहारायप्रवृत्तं । तथाचसर्वमंत्राणांब्रह्माऋषिःअतस्सएवद्रष्टासचैकानंतरमपरंमंत्रंद्र

ष्टवानतोमंत्राणांब्रह्मबुद्धौव्यक्तीभावमपेक्ष्यैवमंत्रेष्वपिक्रमोविष्णूदितेतंत्रसारेउच्यते। ततस्तदनुसारेणास्माभिरपितथैवक्रमोमंत्रेषूच्यतइत्येवंपरतयातद्वाक्यविरोधाभावात्। यद्यपिनवर्णेषुदैशिकःकालिकोवाक्रमस्संभवति । व्यापत्वान्नित्यत्वाच्च नापिवस्तुनिबंधनः। एकदैवजारारराजेतिप्रयोगेजकारस्यपौर्वापर्यायोगात् । नापिबुद्धिगतएवक्रमोवर्णेष्ववभासतइतियुक्तं । वर्णपदादिगतस्यक्रमस्यश्रावणत्वानुभवात्। बुद्धेरांतरत्वेनसाक्षिवेद्यतयातक्रमस्यापितथात्वेनश्रावणत्वायोगात् । नचारोपितएववर्णेषुक्रमइतियुक्तं। पदवाक्यादेरत्यंतासत्त्वापातात्। तथापिबुद्धिक्रमजन्योवर्णेष्वौपाधिकःकश्चनक्रमोस्त्येव । क्रमस्तुवर्णधर्मइतिस्पष्टंसुधोक्तेः । नचसकीदृशइतिवाच्यं । यथाकालनिबंधनक्रमापेक्षयादेशनिबंधनस्तत्तद्वस्तुगतःक्रमोविलक्षणोनुभूयमानोविशिष्यवक्तुमशक्योपिकश्चिदंगीक्रियते । तथाबुद्धिक्रमनिबंधनोवर्णपदादिगतानुपूर्वीरूपःक्रमोपिसाक्षिवेद्यतयाश्रोत्रेणानुभूयमानोवक्तुमशक्योप्यंगीकार्यः । नहिसर्वत्रक्रमशब्दएकार्थकोस्तीत्येवमस्मदाचार्यरचितसुधाटिप्पण्यनुसारेणद्रष्टव्यं । सचवर्णनिष्ठःक्रमईश्वरबुद्ध्युपाधिकोस्मद्बुद्ध्युपाधिकश्चेतिद्विविधोपिजन्यएव क्रमस्यकृतकत्वेपीतिसामान्यवचनात्। इयांस्तुविशेषः। अस्मद्बुद्ध्युपाधिकःक्रमोजन्योस्मद्बुद्ध्युपरमेनश्यति । ईश्वरबुद्ध्युपाधिकःक्रमोजन्योपिननश्यति। तद्बुद्ध्युपरमाभावात्। जन्यस्यापिनाशाभावस्यपुराणेषुप्रमितत्वात्। यथोक्तंतर्कतांडवे । ईश्वरोप्यस्मन्मतेमहोपाध्यायएवेति। यथाप्रत्यहमुपाध्यायबुद्ध्युपाधिकःक्रमोवर्णेषुजायते एवमीश्वरबुद्ध्युपाधिकःक्रमोपिवर्णेषुजायतएवेतितद्वाक्यार्थः । नन्वीश्वरबुद्ध्युपाधिकक्रमस्याजन्यत्वांगीकारेकिंबाधकंक्रमस्यकृतकत्वेपीतिवाक्यस्यास्मद्बुद्ध्युपाधिकक्रमविषय

त्वसंभवादितिचेत् । अत्रोच्यते । क्रमस्तावद्वर्णधर्मः । क्रमस्तुवर्णधर्मइतिसुधावचनात् । तस्यचाजन्यत्वांगीकारेयावद्र व्यभावित्वप्राप्त्याखंडितत्वाभावेनवर्णैरत्यंताभेदएववाच्यः । यावद्वस्तुनभेदवदित्युक्तत्वात् । एवंचयद्यदभिन्नाभिन्नंतत्तद भिन्नं यथारामाभिन्नमूलनारायणाभिन्नःकृष्णोरामाभिन्नइतिव्याप्तिबलात्पूर्ववर्णाभिन्नक्रमाभिन्नोद्वितीयवर्णःपूर्ववर्णाभिन्न इतिवर्णयोःपरस्परमभेदस्स्यात् । जन्यत्वांगीकारेतुखंडितत्वेनभेदाभेदसद्भावान्नैवमापादनावकाशः । यथायमेकोयमेक स्तस्मादिमौद्वावितीश्वरबुद्ध्याजीवयोर्द्वित्वमुत्पद्यते तच्चेश्वरबुद्ध्युपाधिकमपिद्वित्वंजीवाभ्यांभिन्नाभिन्नमेवांगीक्रियते अन्य थोक्तव्याप्तिबलाज्जीवयोरपिपरस्परमभेदापत्तिरेव । एवमेवप्रकृतेपीतिनकोपिदोषइतिसर्वमवदातं ॥ ७ ॥ सतिसंसर्मी ति । सर्गेसतीत्यर्थः । द्विर्वचनंकिमर्थमित्यतआह ॥ वीप्सायामिति । बह्वर्थसंग्रहोवीप्सा । तथाचसर्गेसर्गइत्यस्य प्रतिसर्गमित्यर्थः ॥ तद्विवृणोतीति । सर्वप्रकारेणसाम्यंविवृणोतीत्यर्थः । ननुकर्तृकरणयोस्तृतीयेत्युक्तत्वात्तक्रमादी नांकर्तृत्वकरणत्वयोरभावात्कथंतत्रतृतीयेत्यतआह ॥ इत्थंभूतलक्षणेतृतीयेति । कंचनप्रकारंप्राप्तइत्थंभूतस्तज्ज्ञापके तृतीयास्यादितिसूत्रार्थः । छात्रेणोपाध्यायमद्राक्षीदित्युदाहरणं । अत्रोपाध्यायत्वरूपंप्रकारंप्राप्तउपाध्यायइत्थंभूतः तत्रो पाध्यायत्वस्यान्यत्रप्रसक्तौसत्यांछात्रस्यतज्ज्ञापकत्वात्तत्रतृतीया । एवमिहाप्येतउद्गीर्यंतइत्युच्चारणविषयत्वरूपंप्रकारंप्राप्तावे दास्तत्रोच्चारणकर्मत्वरूपप्रकारस्यान्यथात्वरूपातिप्रसक्तिपरिहारायतत्प्रकारज्ञापकत्वंक्रमादीनांविवक्षितमितितत्रतृतीयेत्य र्थः ॥ अनेनेति । ब्रह्मादीन्प्रत्युपदिश्यंतइत्यर्थकेनोद्गीर्यंतइत्यनेनेत्यर्थः ॥ अनादेशिकत्वादिति । आदेशउपदेश

स्तत्परंपराप्राप्तत्वाभावादसांप्रदायिकत्वादितियावदित्यर्थः ॥ स्वतंत्रवक्रिति । सजातीयोच्चारणमनपेक्ष्योच्चारयिता पुरुषस्स्वतंत्रस्तत्कर्तेतियावत् । तद्व्याख्यानमेवापेक्षितं तथात्वेतत्रविश्वासोयुक्तइत्याशयः । अनेनेत्युक्तंविशदयति ॥ वेदानामिति । ननुवेदाइतिप्रकृतत्वादेतेषामितिवक्तव्यं । एतासामितिस्त्रीलिंगनिर्देशःकिमर्थइत्यतआह ॥ श्रुतित्वमितिप्रसंगादिति । श्रुतीनांभावःश्रुतित्वमितिश्रुतित्वोक्त्याश्रुतित्वाधिकरणतयाश्रुतीनामपिप्रसक्तत्वादित्यर्थः ॥ शब्दमात्रेति । लौकिकालौकिकसर्वशब्देत्यर्थः ॥ अब्भक्षइत्यादि । अबादिभक्षणस्यसर्वसाधारण्यादम्मात्रभक्षोवायुमात्रभक्षइतियथाव्याख्यायतेतद्वदित्यर्थः ॥ व्याख्येयमिति । निर्वाच्यश्रुतिपदमितिशेषः । अतएवश्रुताएवेत्येवकारःप्रयुक्तइत्याशयेनाह ॥ तथाचेति ॥ तर्हीति । मुनीनामपिप्रतिभासेनतैरप्युद्गीर्यमाणत्वादित्यर्थः । अनधीतत्वात् अश्रुतत्वात् उक्तस्येति । अखिलैःश्रुताइत्यस्येत्यर्थः । विविच्यकथनात्सोपपत्तिकत्वंद्रष्टव्यं । ननुयतस्ताहरिणादृष्टाइत्ययुक्तं श्रुताएव यतइत्युक्त्यादृष्टत्वस्यापिप्रतिषिद्धत्वादित्यतआह ॥ कृतत्वव्यावृत्तिरेवेति । नदृष्टत्वव्यावृत्तिःश्रुताएवयतइतिवाक्यगतावधारणप्रयोजनमित्यर्थः । तथाचश्रुताएवयतोखिलैरित्यत्राखिलैरित्यस्यहरिव्यतिरिक्तजनपरत्वान्नदोषइतिभावः ॥ विवरिष्यतइति । नचनित्यत्वंविनेत्यादिनेतिभावः ॥ एतेनेति । जन्मांतरेश्रुतास्तास्तुवासुदेवप्रसादतः । मुनीनांप्रतिभास्यंतीत्यनेनेत्यर्थः । समाख्याविशेषाः सम्यक्नामविशेषाः ॥ अनंतत्वादिति । तथातन्नामभिरपिशाखानांव्यवहारस्स्यादितिभावः । एतेनेत्युक्तंविशदयति ॥ तज्जन्मनीति ॥ सुप्तप्रबुद्धैरिवेति । आदौसुप्तानांपश्चात्प्रबुद्धानांयथापदार्थदर्शनंस

हसाभवतितद्वदित्यर्थः ॥ तन्निबंधनत्वोपपत्तेरिति [२३।१६] । तस्मिन्समाख्याविशेषेनिमित्तत्वोपपत्तेरित्यर्थः ॥ विशेषणार्थ [२३।१६]
इति । व्यक्तौकिंचिद्विशेषणंदेयमित्यर्थकइत्यर्थः । तदेवविशेषणंदर्शयति ॥ आदिकालीनामिति [२३।१७] ॥ तेनेति [२३।१७] । व्यक्ता
वादिकालीनत्वरूपविशेषणदानेनेत्यर्थः ॥ प्रत्यहमिति [२३।१७] । व्यक्तिमात्रस्यैवोत्पत्तिव्यवहारनिमित्तत्वइतिशेषः ॥ उपचार [२३।१८]
प्रयोगइति । व्यक्तिमपेक्ष्योत्पत्तिव्यवहारस्यौपचारिकत्वादितिभावः । तत्साम्यात् विष्णुबुद्धिगतत्वसाम्यात् । नोपपद्य
तइत्यनंतरं इतिचेन्न । पुराणानामपिनित्यत्वांगीकारेणेष्टापत्तेः । तर्हिपुराणानामनित्यत्वप्रतिपादिकायाअनित्यावावस्मृतय
इतिश्रुतेःकागतिरित्येतावान्वाक्यशेषः । अनेनश्रुतेःकागतिरुक्तेत्यतआह ॥ पौरुषेयत्वेति [२३।२०] ॥ संबंधइति [२३।२१] । एवंसंबंधकर
णेनपौरुषेयत्वनिमित्तएवानित्यत्वव्यपदेशोनविनाशनिमित्तइतिसूचितमितिभावः ॥ पदादीति [२३।२२] । पदानांवाक्यानांचयः
क्रमस्तद्व्यत्यासएवेत्यर्थः । तथाचनवेदवन्नियतक्रमवत्त्वंपुराणानांकिंतुपूर्वकल्पस्थपुराणक्रमापेक्षयैतत्कल्पस्थपुराणेपदवाक्या
दिक्रमस्यव्यत्यासएवभवतीतिभावः ॥ एतच्चेति [२३।२२] । अर्थव्यत्यासाभाववचनमित्यर्थः । अन्येषां वेदाननुसारिणांराजसता
मसपुराणानां । निर्मूलाबुद्धिरुत्प्रेक्षा । आदिपदेनविप्रलंभसंग्रहः ॥ येषांतानीति [२३।२३] । वेदप्रतिपाद्यप्रतिपादकानिवेदप्रयो
जनप्रयोजनकानीत्यर्थः ॥ एतेनेति [२३।२३] । पुराणानितदर्थानीत्युक्त्वावेदार्थार्थकपुराणविषयभूतहरिश्चंद्रादीनांप्रवाहतोऽनादि
नित्यत्वप्रतिपादकेन तदर्थाःपूर्वसर्गवदित्यनेनेत्यर्थः ॥ [२३।२४] अनित्यसंबंधादिति । अनित्यार्थप्रतिपादकत्वादित्यर्थः । त

थाचप्रतिपाद्यानामनित्यत्वेतत्प्रतिपादकस्यवेदस्यकथंनित्यत्वमितिभावः। एतेनेत्युक्तंविशदयति ॥ हरिश्चंद्रादीनामपीति[२३।२४]। वेदानांसृष्टिवाक्यानिभवेयुर्व्यक्त्यपेक्षयेत्यस्यैकानुपूर्वीगतत्वे। तदुत्पत्तिवचश्चैवेत्यनेनपौनरुक्त्यंस्यादित्यभिप्रेत्यावतारयति। [२३।२४]ऋचस्सामानीत्यादीति ॥ प्रदेशांतरस्थमिति[२३।२५] । स्थानांतरस्थमध्यायांतरस्थमित्यर्थः । देवानां वेदाभिमानिनां। कुतस्तेषामनित्यत्वंस्थिरात्मनामित्यनेनवेदाःनित्याः स्थिरात्मत्वादित्यनुमानमुक्तंभवति । तदयुक्तं । स्थिरात्मत्वंहिस्थिरस्वरूपत्वंतच्चनित्यत्वमेवातस्साध्याविशिष्टतेत्यतआह ॥ स्थिरात्मनामिति[२४।१] । तथाचनित्यत्वेनप्रमितत्वंहेतुस्तेनचनित्यत्वंसाध्यतइतिनसाध्याविशिष्टतेतिभावः । नरहरितीर्थानांव्याख्यानमनुवदति ॥ पूर्वोक्तेति[२४।१] ॥ निरंतरमिति[२४।१] । अंतरंव्यवधानं । तच्छून्यंनिरंतरंएकानुपूर्वीगतमेवेत्यर्थः । तथाचवेदानांसृष्टिवाक्यानिभवेयुर्व्यक्त्यपेक्षयेत्येवन किंत्ववांतराभिमानानांदेवानांवाव्यपेक्षयाभवेयुरित्यर्थः। शब्दविशेषइत्युक्तेश्रुत्यादिशब्दानांनासाधारण्यंप्राप्नोतितल्लाभायविशेषशब्दस्यपूर्वप्रयोगइतिभावेनव्याचष्टे ॥ विशिष्यतइतीति[२४।३] ॥ श्रवणकर्मत्वादाविति[२४।३] । श्रुतिशब्दप्रवृत्तिनिमित्तंश्रुतत्वं तच्चश्रवणकर्मत्वमेवेत्यर्थः ॥ नित्यत्वमिति[२४।४] । अनादिनित्यत्वमित्यर्थः । अनादित्वं अपौरुषेयत्वं ॥ श्रुतिशब्देतावदुक्तमिति[२४।४] । अपौरुषेयत्वरूपानादित्वगमकत्वं । अतःश्रुतित्वमेतासांश्रुताएवयतोखिलैरित्यनेनोक्तमित्यर्थः ॥ वेदशब्दश्चेति[२४।४] । विदसत्तायामस्मान्नंदिग्रहिपचादिभ्योल्युणिन्यचइतिसूत्रेणास्यपचादिगणस्थत्वाद्विद्यतइतिकर्त्रर्थेअच्प्रत्ययेहलंत्यमितिचकारलोपेपुगंतलघूपधस्यच पुगंतस्यलघूपधस्यचइकोगुणस्यादितिसूत्रेणइकाररूपलघ्वक्षरोपधस्यइकारस्यएकाररूपे

गुणेवेदेतिरूपनिष्पत्तिरित्यर्थः ॥ [२४१५] **सर्वार्थेति** । घटादिसर्वपदार्थेत्यर्थः ॥ [२४१६] **आम्नायशब्दइति** । आङ्पूर्वात्म्नाअभ्यासेअ
स्मात् आम्नायतेअभ्यस्यतेइतिकर्मार्थेअकर्तरिचकारकेसंज्ञायामितिसूत्रेणघञ्प्रत्ययेघकारञकारयोर्लोपेन अकारमात्रेउर्व
रितेसतिआतोयुक्चिण्कृतोः आदंतधातोर्युगागमस्याच्चिणिञितिणितिकृतिचप्रत्ययेपरेइतिसूत्रेणघञ्प्रत्ययस्यञित्वात्तस्मि
न्परेयुगित्यागमेउक्इत्यस्यलोपेआम्नायेतिसिध्यतीत्यर्थः ॥ [२४१६] **शब्दांतरेति** । लौकिकशब्देत्यर्थः ॥ [२४१७] **एकप्रकारेणैवेति** ।
तथाचपदवाक्यादिक्रमस्यैकप्रकारेणपठ्यमानत्वमेवासाधारण्येनिमित्तमितिभावः । ननुकथमनेनानादिनित्यत्वलाभइत्यत
आह ॥ [२४१७] **एतदेवेति** । भूतभवद्भविष्यद्भिरखिलैरेकप्रकारेणपठ्यमानत्वमेवेत्यर्थः ॥ [२४१८] **अन्यदपीति** । श्रुतिवेदाम्नायशब्दाना
मसाधारण्ये आप्रलयंविद्यमानत्वमपिनिमित्तंसंभवतीत्यर्थः । ननुते वेदाः श्रुतयः आम्नायः इत्येतेषामनुवादकोटौप्रवेशे
विधेयाभावाद्वाक्यंन्यूनमापद्यतइत्याशंक्याह ॥ [२४१९] **तेप्रसिद्धाइति** । अग्निमीळइत्याद्यावाक्यविशेषाइत्यर्थः । तथाच
तइत्येतावदेवानुवादः वेदाः श्रुतयः आम्नायः इत्येतद्विधेयं । एवंचतेप्रसिद्धाःवाक्यविशेषाःनित्यविन्नत्वाद्वेदाइत्यादियो
ज्यमित्याशयः ॥ [२४१७०] **अकर्मकत्वादिति** । विदसत्तायामितिधातोस्सत्तार्थात्विद्इत्यस्मात् गत्यर्थाकर्मकश्लिषशीङ्स्थास
वसजनरुहजीर्यतिभ्यश्च । एभ्यःकर्तरिक्तस्स्यात्भावकर्मणोश्चेतिसूत्रेणविदधातोरकर्मकत्वात्कर्तरिक्तप्रत्ययेककारस्यलोपे
रदाभ्यांनिष्ठातोनःपूर्वस्यचदः रेफदकाराभ्यांपरस्यनिष्ठातः क्तक्तवतूनिष्ठेतिस्मरणात्निष्ठाप्रत्ययभूतक्तप्रत्ययतकारस्यन
कारस्स्यात्पूर्वदकारस्यचनकारस्स्यादितिसूत्रेणदकारतकारयोर्नकारादेशेविन्नविन्नेतिरूपमित्यर्थः । नन्वत्रपुगंतलघूपध

स्यचेत्यनेन इकारस्य एकाररूपगुणवन्नइतिस्यादितिचेन्न । क्ङितिच । क्ङितिङितिचप्रत्ययेपरे इकोगुणवृद्धीनस्तइतिगुण
स्यप्रतिषिद्धत्वेनक्तप्रत्ययस्यकित्त्वाद्गुणाभावइत्यवधेयं। ननुविद्धातोःक्तप्रत्ययेतस्यसेट्त्वादिडागमेविद् इत विदित इति
स्यादित्यतआह ॥ [२४।१०] **विद्यतेरिति** । विद्यतेर्विद्यमानार्थाद्धातोर्विन्नइतिरूपमिष्यतइत्यर्थः । तथाचवार्तिककारेणविन्नइत्ये
वोक्तत्वाद्विन्नइतिसाध्वितिभावः ॥ [२४।११] **एकवचनंबहुवचनार्थइति** । वेदाःश्रुतयइतिप्रायपाठादितिभावः । तत्रज्ञापकमाह ॥
[२४।१२] **सुपामिति** । सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः सुश्चलुक्चपूर्वसवर्णश्चआत्चशेचयाचडाचड्याचयाच्चआल्चते
तथा । सुपामेतआदेशाःस्युरितिसूत्रार्थः । यथाऋजवःसंतुपंथाइत्यत्रपंथानइतिप्राप्तेबहुवचनस्यजसःसुइत्येकवचनादेशेपंथा
इतिभवति । एवंप्रकृतेप्याम्नायशब्दात्बहुवचनस्यजसस्सुइत्येकवचनादेशेआम्नायइतियुक्तमित्यर्थः ॥ [२४।१३] **तदन्यथानुपपत्त्ये**
ति । दर्शनव्यवहारान्यथानुपपत्त्येत्यर्थः ॥ [२४।१४] **तदपीति** । वेदशब्दप्रवृत्तिनिमित्तभूतंनित्यविद्यमानत्वं आदिपदोक्तं श्रुतिश
ब्दप्रवृत्तिनिमित्तमखिलैःश्रुतत्वं आम्नायशब्दप्रवृत्तिनिमित्तंभूतभवद्भविष्यद्भिरखिलैरप्येकप्रकारेणपठ्यमानत्वं । आप्रलयं
प्रलयपर्यंतमेवास्त्वित्यर्थः ॥ [२४।१५] **तावतापीति** । नित्यंविद्यमानत्वस्यप्रलयपर्यंतत्वेपिघटादिसर्वपदार्थवैलक्षण्यसंभवादसाधार
ण्येनैतेषामेववेदशब्दवाच्यत्वंयुक्तं । तथाअखिलैःश्रुतत्वस्य अखिलैरेकप्रकारेणपठ्यमानत्वस्यचप्रलयपर्यंतत्वेपिशब्दांतरवै
लक्षण्यसंभवादसाधारण्येनैतेषामेवश्रुत्याम्नायशब्दवाच्यत्वंयुक्तमित्यर्थः । असाधारण्योक्त्यादीत्यादिपदेनश्रुतिर्वावनित्ये
त्यादिनित्यत्वोक्तिपरिग्रहः(सापि) नित्यत्वोक्तिरपिआप्रलयंविद्यमानत्वेनैवोपपन्नेतिभावः । नन्वस्त्वेवंकिंतावतावेदानामना

वि०त०९८

दिनित्यत्वाव्याघातादित्यतोऽनादिनित्यत्वंगतमेवेत्याह ॥ [२४।१५] **ततोवेदाइति** ॥ [२४।१६] **वर्णादीनामिति** । वर्णादीनामित्येयोक्त्याप्यादिपदेनपदवाक्यग्रहणसिद्धेःकंठरवेणपदग्रहणंकिमर्थमित्यर्थः । वर्णानांपदवाक्ययोश्चनित्यत्वंनैकप्रकारमित्याशयेनपृथग्ग्रहणमित्याह ॥ [२४।१६] **तद्वर्णानामित्यादिना** । कौटस्थ्याभावो निर्विकारत्वाभावोविकारित्वमितियावत् । सर्गेपुनरन्येजन्यंतइत्याशंकितत्वान्मूलेतत्प्रतिषेधोनप्राप्तइत्यतआह ॥ [२४।१७] **तथेति** ॥ [२४।१७] **एतेनेति** । वर्णानांपदादेश्चनित्यत्वस्यभिन्नत्वसूचनेनेत्यर्थः ॥ [२४।१८] **यथायोगमिति** । वर्णानांकौटस्थ्यंशाश्वतत्वं पदादीनांतुक्रमव्यत्यासाभावएवशाश्वतत्वमितिभावः । नन्वेवंशाश्वतपदस्यानेकार्थत्वान्नवर्णपदादिष्वनुगतमेकंशाश्वतत्वमस्तीतिचेत्तत्राह ॥ [२४।१८] **सर्गेपीति** ॥ [२४।१९] **नच्यवंतीति** । व्यथसंचलने । संचलनंविनाशः ननश्यंतीत्यर्थः । सर्गप्रलययोरुत्पत्तिविनाशाभावएववर्णपदाद्यनुगतंशाश्वतत्वमितिभावः । नन्वत्रग्रंथेवर्णानांकूटस्थत्वंप्रकृतानुपयुक्तंकस्मादुच्यतइतिचेन्न । वर्णानांध्वंसप्रतियोगित्वेतदात्मकवेदेतद्बुद्धावित्यादिनोक्तहेतोरसिद्धिस्स्यात्तत्परिहारार्थंमूलेवर्णग्रहणमितिज्ञातव्यं ॥ [२४।१९] **एतच्चेति** । बुद्धिशब्दस्यमनःपरत्वमित्यर्थः ॥ [२४।१९] **उत्तरेग्रंथइति** । नचघटादिवदित्युत्तरग्रंथइत्यर्थः । सर्वदा प्रलये । वेदाःनानित्याः । ईश्वरबुद्धौसर्वदाप्रतीयमानत्वादव्याकृताकाशवदित्यनुमानेऽसिद्धिंवक्तुंपूर्वपक्षीहेतुंनिर्वक्ति ॥ [२४।२०] **नन्वित्यादिना** ॥ [२४।२०] **उक्तार्थेति** । अनित्यत्वाभावेत्यर्थः ॥ [२४।२०] **तच्चेति** । सर्वदावर्तमानतयाऽनुभूयमानत्वमित्यर्थः ॥ [२४।२१] **सर्वज्ञत्वयुक्तयेति** । वेदाईश्वरेणसर्वदावर्तमानतयानुभूयंते तस्यसर्वज्ञत्वादितियुक्त्येत्य

र्थः । तस्य पुराणवाक्यद्वयस्य । तामेवान्यथासिद्धिंविवृणोति ॥ [२४।२२] **वेदाँनुभवेति** । प्रलयेवेदानांनष्टत्वेपीतिशेषः ॥ **सं**
[२४।२२] **भवादिति** । तथाचैवंपुराणवाक्यस्यान्यथासिद्ध्या ईश्वरेणसदावर्तमानतयानुभूयमानत्वसाधकत्वाभावादितिभावः ।
ननुनित्यावेदास्समस्ताश्चशाश्वताविष्णुबुद्धिगाः । वेदास्तेनित्यविन्नत्वादितिपुराणवाक्यद्वये । वेदाःविष्णुबुद्धिगाइत्यस्य
वेदाईशबुद्धिस्थिताइत्यस्यचवेदानुभवजनितसंस्कारस्येशबुद्धिगतत्वमात्रेणान्यथासिद्ध्युक्तौवेदपदस्यवेदानुभवजन्यसंस्का
रेलक्षणास्यादतोनैवंव्याख्येयमितिसिद्धांतिनाशंकितेसत्याह ॥ [२४।२२] **नचैवमिति** । तत्साम्यात् सिद्धांतिनांभवतामपिलक्षणा
साम्यादित्यर्थः । अनुभवार्थतामयांगीक्रियतइतिनमन्मतेलक्षणेत्यतस्सिद्धांतिनांमुख्यार्थेबाधकंपूर्वपक्षीदर्शयति ॥ **वे**
[२४।२३] **दानामेवेति** ॥ [२४।२३] **एवमंगीकारइति** । वेदानांनाशमंगीकृत्यवेदानुभवजनितसंस्कारस्यबुद्धिगत्वमात्रेणविष्णुबुद्धिगा
इत्यस्यान्यथासिद्ध्यंगीकारइत्यर्थः । अनुगृहीतानि अनुकूलानि । ननुवेदपदस्यानुभवार्थतांगीकारेपितत्साम्यादित्युक्त
मयुक्तं । वेदपदस्यानुभवलक्षकत्वानंगीकारात् । नचवेदानांसाक्षान्मनोगतत्वासंभवेनबुद्धिगाइत्यस्यमुख्यार्थानुपपत्त्याऽ
नुभवेलक्षणाकार्येत्युक्तमितिवाच्यं । बुद्धिशब्दस्यमनोवाचित्वेकिलमुख्यार्थानुपपत्तिःकिंतुज्ञानार्थत्वमंगीकृत्यबुद्धिगाइ
त्यस्यवर्तमानतयाज्ञानविषयाइत्यर्थांगीकारात्पुराणवाक्येनोक्तहेतुसिद्धिर्भविष्यत्येवेतिसिद्धांतिनोक्तेसत्याहपूर्वपक्षी ॥ [२४।२४] **अत**
एवेति । बुद्धिशब्दस्यज्ञानार्थत्वपक्षेपिवेदानांनष्टत्वेप्यतीतत्वेनज्ञानविषयत्वमंगीकृत्यतत्प्रतिपादकत्वेनविष्णुबुद्धिगाइत्य
स्यपूर्वन्यायेनान्यथासिद्धत्वादित्यर्थः । ननुवेदपदस्यवेदानुभवजनितसंस्कारलक्षणायांकिंप्रयोजनमितिसिद्धांतिनाशंकि

तेसत्याह ॥ [२४।२४] नचेति । नष्टेपिघटादावित्यनंतरंघटानुभवजनितसंस्कारस्यदेवदत्तबुद्धिगतत्वाभिप्रायेणेतिवाक्यशेषः ॥
[२४।२५] रूढलक्षणात्वादिति । रूढलक्षणायांचनप्रयोजनापेक्षेतिभावः ॥ [२४।२५] तथात्वप्राप्तेरिति । ईश्वरस्यसर्वज्ञत्वेननष्टानांघटादी
नामपिसर्वदावर्तमानतयानुभूयमानत्वप्रसंगेननित्यत्वंस्यादित्यर्थः । ननु आपादनमनिष्टस्यभवति । नष्टानामपिघटादीनांस
र्वदावर्तमानतयानुभूयमानत्वानंगीकारे ईश्वरस्यसर्वज्ञत्वंनस्यात् । अतस्तदन्यथानुपपत्त्यानष्टानामपिघटादीनांसर्वदाईश्वरे
णवर्तमानतयानुभूयमानत्वंवक्तव्यमेव । अतोघटादीनामपितथात्वप्राप्तेरित्यापादनमयुक्तमित्यतआह ॥ [२४।२६] विद्यमानेति ।
विद्यमानपदार्थानामननुभवेहिसर्वज्ञत्वंनस्यात् । नत्वतीतानामपिघटादीनांसर्वदाववर्तमानतयाऽनुभवानंगीकारइतिवाक्य
शेषः । तथाचनष्टानांघटादीनांवर्तमानतयानुभवे ईश्वरस्यभ्रांतत्वप्रसंगेननष्टानांघटादीनामतीतत्वेनैवानुभवोऽस्ति नतुवर्त
मानत्वेनेतिसिद्धत्वान्नष्टानामपिघटादीनांवर्तमानतयानुभवस्यानिष्टत्वेनैतदापादनंयुक्तमेवेतिभावः । घटादिवदितिवतिः त
त्रतस्येवेतिसूत्रात्षष्ठ्यंतादिवार्थेइतिभावेनोक्तं ॥ [२४।२६] घटादेरिवेति ॥ [२५।१] संस्कारस्यबुद्धिगतत्वमात्रमिति । केवलंसंस्कार
स्यमनोगतत्वमित्यर्थः । एतद्ग्रंथानुसारेणप्राक्बुद्धिशब्दोमनःपरतयाव्याख्यातः । प्रसिद्धायाबुद्धेस्संस्काराधारत्वस्यबाधित
त्वात् । एतदभिप्रायेणैवैतच्चोत्तरग्रंथेस्पष्टमितिप्रागुक्तमितिध्येयं ॥ [२५।३] उत्तरवाक्यइति । नित्यावेदास्समस्ताश्चशाश्वतावि
ष्णुबुद्धिगाइत्यस्मादुत्तरवाक्यइत्यर्थः । तदेवेदंवचनमितिप्रत्यभिज्ञाविरोधस्योक्तत्वेपिनैतत्प्रत्यभिज्ञाविरोधःप्रागुक्तः । अत
उक्तत्वादितिकथमुक्तमित्यतआह ॥ [२५।३] उक्तप्रायत्वादिति । सर्गेसर्गेमुनैवैतउद्गीर्यतइतिवाक्यस्योदाहरणंयदाकृतंतदैतत्प्रत्य

भिज्ञाविरोधउक्तप्रायइत्यर्थः ॥ सादृश्यादिति । परिलूनपुनर्जातकुंतलकलापप्रत्यभिज्ञावदियमपिप्रत्यभिज्ञाभ्रांतिरिति भावः ॥ तथासतीति । पूर्वकल्पोच्चारितवेदसदृशाएववेदाएतत्कल्पेऽमुनैवोद्गीर्यंतइत्यंगीकारेपिसजातीयोच्चारणमनपेक्ष्योच्चारयितृरूपस्वतंत्रपुरुषपूर्वकत्वाभावरूपापौरुषेयत्वसिद्धेर्दुर्वारत्वादित्यर्थः । अस्यैवापौरुषेयशब्दार्थत्वादितिभावः ॥ जन्मवाक्येति । प्रत्यभिज्ञायाभ्रांतित्वमंगीकृत्यप्रलयेवेदानांविनाशस्सृष्टिकालेपुनरुत्पत्तिरित्यंगीकारेवेदानामुत्पत्तिप्रतिपादकानामृचस्सामानीत्यादिवाक्यानांवेदानांसृष्टिवाक्यानीत्यादिनागतिकथनंविरुद्धंस्यादित्यर्थः । उक्तं वेदानां तदभिप्रेता पुराणकृदभिप्रेता ॥ उपवर्णितेति । सर्वज्ञत्वादीश्वरस्येत्यनेनेत्यर्थः । तामेवयुक्तिंदर्शयति ॥ तथाहीत्यादिना ॥ अर्थांतरमिति । निबिडावयवरूपंपदार्थांतरमित्यर्थः । अखंडमितियावत् ॥ क्रमश्चेति । वर्णनिष्ठइत्यर्थः ॥ वर्णविषयेति । वर्णधर्मिकेत्यर्थः ॥ विवक्षितक्रमेति । नियतानुपूर्वीरूपेत्यर्थः ॥ अपरइति । अवयवविभागेनस्वरूपध्वंसइत्यर्थः ॥ तथाविधेति । वर्णविषयकविवक्षितक्रमोपाधिभूतेत्यर्थः । विषयांतरसंचारो विषयांतरविषयकत्वं । देवदत्तमनसोविषयांतरसंचारेऽन्यविषयकबुद्ध्युपरमोदृष्टइत्यर्थः ॥ विस्मरणेति । अत्रविस्मरणशब्देनदेहाभिमानाभावोविवक्षितः । एतादृशेविस्मरणेबुद्ध्युपरमोऽनुभवसिद्धइत्यर्थः ॥ तस्यसर्वदेति । ईश्वरस्यसर्वदासर्वविषयकज्ञानवत्त्वेनविषयांतरसंचारप्रयुक्तस्यविस्मरणप्रयुक्तस्यवाबुद्ध्युपरमस्यासंभवादित्यर्थः ॥ उत्तरवाक्यइति । नित्यावेदास्समस्ताश्चशाश्वताविष्णुबुद्धिगाइत्यस्मादुत्तरवाक्यइत्यर्थः ॥ तच्छंकाबीजेति । विष्णुबुद्धिगत्वयुक्त्यायदिवेदानांनित्यत्वमुच्यतेतर्हिपुराणानामपिविष्णुबुद्धिग

त्वसाम्यान्नित्यत्वंस्यात् तथाच । श्रुतिर्वावनित्येत्यादिविभागोनोपपद्यतइतिहिपरेणशंकितं । तत्रपुराणानांसर्वदावर्तमानत यानुभूयमानत्वरूपविष्णुबुद्धिगत्वसाम्यशंकायांबीजाभावेनतद्बीजतयासर्वज्ञत्वयुक्तिमुक्त्वातथाविषयांतरसंचाराद्यभावेन बुद्ध्युपरमाभावमभिधायसर्वदेश्वरेणवर्तमानतयानुभूयमानत्वरूपंविष्णुबुद्धिगत्वमुक्त्वानित्यत्वमुपपादनीयमितिभावः । पुनारचनं । उत्तरकल्पइतिशेषः । पुराणानांपुनारचनंकुतइतिप्रमाणंपृच्छ्यतेप्रयोजनंवा । द्वितीयेपिस्वप्रयोजनंपृच्छ्यतेपरप्र योजनंवेतिविकल्प्य क्रमेणोत्तरमाह ॥ [२५।१२] प्रमाणप्रश्नश्चेदित्यादिना ॥ [२५।१२] उक्तादेवेति । पुराणानितदर्थानीत्यादिनोक्तादे वेत्यर्थः । ननुभगवत्पादानांसर्वज्ञत्वेनपरप्रयोजनानितेपिकस्मान्नावदन्नित्यतआह ॥ [२५।१४] भगवानाचार्योपीति ॥ [२५।१५] उपपा दितमर्थमिति । वर्णनित्यत्वादिरूपमित्यर्थः । केतेनित्यभूताधर्माइत्यतआह ॥ येऽनौपाधिका[२५।१५]इति । आकाशगुणभूत ध्वनिव्यंग्याअनौपाधिकाः स्वाभाविकास्तारत्वमंदत्वाद्यायेधर्मास्ते आदिपदेनग्राह्याइत्यर्थः । यथोक्तंन्यायामृते । नागो नगइत्यादौदीर्घत्वंवर्णगतंसत्यमेवार्थविशेषधीहेतुः । न ध्वनिगतंवर्णेष्वारोपितंहेतुरित्यादि । यद्वाअनौपाधिकाधर्माः ग त्वादयइत्यर्थः । ननुवर्णानित्याइत्युपसंहारेणैवक्रमविशेषविशिष्टवर्णात्मकवेदस्यापिनित्यत्वोपसंहारलाभाद्वेदश्चेतिपृथगुपसं हारेकिंनिमित्तमित्यतआह ॥ [२५।१६] नित्यत्वस्येति । वर्णानांकौटस्थ्यमेवनित्यत्वं वेदानांतुक्रमव्यत्यासाभावएवेति नित्यत्वस्यपृ थग्विधत्वादित्यर्थः ॥ [२५।१६] इंद्रियेति । श्रोत्रेंद्रियेत्यर्थः । व्यापकत्वस्येत्यत्रवर्णानामितिवर्तते । अवष्टब्धं प्रतिबद्धं ॥ [२५।१८] सन्नि कृष्टमपिशब्दमिति । व्याप्ततयासन्निकृष्टमपिवर्णात्मकंशब्दमित्यर्थः । वक्तुरित्यतः पूर्वयदेतिशेषः । प्रतिष्ठमानः

ऊर्ध्वंगच्छन्। अभिहत्य संबध्य ॥ [२५।२०] श्रोत्रस्यसंस्कारइति । पूर्वमतेप्रतिबंधकीभूतस्तिमितवायुनिरासकत्वमेवकोष्ठ्यवा युसंयोगस्य नसंस्कारकत्वमितिस्फुटोभेदः ॥ [२५।२०] सर्ववर्णेति । प्रतिबंधकाभावाच्छ्रोत्रस्यसंस्कृतत्वाच्चेत्यर्थः । संयोगो वायुसं योगः । तथाचनसर्वदोपलब्धिरितिभावः ॥ [२५।२१] सर्वोपलब्धेरिति । उत्तरक्षणएववायुविभागेनसंयोगनाशकल्पनयासर्व दोपलब्धिपरिहारेपिवायुसंयोगानंतरंसर्ववर्णोपलब्धिप्रसंगोननिवारितएवेत्यर्थः । प्रतिबंधकाभावाच्छ्रोत्रस्यसंस्कृतत्वाच्चेति भावः ॥ [२५।२२] वायुगुणत्वइति । वायुविशेषगुणत्वइत्यर्थः । तथाचयोवायुविशेषगुणस्सस्पार्शनग्राह्योयथास्पर्शइतिव्याप्ते र्विवक्षितत्वात् । वायुगतसंयोगादिसामान्यगुणस्यस्पार्शनग्राह्यत्वाभावाद्व्यभिचारइतिशंकानवकाशइतिज्ञातव्यं ॥ [२५।२२] बधि राणामपीति । तेषामपिस्पार्शनेंद्रियसद्भावेनतेनवायुगुणभूतशब्दोपलब्धिप्रसंगइत्यर्थः ॥ [२५।२३] श्रोत्राग्राह्यस्येति । वायुविशे षगुणत्वेनस्पार्शनग्राह्यतयाश्रोत्राग्राह्यत्वस्यापिसिद्धत्वादितिभावः ॥ [२५।२३] तद्ग्राह्येति । श्रोत्रग्राह्येत्यर्थः । कुतोनुपपत्तिरित्यतआ ह ॥ [२५।२३] व्यंग्यव्यंजकयोरिति ॥ [२५।२४] तत्रस्थाइति । एकोवर्णोयत्प्रदेशेऽस्तितत्प्रदेशस्थाइत्यर्थः । तथाचवर्णानांव्याप्तत्वेनाप्र तिघद्रव्यतयाचैकस्मिन्प्रदेशेसर्ववर्णसद्भावाद्व्यंजकीभूतस्यवायुसहितध्वनेःश्रोत्रसंबद्धत्वेनसर्ववर्णानामुपलब्धेरपरिहारादिति भावः ॥ [२५।२४] सएवेति । व्याप्तत्वादेकत्वाच्चेत्यर्थः । तेन यज्ञदत्तेन । तथाच सर्वेषांपुरुषाणामुपलब्धिस्स्यादितिभावः ॥ [२५।२६] यस्त्विति । वीचीतरंगन्यायेनेतिभावः । तद्गुणस्तदवच्छिन्नाकाशगुणः ॥ [२६।१] तस्मिन्व्यज्यमानइति । तस्मिन्ध्वनौ सतिकर्णशष्कुल्यवच्छिन्नाकाशप्रदेशेव्यज्यमानइत्यर्थः। किंचयोवर्णइत्यादिनोक्तांसर्वेषांपुरुषाणामुपलब्धिंपरिहरति ॥ [२६।२] भूता

काशमेवेत्यादिना ॥ [२६१२]तद्गुणएवेति । नवायुगुणइत्यर्थः । तथाचव्यंग्यव्यंजकयोरेकेंद्रियग्राह्यत्वप्राप्त्यावायुविशेषगु
णत्वेनश्रोत्राग्राह्यस्यध्वनेः कथंतद्ग्राह्यवर्णव्यंजकत्वमितिशंकानवकाशइतिध्येयं । ननुभूताकाशस्यश्रोत्रत्वे तस्यसावयवत्वा
भावेनैकत्वात्तस्यैकस्यैवसर्वश्रोत्रत्वेनैकस्यवर्णस्यदेवदत्तश्रोत्रसंबद्धत्वेसर्वपुरुषश्रोत्रसंबद्धत्वप्राप्त्यासर्वेषांपुरुषाणामुपलब्धि
स्स्यादेवेत्यतउक्तं । तच्च भूताकाशं ॥ [२६१३]सावयवमिति। प्रदेशसहितं सांशमित्यर्थः। अतःश्रोत्रेंद्रियाणांभेदइतिभावः। तस्य
प्रदेशस्यौपाधिकत्वे उपाधिसंबंधएकदेशेथसर्वगः । एकदेशेऽनवस्थास्यात्सर्वगश्चेन्नभेदकइत्युक्तदोषपरिहारायोक्तं ॥ [२६१३]स्वत
इति। स्वाभाविकभिन्नाभिन्नावयवोपेतं । नतुतदवयवानामौपाधिकत्वं । येनोक्तदोषःस्यादितिभावः ॥ [२६१३]अतइति ।
सावयवत्वादित्यर्थः ॥ [२६१३]तदवच्छिन्नमेवेति। तत्प्रदेशसंबद्धमेवेत्यर्थः । नचतत्प्रदेशेसर्ववर्णानामपिसत्त्वादुपलब्धिप्रसंगइ
तिवाच्यं । सर्ववर्णानांसत्त्वेपि तत्तद्व्यंजकध्वनीनांप्रतिनियतत्वेनयुगपत्तेषामभावान्नसर्ववर्णोपलब्धिरित्युक्तमेवेतिभावः ।
तेचध्वनयःप्रतिनियताएववर्णानांव्यंजकाः अतोनसर्ववर्णोपलब्धिरित्युक्तमयुक्तमित्याशयेनशंकते ॥ [२६१३]समानेंद्रियग्राह्याणा
मित्यादिना। समानमेकं। समानदेशकालधर्मापन्नानामित्यस्य देशकालनिष्ठोयोधर्मस्समानदेशकालत्वं तदापन्नत्वात्।
समानदेशकालोपेतत्वादित्यर्थः। तथाचवर्णाःनप्रतिनियतव्यंजकव्यंग्याः समानेंद्रियग्राह्यत्वेसतिसमानदेशकालापन्नत्वात्
घटगतपरिमाणपृथक्त्ववदित्यनुमानमुक्तंभवति । अत्रव्यंजकपदंतत्तत्सन्निकर्षातिरिक्तव्यंजकपरं । तेनतत्तद्वर्णसन्निकर्ष
रूपभिन्नव्यंजकव्यंग्यत्वस्यैवसत्त्वाद्बाधइतिशंकानवकाशः । अत्रसमानदेशकालापन्नयोरूपरसयोरालोकलालाजलरूपभि

न्नव्यंजकव्यंग्ययोर्व्यभिचारवारणायसमानेंद्रियग्राह्यत्वेसतीत्युक्तं । तयोस्समानेंद्रियग्राह्यत्वाभावान्नव्यभिचारः । समानेंद्रियग्राह्यत्वेसतिसमानकालापन्नत्वादित्युक्तेरूपरूपत्वयोर्व्यभिचारः । महत्त्वसमानाधिकरणोद्भूतत्वस्यरूपव्यंजकत्वात् । जातियोग्यतायांव्यक्तियोग्यत्वंतंत्रमित्यभियुक्तवचनेनरूपत्वेव्यक्तियोग्यत्वस्यव्यंजकत्वेनसाध्याभावात् । अत्रापिपूर्वोक्तालोकस्यैवरूपव्यंजकत्वोक्तौतस्यरूपत्वसाधारण्येनसाध्यस्यापिसत्त्वेनव्यभिचाराभावापत्तेः । अतउक्तमेवव्यंजकंरूपेवाच्यं । एवंचतयोर्व्यभिचारपरिहारायसमानदेशपदं । रूपस्यघटेवृत्तेरूपत्वस्यचरूपेसत्त्वेनतयोस्समानदेशत्वाभावात् । समानेंद्रियग्राह्यत्वेसतिसमानदेशापन्नत्वादित्युक्ते । रूपतद्ध्वंसयोर्व्यभिचारः । तयोस्समानेंद्रियग्राह्यत्वात् । ध्वंसस्यप्रतियोगिसमवायदेशवृत्तित्वेनसमानदेशत्वाच्च । रूपेमहत्त्वसमानाधिकरणोद्भूतत्वस्यव्यंजकत्वात् । ध्वंसयोग्यतायांप्रतियोगियोग्यत्वस्यतंत्रत्वेनध्वंसेप्रतियोगियोग्यत्वस्यव्यंजकत्वेनसाध्याभावात् । ध्वंसयोग्यतायामधिकरणयोग्यत्वंतंत्रमितिध्वंसेऽधिकरणयोग्यत्वंव्यंजकमितिकेचिदाचक्षते । तन्न । तथात्वे आत्मनिधर्मादिध्वंसस्यप्रत्यक्षत्वापत्तेः । धर्मादिध्वंसाधिकरणस्यात्मनोमानसप्रत्यक्षयोग्यत्वात् । अतोध्वंसे उक्तमेवव्यंजकमंगीकार्यं । अत्ररूपआलोकस्यव्यंजकत्वोक्तौतस्यध्वंससाधारण्येनसाध्यस्यापिसत्त्वेनव्यभिचाराभावापत्तेरतोरूपेमहत्त्वसमानाधिकरणोद्भूतत्वमेवव्यंजकमंगीकार्यमितिव्यभिचारपरिहारायसमानकालपदं । तयोश्चभिन्नकालत्वान्नव्यभिचारइतिभावः । गोत्वाश्वत्वयोर्व्यभिचारान्नेदमनुमानंयुक्तमित्याह ॥ गोत्वाश्वत्वादीनामिति [२६।४] । समानेंद्रियग्राह्याणांसमानदेशकालापन्नानामितिवर्तते ॥ प्रतिनियतव्यक्तीति [२६।५] । प्रतिनियतगवाश्वादिव्य

क्तिरूपव्यंजकव्यंग्यत्वस्येत्यर्थः । अनेनसाध्यंनास्तीतिसूचितं । हेतोरेवाभावान्नव्यभिचारइत्याशंकते ॥ गोत्वा[२६१४]श्वत्वादीनामिति ॥ व्यक्ति[२६१५]सर्वगतत्वेनेति । स्वाश्रयव्यक्तावेवसर्वत्रगतत्वेनेत्यर्थः । यद्वास्वाश्रयसर्वव्यक्तिगतत्वेनेत्यर्थः । गोत्वंस्वाश्रयेगोव्यक्तावेवास्तिनत्वश्वे । एवंचाश्वोगोत्वंप्रतिनव्यक्तिः । एवमश्वत्वमपीतिनसमानदेशत्वमितिभावः । अस्त्येवसमानदेशत्वमित्याह ॥ प्रत्या[२६१५]सत्तेरिति । संयुक्तसमवायरूपायाइत्यर्थः । अश्वसंयुक्तायांगविगोत्वस्य गोसंयुक्तेऽश्वेऽश्वत्वस्यचसमवायादितिभावः । ननुयदागवाश्वावसंयुक्तौतिष्ठतस्तदानोक्तरूपाप्रत्यासत्तिरितिचेन्न । तदापिगोसंयुक्तभूसंयुक्तेऽश्वेऽश्वत्वस्यसमवायेनसंयुक्तसंयुक्तसमवायरूपपरंपरासंबंधस्याश्वस्यगोत्वेनगोरश्वत्वेनसत्त्वात्समानदेशत्वमस्तीतिव्यभिचारइतिभावः । ननुसंयुक्तसमवायादेरेवपरंपरासंबंधत्वात्संयुक्तसंयुक्तसमवायादेःकथंतत्त्वमितिचेन्न । संयुक्तसमवायादेरिंद्रियार्थसन्निकर्षरूपत्वात् । यथोक्तं । इंद्रियार्थयोर्यस्सन्निकर्षःससाक्षात्कारिप्रमाहेतुः सचषड्विधएवेति । अयंत्वर्थयोरेवपरंपरासंबंधःकथ्यते । अर्थयोरेतादृशःपरंपरासंबंधो बहुतरणिपरिस्पंदरूपपरत्वस्यदेवदत्तेसत्त्वेनदेवदत्तेतरणिपरिस्पंदघटकतयायदाकालःकल्प्यतेतदादृष्टइत्यवधेयं । ननुसाक्षात्संबंधेनैवसमानदेशत्वंविवक्षितं । नतूक्तपरंपरासंबंधेन । तथाचाश्वत्वस्यगोव्यक्त्यागोत्वस्यचाश्वव्यक्त्यासमवायरूपसाक्षात्संबंधाभावान्नव्यभिचारइत्याशंक्याह ॥ सम[२६१५]वायाभावस्येति ॥ वर्णे[२६१५]ष्वपीति । वर्णानांद्रव्यत्वेनसर्वगतत्वान्नसमवायरूपसाक्षात्संबंधेनसमानदेशत्वमस्तीतिस्वरूपासिद्धिरितिभावः । अंगीकृत्येदंदूषणमुक्तं । समवायस्यैकत्वेनयएवगोत्वसमवायस्सएवाश्वत्वसमवायइतिसमवायेनसमानदेशत्वमपिगोत्वाश्वत्व

योरस्तीतिव्यभिचारएव । यदिचसमवायेऔपाधिकभेदमंगीकृत्यपरिहारस्तदासमवायेस्वाभाविकैकत्वांगीकारभंगः । औपाधिकभेदस्यापिपार्थिवपरमाणौपाकजरूपस्यस्वाभाविकनीरूपत्वंप्रतीवस्वाभाविकसमवायैकत्वविरोधित्वात् । यथोक्तं यद्यस्यौपाधिकोभेदःकुतएकत्वमिष्यतइति । स्थलांतरेपिव्यभिचारमाह ॥ [२६।६] किंचेति । अध्ययनगुणाश्रयत्वयोःप्रतिनियतयोर्व्यंजकयोस्सत्त्वादितिभावः । आदिपदेनसत्त्वनरत्वपरिग्रहः । तयोर्व्यक्तिसंस्थानविशेषरूपप्रतिनियतयोर्व्यंजकयोस्सत्त्वादितिद्रष्टव्यं । रूपपरिमाणयोश्चव्यभिचारइत्याह ॥ [२६।६] रूपेणेति । रूपेमहत्त्वसमानाधिकरणोद्भूतत्वंव्यंजकं । परिमाणेतु किमित्यतउक्तं ॥ [२६।६] परिमाणस्येति । इंद्रियावयवैरर्थावयवानामर्थावयवैरिंद्रियावयविनइंद्रियावयवैरर्थावयविनोर्थावयविनेंद्रियावयविनइतिचतुष्टयसन्निकर्षइत्यर्थः । दृष्टांतेसाध्यवैकल्यमभिप्रेत्याह ॥ [२६।७] तथेति । पृथक्त्वादेरित्यत्रादिपदेन परिमाणग्रहणं । समानेननीरादिना ऽभिहारो मेलनं । तदभावोव्यंजकइत्यर्थः । परिमाणेतुचतुष्टयसंनिकर्षोव्यंजकतयोक्तएवेतिसाध्यवैकल्यमित्याशयः । ननुवर्णव्यतिरिक्तस्यध्वनेरेवाभावात्कस्यवर्णव्यंजकत्वंस्यादित्याशंक्यनिराकरोति ॥ [२६।७] नचेति । कुतोनचेत्यतोनुभवविरोधादित्याह ॥ [२६।७] दूरादिति ॥ [२६।८] एतत्सर्वमिति । इदमुक्तंभवतीत्यादिनोक्तंप्रमेयमित्यर्थः ॥ [२६।८] प्रत्यभिज्ञेति । वर्णानादिनित्यत्वावगाहिप्रत्यभिज्ञेत्यर्थः ॥ [२६।८] आगमाइति । वर्णात्मकाश्चयेशब्दाइत्यादिरूपाः । साक्षिणः संवादिनः ॥ [२६।९] वेदएवनास्तीति । तथाचवेदश्चेतिकिमर्थंपृथगुपसंह्रियतइत्यर्थः । ननुकथंनास्ति प्रत्येकसमुदा

याभ्यांवर्णानामर्थाभिधायकत्वस्यानुपपत्तेस्तदन्यथानुपपत्त्यावर्णातिरिक्तस्तद्व्यंग्यःस्फोटएववेदस्थानीयोभविष्यति । अतो वेदश्चेतिपृथगुपसंहारोयुज्यतइत्यतआह ॥ [२६।९] स्फोटस्येति ॥ [२६।१०] विशिष्टेति । क्रमस्यविशिष्टत्वंनाम भूतभवद्भविष्यद्भिरखिलैरप्येकप्रकारेणपठ्यमानत्वरूपंनियतत्वंद्रष्टव्यं । नन्वनेनपृथगुक्तेःकोभिप्रायउक्तइत्यतआह ॥ [२६।११] अवस्थेति । तथाचवर्णानांवर्णत्वक्रमविशेषविशिष्टत्वरूपावस्थाभेदात् वर्णावेदाश्चेतिपृथगुपसंहारोयुज्यतइत्यर्थः ॥ ७ ॥ वर्णनित्यत्ववादः ॥ ७ ॥ [२६।१२] अन्वयव्यतिरेकाभ्यामिति । व्युत्पत्तिसद्भावेशब्दादर्थबोधस्तदभावेतदभावइत्यन्वयव्यतिरेकाभ्यामित्यर्थः ॥ [२६।१३] व्युत्पत्तिश्चवृद्धव्यवहारदर्शनादेवेति । ननुकथमेतदवधारणं । शक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्यशेषाद्विवृतेर्वदंतिसान्निध्यतस्सिद्धपदस्यवृद्धाइतिवचनेनव्युत्पत्तिप्रकाराणांबहूनांसत्त्वादितिचेन्न । व्युत्पत्तिश्चेत्यस्यप्राथमिकीव्युत्पत्तिरित्यर्थकरणात् । कार्यव्युत्पत्त्यनंतरभाविव्युत्पत्तिप्रकारास्तेऽतोनदोषइतिभावः ॥ [२६।१४] अस्येयंप्रवृत्तिरिति । प्रवृत्तिसामान्यस्यपक्षत्वेविष्टिगृहीतप्रवृत्तेरपिपक्षत्वापत्त्यातत्रबुद्धिपूर्वकत्वसाधनेंशेबाधस्स्यादतइयमित्युक्तं । प्रत्यक्षसिद्धाजलाहरणविषयेत्यर्थः । विष्टिगृहीतप्रवृत्तौव्यभिचारवारणायस्वतंत्रेत्युक्तं । स्वेच्छाधीनेत्यर्थः । वृद्धस्य प्रयोज्यवृद्धस्य ॥ [२६।१५] प्रवृत्तिहेतु(भूत)बुद्धित्वादिति । उपेक्षाज्ञानेबुद्धित्वसद्भावेपिकार्यविषयकत्वाभावाद्व्यभिचारस्स्यादतःप्रवृत्तिहेत्वित्युक्तं ॥ [२६।१६] तद्वस्त्विति । तद्वस्तुबोधएतच्छब्दजन्यइत्यर्थः ॥ [२६।१७] तद्भावभावित्वादिति । तच्छब्दप्रयोगानंतरभावित्वादित्यर्थः ॥ [२६।१८] प्रमाणांतरेणेति । स्तनपानादिप्रवृत्तिहेतुभूतवस्तुबोधोममशब्दातिरिक्तानुमानरूपप्रमाणांतरेणजातइत्यर्थः ।

ममप्रवृत्तिः स्तनपानादौ ॥ [२६।१९] प्रवृत्तिहेतुभूतइति । प्रयोज्यवृद्धस्येतिशेषः । प्रवृत्तिहेतुभूत स्तनपानादिप्रवृत्तिहेतुभूत ॥ [२६।२०] नतावदहमित्यादि । कृत्यसाध्येचंद्रमंडलेतक्षकचूडामण्याहरणादौक्रियादिज्ञानमात्रस्यसत्त्वेपिप्रवृत्त्यभावेनव्यभिचारात्क्रियादिज्ञानमात्रस्यप्रवर्त्तकत्वमितिभावः ॥ [२६।२१] प्रतीत्यर्हीति । इदंमयाकर्तव्यं । स्तनपानत्वादितिस्तनपानादेःकार्यत्वमनुमानेनज्ञात्वेत्यर्थः ॥ [२६।२१] इत्यनुमायेति । चैत्रस्यप्रवृत्तिःकार्यबोधपूर्विका । बुद्धिपूर्वप्रवृत्तित्वान्मदीयस्तनपानादिप्रवृत्तिवदित्यनुमायेत्यर्थः ॥ [२६।२१] वाक्यस्येति । प्रवृत्तिहेतुभूतार्थबोधकत्वेनावधारितवाक्यस्येत्यर्थः ॥ [२६।२२] लिङाद्यावापइति । लिङ्लोट्तव्यप्रत्ययपंचमलकाराणांस्थापनेकृतइत्यर्थः ॥ [२६।२३] तदुद्धारइति । तेषांलिङादीनांनिष्कासनइत्यर्थः । तएव लिङादयएव तदेव कार्यमेव ॥ [२६।२४] प्रत्येतुमर्हतीति । यएवलौकिकास्तएववैदिकाइतिलौकिकवैदिकपदयोरभेदाल्लोकावगतसामर्थ्यश्शब्दोवेदेपिबोधकइतिन्यायादितिभावः ॥ [२६।२५] तत्रेति । ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादिवेदवाक्ये लिङादिप्रत्ययः ईतप्रत्ययः कार्यशरीरं प्रयत्नरूपशाब्दभावनारूपं अभिदधाति । भावनैवप्रयत्नात्मासर्वत्राख्यातगोचरः । लिङोभिधासैवचशाब्दभावनेत्यादितदीयवचनात् । प्रकृतिः यजइत्येवंरूपोधातुः । तद्विषयं लिङ्वाच्यप्रयत्नविषयंयागं । पदांतराणि ज्योतिष्टोमेनस्वर्गकामइत्यादिपदानि । तत्रायंविवेकः । इनेतितृतीयाविभक्तिःप्रकृत्यर्थभूतयागविशेषणंकरणकारकं यागस्यकरणत्वमितियावत् । ज्योतिष्टोमेत्येतत्प्रकृत्यर्थयागविशेषणीभूतंनामधेयं । स्वर्गकामइत्येतत् नियोज्यमधिकारिणं । अभिदधति संति कार्यप्रतीतावेवव्याप्रियंते व्यापारवंतिभवंतीत्यर्थः । ननुद्विविधान्यंगवाक्यानि । सन्निपत्योपकारकाण्यारादुपकार

काणिचेति । दृष्टद्वारासाक्षादुपकारकाणिसन्निपत्योपकारकाणि । तान्येवक्कचित्स्वरूपोपकारकाणीत्युच्यंते । यथाव्री हीनवहंतीत्यादीनि । तत्रावहननादेर्वितुषीभावरूपदृष्टफलद्वारैवयागस्वरूपोपकारकत्वात् । अदृष्टद्वारोपकारकाण्यारादुपकारकाणि । तान्येवक्कचित्फलोपकारकाणीत्युच्यंते । यथाइडोयजति समिधोयजति बर्हिर्यजति । तनूनपातंयजति स्वाहाकारंयजतीतिपंचप्रयाजादिवाक्यानि अदृष्टद्वारायागफलेउपकारकत्वात् । तत्रसन्निपत्योपकारक(कांग)वाक्यानिव्रीहीनवहंतीत्यादीनि कार्यवाचकलिङादिप्रत्ययशून्यानि । तानिकथंप्रमाणानि । आरादुपकारकेष्वपिलिङाद्युपेतान्येववाक्यानिप्रायस्संति । कानिचिदेवप्रयाजादिवाक्यानितदनुपेतानिसंति । तानिचकथंप्रमाणानीत्यतआह ॥ [२६।२५] **सन्निपत्योपकारकांगवाक्यानीति** । इदमुपलक्षणं । आरादुपकारकाणिकानिचित्प्रयाजादिवाक्यान्यप्यत्रग्राह्याणि। अतएवकंठतोनुक्तिरितिज्ञेयं । मंत्राणामपिकार्येप्रामाण्यमुपपादयति ॥ [२६।२८] **मंत्रा अपीति** ॥ [२६।२८] **अर्थेति** । देवतादिरूपार्थेत्यर्थः ॥ [२६।२८] **तत्रैवेति** । कार्यांगभूतार्थस्मारणएवेत्यर्थः । नन्वर्थवादानांस्तुतिपरत्वेनकथंकार्येप्रामाण्यमित्यतआह ॥ [२७।१] **अर्थवादा अपीति** ॥ [२७।१] **तत्रैवेति**।विधिबोध्येकार्यएवेत्यर्थः ॥[२७।१] **रुचिमिति** । प्राशस्त्यबोधनेनशीघ्रंमनःप्रवृत्तिमित्यर्थः।यत्रकार्येकृत्स्नवेदप्रामाण्यंतत्कार्यंनामकिमित्यतआह ॥ [२७।१] **कार्यंचेति** । चंद्रमंडलादावतिव्याप्तिवारणायसत्यंतं । विषपानादावतिव्याप्तिवारणायविशेष्यमितिद्रष्टव्यं। तच्चकार्यं॥[२७।२]**लोकेभावार्थोवेदेत्वपूर्वमिति**।भावार्थो धात्वर्थः।अयंभावः। गामानयेत्यादिलौकिकवाक्येआनयनरूपधात्वर्थएव

कृतिसाध्यःकृत्युद्देश्यश्च।वेदेतुयजेतेत्यादावपूर्वमदृष्टमेवकृतिसाध्यं कृत्युद्देश्यं। कामीहिकाम्याव्यवहितपूर्वक्षणवर्त्यैवसाधन त्वेनावैतीतिन्यायेनयागादेःक्रियात्मकत्वेनचिरविनष्टस्यकाम्यभूतस्वर्गाव्यवहितपूर्वक्षणवर्तित्वाभावादपूर्वस्यचतथात्वात्तदे वलिङर्थभूतंस्थायिकार्यं । तथाचयजेतेत्यस्ययागेनापूर्वंभावयेदित्यर्थइतितत्संप्रदायइति । ननुवेदांतभागानांकथंकार्यपरत्व मित्यतआह ॥ [२७।२]अतएवेति । कृत्स्नस्यापिवेदस्यकार्यपरत्वादेवेत्यर्थः ॥ वेदांता[२७।२]नामपीति । तदंतर्गतानामित्यर्थः । वि ज्ञानघनएवैभ्योभूतेभ्यस्समुत्थायेत्यादीनांकार्यांगभूतकर्तृस्वरूपप्रतिपादकत्वं । वाग्वावनाम्नोभूयसीत्यादीनांकार्यांगभूतदेव तास्वरूपप्रतिपादकत्वंमंतव्यं । ननुकर्मकांडएवकार्यवाचिलिङादीनांसत्त्वेन ब्रह्मकांडानांवेदांतानांकथंकर्मकांडस्थकार्यांगभू तकर्त्रादिस्वरूपप्रतिपादकत्वेनकार्यपरत्वं प्रकरणभेदादित्याशंक्यनिराकरोति ॥ [२७।३]प्रकरणभेदादिति । ब्रह्मप्रकरणक र्मप्रकरणयोर्भेदादित्यर्थः ॥ [२७।३]तदनंगीकारइति । वेदांतवाक्यानांकर्मकांडस्थकार्यांगभूतकर्त्रादिप्रतिपादकतानंगीकारइ त्यर्थः । वेदांतएवकार्यवाचकलिङादेस्सद्भावात्तदंगभूतकर्त्रादिस्वरूपप्रतिपादकत्वंवेदांतवाक्यानामुपपद्यतएवेत्याह ॥ [२७।३]आत्माज्ञातव्यइतीति । एकवाक्यतामित्यत्रवेदांतानामितिवर्तते । कार्यांगभूतकर्त्रादिस्वरूपप्रतिपादकत्वेनेत्यर्थः । सर्वशब्दानांकार्यपरत्वोपपादनस्यप्रयोजनंदर्शयन्नुपसंहरति ॥ [२७।४]तदेवमिति । कार्यान्वितेसिद्धेपिगवादिशब्दानांपरेणा पिव्युत्पत्तिरंगीक्रियतइत्यतःकेवलइत्युक्तमित्यभिप्रेत्यतद्व्याचष्टे ॥ [२७।५]कार्यान्वयरहितइति । अतएवस्वप्रधाने स्वयमेव प्रधानेनकेनाप्यन्वितइत्यर्थः । कार्यान्वयरहितेपिकार्येलिङादीनांपरेणव्युत्पत्तिरंगीक्रियतएवेत्यतस्सिद्धइत्युक्तमितिसूचय

न्व्याचष्टे ॥ [२७१५] कार्यातिरिक्तार्थइति । अप्रामाण्यमित्यत्रकेवलसिद्धेर्थइत्यनुवर्ततइत्यभिप्रेत्याह ॥ [२७१६] तथाविधइति । कार्यान्वयरहितत्वेनकार्यातिरिक्तत्वेनचकेवलसिद्धार्थभूतइत्यर्थः । तथाचकार्याननन्वितःकार्यातिरिक्तोर्थस्सिद्धार्थइतिसिद्धार्थलक्षणंसूचितंभवति । अत्रकार्याननन्वितस्सिद्धार्थइत्युक्तेकार्येऽतिव्याप्तिस्स्यात्कार्यस्यकार्यान्वयाभावात् । अतःकार्यातिरिक्तइत्युक्तं । तावत्युक्तेघटमानयेतिवाक्यगतेआनयनान्वितेघटेऽतिव्याप्तिस्स्यात् । अतउक्तंकार्याननन्वितइति इति पदकृत्यंद्रष्टव्यं । ननुपरेणवेदस्यव्युत्पत्त्यभावेनविष्णुप्रतिपादकत्वाभावएवांगीकृतोनतुतदप्रमाजनकत्वलक्षणमप्रामाण्यं । तथात्वेस्यादेवोक्तंवेदप्रामाण्यादिकंसमस्तमित्युक्तविरोधापत्तेः । अतोसदनुवादोयं । किंचव्युत्पत्त्यभावलक्षणोहेतुः पदानामप्रतिपादकत्वसाधकएव । नत्वप्रामाण्यसाधकः । पदानांव्युत्पत्त्यभावेज्ञानमात्राजनकत्वप्राप्त्याऽप्रमारूपज्ञानजनकत्वरूपाप्रामाण्यसाधकत्वांगीकारेहेतोर्विरुद्धत्वापातादित्यतोऽप्रामाण्यपदंव्याचष्टे ॥ [२७१६] अप्रतिपादकत्वमिति । ननुभवन्मतेपिकार्यान्वितएवेश्वरेसदागमानांप्रामाण्यंभविष्यति । अतःकार्यान्वयरहितेकेवलसिद्धेर्थेवेदानामप्रतिपादकत्वस्यभवतामपीष्टत्वात्कथंतन्निराकरणमित्याशंक्यनिराकरोति ॥ [२७१६] नचकार्यान्विततयैवेति । तत्र ईश्वरे । अनेन अप्रामाण्यंनचेतिनिराकरणेन । स्वप्रधाने कार्यान्वयरहिते । किमत्रज्ञापकमितिचेत्सदागमैकविज्ञेयमित्यत्रैकशब्दएवेतिब्रूमः । ननुतत्रैकशब्दस्यदुरागमादिव्यावृत्त्यर्थकेवलार्थतयाव्याख्यातत्वात्कथंतस्यस्वप्रधानेविष्णौसर्ववेदप्रामाण्यस्याभिलषितत्वज्ञापकत्वमित्यतआह ॥ [२७१७] अतएवेति । स्वप्रधानेविष्णौसर्ववेदप्रामाण्यंयतोभिलषितमतएवेत्यर्थः ।

अभिलषितैतत्प्रमेयलाभार्थमितियावत् ॥ [२७।७] एकएवेति । एकोभगवानेवकार्यानन्विततयाएकविज्ञेयोमुख्यविज्ञेयःप्रधान विज्ञेयः । एकेमुख्यान्यकेवलाइतिवचनेनैकशब्दस्यप्राधान्यरूपमुख्यार्थत्वादित्यर्थः । समर्थितं स्वग्रंथे ॥ [२७।८] तदभ्युपगम्य तएवेति । अस्माभिरपियोग्येतरान्वितेस्वार्थेशब्दानांव्युत्पत्तिरंगीकृतैवेत्यर्थः । यथोक्तमनुव्याख्याने । शक्तिश्चैवान्विते स्वार्थेशब्दानामनुभूयते । अतोन्विताभिधायित्वमिति । ननुकार्यान्वितेआनंतरिकीअस्माभिरप्यंगीक्रियतएवातःकथमवधा रणमित्यतआह ॥ [२७।९] एवेतिकार्यान्वयनियमेति । कार्यान्वितएवव्युत्पत्तिरितिपरोक्तकार्यान्वयनियमनिराकरणार्थकए वैवशब्दोनतुकार्यान्वितेव्युत्पत्तिनिराकरणार्थइत्यर्थः । कार्यान्वितएवार्थेसर्वशब्दानांव्युत्पत्तिदर्शनात्केवलसिद्धेर्थेतदभावइ तिपरेणोक्तेतत्प्रतिपक्षतयासिद्धान्वितएवव्युत्पत्तिदर्शनादित्येववक्तव्यं । ननुगृहीतेरुपादानादिति । असंगतत्वादतोगृहीते रितिपदंव्याचष्टे ॥ [२७।९] दर्शनादिति । वाक्यार्थमाह ॥ [२७।१०] कार्यान्वयेति । परोक्तकार्यान्वितेव्युत्पत्तिमंगीकृत्यनियमनिरा करणमेवकाराभिप्रायइत्युक्तं । इदानींप्रकारांतरेणतदभिप्रायमाह ॥ [२७।१०] अथवेति ॥ [२७।११] अन्यत्रेति । लिङाद्यर्थस्त्विष्टसाधन त्वमेवेत्यादिनाकर्मनिर्णये कार्यताचनकाचित्स्यादिष्टसाधनतांविनेत्यनुव्याख्यानेचेत्यर्थः ॥ [२७।११] पराभिमतस्येति । कृति साध्यत्वेसतिकृत्युद्देश्यत्वरूपस्येत्यर्थः ॥ [२७।११] एवेत्युक्तमिति । तथाचसिद्धान्वितएवव्युत्पत्तिर्दृष्टा नपरोक्तकार्यान्विते त स्यैवाभावात् । नहिशशशृंगान्वितेव्युत्पत्तिर्दृष्टेत्येवंपरोक्तकार्यान्वितेव्युत्पत्तिनिराकरणमेवैवकाराभिप्रायइत्यर्थः । तत् सि द्धान्वितएवव्युत्पत्तिदर्शनं । आदिपूर्वकशब्दयोरेकार्थत्वादन्यतरवैयर्थ्यमित्याशंक्यव्याख्याति ॥ [२७।१२] अंगुलीति । भ्रूवि

क्षेपादेरित्यत्रादिपदेनछोटिकावादनंग्राह्यं । तथोक्तः अंगुलिप्रसारणादिरित्युक्तः । पूर्वः कारणभूतः । निर्देशस्य । इयं मातेत्यादिनिर्देशस्य । नन्वियंमातेत्यादिनाभगवत्पादैःपिकःकोकिलइतिवदुपदेशतोजायमानएवव्युत्पत्तिप्रकारोदर्शितः । अवधारणेनचप्रकारांतरंव्यावर्तितं । तन्नसंभवति । सास्नादिमान्गौरित्युपदेशानंतरंसास्नादिमत्त्वेनगोशब्दवाच्यत्वज्ञानमनुमानेनापिभवति। तथाप्रभिन्नकमलोदरेमधूनिमधुकरःपिबतीतिवाक्यश्रवणानंतरंप्रभिन्नकमलोदरेयंमधुपानकर्तारंपश्यति तंमधुकरशब्दवाच्यंप्रत्यक्षेणैवप्रत्येति । एवंशक्तिग्रहंव्याकरणोपमानकोशाप्तवाक्यैर्व्यवहारतश्च । वाक्यस्यशेषाद्विवृतेर्वदंतिसान्निध्यतःसिद्धपदस्यवृद्धाइत्युक्तप्रकारेणव्युत्पत्तिप्रकाराणांबहूनांसत्त्वान्निर्देशेनैवतज्ज्ञानातीत्यवधारणंकथमित्यत आह ॥ [२७।१३] एवंशब्देनेति॥ [२७।१३] वृद्धव्यवहारेति । तथाहि चैत्रजलमाहरेत्यादिनोपपादितप्रकारेणवृद्धव्यवहारदर्शनेनजायमानं कार्यान्वितेप्राथमिकव्युत्पत्तिप्रकारंव्यावर्तयतीत्यर्थः ।विषयविषयिभावं प्रतिपाद्यप्रतिपादकभावं॥ [२७।१७] आवापोद्धाराभ्यामिति । आवापःस्थापनं । उद्धारःपरित्यागः । यदर्थावापेयच्छब्दावापोयदर्थोद्धारेयच्छब्दोद्धारइत्यावापोद्धाराभ्यामित्यर्थः । खादयतीतिस्वार्थेणिच् । सखिकर्तृकापूपखादनरूपार्थावापेऽयंतेसखाऽपूपंखादतीतिशब्दावापः । भ्रातृकर्तृककदलीफलाभ्यवहाररूपार्थोद्धारेसतिअयंतेभ्राताकदलीफलमभ्यवहरतीतिशब्दोद्धारइतिद्रष्टव्यं ।ननूपायद्वयस्याप्यविशेषान्मदीयएवोपायःकिंनांगीक्रियतइत्यतआह ॥ [२७।१८] लघीयांश्चेति । वृद्धव्यवहारदर्शनापेक्षयाव्युत्पत्तौकथमस्योपायस्यलघीयस्त्वमित्यतःपरकीयस्योपायस्यगुरुत्वं नानयेत्यादिवाक्यतः । आनीयमानदृष्ट्यैवव्युत्पत्तेःसंभवेसति। एष्यदानयनायायंकुतएवप्रतीक्षतइत्यनु

व्याख्यानंमनसिनिधायोपपादयति ॥ [२७।१९] शश्वद्विस्मरणेति । अत्यपूपांस्तवभ्रातेत्यादावावापतोपिच । उद्वापाद्वर्तमानत्वा
दाकांक्षादिबलादपि । बालोव्युत्पत्तिमप्येतीत्यनुव्याख्यानंमनसिनिधायस्वोपायस्यलघीयस्त्वमुपपादयति ॥ [२७।२०] पुरोवस्थिते
ष्विति । नन्वनागतादौपदार्थेकथंव्युत्पत्तिः तस्यावर्तमानत्वेनपुरोवस्थितत्वाभावादनपेक्षितत्वाच्चेत्यतो दृष्टाज्ञातपदार्थ
स्यस्यादाकांक्षाभविष्यति । व्युत्पत्तिःप्रथमायस्माद्वर्तमानेगतेततइत्यनुव्याख्यानंहृदिनिधायानागतादौव्युत्पत्तिमुपपादय
ति ॥ [२७।२१] वर्तमानापदेशोष्विति । वर्तमानइत्यपदेशो व्यवहारोयेषांतेतथातेषु वर्तमानपदार्थेष्वित्यर्थः ॥ [२७।२१] जातजिज्ञासइ
ति । वर्तमानादन्यत्रानागतादौजातजिज्ञासइत्यर्थः । एतेनेत्युक्तंविशदयति ॥ [२७।२२] प्रथमंव्युत्पत्तेरेवेति । तथाचप्रथमभावि
कार्यव्युत्पत्तीत्युक्तमसदितिभावः ॥ [२७।२४] एवमेवेति । योग्येतरान्वितेस्वार्थेव्युत्पत्तिरितिसामान्यमेवांगीकार्यमित्याहेत्यर्थः ।
कुतोनास्तीत्यतस्तदुपपादयति ॥ [२७।२६] गुणप्रधानभावेनखल्विति । तर्ह्यत्राप्यस्तुकार्यस्यकार्यांतरेणगुणप्रधानभावेनान्वयइ
त्यतआह ॥ [२८।१] कार्येचेति ॥ [२८।१] तथाचेति । कार्यस्ययेनकार्यांतरेणान्वयोबोधनीयस्तस्यापिकार्यस्यप्राधान्येनैवलिङादिशब्द
बोध्यत्वादित्यर्थः ॥ [२८।१] कार्यद्वयस्येति । प्रधानतयालिङादिशब्दबोधितस्येत्यर्थः । ननुप्रयाजाद्यंगसाध्यावांतरकार्यस्यदर्श
पौर्णमासादिसाध्यप्रधानकार्यस्यचगुणप्रधानभावेनान्वयोस्त्येव । तथाचकथंकार्यद्वयस्यगुणप्रधानभावेनान्वयोनसंभवती
त्युक्तमित्यतउक्तं ॥ [२८।१] युगपदिति । एकस्मिन्नेववाक्यइत्यर्थः । तत्रतुभिन्नवाक्यस्थकार्ययोरेवगुणप्रधानभावेनान्वयइतिभा
वः । ननुप्राभाकरस्यान्विताभिधानवादित्वात्कथंकार्यमात्रेलिङादीनांव्युत्पत्तिस्तेनांगीकर्तुंशक्यतइत्यतउक्तं ॥ [२८।२] सिद्धेन्वि

तेवाकार्यइति ॥ गवादिपदानामिति । सिद्धपदानामित्यर्थः । एकप्रयोजकमाशंकते ॥ ननुकार्यान्वयिनीति । अन्वयस्संबंधः ॥ तद्वत्त्वंकार्यस्यसिद्धस्यचास्तीति । अन्वयस्यसंबंधरूपत्वेनद्विष्ठत्वादितिभावः ॥ नचकार्यप्रतीति। गुणप्रधानभावस्यभेदव्याप्तत्वेनैकस्मिन्कार्येतस्यविरुद्धत्वादितिभावः । ननुकार्यान्वयशब्देनगुणप्रधानानुगतमन्वयसामान्यमेवबोध्यतइतिनोक्तदोषइत्यतआह ॥ नचगुणइति । विशिष्यान्विताभिधानवादिनाप्राभाकरेणकार्यान्वयशब्दस्यगुणप्रधानानुगतान्वयसामान्यबोधकत्वानंगीकारादितिभावः ॥ कार्यान्वयान्वयिनीति । कार्येणसाकंयोन्वयस्संबधस्तदन्वयवत्त्वंकार्येसिद्धेचास्ति संबंधस्यद्विष्ठत्वादितिभावः । एतदप्येतेनैवपरास्तं । उक्तरीत्याशब्दैक्येप्यर्थैक्याभावादितिभावः । पुनरेकप्रयोजकमाशंकते ॥ कार्यपरेति । कार्यपरंयत्पदंतस्ययोर्थस्तदन्वितइत्यर्थः । तथाचस्वर्गकामोयजेतेत्यादौलिङादेःकार्यवाचकत्वेनकार्येतात्पर्योपेतत्वात्सिद्धपदस्यापिकार्योपयुक्तकर्त्रादिकारकप्रतिपादकत्वेनकार्येतात्पर्योपेतत्वात्कार्यपरत्वंकार्यसिद्धोभयसाधारणमित्येकप्रयोजकलाभइतिभावः ॥ तदुद्देशित्वमात्रमिति । कार्योद्देशित्वमात्रं तदुपयुक्तार्थप्रतिपादकत्वमात्रं नवाचकत्वमित्यर्थः ॥ नैराकांक्ष्यलक्षणस्येति । यत्प्रतिपादनानंतरंपुनराकांक्षानभवति । तन्निराकांक्षंसंपूर्णाकांक्षमित्यर्थस्तस्यभावोनैराकांक्ष्यंतद्रूपस्येत्यर्थः ॥ गौरश्वः पुरुषोहस्तीतिवेति। वाविकल्पोपमानयोरित्यभिधानाद्वाशब्दउपमानार्थः । तथाचगौरश्वःपुरुषोहस्तीतिनिराकांक्षवाक्यवदित्यर्थः ॥ देवदत्तःपचतीतिवेति । अत्रवाशब्दोऽप्यर्थः । देवदत्तःपचतीत्यपिपदजातमित्यर्थः । पचतीतिलटएवसत्त्वेननैराकांक्ष्यहेतोःकार्यबोधकलिङादेरभावादिति

भावः ॥ पचेतीति । अत्रकार्यताबोधकस्यलोटस्सत्त्वादितिभावः । सिद्धमात्रज्ञापनेनकथंवाक्यस्यनैराकांक्ष्यलक्षणपर्यवसितत्वमित्यतआह ॥ योबाल्यएवेति । बाल्यावस्थायामेवेत्यर्थः । योबालएवेत्यपिक्वचित्पाठः । कुतश्चित्कारणात् राजकार्यादिरूपात् । तथाभावं मातापितृमत्त्वं । पाटलीपुत्रे तन्नामकनगरे । महिषी पत्नी । सिद्धमात्रज्ञापनेनेत्यत्रावधारणार्थकमात्रशब्दव्यावर्त्यमाह ॥ कार्योपदेशमंतरेणेति । निराकांक्षत्वात् आकांक्षापूर्तिहेतुत्वात् ॥ स्वात्मनिसंदिग्धइति । स्वस्मिन्नपिसंदेहवान्भवतीत्यर्थः ॥ सिद्धमात्रज्ञापनेनेति । कार्योपदेशमंतरेणसिद्धस्यैवज्ञापनेनेत्यर्थः । तद्धेतोरेवास्तुतद्धेतुत्वंकिंतेनेतिन्यायंहृदिनिधायाह ॥ कार्यबोधनइति ॥ यदिष्टसाधनेति । तदेवसिद्धार्थबोधनेप्यस्तिचेन्नैराकांक्ष्यलक्षणंपर्यवसानंभविष्यत्येवेत्यर्थः । कार्यताचनकाचित्स्यादिष्टसाधनतांविनेत्युक्तेरितिध्येयं ॥ ७ ॥

ननूक्तरीत्यावाक्यानांसिद्धेर्थेप्रामाण्यसिद्धावपिविष्णोस्स्वप्रधानतयासकलवेदवेद्यत्वंप्रतिज्ञातंकथमनेनसिद्धमित्यतआह ॥ अनेनेति । सिद्धेव्युत्पत्तिप्रदर्शनेनेत्यर्थः । यद्वासिद्धमात्रज्ञापनेनवाक्यस्यपर्यवसितत्वोपपादनेनेत्यर्थः । स्वप्रधानं अनन्यशेषं । तदनंतरं सयदिकथंतौपश्येयमितिजिज्ञासतइत्यादिनोक्तप्रकारंवेदवाक्येपिदर्शयति ॥ ततोवाक्यार्थज्ञानादिति । इयंचयोजनैकांतभक्ताभिप्रायेणमुमुक्षुत्वस्यानुक्तत्वात् । इयंमाताऽयंपितेत्येतावताभागेनसूचितेतिज्ञातव्यं । मध्यमभक्ताभिप्रायेणसुरूपोसीत्यनेनसूचितांयोजनामाह ॥ अथवेति । तत्त्वमसीत्यस्यसिंहोदेवदत्तइतिवत्साद्दश्यमादायोपचारेणाभेदप्रतिपादकत्वमन्यत्रोक्तमभिप्रेत्याह ॥ परमात्मवदिति । यदर्थज्ञापनमुपचारप्रयोगेप्रयोजनंतमर्थमाह ॥ किंत्वी

[२८।२५]श्वरांधीनेति ॥ [२८।२६]अवस्थितस्स्यामिति । मुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यवस्थितिरितिवचनादत्रमुमुक्षुत्वोक्त्यैकांतभक्तातिरिक्तभक्ताभिप्रायेणेयंयोजनेतिज्ञायतइतिद्रष्टव्यं । ननुविज्ञानमानंदंब्रह्मेत्यादिवेदवाक्यस्येयंमातेत्यनेनयोजनाप्रकारस्यसूचितत्वेपिततोवाक्यार्थज्ञानादवाप्तपरमानंदइत्यादिनोक्तउपासनाविधिपराणांवाक्यानांयोजनाप्रकारोमूले नसूचितो तस्तत्प्रदर्शनंकिंमूलकं । तथा तत्त्वमसीत्यादिवेदवाक्यस्यसुरूपोसीत्यनेनयोजनाप्रकारस्यसूचितत्वेपिततःपुनरसौजिज्ञासतइत्यादिनाप्रबंधेनोक्तःकर्मविध्यादिपराणांवेदवाक्यानांयोजनाप्रकारोमूले नसूचितोतस्तत्प्रदर्शनंचकिंमूलकमित्यतआह ॥ [२९।२]एतच्चेति ॥ [२९।२]अन्यार्थंत्विति । अन्यार्थंतुजैमिनिःप्रश्नव्याख्यानाभ्यामपिचैवमेकइतिसूत्रस्यपरमात्मज्ञानार्थंकर्मादिकमपि वदतीतिजैमिनिः कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीतितस्मैसहोवाचद्वेविद्येवेदितव्ये । कथंनुभगवस्सआदेशोभवति यथासोम्यैकेनमृत्पिंडेनेत्यादिप्रश्नव्याख्यानाभ्यांएवमपिचैकेपठंति । यस्तंनवेदकिमृचाकरिष्यतीतिभाष्योक्तप्रकारेणार्थोद्रष्टव्यः ॥ ७ ॥ [२९।३]अनुवादकत्वेनेति । प्रमाणांतरेणतस्यज्ञातत्वादेवेत्यर्थः ॥ [२९।३]अप्रामाण्यंस्यादिति । व्यवहारे भट्टनयइत्यंगीकारेणानधिगतार्थगंतृत्वरूपप्रमाणलक्षणाभावादितिभावः । ननुकार्यस्यापिप्रमाणांतरेणसिद्धत्वेकार्यताबोधकस्यापिवाक्यस्यानुवादकत्वेनाप्रामाण्यंत्वन्मतेपिस्यादेवेत्यतआह ॥ [२९।४]कार्यस्यचेति । कार्यस्यत्वित्यर्थः ॥ [२९।४]पूर्ववात्राप्यनुवृत्तिरिति । इयंमाताऽयंपितासुरूपोसीत्यादौवाक्येनाप्रामाण्यमित्यस्यानुवृत्तिवत्तस्यतत्रेतिवाक्येपिनाप्रामाण्यमित्यस्यानुवृत्तिःकार्येत्यर्थः । तथाचतस्यतत्रप्रामाण्यानुभवात्तस्यचतत्रनाप्रामाण्यमितियोज्यं ॥ [२९।५]नान्यदिति । स्मृत्यादाव

व्याप्तिप्रसंगेनानधिगतार्थबोधकत्वंनप्रमाणलक्षणमित्यर्थः । पूर्वंसिद्धत्वंनामज्ञातत्वमित्यभ्युपेत्यतत्प्रतिपादकस्यवेदस्यानुवादकत्वेपियथावस्थितार्थबोधकत्वलक्षणंप्रामाण्यंप्रत्यक्षादिवत्संभवतीतिव्याख्यातं । अधुनासिद्धत्वंनामनिष्पन्नस्वरूपत्वमित्यभ्युपेत्यानुवादकत्वमेवनास्तीत्याशयेनतस्यचतत्रेतिवाक्यंप्रकारांतरेणव्याचष्टे ॥ [२९।६] **अस्तिचासावित्यादिना** । सिद्धोपि निष्पन्नस्वरूपोपि । अस्मिन्पक्षेवाक्यंयोजयति ॥ [२९।६] **ततइत्यादिना** । तत्रेत्यस्यार्थस्सिद्धार्थएवेति । तस्येत्यस्यार्थइयंमातेत्यादिवाक्यस्येति । प्रामाण्यानुभवादित्यत्रप्रामाण्यपदमननुवादकत्वपरमित्यभिप्रायेणोक्तं ॥ [२९।६] **अननुवादकत्वमिति** । अस्यामपियोजनायामनुवृत्तेर्नाप्रामाण्यमित्यत्रापितत्रतस्येत्यनुवर्ततेइत्याशयेनोक्तं ॥ [२९।७] **केवलेसिद्धेर्थेवाक्यस्येति** । योजनाद्वयेपिनाप्रामाण्यमित्यनंतरंशेषंपूरयति ॥ [२९।७] **किंकार्यपरत्वाग्रहेणेति** ॥ ७ ॥ [२९।७] **बोधकत्वेनेति** । यथावस्थितार्थबोधकत्वेनेत्यर्थः ॥ [२९।८] **परार्थत्वादिति** । परप्रयोजनार्थत्वादित्यर्थः ॥ [२९।९] **यत्कार्यपरमिति** । नतुकाकस्याष्टौदंताइत्यादिसिद्धार्थपरंवाक्यमित्यर्थः । ननुकार्यज्ञापनस्यापि ज्ञापनत्वेनक्वचित्प्रयोजनत्वात्सिद्धइतिव्यर्थमित्यतआह ॥ [२९।१०] **सिद्धेतिप्रकृतत्वादेवोक्तमिति** । नतुकार्यज्ञापनव्यावर्तकत्वेनेत्यर्थः । सिद्धज्ञापनादित्यस्ययथार्थज्ञानजननादित्यर्थइत्याशयेनाह ॥ [२९।११] **अतस्तस्यपरज्ञापनमेवेति** । यथार्थज्ञानसाधनस्यवाक्यस्यपरंप्रतियथार्थज्ञानजननमेवप्रयोजनमित्यर्थः ॥ [२९।११] **तच्चप्रयोजनमिति** । परंप्रतियथार्थज्ञानजननरूपंप्रयोजनमित्यर्थः । सिद्धविषयस्य सिद्धार्थप्रतिपादकस्य । सिद्धार्थप्रतिपादकादपिवाक्याद्यथार्थज्ञानोत्पत्तेरनुभवसिद्धत्वादितिभावः ॥ [२९।१२] **अथवेति** । अस्मिन्पक्षइष्टसाधनतातिरिक्तपराभिप्रेतकार्यनि

रासार्थसिद्धपदप्रयोगइतिभावः ॥ यथावस्थितपर्यायोवेति । तथाचसिद्धज्ञापनादित्यस्ययथावस्थितार्थज्ञापनादित्ये वार्थोद्रष्टव्यः । पूर्वएवाभिप्रायः । शंकते ॥ सत्यमेतादिति । ज्ञापनं यथावस्थितार्थज्ञापनं । कार्यज्ञानमेवप्रवर्तकमितिनिर्धारयितुंपूर्वपक्षीस्वयमेवप्रवर्तकांतराण्याशंक्यनिराकरोति ॥ नचवाच्यमित्यादिना ॥ तद्व्यापारइति । अभिधारूपश्शब्दव्यापारइत्यर्थः । केचित्तुपदार्थस्मृतिरूपश्शब्दव्यापारइत्यर्थइत्याहुः । शब्दस्यप्रवर्तकत्वेदूषणमाह ॥ तथासतीति । तच्छ्राविणां शब्दश्राविणां । शब्दतद्व्यापारयोरुभयोर्नप्रवृत्तिकारणत्वं । व्यतिरेकव्यभिचारादित्याह ॥ बालस्येति । आदिपदेनशब्दव्यापारग्रहणं । ननुयुद्धादौशंखभेर्यादिशब्दश्रवणमात्रस्यैवप्रवर्तकत्वंदृष्टमितिचेत्तत्राह ॥ यापीति ॥ पुरुषाभिप्रायानुमानादेवेति । अयंयुद्धकर्तव्यत्वाभिप्रायवान् । तत्सूचकशंखादिध्वनिकर्तृत्वादित्येवं कार्यतामनुमायैवप्रवर्तते । तथाचकार्यतानुमापकत्वेनैवशंखादिशब्दश्रवणस्यप्रवर्तकत्वंनसाक्षात् । साक्षात्प्रवर्तकमेवचास्माभिर्विचार्यतेतादृशंचकार्यमेवेतिभावः । नन्वथापिनकार्यज्ञानस्यप्रवर्तकत्वंकिंतुरागद्वेषयोरेव । प्रवर्तनालक्षणाःस्युर्दोषारागादयश्चतइतिवचनादित्याशंक्यनिराकरोति ॥ रागद्वेषयोरिति । यद्यप्युक्तकारिकायांरागद्वेषमोहानांत्रयाणामपिप्रवर्तकत्वस्योक्तत्वाद्रागद्वेषयोर्द्वयोरेवग्रहणमयुक्तं । तथापिरागद्वेषयोरेवसाक्षात्प्रवर्तकत्वं । मोहस्यतुरागद्वेषोत्पादनद्वारैवेतितार्किकेणांगीकृतत्वात्साक्षात्प्रवर्तकत्वाभिप्रायेणद्वयोरेवग्रहणमित्यवगंतव्यं ॥ नतुज्ञाततयेति । अत्रहियज्ज्ञानं प्रवृत्त्यादिकारणंतद्विषयोविचार्यते । नहिरागादिज्ञानंप्रवृत्त्यादिकारणं येनप्रवर्तकज्ञानविषयतयाताभ्यामन्यथासिद्धि

स्स्यादितिभावः । ननुरागद्वेषाभ्यांयदाप्रवर्ततेतदानींतज्ज्ञानमप्यस्त्येवेतिज्ञाततयैवप्रवर्तकत्वंप्राप्तमितिचेत्तत्राह ॥ [२१।१७] ज्ञानं त्विति । रागद्वेषविषयकंज्ञानंत्वित्यर्थः ॥ [२१।१७] अबुभुत्सितग्राह्यतयेति । तयोस्सुखादिवत्ज्ञातैकसत्त्वादितिभावः । एवंप्रवर्तकांतराणिनिराकृत्योपसंहरति ॥ [२१।१८] अतइति । नन्वथापिकार्यताज्ञानमेवप्रवर्तकमित्ययुक्तं पुत्रस्तेजातः । सुरसमाम्रफलं । द्वारंद्वारमित्यादिवाक्यात्प्रवृत्तिस्तावदनुभवसिद्धा नह्यत्रकार्यताबोधकंकिंचित्पदमस्ति । लिङाद्यन्यतमस्याभावादित्यत आह ॥ [२१।१८] अतएवेति । यतोवाक्यबोध्यंप्रवृत्त्यादिकारणंकार्यमेवेतिनिर्धारितमतएवेत्यर्थः ॥ [२१।१९] कार्याध्याहारइति । तस्यार्थाध्याहारवादित्वादेवमुक्तं । यद्वाकार्यवाचकगच्छपिधेहीत्यादिपदाध्याहारइत्यर्थः ॥ [२१।१९] लक्षणावेति । पुत्रस्तेजातइत्यादिवाक्यगतस्यैवकस्यचित्पदस्यगमनादौलक्षणेत्यर्थः । सामीपिकाधिकरणेसप्तमीत्यंगीकुर्वद्भिर्वैयाकरणैर्लक्षणानंगीकारात्तन्मतानुसारेणाध्याहारइत्युक्तं । तार्किकमतानुसारेणलक्षणावेत्युक्तमित्याहुः । वाक्यार्थज्ञानमात्रेणक्वचिदिष्टंभवेदपीत्यनुव्याख्यानंमनसिनिधायाह ॥ [२१।२०] यत्रेति । पुत्रस्तेजातः । पितातेराजावर्ततइत्यादौ सिद्धपरत्वं इष्टसाधनत्वरूपसिद्धपरत्वं ॥ [२१।२१] वक्तुमिति । अतस्सिद्धएवेत्युत्तरग्रंथेनेत्यर्थः । परेणकार्यताज्ञानमेवप्रवर्तकमितिनियमितं । नत्विष्टसाधनताज्ञानस्याप्रवर्तकत्वं । येनैवकारो यथाश्रुतस्संगच्छेतातोव्याचष्टे ॥ [२१।२१] एवंशब्दोभिन्नक्रमइति । तमेवदर्शयति ॥ [२१।२१] इष्टसाधनतामेवेति । नतुकार्यतामित्यर्थः । सिद्धमात्रज्ञानंनप्रवृत्त्यादिहेतुरिति । तृणादिज्ञानस्यतथात्वाभावादितिभावः । अयमिहाभिसंधिः । लोकेसिद्धमपिद्विविधमस्ति । एकमिष्टसाधनंकदलीफलादि । अपरमनिष्टसाधनमुदासीनंच । यथाकंटकतृणादि । तत्रसिद्धविशेषेष्टसाधनतामेवज्ञात्वा

प्रवर्तते। अनिष्टसाधनतांचज्ञात्वानिवर्तते । नतुसिद्धभूततृणादिज्ञानात्प्रवृत्त्यादिकमित्येवंसिद्धसामान्यव्यावर्तकत्वमेवेष्टसाधनतामेवज्ञात्वेत्युक्तैवकारस्यार्थइतिद्रष्टव्यं । अथवापराभिमतकृतिसाध्येष्टसाधनत्वरूपलिङ्गाच्यकार्यताज्ञानस्यप्रवर्तकत्वव्यावृत्तिरेवेष्टसाधनतामेवेत्युक्तैवकारस्यार्थोनत्विष्टसाधनताज्ञानमेवप्रवर्तकं । नतुकृतिसाध्यत्वंप्रवर्तककार्यतायांनिवेश्यमित्येवमिष्टसाधनतामेवज्ञात्वेत्युक्तैवकारार्थोभवतीत्यभिप्रायइतिद्रष्टव्यं । उक्तार्थेहेतुप्रदर्शकत्वेनापिज्ञात्वैवेतिवाक्यंव्याचष्टे ॥ [२१।२२] यतोबालोपीति । अनेन हिशब्दोहेत्वर्थइत्युक्तंभवति ॥ [२१।२३] दंशमशकेति । अरण्यमक्षिकादंशोमशकोगृहमक्षिकेत्यभिधानं । स्थूलास्तुमक्षिकादंशामशकाः सूक्ष्ममक्षिकाइतिचरत्नमाला । शंकते ॥ [२१।२३] तस्यापीति । बालस्यापीत्यर्थः ॥ [२१।२३] कार्यताज्ञानादेवेति । कृतिसाध्यत्वरूपकार्यताज्ञानादेवेत्यर्थः ॥ [२१।२४] कारणमिति । किंतुस्वयंक्लेशरूपंकर्मयत्कार्यतांव्रजेत् । फलसाधनतातत्रकारणंतेनकार्यतेतितद्वचनादितिभावः ॥ [२१।२४] प्रमाणाभावादिति । ननुकथंप्रमाणाभावः । लिङादिशब्दएवतत्रप्रमाणमितिचेत् उच्यते । अनन्यलभ्योहिशब्दार्थः । तत्रकृतिसाध्यत्वंनामप्रयत्नजन्यत्वं । इदंचयागादेरन्वयव्यतिरेकसध्रीचीनप्रत्यक्षेणैवगम्यमित्यनन्यलभ्यत्वाभावान्नतल्लिङादिशब्दबोध्यं । तथात्वेलिङादेरनुवादकत्वप्रसंगात् । यथोक्तंकर्मनिर्णये । शब्दस्तुनतद्वक्तीत्युक्तमिति । इष्टसाधनत्वंतुलिङादिशब्दबोध्यं । नहियजेतेत्यत्रयागादीनांस्वर्गसाधनत्वमन्वयव्यतिरेकसध्रीचीनप्रत्यक्षगम्यमित्यनन्यलभ्यत्वात्तदेवलिङादिशब्दबोध्यमंगीकार्यमिति । इष्टसाधनतातिरिक्तकार्यतायांप्रवृत्त्यन्यथानुपपत्तिरेवप्रमाणमितिशंकते ॥ [२१।२४] चंद्रमंडलादाविति । आदिपदेनतक्षकचूडामण्याह

रणादिकंग्राह्यं । अयमर्थः । यदीष्टसाधनत्वमेवकार्यतास्यात्तर्हिचंद्रमंडलादाविष्टसाधनताबुद्धिस्तावद्भवतितथाचममेदं कृतिसाध्यमितिकृतिसाध्यतारूपकार्यताबुद्धिरपिस्यात् । नचेष्टापत्तिः । तथात्वेतत्रप्रवृत्तिप्रसंगात् । नभवतिचप्रवृत्तिःतेन ज्ञायतेतत्रेष्टसाधनताबुद्धिरेवभवति नकार्यताबुद्धिरिति । तस्मादिष्टसाधनतातिरिक्ताकार्यतांगीकार्येति । अर्धांगीकारेण परिहरति ॥ [२६।२५] सत्यमिति । चंद्रमंडलादाविष्टसाधनताबुद्धिर्भवतीत्यंगीकृतं नकार्यताबुद्धिरित्येतन्नांगीक्रियते । इष्टसाधनतैवकार्यतेतियदांगीकृतंतदाकार्यताबुद्धिरपितत्रभवत्येवेतिभावः । तथात्वेतत्रप्रवृत्तिस्स्यादितिचेन्न । प्रवर्तकाभावादित्याह ॥ [२६।२५] कृतिसाध्येष्टसाधनतायाःकार्यतापर्यायतयांगीकारादिति । कार्यपदवाच्यत्वेनांगीकारादित्यर्थः । ननु कथमेतत् । कृतिसाध्येष्टसाधनतायालिङ्वाच्यकार्यत्वांगीकारेपरोक्तमेवांगीकृतंस्यात् । परेणापिकृतिसाध्यत्वेसतिकृत्युद्देश्यत्वरूपकार्यतायाएवलिङ्वाच्यत्वेनोपपादितत्वात् । तथाचात्रलिङाद्यर्थस्त्विष्टसाधनत्वमेवेतिकर्मनिर्णयेन इष्टसाधनत्वंसिद्धविशेषः कार्यत्वं । तदेवधात्वर्थनिष्ठंलिङाद्यर्थइतितट्टीकया इष्टसाधनत्वातिरिक्तकार्यतायालिङ्वाच्यत्वनिराकरणपरेण कार्यताचनकाचित्स्यादिष्टसाधनतांविनेत्यनुव्याख्यानेन कृतिसाध्यताविशेषणस्यव्यर्थत्वादितिसुधयाचविरोधस्स्यादितिचेत् । उच्यते । अस्त्यत्रसंप्रदायविशेषः । सिद्धांतेकार्यंद्विविधमंगीकृतं । एकंलिङ्वाच्यं । अपरंचप्रवर्तकमिति । तत्रेष्टसाधनत्वरूपंकार्यंलिङ्वाच्यं । कृतिसाध्येष्टसाधनत्वरूपंयत्कार्यंतत्प्रवर्तकंकार्यं । तच्चनलिङ्वाच्यं । तथाचकृतिसाध्येष्टसाधनतायाः कार्यतापर्यायतयांगीकारादित्यस्यलिङ्वाच्यकार्यतापर्यायतयांगीकारादितिनार्थः । येनोक्तग्रंथविरोधस्स्यात्किंनाम । प्र

वर्तककार्यतापर्यायतयांगीकारादित्यर्थः । तथाचप्रवृत्ताविष्टसाधनतालक्षणलिङ्वाच्यकार्यताज्ञानमात्रंनकारणं येनचंद्र मंडलादौप्रवृत्तिप्रसंगः किंतुप्रमाणांतरजन्यकृतिसाध्यत्वज्ञानसहितेष्टसाधनताज्ञानं । चंद्रमंडलादौचकृत्यसाध्यताज्ञान स्यैवप्रतिबंधकस्यसत्त्वेननोक्तंप्रवर्तकमस्तीतिनप्रवृत्तिप्रसंगः । अतएवकर्मनिर्णयटीकायां इष्टसाधनत्वमेवलिङादिवाच्य मित्यतिस्पष्टमुक्त्वा नकेवलंलिङादिवाच्येष्टसाधनतालक्षणकार्यताज्ञानंप्रवृत्तिकारणं । किंतुप्रमाणांतरजनितकृतिसा ध्यत्वज्ञानसहितमित्यभिप्रेत्यकृतिसाध्यतैकार्थसमवेतेष्टसाधनताज्ञानादेवप्रवृत्त्युपपत्तेरित्यादिनाग्रंथेनातिरिक्तकार्येपरोपन्य स्तचंद्रमंडलादौप्रवृत्त्यन्यथानुपपत्तिलक्षणार्थापत्तिरन्यथैवोपपत्त्यादूषितेतिज्ञातव्यमित्यालोचनीयं । नन्विष्टसाधनत्वस्यै वकार्यत्वेऽतीतभोजनादावपीष्टसाधनत्वस्यसत्त्वेनकार्यताबुद्ध्यापत्त्याप्रवृत्तिप्रसंगइत्येतदप्यतएवापास्तमित्याह ॥ [२१।२५] अतए वेति । भूतादौ इष्टसाधनेऽतीतभोजनादौ । अतीतभोजनादेःकृत्यसाध्यत्वेनकृतिसाध्येष्टसाधनत्वरूपप्रवर्तकाभा वादेवेत्यर्थः । भावबोधेतु अतीतभोजनादौप्रवृत्तिप्रसंगइतिचेन्न । तस्येदानीमिष्टसाधनत्वाभावात् । अन्यथाऽतीतकार्येप्य यंप्रसंगस्तुल्यइत्यादिसुधानुसारेणातएवेत्यस्येदानीमिष्टसाधनत्वाभावादेवेत्यर्थइतिव्याख्यातं ॥ [२१।२६] योव्युत्पत्तिरिति । तथा हिचैत्रजलमाहरेत्यादिनाव्युत्पादितेत्यर्थः । सिद्धविषया इष्टसाधनविषया । एतेनेत्युक्तंविशदयति ॥ [२१।२७] बालेनहीत्या दिना । स्वप्रवृत्तौ स्तनपानादिप्रवृत्तौ ॥ [३०।१३] इत्युक्तमिति । तथाचतदेववृद्धप्रवृत्तावपिकल्पयतीत्यर्थः । सिद्धज्ञानस्य इष्टसाधनज्ञानस्य । इयंमातेत्यादीनांलिङादिरहितानांसिद्धएवप्रामाण्यंसिद्धमित्यन्वयः । अत्र वाक्यस्यसिद्धेर्थेप्रामाण्य

मित्यत्र ॥ [३०।४] अर्थवादबलादित्यादि । अर्थवादानांहिकर्तव्यत्वेनविधिबोधितेर्थेरुच्युत्पादनायप्राशस्त्यज्ञापकत्वेनोपयो
गो वायव्यंश्वेतमालभेतभूतिकामोवायुर्वैक्षेपिष्ठादेवतेत्यादौदृष्टः । तदिहापि । शब्दस्सम्यग्ज्ञातव्यइतिविधेरेवाभावे एकः
शब्दइत्याद्यर्थवादः कस्मिन्विषयेरुच्युत्पादनायप्रशस्तत्वंप्रतिपादयेदितिव्यर्थएवस्यादतएकःशब्दइत्याद्यर्थवादबलात्प्रवृत्ति
रितिपूरणीयं । तद्बलाच्च एकःशब्दस्सम्यग्ज्ञातव्यइतिविधिःकल्प्यतइत्यर्थोद्रष्टव्यः । एवमव्याख्याने इष्टसाधनताज्ञाना
देवप्रवृत्त्युपपत्तावितिवाक्यास्वारस्यापत्तेरितिज्ञातव्यं । तथाचतेनविधिवाक्येनव्याकरणादीनामेकवाक्यतयाकार्यपरत्वा
न्नसिद्धमात्रेशब्दादिस्वरूपेप्रामाण्यमितिभावः ॥ [३०।५] इष्टसाधनताज्ञानादेवेति । प्रमाणविरुद्धार्थवादानांस्वार्थेऽप्रामाण्या
त्प्रमाणभूतार्थवादबोधितार्थएवयदिष्टसाधनताज्ञानंतस्मादेवव्याकरणादौप्रवृत्त्युपपत्तेर्विधिकल्पकाभावादित्यर्थः।शब्दापश
ब्दविभागज्ञानमेवप्रयोजनमितिचेत्तत्राह ॥ [३०।६] शब्दज्ञानस्येति । शब्दापशब्दविभागज्ञानस्येत्यर्थः । नन्वस्तिव्याकरण
शास्त्रस्यप्रयोजनं । संदेहपरिहारेणवेदपाठसंरक्षणस्यैवप्रयोजनत्वात् । तथाहि । चक्षोस्सूर्योजायत उपप्रयंतोध्वरं सुजाते
श्वसूनृते । इत्येवंकस्मान्नोच्चार्यतइतिशंकायां प्रकृत्यांतःपादमव्यपरे ऋक्पादमध्यस्थएङ्प्रकृत्यास्यात् नसंधिंयातीतियाव
दितिव्याकरणोक्तनियामकेन चक्षोस्सूर्योअजायत उपप्रयंतोअध्वरं सुजातेअश्वसूनृते इत्येवमेवोच्चारणंकर्तव्यमित्येवंवेदपा
ठरक्षणमेवप्रयोजनमस्ति। रक्षोहागमलध्वसंदेहाःप्रयोजनंशब्दशास्त्रस्येतिवचनादित्याशंकयाह ॥ [३०।६] वेदरक्षादेरिति ॥ [३०।६] शुद्ध
संप्रदायेनेति । अध्यापकसंप्रदायेनेत्यर्थः । अध्यापकैस्संप्रदायेनयथाप्रयुज्यतेतथैवप्रयोगःकर्तव्यः । तैश्चचक्षोस्सूर्योअ

जायतेत्येवमादिरूपेणैवप्रयुज्यतइतितथैवप्रयोगःकार्योतस्तदर्थंनव्याकरणमपेक्षितमितिभावः ॥ [३०।६] तद्दुदाह्रियतइति । वाक्यानांसिद्धेप्रामाण्यमित्यत्राप्रमाणभूतंव्याकरणंदृष्टांतत्वेनकथमुच्यतइत्यर्थः । निर्वर्त्योजायमानः ॥ [३०।८] प्रयुज्यंतइति । गावीतिगुर्जरैः गायीतिमहाराष्ट्रैरित्यर्थः । तद्वत् गोशब्दवत् । इष्टापत्तिरितिचेत्तत्राह ॥ [३०।८] दुष्यतीति । यस्तुप्रयुङ्क्ते कुशलोविशेषेशब्दान्यथावद्व्यवहारकाले । सोनंतमाप्नोतिजयंपरत्रवाग्योगयुक्दुष्यतिचापशब्दैरितिमहाभाष्यकारवचनादित्यर्थः । यः पुमान्विशेषे । शब्दविशेषप्रयोगे । कुशलोव्यवहारकालेयथावत् अपशब्दासंकीर्णान्शब्दान्प्रयुंक्तेसपुमानिहजन्मनिलोके । अनंतंनियमेनेतियावत् । प्रतिवादीजयमाप्नोति । परत्र जन्मांतरे । वाग्योगयुक् अपशब्दासंकीर्णसमीचीनवाक्प्रयोगयुक्तोभवति । यथावत्प्रयुंक्तइतिकिमर्थमुक्तमित्यतआह । दुष्यतिचेति । अपशब्दैःप्रयुक्तैः अपशब्दंप्रयुंजानइतियावत् । दुष्यति दोषवान्भवति । इहजन्मनिजयंनप्राप्नोतीतियावत् । परत्रवाग्योगयुङ्नभवतीतिचशब्दार्थइत्येवंतट्टीकानुसारेण श्लोकार्थोद्रष्टव्यः । अतएवेत्युक्तंविशदयति ॥ [३०।९] तदभावइति । शब्दापशब्दविभागाभावइत्यर्थः ॥ [३०।९] फलभेदकथनेति । समीचीनशब्दप्रयोगस्यएकःशब्दइत्यादिनास्वर्गलोकेकामदोहकत्वं अपशब्दप्रयोगस्य । दुष्यतिचापशब्दैरितिदोषापादकत्वमित्येवंवाक्यद्वयेनफलभेदकथनानुपपत्तेरित्यर्थः । अस्तुशब्दापशब्दविभागः प्रकृतेव्याकरणप्रामाण्येकिमायातमित्यतआह ॥ [३०।९] नचेति । तथाचशब्दापशब्दविभागज्ञानस्यप्रयोजनत्वात्प्रयोजनाभावोऽसिद्धइतिभावः । निर्मूलकत्वादप्रामाण्यमित्युक्तंनिराकरोति ॥ [३०।१०] अतएवेति । शब्दव्यवहारार्थव्याकरणप्रामाण्यस्यांगीकार्यत्वादेवेत्यर्थः ॥ [३०।१०] अष्टकादीति ।

मार्गशीर्षपौषमाघफाल्गुन(भाद्रपद)मासानांकृष्णपक्षीयसप्तम्यष्टमीनवमीषुतिस्रोष्टकश्राद्धंकार्यमितिप्रतिपादिकानामष्टका दिस्मृतीनांकिंचिन्मूलमप्रसिद्धमपियथाकल्प्यते तथात्रापिकल्पनीयमितिनिर्मूलत्वमसिद्धमितिभावः । वैदिकपाठसंरक्ष णादेःप्रयोजनत्वेकथितेतस्यशुद्धसंप्रदायेनान्यथासिद्धिरुक्ता । तांपरिहरति ॥ [३०।१०] प्रमादेति । अध्यापकानामपिकदाचित्प्रा प्तप्रमादपरिहारार्थत्वेनेत्यर्थः ॥ [३०।११] सिद्धमिति । व्याकरणप्रयोजनत्वेनसिद्धमित्यर्थः ॥ ७ ॥ [३०।११] समतीतक्षराक्षरत्वादि लक्षणइति । सदागमैकविज्ञेयमित्यत्रवीत्युपसर्गस्यविलक्षणतयाज्ञेयमित्यर्थस्योक्तत्वादितिभावः । ननुसमतीतक्षराक्षरत्वे नेतरविलक्षणत्वात्तत्रैवनारायणेसकलसदागमानांप्रामाण्यंसिध्यतीतिचेत्तत्राह ॥ [३०।१२] नहीति ॥ ननुवेदस्यापौरुषेयत्वेऽप्रामा ण्यापत्तेःसर्वस्यापिकार्यपरत्वाच्चनेश्वरप्रतिपादकत्वमितिशंकायाअपौरुषेयत्वसमर्थनेनकार्यतापरत्वनिराकरणेननिराकृतत्वा दुक्तलक्षणेनारायणेसकलसदागमानांप्रामाण्यंनिश्चितंभविष्यतीत्यतआह ॥ [३०।१२] संभावनाकारणमेवेति ॥ [३०।१३] प्रागुक्तमिति । कार्यतापरत्वनिराकरणादिकंसकलसदागमानामुक्तलक्षणेनारायणेप्रामाण्यमित्यस्यसंभावकमेवननिश्चायकमितिभावः । न नुज्ञेयएतैरितिवाक्येसर्वेषांसदागमानांसदागमैकविज्ञेयत्वादिविशिष्टभगवत्स्वरूपप्रतिपादकत्वस्योक्तत्वान्निश्चायकंप्रमाणमु क्तमस्तीतिचेत्तत्राह ॥ [३०।१३] ज्ञेयएतैरितिवाक्यमपीति । जनार्दनएतैरेवज्ञेयइत्येवोक्तत्वादुक्तविशेषणविशिष्टभगवत्प्रतिपा दकत्वंसकलसदागमानांनोक्तमित्यर्थः । केचित्तुयद्यपितत्रविशेषणार्थकतुशब्दस्यजनार्दनइत्यनेनसंबंधंकृत्वासदागमैकवि ज्ञेयत्वादिविशेषणविशिष्टोजनार्दनएतैरेवज्ञेयइतियदाव्याख्यातंतदानाचष्टइत्युक्तं। तथापिस्पष्टंनाचष्टइतिव्याख्यानाददोष

इत्याहुः । तुष्यत्वितिन्यायेनाह ॥ **वक्ष्यमाणामिति** । ज्ञेयएतैरितिवाक्यमितिवर्तते । ननुधर्मादिकमपिवेदादिप्रतिपाद्यं अन्यथातदसिद्धिप्रसंगात् । अतस्सर्वस्यापिवेदादेःकथंनारायणज्ञापकत्वमुच्यतइत्यनुपदमेववक्ष्यमाणामाशंकामित्यर्थः॥ **निर्दोषत्वमिति** । रोगवाच्यामयशब्दस्यसर्वदोषोपलक्षकत्वेनरोगाभाववा चयनामयपदेननिर्दोषत्वंलक्ष्यतइत्यर्थः। ननुसर्वोत्तममित्यत्रकस्समासः । नचसर्वस्मादुत्तमइतिविग्रहंकृत्वापश्चात्पंचम्याउत्तमपदेनसमासइतिवाच्यं । पंचमीभयेन भयशब्दयोगेपंचमीसमस्यतेचोराद्भयंचोरभयमितिभयशब्दयोगएवपंचम्यास्समासविधानात्प्रकृतेचभयशब्दयोगाभावाद तस्सर्वस्मादुत्तमइत्येववक्तव्यमित्यतआह ॥ **पंचमीतियोगविभागादिति** । योगोवाक्यंतद्विभागादित्यर्थः । तथाच पंचमीत्येकंवाक्यं । पंचमीयेनकेनापिपदेनसमस्यतइतितदर्थः । भयेनेत्यपरंवाक्यं । भयशब्देनचसमस्यतइतितदर्थः । तथाचसर्वस्मादुत्तमइतिविगृह्य विग्रहंकृत्वा अनंतरंपंचम्याउत्तमपदेनसमासेसतिसर्वोत्तममितियुक्तमितिभावः। ननुतर्हिसर्वेषां वेदानांज्ञापयंतीत्यसंगतिरितिचेत्तत्राह ॥ **अर्थवशादिति** । अर्थसंगतिवशात्षष्ठीविभक्तेःप्रथमात्वेनविपरिणामः कर्तव्यः। तथाचसर्वेवेदाद्याज्ञापयंतीत्यर्थोद्रष्टव्यः ॥ **तदसिद्धीति** । धर्मादिविषयेप्रत्यक्षस्याप्रवृत्तेः केवलानुमानस्यचाप्रामाण्यादितिभावः ॥ **एवमुच्यतइति** । सर्वस्यापिवेदादेःकथंनारायणज्ञापकत्वमुच्यतइत्यर्थः । उक्तलक्षणे सर्वज्ञमित्यादिनोक्तलक्षणविशिष्टे । धर्मादौत्ववांतरंतात्पर्यमितिभावः । धर्मादिकं निवृत्तकर्मादिकं । ननुकथंधर्मादीनांभगवत्प्रतिपत्त्यंगत्वमित्यतआह ॥ **तत्प्रकारश्चेति** । भगवत्प्रतिपत्त्यंगत्वप्रकारइत्यर्थः ॥ **प्रागेवसंक्षेपेणोक्तइति** । अनेनैतांवेदवा

क्यानांयोजनांसूचयतीत्यादिनाप्रकारद्वयेनवेदवाक्यानांयोजनाकरणसमयइत्यर्थः । एकांतभक्ताभिप्रायेणयोजनाकरणसमयेततोवाक्यार्थज्ञानादवाप्तपरमानंदस्तत्साक्षात्कारंकामयतेतंप्रतितदुपासनाविधीयतेसाचप्रक्षीणांतःकरणमलस्यैवसंभवतीतितदर्थंकर्मविधयःप्रवर्ततइति। तथातदितरभक्ताभिप्रायेणाथवेत्यादियोजनाकरणसमये ततःपुनरसौजिज्ञासतेकेनोपायेनाहमिदमस्वाभाविकंरूपंहित्वास्वरूपेणावस्थितःस्यामितितंप्रतिपरमेश्वरएवप्रसन्नस्तदुपायइतितत्स्वरूपंनिरूप्यतेततःकथमसौप्रसीदतीत्यपेक्षायांतत्साक्षात्कारस्तदर्थंश्रवणादिकंतदंगतयाकर्माणिविधीयंतइतिसंक्षेपेणास्माभिरुक्तइत्यर्थः ॥ ७ ॥ इति कार्यताप्रकरणं ॥७॥ [३०।१८] अत्रेति । सर्वोत्तमत्वादिलक्षणेविष्णौसकलवेदानांमहातात्पर्यमित्यत्रेत्यर्थः । मंत्रः अग्निमीळइत्यादिः । उरुप्रथस्वेतिपुरोडाशंप्रथयतीतिब्राह्मणं । अतत्वावेदकत्वेहेतुमाह ॥ [३०।१९] अविद्यावद्विषयकइति । अत्रविषयपदेनाधिकारीविवक्षणीयः । तथाचाविद्यावान्विषयोधिकारीयस्येतिविग्रहः । तथाचाविद्वदधिकारिकत्वादतत्त्वावेदकइत्यर्थः । केचित्तुअविद्यावच्छब्देनप्रपंचउच्यते । प्रपंचस्याविद्यावत्त्वंनाम । तदुपादानकत्वंतत्कल्पितत्वमितियावत् । तथाचाज्ञानकल्पितकर्मादिप्रपंचप्रतिपादकत्वादतत्त्वावेदकइत्यर्थइत्याहुः । ननुमंत्रब्राह्मणलक्षणस्यवेदस्यातत्त्वावेदकत्वेनतत्रतात्पर्याभावेपिवेदांतानांतत्रतात्पर्यमस्त्वित्यतआह ॥ [३०।१९] वेदांतानांत्विति ॥ [३०।२०] अभेदएवेति । नसर्वोत्तमत्वादिलक्षणेविष्णावित्येवकारार्थः । ननु(नकथं)वेदांतानामभेदपरत्वं तत्रॐमित्येतदक्षरमुद्गीथमुपासीतेत्याद्युद्गीथोपासनावाक्यानामपिसत्त्वात् । उद्गीथाद्युपासनावाक्यानांचएषोएवसमृद्धिर्यदनुज्ञासमर्धयिताहवैकामानांभवति । यएतदेवंविद्वानक्षरमुद्गीथमुपास्तइति

कर्मसमृद्धिफलकत्वश्रवणादित्यतआह ॥ तत्रोद्गीथाद्युपासनानामिति[३०।२०] ॥ कर्मसमृद्ध्यर्थानामिति[३०।२०] । कर्मणाजायमाना यास्वर्गादिरूपासमृद्धिस्तत्फलिकानामित्यर्थः ॥ चित्तवृत्तित्वसाम्येनेति[३०।२०]। यथावेदांतेषुप्राणाद्युपासनाः । सगुणोपासनाश्चकथ्यंतएवमुद्गीथाद्युपासनाश्चकथ्यंते । प्राणाद्युपासनावत्उद्गीथोपासनायाश्चचित्तवृत्तित्वसाम्येनप्रत्यगर्थविषयकमनोवृत्तित्वसाम्येनोपासनात्वसाम्येनेतियावत् । आम्नानं कथनं । अविरुद्धमित्यर्थः। हेत्वंतरमाह ॥ बुद्धिशुद्ध्यर्थत्वाच्चेति[३०।२०] । प्राणाद्युपासनावदुद्गीथाद्युपासनानामप्यंतःकरणस्यपराग्वृत्तिनिरोधकत्वादित्यर्थः । ननुतथापिवेदांतस्थानांप्राणंब्रह्मेत्युपासीतेत्यादीनांप्राणादिप्रतीकोपासनावाक्यानांकागतिरित्यतोगतिमाह ॥ प्राणाद्युपासनानामिति[३०।२१] । अद्वैतज्ञानोपयोगित्वेहेतुकथनं ॥ प्राणादीनांब्रह्मप्रतीकत्वेनेति[३०।२१] । ब्रह्मप्रतिबिंबत्वेनेत्यर्थः । बिंबप्रतिबिंबयोरभेदेनब्रह्मप्रतिबिंबत्वेनप्राणाद्युपासनायाअद्वैतज्ञानोपयोगित्वादितिभावः । हेत्वंतरमाह ॥ क्रममुक्तिफलत्वाच्चेति[३०।२१] । क्रमेणजायमानायामुक्तिस्तत्फलकत्वादित्यर्थः। तथाचप्राणाद्युपासनायांकृतायामादौप्राणादिप्राप्तिर्भवतिपश्चाद्ब्रह्मभावरूपामुक्तिर्भवतीत्यर्थः। ननुतथापिवेदांतस्थानां यस्सर्वज्ञस्सर्वविदित्यादीनांसार्वज्ञादिगुणविशिष्टब्रह्मप्रतिपादकवाक्यानांकागतिरित्यतआह ॥ एतेनेति[३०।२१] । सगुणब्रह्मविद्यायाअप्यद्वैतज्ञानोपयोगित्वेनक्रममुक्तिफलकत्वेनचेत्यर्थः । आदौसगुणोपासनंविनानिर्गुणब्रह्मोपासनेबुद्ध्यनारोहात्सगुणोपासनस्यनिर्गुणोपासनोपयोगित्वं । यथोक्तं । निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः । येमंदास्तेनुकंप्यंतेसविशेषनिरूपणैरिति ॥ तथासगुणब्रह्मप्राप्तिद्वारानिर्गुणब्रह्मैक्यप्राप्तेः क्रममुक्तिफलकत्वमितिभावः। नन्वेवमपिवेदांतेसदेव

सोम्येदमग्रआसीत्तत्तेजोसृजतेत्यादिसृष्ट्यादिकथनस्यकथमुपयोगः यदिचैकमेवाद्वितीयमितिब्रह्मणोनिष्प्रपंचताप्रतिपादन पूर्वकमभेदप्रतिपादनायानुवादकतयासृष्ट्यादिकथनस्योपयोगस्तर्हिमंत्रब्राह्मणलक्षणवेदस्यापिब्रह्मणोनिष्प्रपंचताप्रतिपादन पूर्वकमभेदप्रतिपादनायकर्माद्यनुवादकत्वेनोपयोगसंभवान्मंत्रब्राह्मणलक्षणस्तावद्वेदइत्यादिनाविभज्यकथनमयुक्तमित्यस्व रसादाह ॥ यद्वेति । पूर्वस्मिन्पक्षेमूलस्थमागमस्येतिवेदांतमात्रपरत्वेनसंकुचितार्थमस्मिन्पक्षेत्वसंकुचितार्थंभवतीतिद्रष्टव्यं। क्रिया यागादिरूपा । कारकं कर्त्रादि । फलं स्वर्गादि । ननुजीवेश्वराभेदेसर्वोत्तमत्वेचेत्युभयत्रापितात्पर्यमस्त्वित्यतआह॥ सर्वोत्तमत्वादेरिति । नन्वीश्वरस्यापिविशिष्टत्वात्परेणविशिष्टयोरभेदानंगीकाराज्जीवेश्वराभेदएवेत्यसदनुवादइत्यत आह ॥ अत्रेश्वरशब्देनेति ॥ उच्यतइति । लक्षणयाप्रतिपाद्यतइत्यर्थः । विशिष्टवाचकेनेश्वरपदेनशुद्धंब्रह्मकथंलक्ष्यत इत्यतोलक्षणाबीजंशक्यसंबंधमुपपादयति ॥ तस्यैवेति । शुद्धब्रह्मणएवेत्यर्थः । मायाशबलस्य मायावच्छिन्नस्य । लक्षणा बीजभूतमुख्यार्थानुपपत्तिंदर्शयति॥ ऐश्वर्येति । प्रधानवाक्ये महावाक्ये ॥ तदेकवाक्यतामिति । त्वदुक्तरीत्याते नमहावाक्येनैकवाक्यतामित्यर्थः । उचितं लोकइतिशेषः । नह्येवंप्रकृतेस्तीत्याह ॥ नचेति ॥ अस्तीति । येनतद्विरुद्ध स्याभेदागमस्यकालातीतसत्प्रतिपक्षहेत्वोरिवाप्रामाण्यंस्यादितिभावः ॥ दुर्बलत्वादिति । भेदवाक्यानांप्रमाणांतरसिद्धभे दप्रतिपादकत्वेनापूर्वतालक्षणतात्पर्यलिंगाभावेनदुर्बलत्वादित्यर्थः । नन्वभेदस्यापिप्रमाणांतरसिद्धत्वेनतद्वाक्यानामप्य

नुवादकत्वेनदुर्बलत्वमेवेत्यतआह ॥ [३।१।५] नचाभेदइति ॥ [३।१।६] विपर्ययएवेति । अभेदवाक्यविरोधेनभेदवाक्यानामेवाप्रामाण्यकथनमुचितमित्यर्थः ॥ [३।१।७] भेदस्तावदिति । भेदस्यससंबंधिकपदार्थत्वेनसंबंधितावच्छेदकप्रकारकसंबंधिज्ञानसाध्यत्वादितिभावः । अथवाभेदस्यान्योन्याभावरूपत्वेनतस्यप्रतियोग्यधिकरणज्ञानसाध्यत्वादितिभावः ॥ [३।१।१०] आद्ये वक्ष्यामइति । आगमेनेश्वरसिद्धावुच्यमानायांयेनागमेनयस्सर्वज्ञइत्यादिनेश्वरसिद्धिस्तेनभिन्नत्वेनैवसिद्धइतितद्विरोधेनाभेदागमस्याप्रामाण्यप्रसंगइति कथंचानुवादकत्वमित्यत्रवक्ष्यामइत्यर्थः ॥ द्वितीयेत्विति । प्रमाणांतरेणेश्वरसिद्धिरितिद्वितीयपक्षोत्तरत्वेन इदं आगमंविनेतिमूलवाक्यं उपतिष्ठते प्राप्नोतीत्यर्थः । तथाचागमंविनेत्यस्यप्रमाणांतरेणेत्यर्थोद्रष्टव्यः ॥ [३।१।१०] धर्मिप्रतियोगिप्रतीत्यभावादिति । ईश्वरस्यकदाचिद्धर्मित्वात्कदाचित्प्रतियोगित्वादित्यर्थः । किमनेनदूषणमुक्तंभवतीत्यतआह ॥ [३।१।१२] तथाचेति ॥ [३।१।१३] आद्येवक्ष्यामइति । प्रत्यक्षागमसाहाय्यवतानुमानेनेश्वरसिद्धौतेनभिन्नत्वेनैवसिद्धिरितितद्विरोधएवाभेदागमस्यस्यादित्यादिकं कथंचानुवादकत्वमित्यत्रैववक्ष्यामइत्यर्थः । (नचानुमानात्तत्सिद्धिरितिमूलवाक्यस्यप्रत्यक्षागमसाहाय्यरहितादनुमानादीश्वरसिद्धिर्नचेत्यर्थोद्रष्टव्यः ।) ननुविपर्ययस्यानुमातुंशक्यत्वेकर्तृकरणत्वयोरभावेनकर्तृकरणयोस्तृतीयेत्यनेनतृतीयायाअयोगादाह ॥ [३।१।१४] इत्थंभूतलक्षणइति । कंचनप्रकारंप्राप्तइत्थंभूतस्तल्लक्षणे तत्प्रकारज्ञापके । तृतीयास्यादितिसूत्रार्थः । छात्रेणोपाध्यायमद्राक्षीदित्युदाहरणं । प्रकृतेचानुमातुंशक्यत्वरूपंप्रकारंप्राप्तईश्वरइत्थंभूतः । तत्रप्रकारस्यातिप्रसक्तौसत्यांविपर्ययस्यतज्ज्ञापकत्वात्तत्रतृतीयेत्यर्थः । वाक्यार्थमाह ॥ [३।१।१५] प्रत्यक्षेति ॥

कैनाभातीवदुवचावीति । सर्वत्रातिविसुवचाविवत्यर्थः । नन्वेवसत्यनुमानमात्रोच्छेदः । नचप्रत्यक्षादिसाहाय्यवत्यनुमाने नोपाधिप्रतिपक्षाववितिनानुमानमात्रोच्छेदइतिवाच्यं । तत्साहाय्यवत्वमात्रेणाप्युपाधिप्रतिपक्षयोःपरिहारासंभवादित्यतआह ॥ [३।१।१५] प्रत्यक्षादिसाहाय्येत्विति । अनुकूलेनतर्केणसनाथेसतिसाधने । साध्यव्यापकताभंगात्पक्षेनोपाधिसंभवइतिवचनादितिभावः । अत्रतर्केणेतिप्रमाणोपलक्षणं ॥ [३।१।१६] तेनेति । विमतग्रहणेनेत्यर्थः । ननुसकर्तृकत्वंनामयदिकर्त्रासहवर्तमानत्वंतदाजीवानांविभुत्वेनांकुरादेस्तैस्सहवर्तमानत्वात्सिद्धसाधनतापत्तिः । यदिचकर्तृजन्यत्वंतथापिसिद्धसाधनतैव । जीवानामप्यदृष्टद्वारांकुरादिकर्तृत्वोपपत्तेः । ईश्वरासिद्ध्यार्थांतरताचस्यादित्यतआह ॥ [३।१।२०] सकर्तृकमिति । बुद्धिमत्पूर्वकमित्युपलक्षणं । चिकीर्षाकृतिमत्पूर्वकत्वमपिज्ञातव्यं । ननुकार्यत्वंनामकृतिविषयत्वंवातज्जन्यत्वंवा । नाद्यः । परमाणौपरमाण्वंतरसंयोगार्थमीश्वरीयकृतिविषयत्वसद्भावेनसकर्तृकत्वाभावाद्व्यभिचारस्स्यात् । नद्वितीयः । पक्षेजीवकृतिजन्यत्वासंभवेनेश्वरीयकृतिजन्यत्वमेववाच्यं । तस्यचेदानीमप्यसिद्ध्याहेतोस्संदिग्धासिद्ध्यापत्तेरतआह ॥ [३।१।२३] अभूत्वाभावित्वादिति । प्रागभावप्रतियोगित्वादित्यर्थः । अन्योन्याभावप्रतियोगिनिगगनादौव्यभिचारपरिहारायप्रागभावेत्युक्तं । ध्वंसेऽनैकांत्यपरिहारायसमवेतत्वेसतीतिभावत्वेसतीतिवाविशेषणंदेयं । गोत्वादौव्यभिचारपरिहारायविशेष्यभागइतिज्ञातव्यं । ननुघटवदितिनयुक्तं । तत्रतस्येवेतिसूत्रेणसप्तमीसमर्थात्षष्ठीसमर्थाद्वा इवार्थेवतेर्विधानात् घटेइवघटस्येवेतिवावक्तव्यं । तथाचघटेइवघटस्येवविमतंसकर्तृकमित्यसंगतं । दृष्टांतदार्ष्टांतिकयोस्समानविभक्तिकत्वेहिसंगतिः । नचवाच्यंघटवदितिप्रथमास

मर्थादेववतिः । तथाचसमानविभक्तिकत्वात्संगतिरिति । प्रथमांतादिवार्थेवतेर्विधानाभावादित्यतआह ॥ [३१।२१] तत्रतस्येवेति । लक्षणस्य सूत्रस्य । अभियुक्तैः प्रामाणिकैः ॥ [३१।२१] व्याख्यातत्वादिति । पूर्ववत्सनइतिसूत्रेपूर्वस्मादिवपूर्ववदितिपंचम्यंतादपि वतेर्विधानेनतत्रतस्येवेतिसूत्रोक्तस्यप्रायिकत्वावगमात्प्रथमांतादपिवतेर्युक्तत्वाद्घटवदितियुक्तमित्यर्थः ॥ [३१।२२] अनुमितेसतीति। परार्थानुमानस्यचवचनरूपत्वादितिभावः । यःपरार्थानुमानस्यप्रयोगोवाक्यलक्षणइत्युक्तेरितिज्ञातव्यं । विशेष्यानुक्तेराह ॥ [३१।२२] ईश्वरइति । तदुपपादयति ॥ [३१।२२] नहीति ॥ [३१।२३] व्याख्येयमिति । सर्वविकर्तृकमित्युक्तेगगनादौसिद्धसाधनत्वं घटादौबाधश्चस्यात् । तन्निवृत्त्यर्थंविमतमित्युक्तं । तेनविकर्तृकत्वेनसकर्तृकत्वेनचयत्रवादिप्रतिवादिनोरसंमतिर्गगनादौघटादौचततोन्यदंकुरादीत्युक्तंभवति । विकर्तृकं उपादानादिविषयबुद्धिमत्पूर्वकंनभवति । तथाचजीवानामेवादृष्टद्वारांकुरादिकर्तृत्वसंभवाद्बाधइतिनिरस्तमितिव्याख्येयमित्यर्थः ॥ [३१।२३] कर्तृरहितत्वस्येति । अस्मत्संमतंयत्कर्तृरहितत्वंतस्मादित्यर्थः ॥ [३१।२३] कर्तुर्वेति । अस्मत्संमतोयःकर्तातद्रहितत्वादित्यर्थः ॥ [३१।२४] तत्परिहारार्थमेवेति । साध्याविशिष्टतापरिहारार्थमेवास्मत्संमतेतिविशेषणमित्यर्थः ॥ [३१।२४] सर्वत्रेति । अनुपयुक्तैतद्विशेषणप्रक्षेपेणसाध्याविशिष्टत्वपरिहारेपर्वतोग्निमान्नभवतिअग्निमत्त्वशून्यत्वादित्यादावपिसाध्याविशिष्टत्वेप्राप्तेसत्यस्मत्संमताग्निमत्त्वशून्यत्वादितिविशेषणंप्रक्षिप्यसाध्याविशिष्टत्वपरिहारसंभवात्तस्यदोषत्वंनस्यादित्यर्थः ॥ [३१।२५] अनेनेति । अस्मत्संमतपदेनेत्यर्थः । शरीरादिमान्वेत्यत्रादिपदेनवक्ष्यमाणरीत्यास्वप्रयोजनाज्ञानसंशयविपर्ययानित्यज्ञाना

द्रिग्रहणं । साध्याभावोपपादनायाह ॥ **क्रुविदादीति** ॥ **वैयर्थ्यमेवेति** । शरीरादिरहितःकर्ताचेत्स्यात्तर्ह्येवतद्व्यावृत्त्यर्थंशरीरादिमत्त्वार्थकास्मत्संमतविशेषणंदेयं । शरीरादिरहितस्यकर्तुरेवानंगीकारेशरीरादिमत्त्वार्थकास्मत्संमतविशेषणव्यावर्त्याभावेनतस्यवैयर्थ्यमेवस्यादित्यर्थः । दूषणांतरंचाह ॥ [३१।२६] **साध्याविशिष्टताचेति**। शरीरादिरहितस्यकर्तुरनंगीकारेविकर्तृकत्वशरीरादिमत्कर्तृरहितत्वयोरेकत्वापत्त्याशरीरादिमत्कर्तृरहितत्वमेवविकर्तृकत्वापरपर्यायंजातमितिसाध्याविशिष्टत्वादित्यर्थः । ननुविकर्तृकत्वंशरीरादिमत्कर्तृरहितत्वमितिशब्दतएवसामान्यविशेषभावेनभेदप्रतीतेर्विशेषाभावेनसामान्याभावसाधनान्नसाध्यावैशिष्ट्यमित्याशंक्यपरिहरति ॥ [३१।२६] **नचेति** ॥ [३२।१] **सामान्यस्यापीति** । यदिशरीरादिमान्कर्ता तद्रहितश्चकर्ताकश्चित्स्यात्तर्ह्येवकर्तृत्वंसामान्यं विकर्तृकत्वंचतदभावस्स्यात् नचैवमित्यर्थः । सामान्यविशेषभावमभ्युपेत्यापिदूषणमाह ॥ [३२।१] **सामान्याभावस्येति** ॥ [३२।१] **विशेषाभावेनेति** । यत्किंचिद्विशेषाभावेनेत्यर्थः । नहिनीलघटाभावेनघटसामान्याभावोवक्तुंशक्यतइतिभावः ॥ [३२।२] **नचैवमिति** । अस्मत्संमतेत्यस्यकर्तृविशेषणत्वएववैयर्थ्यादिदोषशंकास्यान्नचैवमित्यर्थः । अखंडाभावेनवैयर्थ्यमितिभावइत्याहुः ॥ [३२।३] **एवंसत्प्रतिपक्षतेति** । पर्वतोग्निमान्नभवति अग्निमत्त्वेनास्माकमसंमतत्वादित्येवंसत्प्रतिपक्षताप्रसंगइत्यर्थः । अनुकूलप्रमाणं तर्कादिकं । बाधितत्वात् सत्प्रतिपक्षानुमानस्येतिशेषः । नचप्रकृतेप्यनुकूलतर्कविरोधेनसत्प्रतिपक्षनिरासइतिवाच्यं । तदभावादित्यादिनाग्रंथेनतस्याग्रेदूष्यमाणत्वादितिभावः । आदिपदग्राह्यंस्वयमेवदर्शयति ॥ [३२।४] **स्वप्रयोजनेत्यादिना** ॥ [३२।५] **एवमपीति** । अस्मत्संमतकर्तृरहितत्वादित्यस्यशरीरीयजन्यत्वादितिव्याख्यानेपिशरीरीतिविशेषणं

व्यर्थमित्यर्थः ॥ [३२।५] पक्षधर्मतेति । अजन्यत्वमात्रस्यस्वरूपासिद्धत्वादितिभावः । ननुहेतौव्यभिचारवारकमेवविशेषणंदेयं ।
व्याप्तिग्रहोपयुक्तत्वात् । नत्वसिद्धिवारकंविशेषणं । व्यर्थत्वादित्यतआह ॥ [३२।६] परैरपीति । नन्वत्ररूपस्यैवग्राहकत्वादित्य
स्याप्रसिद्धत्वेनव्याप्तिग्रहायोगादप्रसिद्धिपरिहारायलोकेप्रसिद्धिंसंपाद्यव्याप्तिमुपपादयितुमेवरूपादिषुपंचसुमध्यइत्युक्तमि
त्येवंव्याप्तिग्रहोपयुक्तमेवतद्विशेषणंदेयं नतुपक्षधर्मतासिद्ध्यर्थमित्यतउदाहरणांतरमाह ॥ [३२।६] प्रामाण्यमिति । अभ्यासदशाप
न्नज्ञानप्रामाण्येसंशयविषयत्वाभावेनासिद्धिपरिहारायानभ्यासदशायामितिविशेषणमितिभावः । नन्वत्राप्यसिद्धिपरिहा
रेणपक्षधर्मतासिद्ध्यर्थमनभ्यासदशायामितिहेतौविशेषणंनाभिप्रेतं किंनामपक्षएवेदंविशेषणंदेयं । तथाचानभ्यासदशायां
प्रामाण्यं अनभ्यासदशापन्नज्ञानप्रामाण्यमितियावत् । परतोज्ञायते । सांशयिकत्वादिति । अतोनेदमप्युदाहरणंयुक्तमि
त्याशयेनइत्यादावित्युक्तमितिज्ञातव्यं । एवमित्यस्यैवविवरणं ॥ [३२।७] व्याप्तावनपेक्षितेति । असिद्धिपरिहारेणपक्षधर्मतासि
द्ध्यर्थमपेक्षितत्वेपिव्यभिचारावारकतयाव्याप्तावनपेक्षितमिदंविशेषणमित्यर्थः ॥ [३२।७] प्रयोजनेति । पक्षधर्मतासिद्धिरूपप्र
योजनेत्यर्थः ॥ [३२।८] अतिप्रसंगइति । देवदत्तःपिपासितइत्येतावतामरावपिवारिसाधकंप्रमाणंप्रवर्तेतेतिभावः ॥ [३२।८] वक्ष्यामो
त्रसमाधानमिति । पक्षधर्मतासिद्धिरूपप्रयोजनार्थंव्याप्तावनपेक्षितमपिविशेषणंनदीयतेयेनोक्तातिप्रसंगःस्यात् । किंत्वखं
डस्योपाधेस्साध्यव्यापकत्वेनतदभावस्यप्रतिपक्षानुमानेहेतुत्वेनाखंडाभावरूपतयाऽखंडाभावेचनवैयर्थ्यशंक्यंतद्बीजाभावा
दित्येवमुपाध्यनुन्नीतएवानुमानइत्यादिनाग्रंथेनवक्ष्यामइत्यर्थः । अनुमानविरोधादितिपंचम्याअन्वयोनप्रतीयतेऽतस्तंदर्श

यति ॥ **अनुमानविरोधादित्यस्येति** ॥ **तत्राप्यन्यत्वादरवाते** । अत्रादिपदेनरहितत्वसंग्रहः । विकर्तृकत्ववति गगनादौपटाद्यन्यत्वघटादिरहितत्वयोस्सत्त्वेनसाध्यव्यापकत्वादित्यर्थः । ननु साधनव्यापकास्साध्यसमव्याप्ताउपाधयइत्युक्तत्वात्समव्याप्तस्योपाधित्वपक्षेयत्रान्यत्वंतत्रविकर्तृकत्वमित्यस्यघटादौव्यभिचारेणसमव्याप्त्यभावात्तदर्थंकार्येतिविशेषणमितिचेत्तत्राह ॥ [३२।१४] **समव्याप्तेश्चेति** ॥ [३२।१४] **अनपेक्षितत्वादिति** । अयंभावः । विषमव्याप्तस्यैवोपाधित्वेपक्षेतरत्वस्याप्युपाधित्वप्राप्त्यानुमानमात्रोच्छेदप्रसंगेनतत्परिहारायहिसमव्याप्तत्वंवक्तव्यं । तत्रविषमव्याप्तस्यैवोपाधित्वेपिपक्षेतरत्वस्योपाधित्वपरिहारस्तुप्रकारांतरेणभविष्यति । तथाहि । अनुकूलतर्कसद्भावदशायांतस्योपाधित्वमुच्यते तदभावदशायांवा । नाद्यः । पक्षएवसाध्यव्यापकत्वभंगात् । अनुकूलेनतर्केणसनाथेसतिसाधने । साध्यव्यापकताभंगात्पक्षेनोपाधिसंभवइतिवचनात् । नद्वितीयः । तदभावेतस्येष्टत्वादिति ॥ [३२।१४] **पक्षेव्यावृत्त्यर्थमिति** । पक्षेउपाधिव्यावृत्त्यर्थमित्यर्थः । साधनाव्यापकत्वार्थमितियावत् । अन्यथा अन्यत्वमात्रस्यपक्षेपिविद्यमानत्वेनसाधनव्यापकत्वादितिभावः ॥ [३२।१५] **इतरत्रापीति** । शरीरिजन्यत्वोपाधावपिपक्षव्यावृत्त्यर्थमेवशरीरीतिविशेषणमित्यर्थः । वैयर्थ्यंनामविगतप्रयोजनवत्त्वं । अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु इत्यभिधानेनार्थशब्दस्यप्रयोजनवाचित्वावगमात् । तथाचात्रकिंप्रयोजनविशेषाभावोविवक्षितः प्रयोजनसामान्याभावोवेतिविकल्पयति ॥ [३२।१५] **नन्विति** । (अकार्यत्वोपाधौविशेषणवैयर्थ्यमुक्तं । तत्राशंकते ॥ [३२।१५] **नन्विति** ॥) [३२।१६] **व्यापकगतस्येति** । उपाधेस्साध्यव्यापकत्वादितिभावः ॥ [३२।१६] **तथात्वनियमाभावादिति** । व्यभिचारवारकत्वनियमाभावादित्यर्थः । ननुव्यापकगतविशेषणस्यापिव्यभि

चारवारकत्वंदृष्टं। तथाहि। शब्दोनस्पर्शवद्विशेषगुणः। प्रत्यक्षत्वेसत्यकारणगुणपूर्वकत्वात्। अत्रपरमाणुरूपादिव्यावृत्त्यर्थंप्रत्यक्षत्वेसतीत्युक्तं। पटरूपादिव्यावृत्तयेविशेष्यभागः। तथाचात्रान्यतरकर्मजेस्थाणुश्येनसंयोगादौव्यभिचारपरिहारायसाध्येविशेषपदस्याभियुक्तैर्दत्तत्वादितिचेत्सत्यं। अतएवनियमाभावादित्युक्तमितिद्रष्टव्यं॥ [३२।१६] असिद्धेरिति। साधनाव्यापकत्वसिद्धिरूपप्रयोजनसद्भावेनप्रयोजनसामान्याभावस्यासिद्धेरित्यर्थः॥ [३२।१६] एतदपिसमानमिति। शरीरिजन्यत्वोपाधावपिशरीरिविशेषणस्यवैयर्थ्यंनाम नतावद्व्यभिचारनिवारणलक्षणप्रयोजनाभावः। व्याप्यगतविशेषणस्यैवतथात्वेनव्यापकगतस्यतथात्वनियमाभावात्। उपाधेश्चसाध्यव्यापकत्वात्। नापिप्रयोजनसामान्याभावः। साधनाव्यापकत्वसिद्धिरूपप्रयोजनसद्भावेनप्रयोजनसामान्याभावस्यासिद्धेरितिसमानमित्यर्थः। साध्यव्यापकीभूतोपाधौविशेषणवैयर्थ्यपरिहारेणप्रतिपक्षानुमानेपितद्वैयर्थ्यंपरिहृतमित्याह॥ [३२।१६] अतएवेति। व्यापकगतविशेषणस्यतथात्वनियमाभावादेवेत्यर्थः। ननूपाधेस्साध्यव्यापकत्वेनतत्रत्यविशेषणस्यव्यभिचारवारकत्वनियमाभावेपितदभावस्ययदाहेतुत्वंतदातस्यव्याप्यगतविशेषणत्वप्राप्त्याव्यभिचारवारकत्वंवक्तव्यमेवेत्याशंक्यातएवेत्युक्तमेवस्पष्टमाह॥ [३२।१७] विशिष्टस्येति। अखंडस्येत्यर्थः। सामान्यवत्त्वेसतीत्यादाविवसत्यंतविशेषणाभावादखंडत्वमितिसांप्रदायिकोर्थः। तथाचाखंडोपाधौनवैयर्थ्यमितिभावः। नन्वस्तूपाधेस्साध्यव्यापकत्वं तथापितदभावेनकथंप्रतिपक्षइत्यतआह॥ [३२।१७] व्यापकनिवृत्तिश्चेति। साध्यव्यापकीभूतोपाधिनिवृत्तिरित्यर्थः। स्व

व्याप्यं उपाधिव्याप्यभूतंसाध्यं ॥ [३२।१७] निवर्तयत्येवेति । व्यापकनिवृत्त्याव्याप्यनिवृत्तेरावश्यकत्वादितिभावः ॥ [३२।१८] उपाध्य
भावश्चेति । साध्यव्यापकीभूताखंडोपाध्यभावइत्यर्थः । तथाचोपाध्यभावस्यव्याप्यत्वेप्यखंडाभावरूपत्वादखंडाभावेचन
वैयर्थ्यमितिभावः । तथाहि । लोकेविशेषणवैयर्थ्यशंकायांहीदंबीजं । एकस्मिन्धर्मिणिलघुगुरुधर्मद्वयसमावेशेलघुनाव्याप्त्य
वच्छेदेगुरोरनावश्यकत्वं । यथाधूमेधूमत्वनीलधूमत्वरूपधर्मद्वयसमावेशेलघुनाधूमवत्त्वेनैवव्याप्त्यवच्छेदेगुरोर्नीलधूमवत्त्व
स्यानावश्यकत्वमितितद्विशेषणंव्यर्थं । नचेदंबीजमत्रास्ति । शरीरिजन्यत्वरूपाखंडधर्मप्रतियोगिकाभावस्यैकत्वेनतन्मध्ये
जन्यत्वाभावः शरीरिजन्यत्वाभावइतिविभागासंभवेनवैयर्थ्यबीजाभावान्नविशेषणवैयर्थ्यशंकेतिज्ञातव्यं । व्याप्तावनपेक्षित
विशेषणदानेनपक्षधर्मतांप्रसाध्यसाध्यसाधने प्रयोजनाधीनंप्रमाणं नप्रमाणाधीनंप्रयोजनमित्यायातं । तथाचदेवदत्तःपिपा
सितइत्येतावतामरावपिवारिसाधकप्रमाणप्रवृत्तिस्स्यादित्यतिप्रसंगइत्युक्तदोषः परिहृतइत्याह ॥ [३२।१८] उपाध्यनुन्नीतएवेति ।
उपाध्यभावमेवहेतुंकृत्वाक्रियमाणंयदनुमानंतद्भिन्ने पर्वतोग्निमान्प्रमेयधूमवत्त्वादित्याद्यनुमानइत्यर्थः ॥ [३२।१८] उपाध्युन्नीतइ
ति । अखंडोपाध्यभावमेवहेतुंकृत्वाक्रियमाणेसत्प्रतिपक्षानुमानइत्यर्थः । प्रकृतंचतादृशमितिभावः ॥ [३२।१९] दोषाभावादि
ति । प्रागुक्तातिप्रसंगलक्षणदोषाभावादित्यर्थः । तथाचपक्षधर्मतांसाधयितुंव्याप्तावनपेक्षितमपिविशेषणंनप्रक्षिप्यतेस्माभि
र्येनातिप्रसंगः । किंनामाखंडोपाध्यभावएवात्रसत्प्रतिपक्षत्वेनोक्तः । तथाचोपाधेरखंडत्वेनतत्रविशेषणविशेष्यविभागाभावे
नतदभावरूपाखंडाभावेपिनविशेषणविशेष्यविभागोस्ति । एवंचानपेक्षितविशेषणप्रक्षेपोनक्रियतइतिनोक्तदोषइत्याशयः ।

तदनेनवक्ष्यामोत्रसमाधानमित्युक्तंदर्शितंभवतीतिज्ञातव्यं । विमतंसकर्तृकंकार्यत्वादित्यत्रशरीरिजन्यत्वोपाधेस्तदभावेनस त्प्रतिपक्षस्यचनिरासोऽनुकूलेनतर्केणक्रियते । अनुकूलतर्कसद्भावउपाधेःपक्षएवसाध्यव्यापकताभंगात् । प्रतिपक्षस्यचबाधि तत्वादित्याशंकते ॥ [३२।१९] **अनुकूलतर्केणेति** ॥ [३२।२०] **कारणाभावेति** । तथाचनकर्तुरभावेनकार्यत्वाभावापादनंयुक्तमितिभावः । तदुपपादयति ॥ [३२।२०] **कार्येति** ॥ [३२।२०] **अन्यथेति** । कार्यसामान्यस्यकारणसामान्यायत्तत्वमनंगीकृत्यकारणविशेषायत्तत्वंचांगीकृ त्यकार्यसामान्याभावस्यकारणविशेषाभावप्रयुक्तत्वांगीकारइत्यर्थः॥ [३२।२१] **आसनशयनादीति** । आस्तेशेतइत्यादेरकर्मकत्वादि तिभावः ॥ [३२।२१] **सार्वत्रिकइति** । तथाचतदभावेन कार्यत्वाभावापादनंयुक्तमितिभावः ॥ [३२।२१] **तत्सिद्ध्यर्थत्वादेवेति** । कर्तुस्सार्व त्रिकत्वसिद्ध्यर्थत्वादेवेत्यर्थः। तथाचकर्तुस्सार्वत्रिकत्वेसिद्धेऽनुकूलतर्कसिद्धिः । तत्सिद्धौचोपाधिप्रतिपक्षनिरासेनानुमानस म्यक्त्वसिद्ध्यातेनकर्तुस्सार्वत्रिकत्वसिद्धिरित्यन्योन्याश्रयस्स्यादितिभावः । ननुक्षित्यादिकंसकर्तृकमित्यस्यक्षित्यादिकंविक र्तृकमितिप्रतिपक्षोभिहितः। तत्राकार्यत्वमुपाधिरित्युक्तेशरीरिजन्यत्वमितरत्राप्युपाधिरितिप्रतिबंद्युत्तरंकस्माद्दत्तं। किंतुसत्प्र तिपक्षानुमानउपाध्युद्भावनमेवनोचितमित्युत्तरंदेयमित्याशंकते॥ [३२।२२] **यद्यपीति**॥ [३२।२२] **वैयर्थ्यादिति** । शतमप्यंधानांनपश्यतीति न्यायादेकेनापिबहूनांप्रतिबंधादितिभावः॥ [३२।२२] **अभ्युपगमेति**। प्रतिपक्षेउपाध्युद्भावनस्योचितत्वमभ्युपगम्यशरीरिजन्यत्वमित रत्राप्युपाधिरित्युक्तमित्यर्थः। ननुशरीरिजन्यत्वंनोपाधिः साध्याव्यापकत्वादित्याशंकते ॥ [३२।२२] **नन्विति**। कुतोनास्तीत्यतआह॥क [३२।२३] **र्मभूतस्येति**। देवदत्तःशरीरंप्रेरयतीतिप्रतीत्याशरीरप्रेरणायाः शरीरकर्मकत्वंतावत्सिद्धं । तस्याश्चपुनःशरीरिजन्यत्वेकर्मभूत

स्यशरीरस्यकर्तरिप्रवेशापत्तिः। तथाचशरीरावच्छिन्नस्यदेवदत्तस्यकर्तृत्वेनविशिष्टस्ययद्भवतितद्विशेषणस्यापिभवतीत्येवंलंबक
र्णमानयेत्यादौदर्शनात्तन्न्यायेनशरीरस्यापिकर्तृत्वप्राप्तौकर्तृत्वकर्मत्वयोरेकत्रविरोधेनांगीकर्तुमशक्यत्वेनशरीरिजन्यत्वंनास्ती
तिवक्तव्यं। तथाचशरीरप्रेरणायांसकर्तृकत्वेसत्यपिशरीरिजन्यत्वाभावात्साध्याव्यापकतेत्यर्थः। शरीरप्रेरणायांनसाध्याव्यापक
ता। शरीरिजन्यत्वस्यापिसत्त्वात्तदनंगीकारेकेवलात्मजन्यत्वप्राप्तेः। अस्त्वितिचेत्तत्राह॥ [३२।२४] **शरीरप्रेरणंहीत्यादिना**॥
[३२।२४] **नचांशरीरस्येति** । तथात्वेघटावच्छिन्नात्मनोपिप्रयत्नोत्पत्तिस्स्यादितिभावः। नचकर्मभूतस्यशरीरस्यकर्तरिप्रवेशानुपपत्ति
दोषइतिवाच्यं। शरीरावच्छिन्नस्यात्मनः कर्तृत्वाद्विशेषणीभूतशरीरमात्रस्यैवकर्मत्वादुक्तन्यायस्यचित्रगुमानयेत्यादौव्यभि
चारित्वादितिद्रष्टव्यं । यद्वाशरीरंप्रेरयतीत्यस्यशरीरपरिस्पंदानुगुणप्रयत्नंकरोतीत्यर्थः। तथाचप्रयत्नस्यैवकर्मत्वंनशरीरस्य
अतोनकर्मभूतशरीरस्यकर्तरिप्रवेशानुपपत्तिरित्युक्तदोषः । नचशरीरपरिस्पंदएवसाध्याव्यापकत्वंशंक्यं । तत्राप्युक्तरीत्या
शरीरमात्रस्यैवपरिस्पंदंप्रतिकर्मत्वंशरीरावच्छिन्नस्यैवात्मनःकर्तृत्वमित्यभिप्रायोद्रष्टव्यः । एवमुपाधिनानुमानंदूषयित्वा
हेत्वसिद्ध्यापिदूषयति॥ [३२।२४] **किंचेत्यादिना**॥ [३२।२४] **आगमानपेक्षेति** । आगमापेक्षत्वेततएवकार्यत्वसिद्धिस्स्यादितिभावः।
प्रत्यक्षेणकार्यत्वसिद्धिपरिहारायाह॥ [३२।२५] **अनुपलब्धप्राक्कोटिष्विति** । प्राक्कोटिःप्रागभाव उत्पत्तिर्वा। तथाचानुपलब्धप्रा
गभावेषु अनुपलब्धोत्पत्तिकेषुवापर्वतादिष्वित्यर्थः। कार्यत्वं प्रागभावप्रतियोगित्वं॥ [३२।२६] **व्यभिचारादिति**। कार्यत्वरू
पसाध्याभावादितिभावः॥ [३२।२६] **जात्यादाविति**। तंतुत्वादेःपटावयवेतंतौसमवेतत्वादितिभावः। आदिपदेनपरमाणुगतवि

शेषग्रहणं ॥ इतिह्युक्तं[3311]स्यादिति । द्रव्यसमवायिकारणमवयवइतिवचनादितिभावः ॥ [3311]अनभ्युपगच्छतइति । तथाच समवायिकारणस्यैवानभ्युपगमात्स्वसमवायिकारणसमवेतत्वमप्यसिद्धमितिभावः। सावयवत्वंप्रकारांतरेणनिर्वक्ति ॥[3313]द्रव्या श्रितेति । आकाशेव्यभिचारपरिहारायद्रव्याश्रितेत्युक्तं । जलपरमाणुगतरूपादिगुणादौतत्परिहारायद्रव्यत्वमित्युक्तं ॥ [3313]तस्यचेति । समवायस्यचेत्यर्थः ॥ [3313]उभयत्रापीति । समवायस्यसंबंधत्वेनद्विष्ठत्वादितिभावः । तथाचपरमाणुरपिद्व्यणु कसमवेतइतितत्रव्यभिचारइतिद्रष्टव्यं ॥ [3313]समवायवृत्त्येति । समवायसंबंधेनेत्यर्थः । तथाचसमवायसंबंधेनचद्व्यणुकमे वपरमाणावस्तिनपरमाणुर्द्व्यणुकइतिनतत्रव्यभिचारइतिभावः ॥ [3314]ऊर्ध्वाधरीभावादेरिति । समवायसंबंधेनापिद्रव्या श्रितत्वंनामनकुंडबदरादिवदूर्ध्वाधरीभावेनवक्तुंयुक्तं । तंतुपटाद्यवयवावयविस्थलएतादृशोर्ध्वाधरीभावादर्शनेनपरमाणुद्व्य णुकयोरप्यभावात् । आश्रयाश्रयिभावोनामसमवायएववक्तव्यः सचद्विष्ठइतिपुनःपरमाणौव्यभिचारस्तदवस्थएवेत्यर्थः । ननुसमवायवृत्त्याद्रव्याश्रितत्वंनामसमवायसंबंधेनद्रव्याश्रिततयाव्यवह्रियमाणत्वंविवक्षितं । नचेदंपरमाणावस्ति । परमा णुर्द्व्यणुकसमवेतइतिव्यवहाराभावात् । किंतुद्व्यणुकएवपरमाणुसमवेतइत्येवव्यवहारः । अतोनव्यभिचारइत्यतआह ॥ [3314]व्यवहारमात्रंत्विति । कुतोनव्यवस्थितमित्यतआह ॥ पटेतंत[3315]वइत्यादेरिति । तथाचतद्वद्व्यणुकेपरमाणुरित्यपिकदा चित्कस्यचिद्व्यवहारसंभवात्परमाणौव्यभिचारस्स्यादेवेतिभावः । केचित्तुपटेतंतवइत्यपिव्यवहारदर्शनेनसावयवत्वेनप्रसिद्धे पटेनिरुक्तसावयवत्वलक्षणस्याभावादव्याप्तिरितिभावमाहुः ॥ [3315]तस्याकार्यत्वेपीति । ननुमध्यमपरिमाणवत्त्वमस्तुकार्यत्वं

मास्त्वित्यप्रयोजकताशंकायांकथमनुपपत्त्यभावः । कार्यत्वाभावेमध्यमपरिमाणवत्त्वमेवनस्यादितिहेतूच्छित्तिरेव । बाधकतर्कस्यविद्यमानत्वादितिचेन्न । अस्मन्मतेलिंगशरीरस्यानादित्वेनाकार्यत्वेपिमध्यमपरिमाणवत्त्वस्यैवसत्त्वेनतर्कस्यव्यभिचारित्वादिति । यद्यपिलिंगशरीरमप्यण्वेव । तथापितत्तच्छरीरव्यापित्वंविशेषबलादस्ति । ततस्तत्रव्यभिचारस्सुस्थइतिभावः ॥ [३३।५] अप्रयोजकत्वादिति । अस्त्वेतादृशंसावयवत्वंकार्यत्वंमास्त्वित्यप्रयोजकता । अनुकूलतर्काभावादित्यर्थः । पूर्वग्रंथफलितमर्थमनुवदन्नुत्तरग्रंथमवतारयति ॥ [३३।६] तदेवमिति । तद्विरोधादेवेत्येवकाराभिप्रायमाह ॥ [३३।८] तिष्ठंतुतावदिति । [३३।९] तथाचेति । भेदग्राहकप्रत्यक्षादिविरोधेसतीत्यर्थः ॥ [३३।१०] तदिति । तस्याभेदागमस्येत्यर्थः ॥ [३३।१२] तेनेतिवर्ततइति । अनुवर्ततइत्यर्थः । अनुवृत्तस्यतेनेत्यस्यप्रत्यक्षादिविरोधेनेत्यस्यार्थस्यासंभवादाह ॥ [३३।१२] भेदस्येति । आगमस्य अभेदागमस्य ॥ [३३।१४] वेदत्वेनेति । अपौरुषेयवाक्यत्वेनेत्यर्थः । ननुकथमनेनानुवादकत्वपरिहारइत्यतआह ॥ [३३।१५] अयमाशयइति ॥ [३३।१५] पूर्वप्रवृत्तप्रमाणावच्छिन्नेति । पूर्वप्रवृत्तप्रमाणप्रतिपाद्यत्वावच्छिन्नार्थप्रतिपादकत्वमित्यर्थः । यथालोकेप्रत्यक्षादिकंप्रमाणमेवंप्रतिपादयतीत्यनुवादकवाक्यस्यपूर्वप्रवृत्तप्रत्यक्षादिप्रमाणप्रतिपाद्यत्वविशिष्टार्थप्रतिपादकत्वमस्ति । एवंतादृशानुवादकत्वंद्वासुपर्णेत्यादिभेदवाक्यानांनास्तितथाऽनुपलंभादित्यर्थः ॥ [३३।१६] तथात्वेहीति । यद्येतादृशानुवादकत्वमुच्येततदैवह्यर्थासंस्पर्शितया अयमेवमाहेत्यादिवत् भेदरूपार्थसत्त्वेउदासीनत्वेनार्थसत्त्वनिश्चायकत्वाभावप्राप्त्याभेदवा

क्यानांदौर्बल्येनाप्रामाण्यशंकास्यात् । नह्येवमस्ति । अनुपलंभादित्यर्थः ॥ तस्यापीति । प्रतिपन्नार्थप्रति
पादकस्याप्यागमस्येत्यर्थः ॥ परानपेक्षेति । पूर्वप्रवृत्तप्रत्यक्षादिप्रमाणरूपपरापेक्षांविनास्वकारणायत्तस्य स्वस्यार्थ
बोधनेयत्कारणंशक्तियोग्यतादिसहकारि तन्मात्राधीनस्य तन्मात्रमपेक्ष्यप्रवृत्तस्येत्यर्थः । अयंभावः । यद्यागमः प्र
त्यक्षादिरूपपूर्वप्रमाणापेक्षया तदुपजीवनेनेतियावत् । स्वार्थप्रतिपादनेप्रवर्तेततर्ह्येवानुवादितयादौर्बल्यशंकास्यात् ।
नचैवमस्ति । आगमः प्रत्यक्षाद्यनुपजीवनेनशक्त्यादिसहकारिवशात्स्वार्थंप्रतिपादयति । सोर्थोवस्तुगत्याप्रमाणांतरप्रति
पादितइत्येव । तथाचैतादृशस्यापिवाक्यस्यानुवादित्वेप्रमाणांतरेणापितस्यार्थस्यप्रतिपादितत्वाद्वैयर्थ्यमितिवैयर्थ्यमेवबीज
तयावाच्यं नचतत्प्रकृतेस्तीति । तद्वैयर्थ्यरूपंबीजंप्रकृतेनास्तीत्यर्थः । कुतोनास्तीत्यतआह ॥ दुर्बलाभ्यामित्या
दिना । तथाचनिश्शंकतयाभेदप्रतीतेर्द्वासुपर्णेत्यादिभेदागमेनैवजायमानत्वेनप्रत्यक्षादिनातदजननात् । अनुवादकत्वेबीज
भूतंवैयर्थ्यंनास्तीतिभावः ॥ नद्विरोधेनेति । भेदवाक्यविरोधेनेत्यर्थः । भेदवाक्यैः प्रतिरुद्धत्वादित्यन्वयः ॥ किंतुप्रब
लप्रमाणबाधितत्वाचेतिवक्तुमिति । अतस्तयोर्विरोधेप्रामाण्यंनस्यादित्यत्रेत्यर्थः ॥ यद्यपीति । तथाचनप्रत्यक्षानु
मानविरोधेनाभेदागमस्याप्रामाण्यंवक्तुमुचितमितिभावः । ततएव बलवत्त्वादेव ॥ द्वैरूप्यापातादिति । विरुद्धधर्मद्वया
लिंगितत्वापातादित्यर्थः । विषयो धर्मी पर्वतग्राहकं प्रत्यक्षं॥ स्वोदयाभावेनेति । स्वस्योपजीवकस्योदयाभावेनेत्यर्थः ॥
अबोधकत्वलक्षणमप्रामाण्यमिति । अनुत्पन्नस्यविपरीतबोधकत्वलक्षणाप्रामाण्यासंभवेपिबोधकत्वाभावरूपाबोध

कत्वरूपाप्रामाण्यंसंभवत्येव । धर्म्यभावेतत्रधर्मसंसर्गोनुमानेनवाऽऽगमेनवाबोधयितुंनशक्यते । सिद्धंधर्मिणमुद्दिश्यसा ध्यधर्मोविधीयतइतिवचनात् । अतोबोधकत्वाभावरूपाप्रामाण्यंप्राप्नोतीत्यर्थः । स्वस्यैवेत्येवकाराभिप्रायमाह ॥ यत्स्वय मिति ॥ येनयस्येति । तथाचलिंगादिग्राहकस्याप्युपजीव्यत्वेनयेनयस्यविषयः धर्मीसिध्यति तत्तस्योपजीव्यमित्युपजी व्यलक्षणमयुक्तमितिभावः ॥ प्रकृतापेक्षयेति । जीवेश्वररूपधर्मिग्राहकतयैवप्रत्यक्षादेरुपजीव्यत्वस्यप्रकृतत्वादित्यर्थः ॥ एतदुक्तमिति । विषयाभावइत्यनेनधर्मिग्राहकस्यैवोपजीव्यत्वमुक्तमित्यर्थः । वस्तुतस्तुयेनविनायस्योत्थानंनभवतितत्त स्योपजीव्यमित्येतदेवोपजीव्यलक्षणमितिभावः । तेनैवेतिवचनेनसूचितमर्थमाह ॥ अनेनेति ॥ इदमिति । भेदग्राहक योःप्रत्यक्षानुमानयोरभेदागमंप्रत्युपजीव्यत्वमस्माभिर्बलात्कारेणनोच्यतइत्यर्थः । नकेवलमस्मत्पक्षेकिंतुतत्पक्षेपीत्यन्यथाप्र तीतिनिरासायापिशब्दाभिप्रायमाह ॥ नकेवलमिति । तत्पक्षेप्यागमस्येतिपदद्वयमनूद्यतदभिप्रायमाह । (नकेवलमि त्यादेरभिप्रायमाह ॥) भेदागमवदित्यादिना । भेदग्राहकयोःप्रत्यक्षानुमानयोरभेदागमंप्रतिकथंधर्मिग्राहकत्वेनोपजीव्य त्वमित्यतस्तदुपपादयति ॥ जीवंविषयीकृत्येत्यादिना । विषयीकृत्य धर्मीकृत्य ॥ तत्त्वमसीति । त्वंतदसीतितदर्थः॥ क्षेत्रज्ञंचापीति । मांक्षेत्रज्ञंजीवंविद्धीत्यर्थः ॥ नेहनानेति । इह जीवब्रह्मणोः । तदुभयानुस्यूतचिन्मात्रस्येतियावत् । नाना भेदोनास्तीत्यर्थः ॥ एतदेवेति । प्रत्यक्षानुमानयोरभेदागमंप्रतिधर्मिग्राहकतयोपजीव्यत्वमेवविवृणोतीत्यर्थः ॥ स्व रूपग्राहकस्यापीति । नेहनानास्तीत्याद्यभेदागमस्वरूपग्राहकश्रोत्रप्रत्यक्षस्यापीत्यर्थः ॥ चशब्देनेति । तथाचनात्रजी

वस्यप्रत्यक्षसिद्धत्वानुक्तिरितिभावः ॥ [३४।१३]प्रत्याक्षानुमानयोर्विरोधइति । प्रत्यक्षानुमानयोस्सकाशाद्विरोधेसतीत्यर्थः ॥ भवत्वित्यादि[३४।१३] । यद्यप्यनुवादित्वपक्षइत्यनेनभेदागमानामनुवादकत्वसिद्ध्यर्थंप्रत्यक्षादेर्भेदग्राहकत्वंवाच्यमेवान्यथाभेदागमानामनुवादकत्वमेवनस्यादितिप्रतिपादितत्वेनशंकैवैषानोपपन्ना । तथाप्यनुवादित्वपक्षइत्यस्याभिप्रायमजानतःशंकेयमितिज्ञातव्यमित्याहुः ॥ [३४।१५]तथाभूतेएवेति । स्वरूपमात्रग्राहकेएवप्रत्यक्षानुमानेऽभेदागमंप्रत्युपजीव्येइत्यर्थः । अनुमानसिद्धेत्यनेनाभिप्रेतमर्थमाह ॥ [३४।१६]यद्यपीत्यादिना ॥ [३४।१६]अन्योन्यानपेक्षेइति । प्रतियोगिज्ञानाभावादित्याशयः । प्रत्यक्षानुमाने जीवेश्वरस्वरूपमात्रग्राहके । तद्विरुद्धस्वभावं असार्वज्ञादिविशिष्टं । ततः ईश्वरात् । प्रतियोगिभूतेश्वरस्यज्ञातत्वादितिभावः ॥ [३४।१७]अवर्जनीयमेवेति । प्रत्यक्षेधर्मिणिभेदकधर्मसाक्षात्कारस्यभेदसाक्षात्कारव्याप्तत्वादितिभावः । शंकते ॥ [३४।१७]नानुमानमिति । येनसर्वकर्तृत्वादिविशिष्टतयेश्वरज्ञानापत्तिरितिभावः । तस्यापि आगमस्यापि ॥ [३४।१८]अनुमानतुल्यत्वादिति । यथानुमानस्यसर्वकर्तृत्वादिवैशिष्ट्यविषयकानुमितिजनकत्वं । एवंयस्सर्वज्ञइत्यादेरागमस्यापिसार्वज्ञादिवैशिष्ट्यविषयकज्ञानजनकत्वादितिभावः । प्रत्यक्षेणचागमइति । प्रत्यक्षस्यागमस्वरूपग्राहकत्वमुक्तं । तदनुपयुक्तंकस्मादुक्तमित्यतआह ॥ [३४।१८]आगमग्राहकेति ॥ [३४।१९]स्वप्रभृतेरिति । अन्यथास्वस्मिन्नेवप्रामाण्यंप्रतिहतमितिकथमन्यस्यापिमिथ्यात्वंप्रतिपादयेदितिभावः ॥ [३४।१९]तत्रेति । नेहनानेत्यत्रेत्यर्थः ॥ [३४।१९]तद्विरोधेनेति । आगमस्वरूपसत्ताग्राहिश्रोत्रप्रत्यक्षविरोधेनस्वस्य मिथ्यात्वबोधनायोगेनस्वस्मिन्प्रामाण्यंप्रतिहतमितिकथंस्वव्यतिरिक्तस्यभेदप्रपंचस्यमिथ्यात्वंबोधयेदित्यर्थः । तथाचस्व

प्रभृतेरित्याद्युक्तमयुक्तमितिभावः । ननुपूर्वप्रत्यक्षादेरागमस्यप्राबल्येपिनोपजीव्यप्रमाणविरोधेप्रामाण्यमितिसाक्ष्यनुभववि रोधेनैक्यागमाप्रामाण्यस्योक्तत्वादस्यग्रंथस्यपुनरुक्तिरित्यतआह ॥ [३४।२०] पूर्वमिति ॥ [३४।२१] उपजीव्यत्वानपेक्षेति । द्विविधंबल वत्त्वंचबहुत्वाच्चस्वभावतः । तयोस्स्वभावोबलवानुपजीव्यादिकश्चसइत्युक्तत्वेनसाक्षिणउपजीव्यत्वरूपंयत्स्वभावप्रयुक्तंप्रा बल्यंतदाश्रित्यपूर्वंतद्विरोधउक्तः । इदानींतुसाक्षिणउपजीव्यत्वानपेक्षंयन्निरवकाशत्वरूपंतत्स्वभावप्राबल्यंतदाश्रित्यतद्वि रोधउच्यतइतिभेदइत्यर्थः । अस्मिन्पक्षेविरोधप्रकारःकथमित्यतआह ॥ [३४।२१] विरोधप्रकारस्त्विति ॥ [३४।२१] प्रागिति । असर्व कर्तृत्वेनानुभवादित्यत्रेत्यर्थः । श्रुत्यादिनासार्वज्ञादिलक्षणमीश्वरंज्ञातवतस्साक्षिणाचतद्विरुद्धमसार्वज्ञादिविशिष्टमात्मान मनुभवतस्ततोभेदज्ञानमवर्जनीयमेवेतितद्विरोधादभेदागमस्याप्रामाण्यमितिभावः ॥ [३४।२२] इत्युक्तमिति । वस्तुनोविरुद्धधर्म द्वयालिंगितत्वरूपद्वैरूप्यापत्तेः । अप्रामाण्येचवस्तुनोनिस्स्वभावत्वापत्तेरित्युक्तमित्यर्थः । अंगीकरणीये सति । साक्ष्यनुभ वस्य भेदग्राहकस्य । तस्य साक्षिणः ॥ [३४।२४] अभेदागमेति । साक्षिणएवाभेदागमप्रामाण्यग्राहकत्वादितिभावः ॥ [३४।२५] तत्श्चे ति । साक्षिणोऽविश्वस्तप्रामाण्यकत्वादित्यर्थः । असिद्धप्रामाण्यं असिद्धप्रामाण्यकमितिप्रथमांतं । अन्यत् साक्ष्यनुभव मितिद्वितीयांतं । ननुसाक्ष्यनुभवस्याप्रामाण्येआगमप्रामाण्यानुभवस्याप्यप्रामाण्यप्रसंगइत्यापादनमयुक्तं । आगमप्रामा ण्यानुभवस्यापिसाक्षिरूपत्वात् । तथाचसाक्ष्यनुभवस्याप्रामाण्येसाक्ष्यनुभवस्याप्रामाण्यमित्युक्तंस्यात् । तच्चव्याहतमित्या शंक्याह ॥ [३४।२६] आगमप्रामाण्येति ॥ [३४।२६] विषयभेदेनेति । जीवेश्वरभेदविषयकत्वागमप्रामाण्यविषयकत्वरूपविषयभेदेनेत्य

र्थः । विषयभेदमेवाह ॥ **आगमप्रामाण्यविषयेपीति** । ननुसाक्ष्यनुभवविरोधेनैक्यागमस्याप्रामाण्यंकुतइतिचेदिति
पृष्टेसाक्षिणःप्राबल्येकोहेतुरनेनोक्तइत्यतआह ॥ **अनेनेति** । साक्ष्यनुभवविरोधादैक्यागमस्याप्रामाण्यापत्तिकथनेनेत्य
र्थः ॥ **अव्यभिचरितत्वनियमइति** । विषयाव्यभिचरितत्वनियमइत्यर्थः । अनेननिरवकाशत्वंविवृतंभवतीतिज्ञातव्यं ॥
एतैरेवेति । भेदग्राहकप्रत्यक्षादिभिरेवेत्यर्थः ॥ **अधिगतमेवेति** । प्रथमप्रमाणेनेत्यर्थः । द्वितीयादीनां प्रमाणानां । ब
हुत्वइत्यनंतरंएकविषयत्वेचेतिशेषः ॥ **प्रामाण्याभावादिति** । अनधिगतार्थगंतृत्वरूपप्रामाण्याभावादित्यर्थः । प्रामा
ण्ये अनधिगतार्थगंतृत्वे ॥ **बहुत्वाभावादिति** । स्वस्वविषयेतेषामेकैकत्वादित्यर्थः ॥ **संवादग्रहणेनेति** । समानविषय
कज्ञानांतरस्यैवसंवादत्वादितिभावः । अनुवादकत्वं । अधिगतार्थाधिगमकत्वेनवैयर्थ्यलक्षणानुवादकत्वमित्यर्थः ॥ **प्रयो
जनवत्त्वेति** । निःशंकप्रतीतिहेतुत्वरूपप्रयोजनवत्त्वाभिधानेनेत्यर्थः । उक्तंप्रयोजनवत्त्वमाक्षिप्यसमाधत्ते ॥ **यद्यपीत्या
दिना** ॥ **एकाकारेति** । तथाचप्रथमप्रमाणवद्द्वितीयादिप्रमाणानामपिनिःशंकप्रतीतिहेतुत्वंप्रथमप्रमाणानवगतस्यनिःशंक
प्रतीत्युपयोगिनोऽधिकस्याभा(ना)(वा)दित्यर्थः। परिच्छिन्ने ज्ञातेसति। तत्रैव भेदविषयएव॥ **तस्यैवेति** । पुरुषत्रयेणप्र
तिपादितस्यैवाग्नेरित्यर्थः। अनेन बहूनांवचनइतिमूलेन॥ **अभिदधतीति**। दृष्टांतइतिशेषः । अपौरुषेयत्वादीत्यादिपदेनपौ
रुषेयत्वंग्राह्यं । तत्रभेदग्राहिप्रत्यक्षानुमानागमेषुप्रत्यक्षानुमानयोःपौरुषेयत्वं आगमस्यत्वपौरुषेयत्वमितिद्रष्टव्यं ॥ **अपरो
पीति** । सहकारिकृतसामार्थ्यातिशयोनुभवसिद्धइत्येवविशेषोनेत्यर्थः । अत्रज्ञापकमाह ॥ **अतएवेति** । अपौरुषेयत्वपौरु

षेयत्वरूपोविशेषस्सूचनीयोयतोतएवेत्यर्थः । तथाहि । प्रत्यक्षानुमानसिद्धेजीवेश्वरभेदेप्रवर्तमानस्यागमस्यानुवादकत्वंवदंतं प्रतितदभावव्युत्पादनार्थंदार्ष्टांतिकानुसारेणदृष्टांतेदर्शनमादावुक्त्वापश्चाद्वचनंवक्तव्यं । तथाचदर्शनेतस्यैवबहूनांवचनइ तिवाक्यवृत्तिस्स्यात् । नचैवमवादीत् । किंतुबहूनांवचनेतस्यैवदर्शनइति वचनमादावुक्त्वादर्शनमेवपश्चादुक्तं । तेनज्ञायतेपर्व तोग्निमानितिपर्वताग्निसंसर्गबोधकवाक्यजन्यपरोक्षज्ञानानिवर्त्यशंकानिरासोपयोगोअपरोक्षत्वरूपोविशेषोदर्शनेस्तीति । तद्व देवदोषशंकाकलंकितप्रत्यक्षानुमानापेक्षयाद्वासुपर्णेत्यादिभेदवाक्यस्यतदनिवर्तनीयशंकानिरासोपयोग्यपौरुषेयत्वरूपोविशे षोस्तीतिज्ञायतइतिभावः । दार्ढ्यहेतुत्वेनप्रयोजनवत्त्वेनदार्ढ्यहेतुत्वरूपप्रयोजनवत्त्वेन ॥ [३५।१४] **तस्यानुवादकत्वइति** । सि द्धसाधनस्यानुवादकत्वेनदूषणत्वेप्रकृतेभेदागमस्याप्यनुवादकत्वेनदूषणत्वंस्यादित्यर्थः । ननुविवादपदोक्तविप्रतिपत्तिरेवन शंकाकारणं । समानधर्मादेरन्यस्यापिसंभवादित्यतआह ॥ [३५।१४] **अविवादपदेनेति** । सर्वाविवादस्थलएवेत्यस्यप्रथमप्रमाणेनै वयत्रार्थोनिःशंकंप्रमितस्तादृशस्थलएवेत्यर्थोद्रष्टव्यः ॥ [३५।१५] **वैयर्थ्यदोषइति** । वैयर्थ्यरूपोक्तदोषइत्यर्थः ॥ [३५।१६] **स्वार्थेति** । परा र्थानुमानवाक्ययोःपरज्ञापनार्थत्वेनपरेणतस्यार्थस्यनिःशंकंप्रमितत्वेनवैयर्थ्यदोषः । संदिग्धविपर्यस्तान्यतरंप्रत्येववाक्यपरा र्थानुमानयोरर्थवत्त्वादितिवचनात्स्वार्थानुमानस्यप्रत्यक्षस्यवानिःशंकंप्रमितेप्यर्थेपुनःप्रवर्तमानस्यवैयर्थ्येनदोषइत्यर्थः । कुतइ त्यतआह ॥ [३५।१६] **तयोरिति** । स्वार्थानुमानप्रत्यक्षयोरित्यर्थः । नहिसामग्रीबुद्धिमती येनयन्मयाकर्तव्यंतदन्येनकृतमित्यवे क्ष्योदासीतेतिभावः । तथाचपरार्थानुमानएवसिद्धेःप्रतिबंधकत्वं नस्वार्थानुमानइत्यवधेयं । नचस्वार्थानुमानेसंदेहघटित

पक्षलक्षणाभावःशंक्यः । अनुमितिविषयःपक्षइतिपक्षलक्षणस्यतत्रापिसत्त्वात् । नचसाध्येतिव्याप्तिः विषयशब्दस्यविशेष्यपरत्वात् । तथाचानुमितिविशेष्यःपक्षइतिपक्षलक्षणंद्रष्टव्यं । यथोक्तंसुधायांभक्तिपादे । परमार्थतस्तु । अनुमितिविषयःपक्षइति ॥ अतएवेति । सत्यांशंकायांपरार्थानुमानवाक्ययोर्निःशंकंप्रमितेप्यर्थेप्रत्यक्षस्वार्थानुमानयोरव्यर्थत्वादेवेत्यर्थः । तथाहि । यदिसत्यामपिशंकायांपरार्थानुमानवाक्ययोरनपेक्षितत्वेनवैयर्थ्यंस्यात्तर्हिबहूनांवचनंशंकानिवर्तकत्वेननाद्रियेतेति पूर्वंबहूनामितिनोच्येत । तेनज्ञायते सत्यांशंकायांतयोर्नवैयर्थ्यमिति । यदिचप्रत्यक्षंनिःशंकंप्रमितेप्यर्थेव्यर्थंस्यात्तदाबहूनां वचनैर्निःशंकंप्रमितेप्यर्थेविश्वासहेतुत्वेनदर्शनंनोच्येत । तेनज्ञायतेशंकाभावदशायांनप्रत्यक्षस्यवैयर्थ्यमिति । नन्विदानीं तनैक्यवादिविवादजनितशंकापनोदायानादिवेदप्रवृत्तिःकथमित्यतआह ॥ ऐकत्ववादिवादानामिति । अनादित्वात् प्रवाहतोनादित्वात् । शौद्धोदनिप्रभृतयस्संप्रदायप्रवर्तकाइतिवचनादितिभावः । यथोक्तमनुव्याख्याने अनादिकालतोवृत्तास्समयाहिप्रवाहतः । नचोच्छेदोस्तिकस्यापिसमयस्येति ॥ तर्दनेनेति । बहुप्रमाणानामेकविषयत्वमंगीकृत्यदार्ढ्यहेतुतयावैयर्थ्याभावसमर्थनेनेत्यर्थः ॥ वैपरीत्यस्यापीति । ऐक्यागमविरोधेनबहूनांप्रत्यक्षादीनामेवाप्रामाण्यसंभवादितिभावः । पाटनं छेदः ॥ अनुमिनोतीति । इयंशुक्तिर्दाहच्छेदादिमत्त्वादित्यनुमिनोतीत्यर्थः । ननूक्तरीत्याशुक्तिरजतज्ञानस्याप्रामाण्येपिऐक्यागमप्रामाण्येकिमायातमित्यतस्तद्दृष्टांतेनतदप्यनुमेयमित्याह ॥ एतदुक्तंभवतीति ॥ ऐक्यवाक्यमिति । तज्जनितंविज्ञानमित्यर्थः । अनुमानेदोषजन्यत्वरूपमुपाधिमाशंकते ॥ नन्विति ॥ प्रकटयतीति । बहुप्रमा

णविरुद्धानामितिबहुवचनस्यभूयोदर्शनप्रदर्शनपरत्वादितिभावः ॥ [३५।२६] पूर्वोत्तरेति । उपक्रमोपसंहारेत्यर्थः ॥ [३५।२६] साधनव्या पकत्वमिति । यत्रबहुप्रमाणविरुद्धत्वंतत्रदोषजन्यत्वमितिसाधनव्यापकत्वमित्यर्थः ॥ [३६।२] अतींद्रियत्वादिति । तस्यका लादिघटितत्वादितिभावः ॥ [३६।३] तद्दोषाणामप्यतींद्रियत्वादिति । शुक्तिरजतादिज्ञानंदोषेसतिजायतेदोषाभावेनजायत इत्यन्वयव्यतिरेकाभ्यांशुक्तिरजतादिज्ञानस्यदोषजन्यत्वंज्ञातव्यं । तन्नसंभवति । इंद्रियाणामतींद्रियत्वेनतदाश्रितानमा न्वयव्यतिरेकप्रतियोगिनांदोषाणामप्यतींद्रियत्वेनज्ञातुमशक्यतयाऽन्वयव्यतिरेकयोर्दुर्ज्ञानत्वादितिभावः ॥ [३६।३] नापीति । शुक्तिरजतादिज्ञानंदोषजन्यं अप्रमाणत्वादित्यनुमानेनेत्यर्थः ॥ [३६।३] तज्ज्ञानेपीति । शुक्तिरजतादिज्ञानस्याप्रामाण्यज्ञाने पीत्यर्थः । नचदोषजन्यत्वमेवतज्ज्ञानोपायइतिवाच्यं । अन्योन्याश्रयादितिभावः ॥ [३६।३] नचात्रेति । शुक्तिरजतादिज्ञानस्य दोषजन्यत्वइत्यर्थः । ननुबलवत्प्रमाणविरुद्धत्वस्यैवदोषजन्यत्वव्याप्तिःप्राप्ता नतुबहुप्रमाणविरुद्धत्वस्येत्यतआह ॥ [३६।४] बलव त्त्वंचेति ॥ [३६।६] नास्योपाधित्वमिति । ऐक्यवाक्यजनितंविज्ञानमप्रमाणं । बहुप्रमाणविरुद्धत्वाच्छुक्तिरजतज्ञानवदित्यनु मानेदोषजन्यत्वस्योपाधित्वंनास्तीत्यर्थः ॥ ७ ॥ [३६।७] न्यायशास्त्रसंमत्येति । ब्रह्मतर्कसंमत्येत्यर्थः । ब्रह्मतर्कस्तर्कशास्त्रंवि ष्णुनायत्समीरितमितिवचनात्सिद्धांतेब्रह्मतर्कस्यैवन्यायशास्त्रत्वप्रसिद्धिरितिभावः । ननुप्रमाणलक्षणादेःप्रागनुक्तत्वात्तत्प्र तिपादकेनानेनवाक्यसंदर्भेणकथमुक्तार्थदृढीकरणमित्यतआह ॥ [३६।७] एतेषामिति । प्रागुक्तार्थप्रतिपादकेनैवदार्ढ्यहेतुत्वा भावेपिक्वचिदुक्तप्रतिपादकत्वेन क्वचिदुक्तसमर्थनादिना दार्ढ्यहेतुत्वमस्तीतिभावः । अतएवसर्वसंग्रहायोपयोगपदप्रयोगइ

तिज्ञातव्यं । प्रवृत्तानि ब्रह्मतर्कग्रंथइतिशेषः । स्वरूपे प्रमाणस्वरूपे ॥ [३६।८] तदन्यधर्मेति । बलवत्प्रमाणतश्चैवेत्यादिनावक्ष्य
माणबलवत्त्वादिधर्मज्ञानमित्यर्थः ॥ [३६।८] स्वरूपज्ञानंचेति । इतरव्यावृत्तत्वेनस्वरूपज्ञानमित्यर्थः ॥ [३६।८] व्यवहारेष्विति । प्र
त्यक्षादेरागमस्येत्यादिविशेषव्यवहारेष्वित्यर्थः ॥ [३६।९] अनुपयोगादिति । तस्यातिप्रसक्तत्वात् । नहिपशुत्वंगौरितिव्यवहारे
निमित्तमितिभावः । तेनप्रमाणमितिप्रमाणसामान्यव्यवहारेसामान्यलक्षणस्याप्युपयुक्तत्वात्कथमेतदितिशंकानवकाशइति
ध्येयं । विशेषाणां विशेषलक्षणानां । तदुपयोगात् विशेषव्यवहारेषूपयोगात् । अदुष्टत्वस्यदोषज्ञानाधीनत्वात्तंलक्षयति ॥
[३६।१०] येनेति । उत्पादयतीत्यनंतरंसदोषइतिशेषः । अनेनप्रमाप्रतिबंधकत्वंदोषत्वं । प्रमाप्रतिबंधकत्वंचद्वेधा । सर्वथाज्ञानाजन
कत्वेन तज्जनकत्वेपिसंशयविपर्ययजनकत्वेनचेत्युक्तंभवति ॥ [३६।११] ज्ञानेंद्रियमेवेति । नकर्मेंद्रियमित्यर्थः । कुतइत्यतआह ॥
[३६।११] प्रमाणप्रकरणादिति । कर्मेंद्रियस्यकर्मकरणत्वेनप्रमाकरणत्वाभावादितिभावः । तमेवविशेषंदर्शयितुंतदुपयुक्तांकांचनव
स्तुस्थितिमाह ॥ [३६।११] सेतिकर्तव्यताकमिति । कारकमितिशेषः । सन्निकर्षादिरूपावांतरव्यापाराख्येतिकर्तव्यतासहितंय
त्कारकंतत्करणमित्युच्यतइत्यर्थः। यद्यपिक्रियाऽयोगव्यवच्छिन्नमेवकारकंकरणं नियमेनक्रियाजनकमितियावत्। क्रियांकु
र्वद्धिकारकमितिवचनात्। नतुसेतिकर्तव्यताकं। तथापीतिकर्तव्यतारहितस्यक्रियाऽयोगव्यवच्छिन्नत्वाभावादेवमुक्तमिति
ज्ञातव्यं । अत्र ब्रह्मतर्कवाक्ये । अधिकृतं लक्ष्यतयेतिशेषः । एवंवस्तुस्थितिमुक्त्वा ननुतर्हिप्रत्यक्षनिरूपणमकृत्वाऽक्षमेवा
त्रकस्मान्निरूपितमित्याशंकापरिहारायतुशब्दार्थभूतंविशेषंदर्शयति ॥ [३६।१२] तत्रेति । करणधर्मिणइत्यत्रकरणेधर्मिणइतियोज्यं ।

इतिकर्तव्यतासहितकारकरूपकरणशब्दार्थेयद्धर्मिभूतंकारकंतस्येतिकर्तव्यतापेक्षयाप्राधान्यादित्यर्थः ॥ [३६।१२] प्रत्यक्षधर्म्यक्षमेवेति । करणविशेषभूतविषयसन्निकृष्टाक्षरूपप्रत्यक्षशब्दार्थेपियद्धर्मिभूतंप्रधानं अक्षं तदेवसन्निकर्षरूपेतिकर्तव्यतापरित्यागेननिरूपितमित्यर्थः । प्रत्यक्षधर्म्यक्षमेवेत्यत्रस्ववाक्येऽवधारणव्यावर्त्यमाह ॥ [३६।१२] नत्विति । प्रत्यक्षं निरूपितमितिवर्तते । यथाहितर्कोऽदुष्टस्तथानुमेत्यत्रसेतिकर्तव्यताककरणवाचिनानुमापदेनसेतिकर्तव्यताकमेवानुमानंनिरूपितं एवंसेतिकर्तव्यताकंप्रत्यक्षंननिरूपितमित्यर्थः । तर्हियदधिकृतंप्रत्यक्षंतन्ननिरूपितमेवेतिन्यूनतेत्यतआह ॥ [३६।१२] तत्त्विति । यदधिकृतंसन्निकर्षरूपेतिकर्तव्यतासहितंप्रत्यक्षंतत्त्वित्यर्थः ॥ [३६।१२] उत्तरत्रेति । विषयान्प्रतिस्थितंह्यक्षंप्रत्यक्षमितिकीर्तितमित्युत्तरत्रेत्यर्थः ॥ [३६।१३] व्याप्यांगीकारइति । व्यतिरेकव्याप्तौसाध्याभावस्यव्याप्यत्वादग्निर्मास्त्वित्यग्न्यभावरूपव्याप्यांगीकारइत्यर्थः । व्यापकप्रसंजनं धूमाभावापादनं । अप्रसंगात्मकं साधनानुमानं । नन्वेवंसतिदूषणानुमानरूपतर्कसाधनानुमानोभयानुगतानुमानलक्षणालाभइत्यतआह ॥ [३६।१४] तथाचेति । अत्रादुष्टइत्यनंतरंलिंगमितिविशेष्याध्याहारः । अदुष्टइतिपुँल्लिंगस्यव्यत्ययः । एवंसत्यदुष्टंलिंगमनुमेत्येवमुभयानुगतलक्षणलाभइत्यभिप्रेत्योक्तं ॥ [३६।१४] वक्ष्यमाणविरोधादिदोषरहितंलिंगमनुमेति । निर्दोषोपपत्तिरनुमा अनुमायुक्तिरेवोक्ता लिंगंहेतुरितिप्रमाणलक्षणानुव्याख्यानमिथ्यात्वानुमानखंडनानुसारेणोपपत्तियुक्त्यादिशब्दवाच्यंलिंगमित्युक्तं । तर्कतथाशब्दाभ्यांविभागउक्तइत्यभिप्रेत्याह ॥ [३६।१४] साचेति ॥ [३६।१५] एवमुक्तमिति । स्वशब्देनकंठरवेणतर्कोगृहीतइत्यर्थः । प्रमाणत्वमंगीकृत्यतस्यानुमानेंतर्भावकथनेनमतद्वयस्यापिनिरासादितिभावः ॥ [३६।१६] सम

स्तोपपत्तिरिति । साधनानुमानदूषणानुमानरूपेत्यर्थः । तथाचात्रानुमेत्यनेनैवसामान्यलक्षणंतर्कइत्यनेनैवविभागश्चोक्त इतिज्ञातव्यं ॥ [३६।१६] अयमपीति । साधनानुमानदूषणानुमानरूपस्तर्कइत्यर्थः ॥ [३६।१६] वाक्यदोषेति । अबोधकत्वविपरीतबोधकत्वादिरूपेत्यर्थः ॥ [३६।१७] तेनेति । चेष्टायाआगमत्वव्यावर्तनेनेत्यर्थः ॥ [३६।१७] समर्थबलेनेति । संकेतबलेनेत्यर्थः । चेष्टायाअप्येताद्दशत्वेनतन्मतेआगमांतर्भावोद्रष्टव्यः । कथंनिरस्तमित्यतस्तदुपपादयति ॥ [३६।१८] आगमशब्दस्येति ॥ [३८।१८] वाक्यएवेति । नतुचेष्टायामित्यर्थः । ननुवाक्येआगमशब्दस्यरूढत्वेपिचेष्टायांप्रयोगःकुतोनकर्तव्यइत्यतआह ॥ [३६।१८] लोकरूढस्यैवेति । अन्वाख्येयत्वात् प्रयोक्तव्यत्वात् व्यवहर्तव्यत्वादितियावत् । लोकरूढस्यैवपरीक्षकैरन्वाख्येयत्वाभावेऽतिप्रसंगमाह ॥ [३६।१८] अन्यथेति । प्रत्यक्षशब्दस्याप्यागमेप्रयोगस्स्यादित्यतिप्रसंगस्स्यादित्यर्थः । ननुचेष्टायाआगमानंतर्भावेप्रमाणांतरत्वंस्यादित्यतआह ॥ [३६।१८] चेष्टायाश्चेति । नन्वत्रसुधाविरोधःशंक्यः । तत्रलिप्यक्षरचेष्टयोर्वर्णस्मरणहेतुत्वेनमानसप्रत्यक्षेंतर्भावकथनात् । यथोक्तंसुधायांविलक्षणाधिकरणे । पुरुषलिपिरपिपदमिवपदार्थस्यवर्णानांस्मरणहेतुरेष्टव्येति । नचात्रपुरुषलिपिरेवोक्तानाक्षरचेष्टेतिवाच्यं । भक्तिपादीयसुधायांशाकुनलिप्यक्षरचेष्टानामंतर्भावस्यविलक्षणाधिकरणेसूचितत्वादित्युक्तत्वात् । नहिविलक्षणाधिकरणस्थमुक्तवाक्यंविनाऽक्षरचेष्टांतर्भावसूचकंतत्रत्यवाक्यांतरमस्तीतिचेत् । उच्यते । भक्तिपादीयसुधायामक्षरचेष्टाशब्देनाक्षरत्वेनसंकेतितचेष्टायाःकरपल्लवसंज्ञायाविवक्षितत्वात् । अत्रचेष्टाशब्देनार्थविशेषबोधकभ्रूविक्षेपादिरूपायाएवचेष्टायाअभिप्रेतत्वेनाक्षरचेष्टांतर्भावानुक्त्यासुधाविरोधाभावात् । अतएवात्रचेष्टेत्येवसामा

न्येनोक्तंनाक्षरचेष्टेति । अत्रत्यचेष्टाशब्दस्याक्षरचेष्टाभिप्रायकत्वेतुचेष्टकबुद्धिस्थशब्दानुमापकत्वेनवातदवबुद्धार्थानुमापकत्वेनवाऽनुमानेंतर्भावादितिपररीत्याव्याख्येयमितिसंप्रदायविदः ॥ [३६।१९] आत्मस्वरूपभूतमिति । अनेनस्वाचसादृक्चेतिस्वदृगितिविग्रहःप्रदर्शितोभवति । ननुवृत्तिरूपज्ञानस्याप्यनुभवत्वेनानुभवलक्षणभूतात्मस्वरूपज्ञानत्वरूपस्वदृक्त्वलक्षणस्यतत्राव्याप्तिरित्यतआह ॥ [३६।१९] तदिदानीमिति । आत्मस्वरूपभूतंयत्साक्षिरूपंज्ञानंतदेवेदानीमनुभवइतिविवक्षितं नवृत्तिरूपंज्ञानं । तथाचसाक्षिरूपानुभवस्यैवलक्ष्यत्वेनात्राभिप्रेतत्वान्नवृत्तिरूपज्ञानेलक्षणाभावोदोषायेतिभावः । ननुनिर्दोषत्वाननुवृत्तावयथार्थभूतेसाक्षिण्यात्मस्वरूपभूतज्ञानत्वरूपस्वदृक्त्वस्यातिव्याप्तिरित्यतआह ॥ [३६।२०] सर्जीवानामिति । तथाचोत्तमजीवसंबंधिस्वरूपज्ञानत्वंसाक्षिप्रत्यक्षस्यलक्षणमित्युक्तंभवति । ननुसाक्ष्यनुभवस्यनित्यत्वंविषयनियमादिकंचकुतोनोक्तमित्यतआह ॥ [३६।२०] अत्रेति ॥ [३६।२०] प्रक्रियात्विति । नित्यत्वविषयनियमादिप्रक्रियात्वित्यर्थः । आदिपदेनेच्छाद्वेषस्सुखंदुःखंभयाभयकृपादयः । साक्षिसिद्धाइत्यनुव्याख्यानादिग्रहणं । ननुप्रत्यक्षादिस्वरूपनिरूपणस्यकःप्रकृतोपयोगइत्यतस्तंदर्शयति ॥ [३६।२१] प्रत्यक्षेति । एतेषांवाक्यानामुक्तोपयोगंतत्रतत्रैवदर्शयिष्यामइत्युक्तंप्रदर्शितंभवतीतिद्रष्टव्यं ॥ [३६।२३] दोषज्ञानाधीनज्ञानमिति । अभावज्ञानस्यप्रतियोगिज्ञानाधीनत्वादितिभावः ॥ [३६।२४] प्रत्यक्षादिसिद्धाइति । शब्देचाक्षुषत्वाभावस्यप्रत्यक्षसिद्धत्वादितिभावः ॥ [३६।२४] इंद्रियदोषास्त्विति । इंद्रियाणामतींद्रियत्वेनतद्दोषाणामप्यतींद्रियत्वादितिभा

वः । बलवत्प्रमाणतइत्यनंतरंविरोधपदमध्याहार्यमित्याशयेनोक्तं ॥ [३६।२४] बलवत्प्रमाणविरोधेनैवेति ॥ [३६।२५] पुरस्तादिति । दोष जन्यत्वंचबलवत्प्रमाणविरोधादेवज्ञायतइतिवाक्यव्याख्यानावसरे नतावत्प्रत्यक्षेणेत्यादिनाग्रंथेनास्माभिरुक्तमित्यर्थः । अस्यप्रकृतोपयोगंदर्शयति ॥ [३६।२५] एतेनेति । बलवत्प्रमाणविरोधस्यदोषज्ञानेकारणत्वकथनेनेत्यर्थः । नन्वनुष्टुप्छंदःपादस्या ष्टाक्षरत्वात्कथंनवाक्षरत्वमित्यतआह ॥ [३६।२५] नवाएकेनेति । एकेनाक्षरेणन्यूनेनाधिकेनवेत्यर्थः । वियंति नश्यंति । द्वाभ्यां अक्षराभ्यांन्यूनाभ्यामधिकाभ्यांवानवियंतीत्यर्थः । अस्यापिब्रह्मतर्कस्यछंदस्तुल्यत्वादितिभावः ॥ [३७।१] तत्रेति । स्वभावस्य बलवत्त्वइत्यर्थः ॥ [३७।१] सूचयितुमिति । उपजीव्यादिकश्चसइत्युक्त्या उपजीव्यविरोधेनैवोपजीवकस्याप्रामाण्यंवाच्यंनान्यथा । विषयाभावेस्वस्यैवाप्रामाण्यप्राप्तेरित्युक्तोपपत्तिस्सूचितेतिज्ञातव्यं । निरवकाशत्वादीत्युक्त्योपजीव्येतिभावप्रधानोनिर्देशइ तिसूचयति । निरवकाशत्वादीत्यत्रादिपदेनसाक्षिनिष्ठविषयाव्यभिचरितत्वनियमस्यग्रहणं । अतएवागमप्रामाण्यानुभवस्य प्राप्तेरित्यत्रवक्ष्यतिअनेनाव्यभिचरितत्वनियमः साक्ष्यनुभवस्यप्राबल्येहेतुरित्युक्तंभवतीति । भावबोधेतुश्रुतित्वोपपत्त्यादि ग्रहणमितिव्याख्यातं ॥ [३७।२] अतएवेति । स्वभावस्यबलवत्त्वादेवेत्यर्थः। अर्थतइतिव्युत्पत्त्यार्थशब्दोज्ञेयवाची। यथाशब्दश्चान तिक्रमार्थः । तथाचज्ञेयमनतिक्रम्यविद्यमानंयथार्थमित्यभिप्रेत्याह ॥ [३७।४] यथावस्थितेति । ननुप्रामाण्यस्ययाथार्थ्यभिन्नस्या भावाद्याथार्थ्यमित्यनूद्यप्रामाण्यंकथंविधीयतइत्यतआह ॥ [३७।४] प्रमाणशब्दप्रवृत्तिनिमित्तमिति ॥ [३७।५] एतेनेति । याथा र्थ्यस्यप्रमाणशब्दप्रवृत्तिनिमित्तत्वकथनेनएवशब्देनानधिगतार्थगंतृत्वस्यप्रमाणलक्षणत्वनिराकरणेनचेत्यर्थः ॥ [३७।५] बहिर्या

दि । बहूनामेकार्थविषयकत्वेऽधिगतार्थगंतृत्वेनप्रामाण्यायोगादितिशंकायायाथार्थ्यस्यैवप्रमाणलक्षणत्वेनान्यस्यचप्रमाण लक्षणत्वाभावेनानुपपन्नतयाबहुत्वप्रमाणत्वयोस्समावेशसंभवादितिभावः । प्रामाण्यं ज्ञेयविषयीकारित्वं । तथाचेंद्रियादीनांज्ञेयविषयीकारित्वाभावाल्लक्षणस्याव्याप्तिरितिभावः । ननुज्ञानशब्दयोरितिद्वंद्वनिर्देशेनज्ञानसमकक्षतयाशब्दस्यगृहीतत्वाज्ज्ञानवच्छब्देपिज्ञेयविषयीकारित्वंमुख्यमितिप्राप्तं । तथाचज्ञेयविषयीकारित्वलक्षणस्यप्रत्यक्षादित्रिष्वप्यव्याप्तेःशंकितत्वाच्छब्देतत्परिहारश्चकथमित्याशंक्यद्वंद्वनिर्दिष्टज्ञानशब्दयोरित्यस्यबुद्ध्याविवेकं सकृदुक्तमुख्यशब्दस्यतंत्रन्यायंचाश्रित्यतदभिप्रायमाह ॥ करणेष्वपीत्यादिना । करणेष्वपीत्यनंतरंनिर्धारणायामितिशेषः । मुख्यत्वेनिमित्तमाह ॥ इंद्रियेति ॥ सर्वथेति । मृदब्रवीदित्यादौक्वचिदयथार्थप्रतिपादनेपिनसर्वथाऽप्रामाण्यं । अपौरुषेयत्वेनतदसंभवात् । अतः प्रतीतार्थेप्रामाण्यासंभवेप्यर्थांतरेप्रामाण्यसंभवादितिभावः ॥ वक्तुमिति । बल्येवानुभवइत्यत्रेत्यर्थः । वृत्तिरूपज्ञानस्याप्यांतरत्वात्कथंबाह्यत्वमित्यतोबाह्यपदंव्याचष्टे ॥ आत्मस्वरूपेति ॥ यदर्थमिति । ज्ञानेयाथार्थ्यंमुख्यंतदपिनसर्वत्रैकप्रकारमित्येतदर्थमित्यर्थः । ननुबल्येवेत्येवकारस्ययथावस्थितान्वयेविशेषणसंगतस्यतस्यायोगव्यवच्छेदकत्वादनुभवेबलित्वायोगोनास्तीत्येवप्राप्नोतिनत्वनुभवस्यैवबलित्वमन्यत्रतदभावः । तथाचाग्रेसर्वापेक्षयानुभवस्यैवबलित्वकथनमयुक्तमित्याशंक्यैवकारस्यभिन्नक्रमेणान्वयमाह ॥ अनुभवएवेति । साक्षिरूपानुभवएवेत्यर्थः । तथाचविशेष्यसंगतस्यतस्यान्ययोगव्यवच्छेदकत्वेनानुभवस्यैवबलित्वमन्यत्रतदभावःप्राप्तइतिभावः ॥ बाह्यमितिप्रकृतइति । तथाचनिर्दोषंबाह्यमित्येववक्त

व्यमितिभावः ॥ तत्स्वरूपेति । बाह्यज्ञानस्वरूपेत्यर्थः । कथमनेनतत्स्वरूपनिरूपणमित्यतस्तद्दर्शयति ॥ इंद्रियेत्यादिना । अमुख्यं बाह्यज्ञानेयाथार्थ्यमितिशेषः । प्रकृतोपयोगंदर्शयति ॥ एतेनेति । सर्वापेक्षयाऽनुभवस्यबलित्वकथनेनेत्यर्थः ॥ इत्युक्तमिति । नचानुभवविरोधआगमस्यप्रामाण्यमितिवाक्येनोक्तंसाक्ष्यनुभवस्यप्राबल्यमित्यर्थः । मूलेतथाशब्दस्य समुच्चयार्थत्वात्तत्ससुच्चेयमाह ॥ तथाप्रामाण्यस्येति॥ अन्यथातन्नस्यादिति । ज्ञानप्रामाण्यस्यमुख्यत्वाभावेऽनुप्रमाणप्रामाण्यस्यामुख्यत्वाभावेऽक्षादित्रयस्यानुप्रमाणत्वव्यवहारोज्ञानस्यकेवलप्रमाणत्वव्यवहारश्चनस्यादित्यर्थः ॥ ज्ञानसमकक्षताप्रतीतिमिति । प्राबल्यविषयेपिशब्दस्यसाक्षिरूपज्ञानसमकक्षताप्रतीतिमित्यर्थः ॥ तस्यापवादमाहेति । तन्मुख्यंज्ञानशब्दयोरित्यनेनकरणेष्वपींद्रियलिंगापेक्षयाशब्दविशेषस्यवेदस्ययाथार्थ्यमुख्यं । इंद्रियलिंगयोरिवतस्यसर्वथाऽयाथार्थ्याभावादित्येवंवेदस्यप्रामाण्यनियमस्सूचितइत्युक्तं । तस्यापवादमाहेत्यर्थः । तेषुत्रिष्वागमस्यजात्या वेदत्वादिधर्मेण प्राबल्यमित्यर्थागीकारे उपजीव्यविरोधेतुनप्रामाण्यमित्यत्राप्रामाण्यकथनंबाधितंस्यादतोजात्येत्येतन्नाचष्टे ॥ उत्सर्गेणैवेति । जातिशब्दस्योत्सर्गवाचित्वशंकानिरासायोक्तं ॥ जातिग्रहणेनेति । समानविषयकत्वंलक्षणाबीजमुख्यार्थसंबंधइत्याशयेनोक्तं ॥ जातेरुत्सर्गविषयत्वादिति । उत्सर्गविषयविषयकत्वादित्यर्थः । यथानहिंस्यादित्यत्राहिंस्यत्वंसर्वभूतेषुप्राप्नोतीत्युत्सर्गोबहुव्यापी बहुपदार्थविषयकइतियावत् । एवंपराभिप्रेताजातिर्बहुव्यापिनी अनेकानुगतत्वांगीकारादित्येवंजात्युत्सर्गयोस्समानविषयकत्वसद्भावेनजातिपदमुत्सर्गलक्षकमितिभावः । यद्वाउत्सर्गविषयत्वात् उ

त्सर्गविषयतावच्छेदकत्वादित्यर्थः । उत्सर्गविषयताकेनचिदवच्छिद्यते । तदवच्छेदिकाचजातिः । यथानहिंस्यादित्यादावु
त्सर्गविषयतावच्छेदकंसर्वभूतत्वादिधर्मः । एवंचावच्छेद्यावच्छेदकभावसंबंधसद्भावाज्जातिपदमुत्सर्गलक्षकमित्याशयः। नि
रवकाशादेरित्यत्रादिपदेनश्रुतिग्रहणं ॥ [३७।१९] **वेदस्यापीति** । अपौरुषेयत्वेनप्रमितस्यापिनप्रतीतार्थेप्रामाण्यमित्यर्थः।प्रकृतोपयोगं
दर्शयति ॥ [३७।१९] **अनेनेति** । उपजीव्यविरोधेआगमस्याप्यप्रामाण्यकथनेनेत्यर्थः ॥ [३७।२०] **तदेवेति** । अनुमानविभागनिरूपणमेवेत्य
र्थः । यद्यप्युत्तरत्रयामाहुरित्यादिनापरार्थानुमानेऽवयवनियमखंडनमेवक्रियते नत्वनुमानविभागनिरूपणं । तथापिपरा
र्थानुमानजनकपरोपदेशस्वरूपनियमखंडनेनपरार्थानुमानस्वरूपनिरूपणेक्रियमाणेऽर्थात्तद्भिन्नस्वार्थानुमाननिरूपणमपिकृ
तप्रायमित्याशयेनैवमुक्तमित्यवगंतव्यं । मूलाभिप्रेतंविभागंस्वयंदर्शयति ॥ [३७।२०] **द्विविधमनुमानमित्यादिना** ॥ [३७।२१] **व्याप्त्यनु
सारेणेति** । व्याप्तिग्रहणानुसारेणेत्यर्थः । तथाहि । कयोश्चित्समानकालभिन्नदेशयोर्व्याप्तिः । यथाधूमाग्न्योः । कयोश्चि
त्समानदेशकालयोः । यथारसरूपयोः । कयोश्चिद्भिन्नदेशकालयोः । यथोर्ध्वदेशवृष्ट्यधोदेशनदीपूरयोः । इत्येवंव्याप्तिग्रह
णस्यानेकप्रकारेणजातत्वात्तदनुसारेणेत्युक्तमितिमंतव्यं ॥ [३७।२१] **अनुसंधत्तइति** । अस्त्यत्रपर्वतेवह्निनाव्याप्तोधूमइतितृतीय
लिंगपरामर्शोभवतीत्यर्थः । तेन तृतीयलिंगपरामर्शेन । ननुपरोपदेशमपेक्ष्योत्पन्नस्यव्याप्त्यादिज्ञानस्यपरार्थानुमानत्वेपरो
पदेशरूपपंचावयववाक्यस्यपरार्थानुमानत्वव्यपदेशोनघटतइत्यतआह ॥ [३७।२३] **तत्संबंधादिति** । परोपदेशस्यव्याप्त्यादिज्ञान
जनकत्वेनव्याप्त्यादिज्ञानेनसाकंपरोपदेशस्यजन्यजनकभावसंबंधादित्यर्थः ॥ [३७।२३] **तथेति** । परार्थानुमानतयेत्यर्थः । त्रीनुदाह

रणांतान्वायद्बोदाहरणादिकान् । मीमांसकाइतिकारिकानुसारेणाह ॥ प्रतिज्ञेत्यादि । तेप्रतिज्ञादिरूपेणपंचेतिन्यायवि
स्तरइतिकारिकानुसारेणोक्तं ॥ प्रतिज्ञादयःपंचेति । सौगतास्तुसोपनीतिमुदाहृतिमितिकारिकानुसारेणाह ॥ उदाहरणे
ति । ननुपरोपदेशरूपवाक्यस्यावयवत्रयात्मकत्वंसिद्धांतेप्यंगीकृतमितिकथंतत्प्रतिषेधइत्यतआह ॥ नियमेनेतिशेषइ
ति । तथाचनियमएवास्माभिर्नांगीक्रियतइतियुक्तस्तत्प्रतिषेधइतिभावः । ननुत्रियादीतिकथं । त्रिआदीतिस्थिते । इकोय
णचि । इकःस्थानेयण्स्यादचिपरतइत्युक्तत्वेनयणादेशेत्र्यादीतिस्यादित्यतआह ॥ त्रियंबकमित्यादि ॥ यणागमोपी
ति । नकेवलंयणादेशइत्यर्थः । अन्यथात्रीण्यंबकानिचक्षूंषियस्यासौत्र्यंबकः । भूआदयोभ्वादयइत्येवस्यादितिभावः ।
तथाच इकारात्परंयणागमेत्रियादीतिसाध्वितिद्रष्टव्यं । नैयायिकमतेन पंचावयवनियममुपपादयति ॥ नन्विति । तत्रप्र
तिज्ञापक्षोक्तिरितिकारिकानुसारेणप्रतिज्ञालक्षणमुक्तं ॥ साध्यनिर्देशरूपेति । साध्यवत्तयासाधयितुंयोग्यंसाध्यंपक्षइत्य
र्थः । लिंगस्यवचनंहेतुस्साधकत्वप्रकाशकमितिकारिकानुसारेणहेतुंलक्षयति ॥ साधनत्वख्यापकमिति । धूमइत्यादिलिं
गवचनस्यहेतुत्वपरिहारायेदंविशेषणं । पंचम्यंतंतृतीयांतंवेत्यर्थः ॥ सामर्थ्येति । व्याप्तिपक्षधर्मतारूपसामर्थ्येत्यर्थः । उ
दाहरणलक्षणस्यदृष्टांतघटितत्वाद्व्याप्तिसंवेदनस्थानंदृष्टांतइतिगीयतेइतिकारिकानुसारेणदृष्टांतस्वरूपंदर्शयन् सम्यग्व्याप्ति
निर्देशपूर्वकं । दृष्टांतवचनमितिकारिकानुसारेणोदाहरणलक्षणमाह ॥ व्याप्तिग्रहणस्थलस्येत्यादि । यथामहानसइति

वचनमात्रस्योदाहरणत्वपरिहारायव्याप्तिनिर्देशपूर्वकमित्युक्तं । यत्रवन्हिस्तत्रधूमःयथामहानसइतिवचनस्याप्युदाहरणत्व परिहारायोक्तं ॥ **सम्यगिति** । व्याप्यस्यवचनंपूर्वंव्यापकस्यततःपरमित्युक्तरीत्यासम्यगित्यर्थः । दृष्टांतापेक्षयापक्षेहेतो र्व्याप्तिप्रदर्शकं । वचनंस्यादुपनयइतिकारिकानुसारेणोपनयंलक्षयति ॥ **दृष्टांतइत्यादिना** । एतेषां चतुर्णामवयवानां ॥ **ऐकार्थ्यप्रतिपत्तयइति** । साध्यरूपैकार्थप्रतिपादनायप्रवृत्तत्वज्ञापनायेत्यर्थः। हेतुपूर्वंपुनःपक्षवचोनिगमनंमतमितिकारि कांहृदिनिधायनिगमनलक्षणतात्पर्यमेवोक्तं ॥ **निगमनाख्यमुपसंहारवाक्यमिति** । उपसंहारवाक्याख्यंनिगमनमिति योज्यं । मीमांसकमतेन त्र्यवयवनियममुपपादयति ॥ **अथवेति** । ननुहेतोःपक्षधर्मताज्ञापनायोपनयवाक्यमपेक्षितमि त्याशंक्यतस्यहेतुवाक्येनगतार्थतामाह ॥ **हेतुनैवेति** । हेतुवाक्येनैवेत्यर्थः । नन्वेतेषामैकार्थ्यप्रतिपत्तयेउपसंहाररूपंनिग मनवाक्यमपेक्षितमित्याशंक्यतस्यानपेक्षितत्वमुपपादयति ॥ **अविप्रकृष्टत्वेनेति** । कालव्यवधानाभावेनेत्यर्थः ॥**आद्या स्त्रयइति** । प्रतिज्ञाहेतूदाहरणरूपाः । मीमांसकमतेनैवप्रकारांतरेणत्र्यवयवनियममुपपादयति ॥ **यद्वेति** । नन्वादौलिंग मनभिधायतद्धर्मभूतयोर्व्याप्तिपक्षधर्मतयोरेवादावुदाहरणोपनयवाक्याभ्यामभिधानेऽसंगत्यापत्तिस्तदर्थंहेतुवाक्यमपेक्षित मितिचेत्तत्राह ॥ **उपोद्धातलक्षणयासंगत्येति** । चिंतांप्रकृतसिद्ध्यर्थामुपोद्घातंप्रचक्षतइतिलक्षणलक्षितयोपोद्घातसंग त्येत्यर्थः । अभिहितयोस्सतोः । उदाहरणोपनयवाक्याभ्यामितिशेषः । नन्वथापिलिंगालाभान्न्यूनतेत्यतआह ॥ **तदाधा रतयेति** । व्याप्तिपक्षधर्मताधारतयेत्यर्थः । तथाचनहेतुवाक्यमपेक्षितमितिभावः । ननुसाध्यधर्मविशिष्टधर्मिरूपपक्षप्रति

पत्त्यर्थप्रतिज्ञावाक्यमपेक्षितमितिचेत्तत्राह ॥ **निगमनेनेति** । तस्माद्वन्हिमानित्येवंरूपेणेत्यर्थः ॥ **साध्येति** । साध्यधर्म विशिष्टधर्मिरूपपक्षप्रतीतेरित्यर्थः । तथाचनिगमनवाक्येनगतार्थत्वान्नप्रतिज्ञावाक्यमपेक्षितमितिभावः ॥ **उत्तरैत्रयइ ति** । उदाहरणोपनयनिगमनरूपाइत्यर्थः । सौगतमतेनद्व्यवयवनियममुपपादयति ॥ **यदिवेति** ॥ **विवादेनैवेति** । एको ब्रूतेपर्वतोग्निमानितिअपरोब्रूतेऽग्निमान्नभवतीतिविवादेनैवेत्यर्थः । साध्यप्रतीतौ तद्विशिष्टधर्मिप्रतीतौ । तथाचप्रतिज्ञा वाक्यमपेक्षितमितिभावः ॥ **व्याप्तिपक्षधर्मतेति** । उदाहरणोपनयाभ्यामितिशेषः ॥ **साधनधर्मीति** । साधनरूपोयो धर्मीत्यर्थः । व्याप्तिपक्षधर्मतारूपधर्माधिकरणत्वात्साधनस्यधर्मित्वमितिभावः । तथाचनतदर्थहेतुवाक्यमपेक्षितमितिभा वः ॥ **पूर्ववदिति** । अविप्रकृष्टत्वेनोपसंहारस्यानपेक्षितत्वादित्यर्थः । स्वरूपसत्याउपपत्तेरनुपयुक्तत्वादाह ॥ **तत्स्मृती ति** । तस्य व्याप्त्यादिमल्लिंगस्य येस्मृतिजिज्ञासे । तयोरुपलक्षणमित्यर्थः । वाक्यं परोपदेशरूपं । लिंगाभाववतिस्थलेक्व चित्परोपदेशस्याविद्यमानार्थत्वेनप्रामाण्याभावादाह । प्रमाणतामुपयुक्ततामितीत्याहुः । वस्तुतस्तुनियतावयवत्वेनांगीकृत वाक्यंव्याप्त्यादिमल्लिंगस्मृतिजिज्ञासाजनकत्वेनप्रमाणतांप्रमाकरणतांयातीतिवक्तुंनयुज्यते । स्मृतिजिज्ञासयोःप्रमात्वाभावे नतत्करणस्यप्रमाणत्वायोगादित्यतआह ॥ **प्रमाणतामुपयुक्ततामिति** । एवमुत्तरत्रापिद्रष्टव्यं । ननुपंचावयवोपेतंमहा वाक्यंतावदाप्तवाक्यत्वेनव्याप्त्यादिमल्लिंगप्रमितिजननायोपयुज्यते । आकांक्षाद्युपेतमेवचवाक्यं । तत्रयथापूर्वपदसंजाता कांक्षापूरकत्वमुत्तरपदस्यैवंपूर्वावयवसंजाताकांक्षापूरकत्वमुत्तरावयवस्यवक्तव्यं । अन्यथागौरश्वइत्यादिवद्वाक्याभासत्वा

पत्तेः । अतउक्तरीत्याऽऽकांक्षाचतुष्टयनिवर्तकत्वेनप्रतिज्ञाद्यवयवचतुष्टयस्यबुद्ध्यारोहायोपसंहाररूपनिगमनरूपावयवस्या
प्यपेक्षितत्वेनाकांक्षाद्यनुपपत्तिरेवावयवनियमकल्पिकेतिचेत्तत्राह ॥ [३८।१०] **इदमुक्तंभवतीति** ॥ [३८।११] **आगमतयेति** । आप्तवाक्य
त्वेनेत्यर्थः ॥ [३८।११] **प्रमितीति** । व्याप्त्यादिमल्लिंगप्रमितीत्यर्थः । येनोक्ताकांक्षाद्यनुसारेणपंचावयवनियमस्स्यादितिभावः । कु
तोनोपयुज्यतइत्यतआह ॥ [३८।११] **प्रतिवादिनीति** । अनाश्वासात् आप्त्यनिश्चयात् । आश्वासे आप्तिनिश्चये ॥ [३८।१२] **पूर्तेरिति** ।
आकांक्षापूर्तेरित्यर्थः । तथाचाकांक्षानुपपत्तिरेवनास्तीतिभावः । तावतैववाक्यत्वनिर्वाहोपियुक्तइतिहृदयं ॥ [३८।१२] **इतरेति** ।
हेत्वाद्यवयवेत्यर्थः । तथाचहेत्वाद्यभिधानप्रयोजकीभूतप्रमाणाद्याकांक्षायाएवानुत्थानेनव्यवधानाभावेनोपसंहारस्यचानपे
क्षितत्वेनहेत्वाद्यवयववैयर्थ्यापत्तेरित्यर्थः । शंकते ॥ [३८।१३] **सत्यमेवमिति** ॥ [३८।१४] **तदर्थमेवेति** । व्याप्त्यादिमल्लिंगस्मृत्याद्यर्थमेव
पंचावयवनियमउपन्यस्यतइत्यर्थः ॥ [३८।१४] **अन्यथापीति** । पंचावयवनियमंविनापीत्यर्थः ॥ [३८।१४] **संभवादिति** । व्याप्त्यादिमल्लिं
गस्मृत्यादेरितिशेषः ॥ [३८।१६] **व्याख्येयमिति** । हेतुर्दृष्टांतउपनयश्चरूपोनिरूपकःस्मृत्यादिजनकोयस्यास्सातथोक्तेत्येवंव्याख्ये
यमित्यर्थः । ननुदृष्टांतस्यमहानसादेःकथंव्याप्त्यादिमल्लिंगस्मारकत्वमित्यतआह ॥ [३८।१६] **दृष्टांतशब्देनेति** । उदाहरणरूपिके
त्यनुक्त्वावचनोपलक्षणाभिप्रायेणदृष्टांतरूपिकेत्येवकस्मादुक्तमित्यतआह ॥ **उदाहरणैकदेशेति** । समग्रोदाहरणवाक्यस्य
नव्याप्त्यादिमल्लिंगस्मारकत्वंकिंतुतदेकदेशभूतदृष्टांतवचनस्यैवेतिज्ञापयितुमुदाहरणरूपिकेत्यनुक्त्वादृष्टांतरूपिकेत्येवोक्तमि
त्यर्थः । ननुनिगमनात्मिकेतिकथं युक्तेर्वचनरूपनिगमनात्मकत्वाभावादित्यतआह ॥ [३८।१६] **निगमनात्मिकेतीति** ॥ [३८।१६] **उपपंच**

रितइति । तथाचप्रतिज्ञारूपेत्यादिवन्निगमनरूपेत्येवव्याख्येयमितिभावः । अभेदव्यपदेशइतिपदच्छेदः । ननुपरानिगमनात्मिकेत्यत्रपरेत्ययुक्तं । पराभिन्नेतिहितदर्थः । [३८।१७] तथाचप्रतिज्ञानिगमनयोरेकार्थत्वेनप्रतिज्ञानिरूपितयुक्तेर्निगमननिरूपितयुक्तेश्चैकत्वेनभेदाभावादित्यतआह ॥ एवंपरेत्यपीति । इत्यपिभेदव्यपदेशो निगमनात्मिकेत्यभेदव्यपदेशवदुपचरित इत्यर्थः । उपचरितत्वमात्रमपेक्ष्यैवैवमित्यतिदेशइतिज्ञातव्यं । परेत्यस्यतात्पर्यमाह ॥ [३८।१७] कदाचिदिति ॥ [३८।१९] अनुमानेति । व्याप्त्यादिमल्लिंगेत्यर्थः । एवमुत्तरत्रापिद्रष्टव्यं ॥ [३८।१७] चतथाशब्दाइति । चशब्दौतथाशब्दश्चेतिचतथाशब्दाइत्यर्थः ॥ [३८।१७] अथवेत्यादि । तथाचयुक्ति व्याप्त्यादिमल्लिंगस्मृत्यादिजनिका । प्रतिज्ञारूपा प्रतिज्ञास्वरूपाप्रतिज्ञैवेतियावदित्यादिव्याख्येयमितिभावः । पूर्वरूपात्मशब्दावुपचरितौयुक्तिशब्दोमुख्यार्थइत्युक्तं । [३८।२०] इदानींतद्वैपरीत्येनेत्येवंयोजना भेदमात्रमर्थस्त्वेकएवेतिद्रष्टव्यं । नोपपत्त्याहीत्यादिग्रंथसमुदायार्थमाह ॥ यदीदमित्यादिना । इदं परोपदेशरूपंवाक्यं । आगमतया आप्तवाक्यत्वेन । बोधकं अनुभावकं । व्याप्त्यादिमल्लिंगानुभवजनकमित्यर्थः ॥ [३८।२०] तत्क्रमश्चेति । प्रमाणाकांक्षाजननार्थमित्यादिनोक्तोनियतावयवानांक्रमइत्यर्थः । आप्तवाक्यतयानुभावकत्वेयथायथाकांक्षास्यात्तथाक्रमेणनियतावयवान्सवदिष्यतीतिभावः । युक्तिःप्रतिज्ञारूपाचेत्यादिनोक्तंप्रतिज्ञादेरेकैकस्यैवव्याप्त्यादिमल्लिंगस्मृत्यादिकारणत्वमुपपादयितुमुत्तरोग्रंथः।तत्रप्रतिज्ञायाःव्याप्त्यादिमल्लिंगस्मृत्यादिकारणत्वमुक्तं।तन्नसंभवतीत्याशंकते॥ [३८।२१] नन्विति । ननु

प्रतिज्ञाहेतुगर्भेत्युक्त्यापरोपदेशस्यावयवद्वयोपेतत्वंप्रतीयते।तदयुक्तं पृथगित्यवयवांतरानपेक्षत्वोक्तिविरोधादतोव्याचष्टे ॥ [३८।२२] हेत्वर्थगर्भेति।केचित्तुपक्षवचनरूपप्रतिज्ञायालिंगवचनरूपहेतुगर्भत्वाभावादाह। हेत्वर्थेतीत्याहुः। हेतुवाक्यसाहित्येनविनाहेत्वर्थगर्भत्वस्याप्यसंभवादाह॥[३८।२२] हेत्वर्थेति । लिंगवचनरूपोयोहेतुस्तदर्थोयोलिंगरूपोधर्मः(धूमः)तद्विशेषणकधर्मिकातद्विशेषणकोयोधर्मीपर्वतस्तत्का तद्वतीतत्प्रतिपादिका । धूमवान्पर्वतोग्निमानित्येवमाकाराप्रतिज्ञेत्यर्थः ॥ [३८।२३] शुद्धेति । हेत्वर्थाविशेषणधर्मिकापर्वतोग्निमानित्येवमाकारेत्यर्थः ॥ [३८।२३] अनुमानस्मृत्यादिहेतुत्वमिति । व्याप्त्यादिमल्लिंगस्मृत्यादिजनकत्वेनोपयुक्तत्वमित्यर्थः । तदुपपादयति ॥ [३८।२३] धूमवानित्यादिना ॥ [३८।२४] विषयवचनमिति । साध्यधर्मविशिष्टधर्मिवचनमित्यर्थः । निश्चित्येत्यनंतरंगृहीतव्याप्तिकश्चेदितिशेषः । सुस्मूर्षते स्मरति । अनुसंधत्ते । पक्षवृत्तिलिंगनिष्ठतयेत्यर्थः ॥ [३८।२६] जिज्ञासितेवेति । अगृहीतव्याप्तिकश्चेदितिशेषः । ननुधूमवानितिनूनंप्रमाणोक्तिर्भवितुमर्हतीतिनिश्चयोनसंभवतीत्याशंकते ॥ अधिकंन्यूनंवैतदिति [३८।२६] । धूमवानित्येतत्प्रतिज्ञायामनपेक्षितत्वादधिकं । अवयवांतरराहित्यान्न्यूनंवेत्यर्थः ॥ किमितिनाशंकितेति [३८।२६] । तथाचधूमवानितिप्रमाणोक्तिरितिननिश्चिनोतीतिभावः । ननुवादिनःप्रामाणिकत्वेनायुक्तवादित्वाभावादाधिक्यादिनिग्रहस्थानास्पदंवचनंकथंवदिष्यतीतिनिश्चित्यधूमवानितिप्रमाणोक्तिरित्येवनिश्चेष्यतीत्यतआह ॥ [३८।२६] युक्तमेवेति । शंकानास्पदंप्रामाणिकमेवेत्यर्थः । प्रत्ययाभावात् विश्वासाभावात् । अतःआधिक्यादिशंकयाधूमवानितिप्रमाणोक्तिरिति

निश्चयोनयुक्तइतिभावः । एवंविधानां हेतुगर्भविशेषणाभिप्रायेणप्रयुज्यमानानां ॥ वा(चोयु)[३९१]र्युक्तीनामिति । युक्ति र्योगःप्रकारो रीतिरीतियावत् । तथाचवाग्रीतीनामित्यर्थः॥ [३९१]शंकेति । आधिक्यादिशंकेत्यर्थः । तथाचधूमवानितिप्रमाणोक्तिरित्येवनिश्चेष्यतीतिभावः ॥ [३९१]अन्यथेति । लोकशास्त्रव्यवहारातिक्रमेणाधिक्यादिशंकोदयमंगीकृत्यधूमवानितिप्रमाणोक्तिरितिनिश्चयानंगीकारइत्यर्थः । ओषधिविशेषार्थत्वं अग्निशब्दस्यचित्रमूलपर्यायत्वेनतदर्थकत्वमित्यर्थः । यथाहि धूमवान्पर्वतोग्निमानित्यत्रधूमवानित्यंशेआधिक्यादिशंकाक्रियते एवमग्निमानित्यंशेऽग्निशब्दस्यचित्रमूलार्थत्वमादायासंगतिशंकापिस्यात् । लोकशास्त्रव्यवहारातिक्रमेशंकायानिरंकुशत्वादितिभावः । अग्निमानित्यंशेऽसंगतिर्नाशंक्यतइत्याशंकते ॥ [३९२]तथात्वइति । वादिप्रयुक्ताग्निशब्दस्यवाद्यनभिमतार्थांतरमादायासंगतिशंकायांछलेनप्रतिवादिनोनिग्रहस्स्यादित्यर्थः । [३९२]तदेवेति । छलमेवकुतइत्यर्थः । तत्रनिमित्तमाशंकते ॥ [३९२]प्रकरणादीति । प्रसिद्धाग्निप्रकरणमननुसंधायार्थांतरंकल्पयित्वाऽसंगत्यादूषणादित्यर्थः ॥ [३९३]सममिति । मयाप्रमाणेपृष्टेवादिनाधूमवानित्युक्तमितिप्रमाणप्रकरणमननुसंधायप्रमाणोक्तिरूपंतदभिप्रायमज्ञात्वाऽऽधिक्यादिशंकायांछलेननिग्रहस्समानएवेतितथाशंकामकृत्वाप्रमाणोक्तिरियमित्येवनिश्चित्यतदीयेव्याप्तिपक्षधर्मतेसुस्मूर्षते । अनुसंधत्ते । जिज्ञासतेवेतिकिमनुपपन्नमित्युक्तंयुक्तमेवेतिभावः ॥ [३९३]साध्यधर्मेति । व्याप्तिनिरूपकभूतेत्यर्थः । व्याप्ते स्तन्निरूपितायाः ॥ [३९४]अनुदयादिति । अतस्तदर्थंप्रतिज्ञारूपमवयवांतरमपेक्षितमितिभावः । ननुसिद्धत्वेनप्रतिज्ञायाइतिप्रतिज्ञावाक्यस्यसिद्धत्वोक्त्याऽवयवद्वयावश्यकत्वंप्रतीयते । तथाचपृथक्पृथगित्युक्तविरोधइत्य

तआह ॥ [३१४]**प्रतिज्ञार्थस्येति** । ननुप्रतिज्ञावाक्याभावेतदर्थस्यकथंसिद्धिरित्यतःप्रकारद्वयेनसिद्धत्वमुपपादयति ॥ **विवाद**
[३१४]**तइत्यादिना** । एकोब्रूतेपर्वतोग्निमानिति । अपरस्तुनेतीत्येवंविवादतइत्यर्थः ॥ [३१५]**अनुमानेस्मृत्यादिहेतुरिति** । व्याप्त्या
दिमल्लिंगस्मृत्यादिजनकत्वेनोपयुक्तमित्यर्थः । धर्म्यादीत्यादिपदेनव्याप्तिपक्षधर्मताग्रहणं ॥ [३१६]**अस्फुरणादिति** । अतस्तद
र्थमवयवांतरमपेक्षितमितिभावः । ननुप्रतिज्ञावयवत्वादितिबहुव्रीहावन्यपदार्थस्यदृष्टांतपदोपलक्षितस्यकथंप्रतिज्ञावयवत्वं
प्रतिज्ञायादृष्टांतैकदेशत्वाभावादित्यतोऽवयवपदार्थमाह ॥ [३१६]**सहकारिणीति** । नन्वेवंसत्यवयवद्वयोपेतत्वापत्त्यापृथक्
पृथगित्युक्तिविरोधइत्यतआह ॥ [३१७]**तच्चेति** । प्रतिज्ञावयवत्वं सहकारिभूतप्रतिज्ञार्थइतियावत् । अत्रादिपदेनपर्वतस्याग्नि
मत्त्वंकुतइतिप्रश्नवाक्यग्रहणं ॥ [३१७]**उक्त्यावेति** । पर्वतोग्निमानित्युक्त्यावेत्यर्थः । नचावयवद्वयप्रयोगापत्तिरितिवाच्यं ।
दृष्टांतस्सप्रतिज्ञोहेतुगर्भइत्युक्तत्वेनधूमवन्महानसवत्पर्वतोग्निमानित्येवंसप्रतिज्ञहेतुगर्भदृष्टांतवचनस्यैवपृथगवयवांतरप्रयोग
मनपेक्ष्यस्वातंत्र्येणोपयुक्ततांगीकारात् । नन्वेवंप्रयोगेप्रतिज्ञावाक्यस्यैवदृष्टांतसाहित्यंप्राप्तं । नतुदृष्टांतस्यप्रतिज्ञासाहित्य
मितिचेत्सत्यं तथापिप्रतिज्ञायादृष्टांतसाहित्योक्तौदृष्टांतेपिप्रतिज्ञासाहित्यमर्थाल्लब्धमेवेत्याशयात् ॥ [३१७]**हेतुगर्भत्वमिति** ।
दृष्टांतस्यलिंगवचनरूपहेतुगर्भत्वाभावाद्धेत्वर्थगर्भत्वमितिव्याख्येयं । धूमवन्महानसवदितितदाकारः ॥ [३१८]**अन्यथेति** । हेतु
गर्भत्वसमुच्चयाभावइत्यर्थः ॥ [३१८]**लिंगधर्मिणइति** । लिंगरूपस्यधर्मिणइत्यर्थः । तस्यापिव्याप्त्यादिकंप्रतिधर्मित्वादितिभा
वः ॥ [३१८]**व्यर्थास्यादिति** । पक्षनिष्ठतयाहेत्वप्रतीत्याप्रतिज्ञापिव्यर्थास्यात् । प्रतिज्ञारूपसहकारिसाहित्यंदृष्टांतस्योच्यमान

मपिव्यर्थमेवस्यात् । व्याप्त्यादिमल्लिंगस्मारकत्वाद्ययोगेनोपयुक्तंनस्यादितियावदित्यर्थः । उपनयमात्रस्यव्याप्त्यादिमल्लिंगस्मारकत्वमुक्तं । तदयुक्तमित्याशंकते ॥ **लिंगधर्मिणइति** । लिंगरूपस्यधर्मिणइत्यर्थः ॥ **प्रतीतावपीति** । तथाचायंधूमवानित्युपनयवाक्येनेत्यर्थः ॥ **व्याप्तीति** । साध्यनिरूपितेत्यर्थः ॥ **अयोगादिति** । तथाचतदर्थंप्रतिज्ञावाक्यमपेक्षितमतःपृथक्पृथगित्युक्तिविरोधइतिभावः ॥ **व्याप्तिवचनमिति** । तथाचव्याप्तिनिरूपकत्वेनसाध्यधर्मस्यव्याप्तिवचनेनैवप्रतीतत्वान्नतदर्थंप्रतिज्ञावाक्यमपेक्षितमितिभावः ॥ **क्रियाविशेषणमिति** । आश्रित्येतिक्रियाविशेषणमित्यर्थः। व्याप्तिविशेषणत्वेकेवलामितिस्यादितिभावः । क्रियाव्ययविशेषणानांक्लीबाव्ययत्वंवाच्यमितिवचनात्केवलमित्यस्यनपुंसकत्वंयुक्तमितिद्रष्टव्यं। तदभिप्रायमाह॥ **दृष्टांतोक्तिमपीति**। व्याप्तिवचनसाहित्येनोपनयाकारंदर्शयति॥ **योधूमवानित्यादिना**। तथाचधूमवांश्चायंपर्वतइत्येवोपनयाकारोनतथाचायंधूमवानिति । येनदृष्टांतोक्त्यपेक्षास्यादितिभावः । ननुउपनयवाक्यस्यव्याप्तिवचनसाहित्यांगीकारेऽवयवद्वयनियमापत्तिरित्यतआह॥ **व्याप्तिमाश्रित्येत्यपीति**। नकेवलंसिद्धत्वेनप्रतिज्ञाया इत्युक्तप्रकारेणसाध्यप्रतीतिः। किंतु व्याप्तिमाश्रित्येत्यपिसाध्यप्रतीतौपक्षांतरप्रदर्शनं प्रकारांतरप्रदर्शनंकृतमित्यर्थः । तथाहि । पूर्वहेतुवाक्यस्यव्याप्त्यादिमल्लिंगस्मारकत्वाद्युक्तौसाध्यधर्माद्यप्रतीतौतन्निरूपितव्याप्त्यादिस्मरणासंभवेनतदुपेतलिंगादिस्मारकत्वंनसंभवतीत्याशंकायांसिद्धत्वेनप्रतिज्ञायाइत्यनेनसाध्यधर्मादिप्रतीतिरुपपादिता। एवंधूमवांश्चायमित्युपनयस्यापिव्याप्त्यादिमल्लिंगस्मारकत्वाद्युक्तौकथमुपनयमात्रस्यव्याप्त्यादिमल्लिंगस्मारकत्वादिकं ततस्साध्यधर्माप्रतीत्यातन्निरूपित

व्याप्तिस्मरणाभावेनतदुपेतलिंगस्मारकत्वाद्यसंभवादित्याशंकापरिहारायव्याप्तिमाश्रित्येत्यनेनसाध्यप्रतीतिर्व्याप्तिवचनेनभविष्यतीत्येवंसाध्यप्रतीतौप्रकारांतर प्रदर्शनंकृतमितिभावः । व्याप्तिमाश्रित्येत्यस्यप्रकारांतरेणसाध्यप्रतीतिप्रदर्शनपरत्वानंगीकारेबाधकमाह ॥ [३९।११] अन्यथेति । व्याप्तिमाश्रित्येत्यस्यप्रकारांतरेणसाध्यप्रतीतिप्रदर्शनपरत्वानंगीकारे सिद्धत्वेनप्रतिज्ञायाइत्युक्तरीत्यैवसाध्यप्रतीत्युपपत्तेरित्यर्थः । तथाहि । उपनयमात्रस्यकथंव्याप्त्यादिमल्लिंगस्मारकत्वादिकंततस्साध्यधर्माप्रतीतेरितिशंकायांसिद्धत्वेनप्रतिज्ञायाइत्युक्तरीत्याविवादेनप्रश्नवाक्येनवासाध्यप्रतीत्युपपत्त्येत्युक्तमेवोपनयमात्रस्यापिव्याप्त्यादिमल्लिंगस्मारकत्वादिकमतो व्याप्तिमाश्रित्येतद्व्यर्थमेवस्यादतइदंसाध्यप्रतीतौप्रकारांतरप्रदर्शनपरंज्ञायतइतिभावः । तथाचसाध्यप्रतीतिःप्रकारद्वयेनभवतीत्युक्तंभवतीतिद्रष्टव्यं ॥ [३९।१२] प्रागनुक्तमिति । युक्तिःप्रतिज्ञारूपाचेत्यत्रानुक्तमपीत्यर्थः ॥ [३९।१२] प्रतिज्ञार्थसिद्धीति । सिद्धत्वेनप्रतिज्ञायाइत्युक्तरीत्यापर्वतस्याग्निमत्त्वंकुतइतिप्रश्नवाक्येनप्रतिज्ञार्थसिद्धौसत्यांकेवलाव्याप्तिरेवप्रमाणं व्याप्त्यादिमल्लिंगस्मारकत्वादिनोपयुक्ता स्यादित्यर्थः ॥ [३९।१२] अन्यथेति । प्रतिज्ञार्थसिद्धिसमुच्चयानंगीकारइत्यर्थः ॥ [३९।१२] पक्षधर्मतेति । पक्षस्यैवाप्रतीत्याहेतोःपक्षधर्मताप्रतीत्यसंभवादित्यर्थः ॥ [३९।१३] व्याप्त्युक्तीति ॥ कुतइतिनिमित्तप्रश्नेयोधूमवान्सोग्निमानितिव्याप्त्युक्तिमात्रस्यान्वयाभावादित्यर्थः ॥ [३९।१४] इत्याद्युक्तेरिति । नियमेतिवाच्येनतद्वाचकंपंचम्यंतंपदमुपलक्ष्यतइत्युक्तंभवति । इत्यादीत्यादिपदेननियमेनेतितृतीयांतपदग्रहणं ॥ [३९।१४] स्मारकत्वेति । व्याप्त्यादिमल्लिंगस्मारकत्वेत्यर्थः ॥ [३९।१४] संपूर्णप्रयोगइवेति । समग्रपंचावयवोपेतवाक्यप्रयोगेसतियथाव्याप्त्यादिमल्लिंगस्मृत्यादिकंभवतितथेत्यर्थः ॥

सर्वार्थसं[३१।१५]ग्राहकत्वादिति । अवयवपंचकार्थस्याप्यत्रसद्भावादितिभावः । ननुतस्मात्तथेत्येवंनिगमनस्यकथंसर्वार्थसंग्राहकत्वं तेनचसाध्यादिप्रतीतिद्वाराकथंव्याप्त्यादिमल्लिंगस्मृत्यादीत्यतआह ॥ अ[३१।१५]ग्निनाव्याप्तस्येति । महानसइतिशेषः । वाक्यं निगमनवाक्यं । तथाचाग्निनाव्याप्तस्येत्यनेनोदाहरणार्थलाभः । धूमस्यपर्वतेविद्यमानत्वादित्यनेनहेतूपनयवाक्यार्थलाभः । पर्वतोग्निमानित्यनेनप्रतिज्ञावाक्यार्थलाभइत्येवंसर्वार्थसंग्राहकत्वंनिगमनवाक्यस्यद्रष्टव्यं ॥ [३१।१६]उक्तविधस्येति । प्रतिज्ञाहेतुगर्भैवेत्याद्युक्तप्रकारेणहेतुगर्भत्वादिविशेषयुक्तस्येत्यर्थः ॥ [३१।१७]तद्भावभावित्वानुभवादिति । पंचावयवप्रयोगानंतरंजायमानत्वानुभवादित्यर्थः । प्रतिज्ञादीनां हेतुगर्भप्रतिज्ञादीनां । प्रकृतोपयोगंदर्शयति ॥ [३१।१८]एतेनेति । पंचावयवनियमस्यावश्यकत्वाभावप्रतिपादनेनेत्यर्थः ॥७॥ [३१।२१]तद्द्वारेति । (अर्थस्यदुष्टत्वेतत्प्रतिपादकशब्दस्यापिदुष्टत्वादितिभावः ॥ [३१।२१]तद्द्वारेति ।) वचनस्यदुष्टत्वेतत्प्रतिपादितार्थस्यापिदुष्टत्वादितिभावः । ननुद्विविधमनुमानं । स्वार्थपरार्थंचेत्यर्थशब्दात्मकत्वेनानुमानविभागस्योक्तत्वात्तद्दोषाअपिविरोधासंगतीह्यार्थेन्यूनाधिकेवाचनिकेइत्येवंविभक्ततयावक्तव्यं । तथाचविरोधासंगत्योरर्थसंबंधित्वंन्यूनाधिक्ययोर्वचनसंबंधित्वंमनसिनिधायविरोधश्चतथाधिक्यमित्यर्थवचनदोषयोर्न्यूनतासंगतिरितिवचनार्थदोषयोश्चव्यामिश्रतयोक्तिंकुतइत्यतआह ॥ [३१।२२]अतएवेति । चतुर्णामपिदोषाणामुक्तरीत्याद्विविधानुमानसाधारण्यादेवेत्यर्थः । अर्थेतिस्वार्थानुमानं । तत्रशब्दप्रयोगाभावात् । शब्देतिपरार्थानुमानं ॥ [३१।२३]तथाविभक्तेति । अर्थशब्दात्मकत्वेनविभक्तेत्यर्थः । तद्दोषकथनं । अर्थशब्दात्मकानुमानदोषकथनं ॥ [३१।२४]स्ववचनेनेति । एकस्मिन्नेववाक्येपदयोरवांतरवाक्ययोर्वापरस्परंविरोधःस्ववचन

विरोधः । यथामेमातावंध्येतितदुदाहरणं । स्वक्रियाविरोधोमूकोहमिति । मेयंमानसापेक्षंनभवतीतिस्वन्यायविरोधः । स्वपू
र्वाचार्यांगीकारेणविरोधःस्वाभ्युपगमविरोधः । पूर्वाचार्यवचनस्यापिस्वेनांगीकृतत्वात् । अपसिद्धांतइतियावत् । यथामीमां
सकस्येश्वराभ्युपगमइतिद्रष्टव्यं । इदंचनसाक्षाद्विरोधविभागकथनपरंकिंनामविरोधप्रभेदरूपोयस्स्ववाक्यविरोधःतत्प्रभेदरू
पायाजातिस्तद्विभागकथनपरमित्यवधेयं ॥ [३९।२४] एवमन्योपीति । हेतुविरोधादिविभागइत्यर्थः । इयमत्रविभागपरिशुद्धिः।वि
रोधस्तावद्द्विविधः । समयबंधप्रश्नस्वपक्षसाधनादिरूपकथासाधारणोनुमानमात्रनिष्ठश्चेति । अनुमानविरोधस्त्रिविधः । प्रति
ज्ञाहेतुदृष्टांतविरोधभेदेन । प्रतिज्ञाविरोधोपिद्विविधः । प्रमाणविरोधस्स्ववाक्यविरोधश्चेति । प्रमाणविरोधोपिद्विविधः । प्र
बलप्रमाणविरोधस्समबलप्रमाणविरोधश्चेति । स्ववाक्यविरोधोपिद्विविधः । अपसिद्धांतोजातिरिति । जातिस्त्रिविधा । स्व
वचनविरोधस्स्वक्रियाविरोधस्स्वन्यायविरोधश्चेति । हेतुविरोधोहिद्विविधः । स्वरूपासिद्धिरव्याप्तिश्चेति । अव्याप्तिस्त्रिवि
धा । साध्येनसंबंधस्तदभावेनापिसंबंधः साधारणानैकांतिकइतियावत् । साध्यसंबंधाभावेसतितदभावेनैवसंबंधो विरुद्धइ
तियावत् । उभयसंबंधाभावो साधारणानैकांतिकइतियावदिति । दृष्टांतविरोधोपिद्विविधः । साध्यवैकल्यंसाधनवैकल्यंचे
ति ॥ [३९।२५] जातेरंतर्भावस्सिद्धइति । प्रतिज्ञाविरोधप्रभेदरूपस्ववाक्याविरोधइतिशेषः ॥ [३९।२६] सामानाधिकरण्यमिति । स्वा
रूप्यजनकस्यअन्यरूपजनकस्येतिसामानाधिकरण्यं नतुस्वस्ययज्जनकंतस्यअन्यस्ययज्जनकंतस्येतिवैयधिकरण्यमित्यर्थः । न
नुप्रकाशनंज्ञानव्यापारोज्ञानंवाउभयथाकरणनिष्ठत्वाभावाद्वाक्यस्यज्ञापकत्वेकथमयंहेतुस्स्यादित्यतआह ॥ [४०।१] स्वविषयप्रति

पादनादिति ॥ उपचारइति । स्वव्याहतवाक्यस्यापिज्ञापकत्वेनप्रमाणभूतवाक्यस्वव्याहतवाक्ययोर्ज्ञापकत्वरूपगुणयो गादित्याशयः । उपचारेबीजंस्वयमेवदर्शयति ॥ स्वव्याहतस्येति । ननुजातिरित्यत्रजशब्देनज्ञापकंवाक्यं अतीत्यनेनात्य यश्चकथंलभ्यतइत्यतस्तद्दर्शयति ॥ अन्येष्वपीत्यादिना । जनीप्रादुर्भावे प्रादुर्भावोविषयप्रकाशनं विषयप्रतिपादनमिति यावत् । एवंचप्रादुर्भावार्थाज्जनेरपादानेजन्यतेज्ञाप्यतेऽर्थोस्मादित्यपादानविवक्षायांडप्रत्ययेडित्त्वविधानसामर्थ्यादभस्या पिटिभूतान्इत्यस्यलोपेज् अ जेतिज्ञापकंवाक्यंजन्यतेज्ञाप्यतेर्थोयस्मादितिव्युत्पत्त्योच्यते । ननुकथमेतत् । सप्तम्यांजनेर्डः सप्तम्यंतेउपपदेजनेर्धातोर्डप्रत्ययस्स्यात् । यथापंकेजातंपंकजं । पंचम्यामजातौ । जातिवर्जेपंचम्यंतेउपपदेजनेर्डस्स्याद्भूते पद्मा ज्जातःपद्मजइति । अजातौकिंअश्वाज्जातःअश्वजइतिनैवभवति । अन्येष्वपिदृश्यते । अन्येष्वप्युपपदेषुसत्सुजनेर्डोदृश्यते । यथाद्विर्जायतइतिद्विजइतिएवंसूत्रत्रयेणसोपपदजनिधातोरेवडप्रत्ययविधानात्प्रकृतेचजनेर्निरुपपदत्वात्कथमत्रडप्रत्ययप्रा प्तिर्येनजमितिरूपंस्यादित्यतउक्तं ॥ अन्येष्वपिदृश्यतइतिदृशिग्रहणान्निरुपपदादिति । अयमर्थः । यद्यत्रसोपपदजनि धातोरेवडप्रत्ययोभिप्रेतस्स्यात्तदा अन्येष्वपीतिसूत्रेदृशिग्रहणंव्यर्थंस्यात् । अन्येष्वपीत्येतावतैवविवक्षितार्थसिद्धेः । पंचम्या मजातावित्यत्रेवात्रापिजनेर्डइत्यस्यानुवृत्तिसंभवात् । अतोव्यर्थंसत्किंचिदिष्टंज्ञापयतीतिन्यायेनदृशिग्रहणसामर्थ्याद्यत्रयत्रो पपदेसत्यसतिचडप्रत्ययकार्यंदृश्यतेतत्रसर्वत्रडप्रत्ययोभवतीतिज्ञायते । अतोत्रनिरुपपदजनिधातोरेवडप्रत्ययेजमितिरूपंयुक्त मितिभावः । प्रकारांतरमप्याह ॥ ण्यंताद्वाकर्तरीति । अत्रनिरुपपदात्प्रादुर्भावार्थाज्जनेरित्येतावदनुवर्तते । तथाचजनीप्रा

दुर्भावेअस्माण्णिच्तस्यचणेरनिटीतिलोपेजनिधातुर्णिजंतस्तस्मादर्थज्ञापनलक्षणक्रियायांकर्तर्यभिधेयेसतिडप्रत्ययेटिलोपेज नयतिज्ञापयत्यर्थमितिव्युत्पत्त्याजमितिज्ञापकंवाक्यमुच्यतइत्यर्थः। ननुतथाप्यतीत्युप सर्गस्यात्ययइत्यर्थप्रदर्शनमयुक्तं। उप सर्गाणांक्रियागतविशेषप्रकाशकत्वात्। प्रकृतेचक्रियासमभिहाराभावेनतदयोगादित्यतआह ॥ [४०।३] उपसर्गाश्चेति॥तद्विशेष [४।०३] काइति ॥ क्रियाधात्वर्थस्तद्विशेषकाइत्यर्थः। यथाप्रजयतीत्यादौप्रादयः धातावेवविलीनोर्थउपसर्गेणकाश्यते ॥ प्रहाराहार संहारविहारपरिहारवदितिवचनात् ॥ [४०।३] ससाधनामिति। कारकगतामित्यर्थः। यथाप्रा चार्यःप्रांतेवासीत्यादौप्रादिरुपसर्ग आचार्यादिरूपकर्तृकारकगतांगमन क्रियामेववक्ति। तथाचप्रगतआचार्यःआचार्यस्यगमनंजातमित्यर्थः। एवमंतेवासिनोपि गमनंजातमित्यर्थः। ननुप्रगतआचा र्यइत्यत्रगतइतिकर्तारमपिवक्तीतिप्रतीयतइतिचेत्सत्यंकर्तृसंबंधंविहायकेवलक्रियामात्रस्य प्रदर्शयितुमशक्यत्वादेवतथाप्रदर्शनं। नतुकर्तारमपिवक्तीत्याशयेनेतिध्येयं। ततःकिंप्रकृतइत्यतआह॥ [४०।४] तंतइति। प्रकृतेक्रि यासन्निधानाभावादित्यर्थः॥ [४०।४] अत्ययस्येति। कर्तृभूतवाक्यनिष्ठविरोधरूपक्रियायाइत्यर्थः॥जस्यस्वाख्यस्येत्यादि [४०।४]। कर्तरिष ष्ठी।स्वाख्येनजनकेनअन्येनवाजनकेनेत्यर्थः॥स्वक्रियांस्वन्यायोवेति [४०।५]।नतुप्रमाणांतरमित्यर्थः। तथाचजेनजनकेनस्वाख्येनस्व वचनेनस्वक्रियास्वन्यायलक्षणान्येन वावाक्यस्यातिरत्ययोविरोधोजातिरित्युच्यतइतिभावः। ननुअन्यच्चात्रस्वक्रियास्व न्यायोवेतिकुतोव्याख्यायते। अन्यदित्यनेनप्रमाणांतरंगृहीत्वातद्विरोधोजातिरितिकस्मान्नोच्यतइत्यतआह ॥ [४०।५] अन्यथे ति। अन्यदितिप्रमाणांतरंगृहीत्वातद्विरोधस्यजातित्वाभिधानेकालातीतसत्प्रतिपक्षयोरपिजातित्वप्रसंगइत्यर्थः। ननुजन

कस्यात्ययोजातिरित्यनेनस्ववचनविरोधःस्वक्रियाविरोधःस्वन्यायविरोधश्चजातिरित्युक्तंस्यात् । तथाचाननुगमइत्याशंक्य सामान्यलक्षणंवदन्मूलंविभागकथनपरतयायोजयति ॥ [४०।१५]एवंचेति । जातिमाहुरथान्येतुस्वव्याघातकमुत्तरमितिकारिकानुसारेणाह ॥ [४०।१५]स्वव्याहतिर्जातिरिति । जातेरंतर्भावःसिद्धइतिसूचयितुंतत्स्वरूपंनिरूपयतीत्युक्तं । अनेनकुत्रांतर्भावस्सूचितइत्यतआह ॥ [४०।१६]तथाचस्वतोविरोधइति । प्रतिज्ञाविरोधप्रभेदरूपेस्ववाक्यविरोधइत्यर्थः । अन्येषां हेत्वाभासानां । तत्रासिद्धविरुद्धसाधारणानैकांतिकासाधारणानैकांतिकानांहेतुविरोधेंतर्भावः । बाधसत्प्रतिपक्षयोःप्रमाणविरोधइत्यादिद्रष्टव्यमित्यर्थः । ननुविरोधादीनांपरपराजयरूपत्वाभावादेतएवनिग्रहाइतिपरपराजयरूपनिग्रहत्वंकथमुच्यतइत्यतआह ॥ [४०।१८]निग्रहस्थानानीति । परपराजयनिमित्तानीत्यर्थः । तथाचनिगृह्यतेपराजीयतेएभिरितिव्युत्पत्त्यानिग्रहशब्देननिग्रहस्थानान्युच्यंतइत्यर्थः । अखंडिताहंकृतिनापराहंकारखंडनं ॥ निग्रहस्तन्निमित्तस्यनिग्रहस्थानतोच्यतइतिकारिकावचनादितिभावः । प्रकृतोपयोगंदर्शयति ॥ [४०।१९]एतेनेति । विरोधस्यानुमानदूषणत्वकथनेनेत्यर्थः । तथाचविरोधस्यानुमानदूषणत्वाभावात्प्रत्यभिज्ञाविरोधेनवर्णानित्यत्वानुमानंकथंदूषितमितिशंकानवकाशः ।प्रत्यभिज्ञाविरोधोहिप्रबलप्रमाणविरोधः । सचानुमानविरोधप्रभेदभूतोयःप्रतिज्ञाविरोधस्तत्प्रभेदभूतोयःप्रमाणविरोधस्तत्प्रभेदभूतः । एवंचतद्विरोधकथनेनानुमानदूषणंयुक्तमितिभावः ॥ [४०।२२]अस्यांप्यनुमानेति । बाहुल्याभिप्रायेणेदं । एकंप्रत्यक्षरूपंस्यादित्यादिनाऽभावप्रमाणस्यप्रत्यक्षेप्यंतर्भावस्योक्तत्वादितिध्येयं ॥ [४०।२४]अन्येति । लक्षणांतरलक्षितेत्यर्थः ॥ [४०।२४]एषैवेति । एतल्लक्षणलक्षितैवेत्यर्थः ॥ किम

[४०।१४] शक्यमिति । अंतर्भावकथनेकिंसंकटमित्यर्थः । एवकारस्यार्थांतरमाह ॥ [४०।१४] अथवेति ॥ प्रमाणद्वयविरोधइति । देवद
त्तोगृहेनास्तीतिगृहाभावग्राहकंप्रत्यक्षरूपंप्रमाणमेकं शतवर्षजीवीदेवदत्तइतिजीवनग्राहकज्योतिःशास्त्ररूपंप्रमाणमपरं तदु
भयविरोधइत्यर्थः । यद्यप्यत्रभिन्नविषयकत्वान्नजीवनग्राहकप्रमाणेनगृहाभावग्राहकप्रमाणस्यसाक्षाद्विरोधोस्ति तथापिजी
वीगृहएवेतिनियमग्राहकप्रमाणसचिवेनजीवनग्राहकप्रमाणेनविरोधइतिद्रष्टव्यं ॥ [४०।१५] आपाततइति । बहिस्सत्त्वमकल्पयि
त्वेत्यर्थः ॥ [४०।१५] व्याघातादिति । गृहाभावग्राहकंप्रत्यक्षं जीवनग्राहकंज्योतिःशास्त्रं अनयोःप्रमाणत्वेभिन्नविषयत्वेनविरोध
स्यैवाभावात्प्रमाणत्वमंगीकृत्यविरोधोक्तौव्याघातः । नमानयोर्विरोधोस्तीत्यभियुक्तवचनात् । यदिचगृहनियमग्राहकंप्रमा
णंकल्पयित्वातद्वाराविरोधोक्तौपुनर्व्याघातएव विरुद्धयोःप्रामाण्यायोगात् । विरुद्धयोश्चनप्रामाण्यमित्यभियुक्तवचनादि
त्यर्थः । तथाचोभयथापिप्रमाणद्वयविरोधइत्युक्तमसदितिभावः ॥ [४०।१५] अन्यथेति । बहिस्सत्त्वंकल्पयित्वाप्रमाणद्वयस्याविरो
धंसंपाद्यव्याहतिपरिहारइत्यर्थः ॥ [४०।१५] उक्तलक्षणेति । अनुपपद्यमानजीवनगृहाभावदर्शनेनतदुपपादकबहिस्सत्त्वस्यकल्प्य
मानत्वेनानुपपद्यमानार्थदर्शनात्तदुपपादकभूतार्थांतरकल्पनमर्थापत्तिरित्युक्तलक्षणाबहिर्भावादित्यर्थः । उदाहरति ॥
[४०।१५] यथेति । यथोक्तंमीमांसकैः । विद्यमानत्वसंसृष्टगेहाभावधियानया ॥ गेहादुत्कालितासत्ताबहिरेवावगम्यतेइति ॥
[४०।१६] नगरइत्यादि । गृह्यमाणेस्मर्यमाणप्रतियोगिकसादृश्यज्ञानात्स्मर्यमाणेगृह्यमाणप्रतियोगिकसादृश्यज्ञानमुपमानमित्यर्थः ॥
[४०।१७] पूर्ववदिति । यद्यन्यत्किंचित्स्यात्तदांतर्भावकथनेसंकटंभवेत् । यदात्वेतदेवतदाकिमशक्यमितिसूचयितुमेवशब्दइत्यर्थः । ए

कस्यैवसादृश्यस्योभयनिष्ठत्वाभिप्रायेणसदृशाविमावित्युक्तं । एकप्रतियोगिकमपरनिष्ठमित्यभिप्रायेणैतत्सदृशोयमित्युक्तमितिद्रष्टव्यं । वाक्यश्रवणानंतरमित्यनंतरं तत्सदृशोयमितिज्ञानमुत्पद्यतइत्यनुवर्तते ॥ प्रत्यक्षादित्वेनेति । प्रत्यक्षागमजन्यत्वेनेत्यर्थः । आद्यंप्रत्यक्षजन्यंद्वितीयमागमजन्यमितिविवेकः । मूलेसामान्यलक्षणमनुक्त्वाविभागस्यैवकथनेनन्यूनतापरिहारायस्वयंतदाह ॥ अभावप्रमितीति । एकंतत्रानुभवतइत्युत्तरवाक्यानुरोधेनव्याचष्टे॥द्विविधसाधनजन्यमिति । द्वैविध्यं द्विविधसाधनजन्यत्वं सुखाद्यभावज्ञानस्यसाक्षिरूपत्वेनजन्यत्वाभावादनुभवतोजायतइत्युक्तमित्यतआह॥उपचारेणेति । अनुभवाख्यस्वरूपेंद्रियेणसुखाद्यभावज्ञानमभिव्यज्यतइतिजन्यज्ञानसाधारणव्यक्तत्वरूपगुणयोगादित्यर्थः । नन्वभावस्यपरिज्ञानंद्विविधमितिद्विविधसाधनजन्यत्वकथनमयुक्तं । अयंचक्षुष्मान्रूपज्ञत्वादिति रूपज्ञानानुमेयत्वेनानुमानिकंयच्चक्षुरादिकंतदभावज्ञानंनायंचक्षुष्मान्रूपाज्ञत्वादित्येवंरूपज्ञानाभावलिंगकानुमानेनभवति । तथाभारताद्यागमसिद्धकौरवाद्यभावज्ञानंभारताद्यागमाद्भवति। तदुभयंकस्मान्नोपन्यस्तमित्यतआह ॥ आनुमानिकेति । अर्थापत्त्युपमाभावा इतिनिरूपणानुसारेणक्रमेणार्थापत्त्यादेरंतर्भावमनभिधायानंतरोक्तस्याभावप्रमाणस्यांतर्भावेनिमित्तमाह ॥ तत्रलाघवायेति । एकंतत्रानुभवतो द्वितीयमपिविज्ञेयमित्येकद्वितीयशब्दाभ्यांप्रकृतद्विविधाभावज्ञानं एकंप्रत्यक्षरूपंस्यात्द्वितीयमनुमात्मकमित्येकद्वितीयशब्दाभ्यामेवोपादायांतर्भावकथनेलाघवमित्यर्थः । क्रमानुसरणेत्वर्थापत्त्युपमयोरंतर्भावमुक्त्वापश्चादभावस्यांतर्भावेवाच्येतत्रएकंप्रत्यक्षरूपंस्यात्द्वितीयमनुमात्मकमित्युक्तौव्यवहितत्वेनैकादिशब्देनैतदुपस्थित्यसंभवात् । सुखा

द्यभावज्ञानंप्रत्यक्षरूपंघटाद्यभावज्ञानमनुमात्मकमितिवक्तव्यंस्यात् ।तथाचशब्दगौरवमितिभावः । ननुसुखाद्यभावज्ञानस्यानुभवरूपसाक्षिजन्यत्वेपिकथंप्रत्यक्षरूपत्वमित्यतआह ॥ साक्षिणइति[४०।२६] । साक्षिषडिंद्रियभेदेनप्रत्यक्षस्यसप्तविधत्वादितिभावः ॥ योग्यत्वेसतीत्यादि[४१।१] । योग्यत्वेसतियन्नोपलभ्यतेतन्नास्तीतिव्याप्तावयोग्येपिशाचादौव्यभिचारपरिहारायसत्यंतं। घटादौतत्परिहारायविशेष्यं ॥ उक्तस्येति[४१।१] । द्वितीयमनुमात्मकमित्युक्तस्येत्यर्थः । ननुप्रत्यक्षप्रतियोगिकाभावज्ञानस्यप्रत्यक्षजन्यत्वनियमात्क्वचिदितिकिमर्थमुक्तमित्यतआह ॥ अत्रायंविवेकइति[४१।२] । परामर्शापरामर्शविशेषादित्याचार्योक्तिमनसिनिधायोपपादयति ॥ यदेत्यादिना[४१।२] । विमृश्य विचाररूपंपरामर्शंकृत्वा ॥ योग्यानुपलब्धीति[४१।३] । घटोत्रेदानींनास्तियोग्यत्वेसत्यनुपलभ्यमानत्वादितियोग्यानुपलब्धिलिंगकमनुमानमित्यर्थः । स्थलांतरेप्यभावज्ञानस्यानुमानिकत्वमुपपादयति ॥ यदाचेति[४१।३] । मात्रशब्दव्यावर्त्यंदर्शयति ॥ गजस्मरणाभावेनेति[४१।३] । अभावज्ञानकारणीभूतस्यप्रतियोगिभूतगजस्मरणस्याभावादित्यर्थः । अन्यत्र राजगृहादन्यत्रस्थलांतरे ॥ पुनर्जिज्ञासायामिति[४१।४] । अनुभूतेराजगृहादौकिंगजोभूद्वानवेतिजिज्ञासायामित्यर्थः । जानातीत्यस्यतत्रस्मरणयोग्यस्यास्मरणंलिंगमितिसंबंधः । अयमर्थः । नाभूत्तत्रगजइतिगजाभावज्ञानंतावज्जायते । तज्ज्ञानंनतावदिंद्रियेणभवति । व्यवहितत्वेनतत्रेंद्रियव्यापाराभावात् । नापियोग्यत्वेसत्यनुपलभ्यमानत्वादितियोग्यानुपलब्धिलिंगकानुमानेन गजस्यानुपलब्धेःसत्त्वेपितस्यव्यवहिततयेंद्रियायोग्यत्वेनयोग्यत्वेसत्यनुपलब्धेरभावादतस्तज्ज्ञानसाधनमभावरूपंपृथक्प्रमाणमंगीकार्यमितिनवाच्यं । तत्राप्यनुमानेनैवगजाभावज्ञानांगीकारात् । योग्या

नुपलब्धेर्लिंगत्वासंभवेपिस्मरणयोग्यत्वेसत्यस्मर्यमाणत्वस्यलिंगत्वोपपत्तेः । तथाहि । गजस्तत्स्थलनिष्ठाभावप्रतियोगी तत्र
मयाननुभूतत्वात् । नचासिद्धिः । तत्रगजोमयानानुभूतः स्मरणयोग्यत्वेसत्यस्मर्यमाणत्वाद्व्यतिरेकेणतत्रत्यपाषाणवदित्यनु
मानसंभवादितिभावः । नन्वथापिसायंकालेराजगृहंगतवतस्तदानींगजंचदृष्टवतःप्रातरत्रगजोनाभूदित्यभावज्ञानंतावज्जाय
तेइदंचनप्रत्यक्षेणोत्पत्तुमर्हतिप्रातःकालविषयेंद्रियव्यापाराभावात्प्रतियोगिनोगजस्यैवदर्शनाच्च । नापियोग्यानुपलब्धिलिंग
कानुमानेन योग्यत्वेसत्यपितदानींगजस्योपलभ्यमात्वेनानुपलब्धेरसिद्धेः । प्रातःकालीनत्वावच्छिन्नगजस्यप्रतियोगित्वेतत्रा
नुपलभ्यमानत्वसद्भावेपियोग्यत्वरूपविशेषणस्यासिद्धेः।प्रातःकालीनत्वावच्छिन्नगजस्यायोग्यत्वात् । अतस्तदर्थमभावरूपंपृ
थक्प्रमाणमंगीकार्यमित्यतआह॥ [४१।४] **एवंप्रातरिति**। तथाचात्रापिनयोग्यानुपलब्धिर्लिंगं किंनामस्मरणयोग्यत्वेसत्यस्मर्यमाण
त्वमेवेत्यर्थः । तथाहि । विप्रतिपन्नोगजःप्रातश्चत्वरनिष्ठाभावप्रतियोगीतदातत्रमयाननुभूतत्वात् । नचासिद्धिः । विप्रति
पन्नोगजस्तदातत्रमयाननुभूतःस्मरणयोग्यत्वेसतितन्निष्ठतयेदानीमस्मर्यमाणत्वाद्व्यतिरेकेणतत्रत्यपाषाणवदित्यनुमानप्रकारो
द्रष्टव्यः ॥ [४१।५] **घटेति** । प्रतियोगिभूतेत्यर्थः। झडितीत्यस्यार्थोविलंबेनविनेति। परितइत्यस्यसम्यगित्यर्थमभिप्रेत्यापरोक्षतयेति
तत्तात्पर्यमुक्तं ॥ [४१।८] **सर्वस्येति** । प्रत्यक्षार्थप्रतियोगिकस्यसर्वस्यापीत्यर्थः । लिंगानुसाधनं । तृतीयलिंगपरामर्शः । अपराम
र्शदशायांझडितिजायमानमपिज्ञानंलिंगजन्यमेवेत्याशयेनशंकते ॥ [४१।८] **अभ्यासेति** ॥ [४१।८] **अवधानेति** । पक्षदर्शनेत्याद्युक्तविलं
बेत्यर्थः । घनगर्जितेनमेघाद्यनुमानस्थलइवेतिभावः।नन्वभावज्ञानस्यानुमानजन्यत्वेऽभावमपरोक्षतोजानामीत्यनुभवसिद्ध

मभावज्ञानस्यापरोक्ष्यंनस्यादितिचेन्न । इष्टापत्तेरित्याह ॥ अपरोक्षेति । अपरोक्षत्वाभिमानः अपरोक्षत्वोपचारः । अपरोक्षत्वाभिमानेनिमित्तं ॥ अपरोक्षाधिकरणेति । तथाचाधिकरणभूतभूतलस्यापरोक्षतोनुभूयमानत्वेनतत्सन्निधानादभावज्ञानेप्यापरोक्ष्यमाभिमानिकमेवनवास्तवमित्यर्थः ॥ तत्प्रसंगादिति । पर्वतरूपापरोक्षाधिकरणानुभवस्यतत्रापिसत्वेनतत्सन्निधानाद्वह्न्यादिज्ञानेप्यापरोक्ष्याभिमानप्रसंगः । तथाचापरोक्षाधिकरणसन्निधानस्यनापरोक्षाभिमानापादकत्वमितिभावः ॥ बाधकाभावाच्चेति । झडितिजायमानघटाद्यभावज्ञानस्यापरोक्षत्वेबाधकाभावान्नोपचारकल्पनंयुक्तमितिभावः । यद्वाननुवायुर्वातीतिप्रतीतिरपाकजानुष्णाशीतस्पर्शरूपलिंगजन्या । तथाचझडितिजायमानत्वंयद्यभावज्ञानस्यलिंगोद्भावित्वाभावेनिमित्तंतर्हिवायुर्वातीतिप्रतीतेरपिझडितिजायमानत्वेनापरोक्षत्वापत्त्यालिंगोद्भवत्वंनस्यादित्यतआह ॥ बाधकाभावाच्चेति । इंद्रियव्यापारानंतरंझडितिजायमानस्याभावज्ञानस्यप्रत्यक्षत्वेबाधकाभावात् । तत्रतुबहिर्द्रव्यप्रत्यक्षत्वेप्रयोजकत्वेनक्लृप्तंयन्महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वंतस्यवायावभावरूपबाधकसद्भावान्नतत्प्रतीतेःप्रत्यक्षत्वमितिभावः । घटाद्यभावज्ञानस्यापरोक्षत्वेबाधकाभावोसिद्धइत्याशंकते ॥ अभावस्यतुच्छत्वेनेति । असतोज्ञानविषयत्वासंभवादितिभावः । तथात्वेत्वदभिमतानुमितिविषयत्वमपिनस्यात् । असतःशशविषाणस्यतददर्शनादित्याह ॥ तथासतीति । एवमपरामर्शदशायांजायमानस्याभावज्ञानस्यानुमानिकत्वंनिराकृत्यपरामर्शानंतरंजायमानस्याभावज्ञानस्यानुमानिकत्वंसमर्थयितुंविप्रतिपत्तिमुद्भावयति ॥ विमर्शानंतरमिति ॥ परोक्षतयेति । योग्यानुपलब्धिलिंगकानुमितिजन्यत्वेनाभा

वज्ञानेपरोक्षत्वस्यानुभवसिद्धत्वादित्यर्थः ॥ [४।१।११] तदपलापइति । परोक्षत्वानुभवापलापइत्यर्थः ॥ [४।१।११] नस्यादिति । तथाचतत्र परोक्षत्वानुभवविरोधएववाच्यः । सोत्रापिसमानइतिभावः । एवंपरामर्शापरामर्शविशेषादभावज्ञानस्यानुमानिकत्वंप्रात्यक्षिकत्वंचेत्युक्तमसहमानःपरामर्शस्थलेऽपरामर्शस्थलेचसर्वत्राभावज्ञानमानुपलब्धमेवेत्येवमनुपलब्धेःपृथक्प्रामाण्यवादीभाट्टःप्रत्यवतिष्ठते ॥ [४।१।१२] सर्वत्रेति । नन्वनुपलब्धेरभावज्ञानेलिंगत्वेनज्ञातकरणत्वात्तज्ज्ञानापेक्षायांतस्याश्चोपलब्ध्यभावरूपत्वेनानुपलब्ध्यंतरापेक्षायामनवस्थास्यादित्यतआह ॥ [४।१।१२] साचेति । अनुपलब्धिरित्यर्थः ॥ [४।१।१२] स्वरूपेणैवेति । चक्षुरादिवदज्ञाततयैवकरणमित्यर्थः ॥ [४।१।१२] नतुलिंगतयेति । नतुलिंगत्वेनज्ञातासतीकरणंयेनानवस्थास्यादितिभावः । तथाचसर्वत्राभावज्ञानमानुपलब्धमेवेतिनोक्तविभागोयुक्तइतिहृदयं ॥ [४।१।१२] अनुभवसिद्धत्वादिति । घटाद्यभावमपरोक्षतोजानामीत्यनुभवसिद्धत्वादित्यर्थः । तथाचप्रत्यक्षत्वमंगीकार्यमितिभावः । तथात्वात् अनुभवसिद्धत्वात् । आनुमानिकत्वमप्यंगीकार्यमितिभावः । षष्ठप्रमाणवादीपुनःशंकते ॥ [४।१।१३] अधिकरणेति ॥ [४।१।१३] तन्मात्रेणैवेति । एतत्रितयमात्रेणैवेत्यर्थः । इंद्रियादीत्यादिपदेनव्याप्त्याद्यनुसंधानपरिग्रहः ॥ [४।१।१४] कल्पकस्येति । अभावप्रतीतेरपरोक्षत्वपरोक्षत्वकल्पकानुभवस्येत्यर्थः ॥ उक्तत्वादिति । अपरोक्षप्रतीतेरनुभवसिद्धत्वात् । व्याप्त्याद्यनुसंधानस्यापितथात्वादित्युक्तत्वादित्यर्थः । तथाचप्रामाणिकत्वाच्चनगौरवंदोषायेतिभावः । तथापिनाभावज्ञानंप्रत्यक्षेणोत्पत्तुमर्हमित्याशंकते ॥ [४।१।१४] अभावेनेति । संयोगसमवाययोरद्रव्यत्वेनायुतसिद्धत्वाभावेनचाभावादितिभावः ॥ [४।१।१५] कल्प्यतइति । घटेनसन्निकर्षोस्तीतिकल्प्यतइत्यर्थः ॥ [४।१।१५] तदापरोक्ष्यमिति ।

तस्याःघटादिप्रतीतेरापरोक्ष्यमित्यर्थः ॥ [४१।१५] प्रतीतिग्राहकेति । घटमपरोक्षतोजानामीतिप्रतीतिग्राहकानुव्यवसायरूपप्रमाणात्तदापरोक्ष्यंसिद्धमित्यर्थः ॥ [४१।१६] सममिति । अत्राप्यभावमपरोक्षतोजानामीतिप्रतीतिग्राहकप्रमाणेनाभावप्रतीतेरापरोक्ष्यस्यसिद्धत्वात्तल्लक्षणकार्येणेंद्रियाभावयोरपिसन्निकर्षःकल्पनीयइत्यर्थः । ननुकथमभावेंद्रिययोस्संयोगः । अद्रव्यत्वात् द्रव्ययोरेवसंयोगइतिहिवैशेषिकप्रक्रियेतिचेत्तत्राह ॥ [४१।१६] वैशेषिकादिप्रक्रियायाइति ॥ [४१।१७] कार्यदर्शनेनेति । तंतुपटयोरवश्यमाश्रयाश्रयिभावेनावस्थानरूपकार्यदर्शनेनेत्यर्थः । अयुतसिद्धत्वदर्शनेनेतियावत् । अपरः संयोगसमवायातिरिक्तस्तृतीयस्संबंधः । योग्यस्यानुपलब्धितः । द्वितीयमपिविज्ञेयमितिपरामर्शदशायांजायमानेऽभावज्ञानेयोग्यानुपलब्धेर्लिंगत्वमुक्तं । तदयुक्तमित्याशंकते ॥ [४१।१७] अनुपलब्धेरिति ॥ [४१।१८] अभावत्वाविशेषेणेति । अनुपलब्धेरप्युपलब्ध्यभावरूपत्वादितिभावः ॥ [४१।१८] अनुपलब्ध्यंतरेति । उपलब्धिविषयकानुपलब्ध्यंतरेत्यर्थः ॥ [४१।१८] साक्षिवेद्यतायाइति । उपलब्धेस्साक्षिवेद्यत्वेनतत्प्रतियोगिकाभावरूपानुपलब्धेरपिसाक्षिवेद्यतायाः सुखाद्येचघटादिकइत्यत्रसुखाद्यइत्याद्यपदेनोक्तत्वादित्यर्थः । तथाचसाक्षिणस्स्वप्रकाशरूपत्वान्नानवस्थेतिभावः ॥ [४१।१९] अनुमानसामग्रीति । व्याप्त्याद्यनुसंधानरूपेत्यर्थः । अभावाद्यवच्छेदप्रकारंदर्शयति ॥ [४१।२०] तस्येति । अभावस्येत्यर्थः ॥ [४१।२०] उभयत्रेति । प्रत्यक्षेऽनुमानेचेत्यर्थः । ननुदेवदत्तोबहिरस्तिजीवित्वेसतिगृहेऽसत्त्वादित्यनुमानंकार्यं । तन्नसंभवतीत्याशयेनशंकते ॥ [४१।२०] नन्विति ॥ [४१।२१] मृतादाविति । मृतशब्देनमृतशरीरंग्राह्यं । आदिपदेनशशशृंगाद्यसद्ग्राह्यं । तथाचमृतशरीरेगृहेऽसत्त्वसद्भावेपिबहिःसत्त्वाभावाद्व्यभिचारः । असतश्चकुत्राप्य

सत्त्वेनगृहेऽसत्त्वसद्भावेपिबहिस्सत्त्वाभावादसतिचव्यभिचारस्स्यादित्यर्थः । केचित्तुमृतेजीवेव्यभिचारइत्याहुः । तन्न ।
जीवस्वरूपस्यनित्यत्वेनबहिस्सत्त्वरूपसाध्यस्यापितत्रसद्भावेनव्यभिचाराप्रसक्तेरितिध्येयं ॥ [४१।२१] विशिष्टमिति । जीवित्वेस
तिगृहेऽसत्त्वमित्यर्थः । तथाचजीवित्वंनामजीवनवत्त्वंतच्चमृतशरीरेऽसतिचनास्तीतिनव्यभिचारइतिभावः ॥ निश्चित
[४१।२२] मिति । जीवीगृहएवेतिनियमग्राहकप्रमाणेनेत्यर्थः । तथाचजीवित्वेसतीत्यस्यगृहेसत्त्वमेवार्थःप्रतिपन्नइतिभावः ॥ सं
[४१।२२] शयस्येति । यदिनियमग्राहकंप्रमाणंकल्पयित्वाविरोधेनविशेषणविशेष्यभावोनो पपद्यतइत्यनुमानासंभवइत्युच्यते तर्हित्व
दभिमतबहिस्सत्त्वकल्पकार्थापत्त्युदयोपिनस्यात् नियमग्राहकप्रमाणसचिवजीवनप्रमाणगृहाभावग्राहकप्रमाणयोःपरस्पर
विरुद्धतयाबलाबलानवधारणेनजीवित्वाद्गृहेस्तिवाप्रत्यक्षेणगृहेऽदर्शनान्मृतोवेति संशयजनकत्वादित्यर्थः ॥ [४१।२३] सामान्यत
इति । जीवताक्वचित्स्थातव्यमितिसामान्यतइत्यर्थः ॥ [४१।२३] प्रसक्तेति । प्रसक्तस्यगृहेसत्त्वस्येत्यर्थः ॥ [४१।२४] अनुमानजन्यैवेति ।
अयंभावः । नियमग्राहकंप्रमाणंकल्पयित्वाजीवनगृहासत्त्वयोःपरस्परविरुद्धत्वेनविशेषणविशेष्यभावानुपपत्त्याऽनुमानासं
भवोनमंतव्यः । जीवताक्वचित्स्थातव्यमित्येवांगीकारेणानुमानप्रवृत्तिसंभवात् । जीवीगृहएवेतिनियमग्राहकंप्रमाणमेकंगृ
हाभावग्राहकंप्रत्यक्षमपरंअनयोर्मध्येएकंबाध्यंविरुद्धार्थग्राहकत्वादित्यनुमानेनगृहाभावग्राहकप्रत्यक्षविरोधेनगृहनियमग्राह
कप्रमाणस्यैवाप्रामाण्यकल्पनात् । नचनियमग्राहकप्रमाणविरोधेनगृहाभावग्राहकप्रमाणस्यैवाप्राण्यंकुतोनकल्प्यतइतिवा
च्यं । बहिष्ठेस्वस्मिन्नेवजीवनगृहाभावयोस्सहदर्शनेननियमग्राहकप्रमाणस्यैवाप्रामाण्यकल्पनौचित्यादिति ॥ [४१।२४] अन्यथेति ।

उक्तरीत्यांतर्भावसंभवेपिपृथक्प्रामाण्यांगीकारइत्यर्थः । ननुयद्यपिनियमग्राहकप्रमाणस्यायोगेनपरस्परविरुद्धतयाजीवित्व
स्यहेतुविशेषणत्वासंभवोनास्ति तथापिजीवनप्रमाणेनजीवनंतावत्सिद्धं । गृहाभावग्राहकप्रमाणेनगृहेऽभावस्सिद्धः । त
थाचजीवनप्रमाणाज्जीवतिवा प्रत्यक्षेणगृहेऽदर्शनान्मृतोवेतिसंदेहःकस्मान्नस्यात् । तथाचसंदिग्धंजीवनंकथंहेतुविशेषणं
भविष्यति निश्चितस्यैवतथात्वदर्शनादित्याशंकते ॥ [४१।२४] एतेनेति । एतेनगृहाभावप्रमाणेनेतिसामानाधिकरण्यं । प्रत्यक्षरूपे
णेत्यर्थः ॥ [४१।२५] भिन्नविषयत्वेनेति । परस्परविरुद्धार्थविषयकत्वाभावेनेत्यर्थः । तथाचजीवनप्रमाणंज्योतिःशास्त्रं । गृहाभावप्र
माणंप्रत्यक्षं । तयोर्जीवनगृहाभावमात्रविषयकत्वेनसंशयाजनकत्वात् । तद्विषययोर्जीवनगृहाभावयोस्स्वस्मिन्नेवसहदर्शनेना
विरुद्धतयातत्प्रमाणयोर्विरुद्धार्थविषयकत्वाभावेनभिन्नविषयकतयासंशयजनकत्वायोगेनासंदिग्धंजीवनंहेतुविशेषणंभविष्य
त्येवेतिनानुमानासंभवइतिभावः । ननुदेवदत्तोबहिरस्तिजीवित्वेसतिगृहेऽसत्त्वादित्यनुमानस्याप्रसिद्धविशेषणता गृहाद्ब
हिर्भावस्यानुमानात्प्रागनेनानवगतत्वादित्याशंकते ॥ [४१।२५] गृहादिति ॥ [४१।२५] केवलव्यतिरेकित्वेति । यत्रबहिस्सत्त्वाभावस्तत्र
जीवित्वेसतिगृहेऽसत्त्वाभावोयथामृतइतिकेवलव्यतिरेकव्याप्तिसंभवादित्यर्थः । तथाचव्यतिरेकिणिसाध्याप्रसिद्धिर्नदोषइ
तिभावः ॥ [४१।२६] सामान्यव्याप्तीति । तथाचसामान्यव्याप्तिमूलकत्वेनसामान्यतोदृष्टानुमानमित्यर्थः । यद्यपितदयोग्यार्थमु
त्तरमितिप्रत्यक्षायोग्यार्थानुमापकंसामान्यतोदृष्टमितिपरेणलक्षितं । तथापिव्याप्यव्यापकयोरन्यादृशत्वेपितत्सामान्याकारा
नुगमेनलिंगलिंगिभावेसामान्यतोदृष्टं । यथाकृषीवलस्यकर्षणादिप्रवृत्तेर्धान्यादिफलकत्वदर्शनेनयागादेस्स्वर्गादिफलानुमा

नं । प्रेक्षावत्प्रवृत्तित्वफलवत्त्वसामान्यानुगमादितिप्रमाणपद्धत्युक्तरीत्यासामान्यतोदृष्टत्वसंभवादितिद्रष्टव्यं ॥ [४१२६] अनुमाभे
दएवेतीति । भेदशब्दोविशेषपरः । केवलव्यतिरेकिरूपोनुमानविशेषः सामान्यव्याप्तिमूलकत्वेनसामान्यतोदृष्टानुमान
विशेषश्चेत्यर्थः ॥ [४१२६] पक्षांतरेति । गृह्यमाणेस्मर्यमाणप्रतियोगिकसादृश्यज्ञानात्स्मर्यमाणेगृह्यमाणप्रतियोगिकसादृश्यज्ञान
मुपमानमितिशाबरोपमानेगोव्यतिरेकेणान्यस्यगवयस्यपक्षीकरणासंभवादित्यर्थः । गवयपक्षीकारेणतत्रगोसादृश्यानुमानेत
स्यप्रत्यक्षसिद्धत्वेनसिद्धसाधनतापत्तेरितिभावः ॥ [४२११] तथाचेति । गौर्गवयसदृशीगवयस्यगोसदृशत्वादित्यनुमानेव्यधिकरण
त्वमित्यर्थः ॥ [४२१२] व्याप्तीति । सामान्यव्याप्तीत्यर्थः । समानाधिकरणमपिलिंगंसंभवतीत्याह ॥ [४२१२] गवयगतेति ॥ [४२१३] कथमिति ।
तथाचदृष्टांताभावेनव्याप्तिग्रहासंभवादप्रसिद्धविशेषणत्वमित्यर्थः ॥ [४२१३] केवलेति । योयत्सदृशोनभवतिसतत्सदृशोनभवती
तिव्यतिरेकव्याप्तिसंभवादित्यर्थः । तथाचव्यतिरेक्यनुमानेऽप्रसिद्धविशेषणत्वंनदोषायेतिभावः ॥ [४२१४] अनुमाभेदएवेति ।
व्यतिरेक्यनुमानरूपानुमानविशेषएवेत्यर्थः । अंततस्स्वकरतलयोरेवदृष्टांतत्वसंभवान्नाप्रसिद्धविशेषणत्वमित्याह ॥ [४२१४] किंचे
ति । तथाचसदृशावेवयेनप्राङ्नोपलब्धावित्युक्तमसदितिभावः । ननुदृष्ट्वासदृशमेवान्यमितिशाबरोपमानस्वरूपमेवानूद्यार्था
पत्त्युपमाभावाइतितस्यैवांतर्भावउक्तोननैयायिकादीरितोपमानस्य । तत्कुतइत्यतआह ॥ [४२१४] नैयायिकेति । अव्युत्पन्नपदोपे
तवाक्यार्थस्यचसंज्ञिनि ॥ प्रत्यक्षप्रत्यभिज्ञानमुपमानमिहोच्यतइतिकारिकोक्तस्याकृतसमयसंज्ञास्मरणसहायंतत्समभिव्या

हृतवाक्यार्थप्रत्यभिज्ञाप्रत्यक्षरूपोपमानस्येत्यर्थः ॥ [४२।४]अनुमानेंतर्भावःस्फुटएवेति । अस्योपमानस्यवाच्यवाचकभावसंबं
धप्रमितिर्हिफलं । प्रमेयंतस्यसंबंधःसंज्ञायास्संज्ञिनासह ॥ तत्प्रतीतिःफलंचास्यनासौमानांतराद्भवेदितिकारिकावचनात् ।
इदंचफलमनुमानेनैवभविष्यति । तथाहि । अयंगवयशब्दवाच्योऽगोत्वेसतिगोसदृशत्वात् । व्यतिरेकेणघटवदितिप्रयोग
संभवादित्यर्थः । प्रकृतोपयोगमाह ॥ [४२।५]अनेनेति । अर्थापत्त्यादेरनुमानांतर्भावकथनेनेत्यर्थः ॥ [४२।५]परिहृतमिति । पृथ
क्प्रमाणत्वाभावेनतद्विरोधोनोक्तइतिभावः । केचिदर्थापत्त्यादेरनुमानेंतर्भावेनतद्विरोधोक्तावर्थापत्त्यादिविरोधोप्युक्तप्रायइ
तिपृथक्तद्विरोधोनोक्तइतिभावइत्याहुः । ननुयदिनित्यत्वंनामध्वंसाप्रतियोगित्वंतर्हिपुराणादीनामपितत्साम्यान्नित्यत्वंस्यात्
तथाचश्रुतिर्वावनित्याअनित्यावावस्मृतयइत्यादिविरोधइत्यतआह ॥ [४२।६]अपौरुषेयइति ॥ [४२।७]अन्यत्रानंतर्भूतमिति । स्वा
तंत्र्येणैवप्रमाणमित्यर्थः । प्रामाण्यमन्यत्रानंतर्भूतत्वंचक्रमेणोपपादयितुमाह ॥ [४२।७]तथाहीति । वाक्याप्रामाण्यनिमित्तयोर
बोधकत्वविपरीतबोधकत्वयोरभावेप्रामाण्यमेवसिद्धंभवतीत्याशयेनतदुभयाभावंक्रमेणोपपादयति ॥ [४२।७]नतावदित्यादि
ना ॥ [४२।७]अनुभवेति । शब्दादर्थंप्रत्येमीत्यनुभवेत्यर्थः ॥ [४२।७]व्यवहारेति । व्यवहारःप्रवृत्तिः । चैत्रजलमाहरेतिप्रयोजक
वृद्धोदीरितवाक्यश्रवणानंतरंप्रयोज्यवृद्धस्यजलाहरणेप्रवृत्तिस्तावद्भवति । वाक्यस्याबोधकत्वेतद्विलोपप्रसंगइत्यर्थः । अ
न्यत्रानंतर्भूतत्वमुपपादयति ॥ [४२।८]अन्यत्रेति । पृथक्त्वे पृथक्प्रामाण्ये ॥ [४२।९]शक्यत्वादिति । प्रमाकरणत्वसाम्यादिति
भावः । ननुप्रत्यक्षस्यकथमनुमानेंतर्भावः । अनुमानस्यपरोक्षप्रमासाधनत्वात् । प्रत्यक्षस्यसाक्षात्कारिप्रमाकरणत्वात् । त

थाचफलवैजात्यानुपपत्तिरित्यतआह ॥ फलवै[४२।६]जात्यादेरिति । आदिपदेनानुमानेव्याप्त्यादिज्ञानंसामग्री प्रत्यक्षेतुसन्निक र्षइत्येवंसामग्रीभेदग्रहणं ॥ अ[४२।६]वांतरभेदत्वेनेति । प्रत्यक्षस्यानुमानावांतरभेदत्वेनेत्यर्थः । यथाहि । घ्राणरसनचक्षुःश्रो त्रादीनांप्रत्यक्षत्वेपितज्जन्येषुगंधादिज्ञानेषुवैजात्यं तत्तदिंद्रियसन्निकर्षादिरूपसामग्रीभेदश्चप्रत्यक्षावांतरभेदत्वेनैवोपपद्यते नतुतद्बलेनतेषांप्रत्यक्षाद्बहिर्भावस्तद्वदितिभावः ॥ क[४२।७]ल्पनेति । आगमस्यपृथक्प्रामाण्यांगीकारेप्रमाणत्रित्वप्राप्त्याकल्प नागौरवमित्यर्थः ॥ प्र[४२।१०]त्यक्षेपीति । प्रत्यक्षानुमानयोरुभयोःप्रामाण्यांगीकारेकल्पनागौरवप्राप्त्यालाधवायानुमानमेकमेवप्र माणमंगीकार्यमितिभावः । ननुप्रत्यक्षस्यप्रामाण्यांगीकारेनकल्पनागौरवंतत्पृथक्प्रामाण्यसाधकस्येंद्रियार्थसन्निकर्षादिरूप सामग्रीभेदादेस्सत्त्वादित्यतआह ॥ सा[४२।१०]मग्रीभेदादेरिति । आदिपदेनफलवैजात्यग्रहणं ॥ अ[४२।१०]त्रापीति । पदार्थस्मृत्या दिरूपसामग्रीभेदस्यपृथक्प्रामाण्यसाधकस्यागमेपिसत्त्वेननकल्पनागौरवमित्यर्थः ॥ अ[४२।११]तएवेति । आगमेपृथक्प्रामाण्य साधकस्यसामग्रीभेदादेःसत्त्वादेवेत्यर्थः ॥ वक्तृज्ञा[४२।११]नानुमापकत्वेनेति । संसर्गप्रमितिकरणत्वेनागमस्यप्रामाण्यंवक्तव्यं । संसर्गश्च एतानिवैदिकानिपदानिस्वस्मारितार्थसंसर्गज्ञानपूर्वकाणिआकांक्षादिमत्पदकदंबकत्वाद्गामानयशुक्लांदंडेनेत्यादिप दकदंबकवदितिवक्तृज्ञानावच्छेदकत्वेनैवसिध्यतीत्येवमागमस्यानुमानविधयासंसर्गबोधकत्वेननतदर्थमागमस्यपृथक्प्रामाण्य मंगीकार्यमित्येवमागमस्यानुमानेंतर्भावोवक्तव्यःकणादसौगताभ्यामित्यर्थः । यथोक्तंकारिकायां । प्रत्यक्षमेकंचार्वाकःकणा दसुगतौपुनः । अनुमानंचतच्चेति ॥ स[४२।१२]मर्थितंचेति । अपौरुषेयत्वाद्वेदस्येत्यनेनेत्यर्थः ॥ पृ[४२।१३]थगिति । तत्रवक्तुरेवाभावे

नतज्ज्ञानानुमानायोगादितिभावः ॥ [४२।१२] अनुमानत्वमेवेति । तत्रवक्तुर्विद्यमानत्वेनतज्ज्ञानानुमानसंभवादित्याशयः । नित्योपौरुषेयोऽनित्यःपौरुषेयः ॥ [४२।१३] अन्विताभिधानेति । प्राभाकरस्यान्विताभिधानवादित्वात्तंप्रत्येवंविकल्पोयुक्तइतिध्येयं ॥ [४२।१३] वाच्यमिति । प्रष्टव्यमित्यर्थः ॥ [४२।१४] कथंनागमत्वमिति । पदानामन्विताभिधानशक्तिमत्त्वेआगमतयैवसंसर्गपरिपर्यायान्वयबोधकत्वप्राप्त्यानानुमानतयासंसर्गबोधकत्वमित्यर्थः । आगमत्वं आगमतयासंसर्गबोधकत्वं । कुतइत्यतआह ॥ [४२।१४] पदानामिति । लौकिकाद्व्यप्पृथिव्यादिवाचिनांपौरुषेयवाक्यस्थानामेवाद्व्यादिपदानां वायोरग्निः अग्नेरापः अद्भ्यःपृथिवीत्यादौवेदेपिश्रवणात् पौरुषेयवाक्यस्थानांपदानामन्विताभिधानशक्त्यभावेऽपौरुषेयवाक्यस्थानामपिपदानांतदभावप्राप्त्याऽपौरुषेयस्यपृथक्प्रमाणत्वंपौरुषेयस्यानुमानत्वमेवेतिविभागोनयुक्तइत्यर्थः । अतएवाहुः । यएवलौकिकास्तएववैदिकाइति । तर्ह्यागमतयैवसंसर्गबोधकत्वंप्राप्तमितिचेत्तत्राह ॥ [४२।१५] तथापीति ॥ [४२।१५] अनन्वितार्थत्वशंकयेति । वाक्यबोध्योन्वयोबाधितोवाऽबाधितोवेतिशंकयेत्यर्थः । तथाचनागमतयासंसर्गप्रमापकत्वमितिभावः ॥ [४२।१५] शब्देति । पौरुषेयशब्देत्यर्थः ॥ [४२।१६] व्यभिचारेणेति । अनाप्तप्रयुक्तशब्दस्यार्थविसंवादित्वदर्शनेनेत्यर्थः । शंका अर्थव्यभिचारेणाप्रामाण्यशंका । तथाचवेदस्यापिनागमतयासंसर्गप्रमापकत्वंस्यादितिभावः । तत्र वेदे । अत्र पौरुषेयवाक्ये ॥ [४२।१७] उपायांतरेणेति । अपौरुषेयत्वाप्तोक्तत्वरूपोपायांतरेणेत्यर्थः । लोकः पौरुषेयागमः । प्रकृतोपयोगंदर्शयति ॥ [४२।१८] एतेनेति । आगमोद्विविधोज्ञेयोनित्योनित्यस्तथैवचेतिपौरुषेयागमस्यापिपृथक्प्रमाणत्वकथनेनेत्यर्थः ॥ [४२।१८] उपपन्नंभवतीति । पूर्वंऋगाद्याभारतंचैवेत्यादिब्रह्मांडपुराणोदाहरणं

कृतं तदयुक्तं । पौरुषेयागमस्यपृथक्प्रामाण्याभावादितिशंकायास्तस्यापिपृथक्प्रामाण्यसमर्थनेननिरस्तत्वादितिभावः ॥छ॥ ननुविधांतरस्यापिलक्ष्मीप्रत्यक्षस्यसत्त्वात्कथंत्रित्वोक्तिरित्यतआह ॥ [४२।१४] ऐश्वरमितीति । अनेनईश्वरस्यईश्वर्याश्चेदंऐश्वरमितिविग्रहस्सूचितोभवतीतिद्रष्टव्यं ॥ [४२।१५] अस्मदादीनामिति । समाधिपरिपाकशून्यानामित्यर्थः । शरीरेंद्रियरहितत्वादित्यत्रेंद्रियरहितत्वेशरीरराहित्यंहेतुत्वेनोक्तमिति बुद्ध्याविवेकेनद्रष्टव्यं । शरीरयोगेसत्येवसाक्षात्प्रमितिसाधनं । इंद्रियमितिकारिकायांइंद्रियस्यशरीरसंयुक्तत्वाभिधानात् शरीरसंयुक्तंज्ञानकरणमतींद्रियमिंद्रियमित्यन्यत्राप्युक्तत्वादितिभावः । तत्र तदीयेंद्रिये । तथेतिदार्ष्टांतिकोक्त्यासूचितंदृष्टांतमाह ॥ [४२।२०] यथेति । यौगिकंप्रत्यक्षं । ऐश्वरमपिप्रत्यक्षं । तथाचयथायौगिकंप्रत्यक्षमक्षात्मकं । अदुष्टेंद्रियात्मकत्वात् । तथासर्वऐश्वरमपिप्रत्यक्षं अक्षात्मकं । अदुष्टेंद्रियात्मकत्वादित्यर्थः । तथाच नतत्रप्रत्यक्षत्वोक्तिरौपचारिकीत्याशयः ॥ [४२।२१] तथासतीति । ऐश्वरप्रत्यक्षस्याप्यदुष्टेंद्रियात्मकत्वरूपाक्षात्मकत्वांगीकारइत्यर्थः ॥ [४२।२२] यदात्मकइति । यदात्मकोभगवान्तदात्मिकाव्यक्तिः । किमात्मकोभगवान्ज्ञानात्मकऐश्वर्यात्मकस्सुखशक्त्यात्मकइतिश्रुतावित्यर्थः ॥ [४२।२२] एतेनेति । विष्णोःश्रियइतिविशिष्यकथनेनेत्यर्थः । अन्येषांयोगिनामयोगिनांच । अक्षाणीतिशेषः ॥ [४२।२३] स्वरूपकथनेति । सज्जनस्वरूपेंद्रियाणामदुष्टत्वनियमेनव्यावर्त्याभावादितिभावः ॥ [४२।२४] भिन्नेंद्रियाणामेवेति । सर्वेषांबाह्येंद्रियाणांदोषसाहित्येनभ्रमजनकत्वस्यापिसद्भावेनतेष्वदुष्टत्वंदुष्टेंद्रियव्यावर्तकतयाविशेषणमितिज्ञापयितुमित्यर्थः । नन्वदुष्टत्वंसज्जनस्वरूपेंद्रियाणांस्वरूपकथनमात्रं भिन्नेंद्रियाणामेवविशेषणमितिवैलक्षण्यं भिन्नेंद्रियाणांविभागकथनेनकथं

ज्ञापितमित्यतोभिन्नेंद्रियेषुदैवादिपदप्रयोगबलेनलब्धमित्याशयवान्दैवादिपदार्थमाह॥ **सम्यग्ज्ञानप्रचुराणीत्यादिना**[४२।२४] । सम्यग्ज्ञानप्रचुराणि । प्राचुर्येणसम्यक्ज्ञानजनकानीत्यर्थः । मिथ्याज्ञानप्रचुराणि । प्राचुर्येणमिथ्याज्ञानजनकानीत्यर्थः । उभयसमानि । साम्येनोभयजनकानीत्यर्थः ॥ **प्रकृतत्वादिति**[४२।२५] । अदुष्टमिंद्रियंत्वक्षमितिप्रकृतत्वादित्यर्थः । तस्यैव अदुष्टेंद्रियरूपाक्षस्यैव । तथासर्वमक्षात्मकंमतमित्युक्तत्वादितिभावः । अतएव प्रकृतविरोधादेव प्रकृतस्यैवोपसंहार्यत्वेनै तदक्षमीरितमितिचवक्तव्यत्वादितिभावः ॥ **निर्दोषानिति**[४२।२६] । अतिदूरत्वातिसामीप्यसौक्ष्म्यव्यवधानादिदोषरहितान्स्व विषयानित्यर्थः ॥ **अनेनेति**[४३।१] । विषयान्प्रतिस्थितमितिवचनेनेत्यर्थः। तथाचप्रगतआचार्यःप्राचार्यइतिवत्प्रतिगतमक्षंप्रत्यक्षमि तिप्रादिसमासोयं । मध्यमपदलोपीसामासइतियावदित्यर्थः । ननुप्रादिसमासोयमितिकुतः अक्षंप्रतिप्रत्यक्षमित्यव्ययीभावः कस्मान्नस्यादित्यतआह ॥ **अव्ययीभावत्वेहीति**[४३।१] । **षष्ठीनश्रूयेतेति**[४३।१] । प्रत्यक्षस्यलक्षणमाहेत्यादिशास्त्रीयप्रयोगेष्वित्यर्थः। तथाहि । नाव्ययीभावादतोम्त्वपंचम्याः । अदंतादव्ययीभावात्सुपोनलुक्तस्यपंचमींविनाअमादेशः । उपकृष्णाद्गतइत्येवं पंचमीव्यतिरिक्तसर्वविभक्तिषुनित्यमम्भावश्रवणात् । तृतीयासप्तम्योर्बहुलं । अदंतादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम् भावस्स्यात् । उपकृष्णंकार्यंउपकृष्णेनकार्यं । उपकृष्णंस्थितःउपकृष्णेस्थितइतितृतीयासप्तम्योरम्भावस्यवैकल्पिकत्वोक्तेः । कर्मणायमभिप्रैतिससंप्रदानमिति । संप्रदानसंज्ञाभावेनचतुर्थीविभक्त्युत्पत्तेरेवायोगेनाव्ययीभावसमासांगीकारेऽम्भाव स्यावर्जनीयत्वेनप्रत्यक्षस्येतिषष्ठीनश्रूयेत । इदमुपलक्षणं प्रत्यक्षेप्रत्यक्षाणीतिप्रथमाद्वितीयाद्विवचनबहुवचनप्रयोगोपिनश्रू

येत । प्रत्यक्षोघटइतिविशेष्यनिम्नताचनश्रूयेतेत्यपिद्रष्टव्यं । प्रयोगबाहुल्याभिप्रायेणैवप्रत्यक्षस्येत्युदाहृतमितिभावः । विषयान्प्रतीतिमूलेहिशब्दःहेत्वर्थःअवधारणार्थश्चेत्यभिप्रेत्यशंकापरिहारपरत्वेनतन्मूलंयोजयति ॥ [४३११]यतोक्षमेवेति॥ [४३१२]स्वगोचरेति । स्वविषयेत्यर्थः॥ [४३१२]नत्वर्थांतरमिति । घटादिवदितिभावः ॥ [४३१२]अनेतिभिन्नत्वादिति । प्रत्यक्षशब्दस्यसन्निकृष्टेंद्रियवाचित्वेनाक्षशब्दाद्भेदेपींद्रियवाचित्वांशस्योभयत्रापिसत्त्वेनप्रत्यक्षाक्षशब्दयोर्घटपटादिशब्दवदत्यंतंभिन्नार्थत्वाभावादित्यर्थः ॥ [४३१२]नकश्चिद्विरोधइति । प्रकृतासंगत्युपसंहारानुपपत्तिरूपोविरोधोनेत्यर्थः ॥ [४३१२]निर्वचनेप्रसंगादिति । प्रत्यक्षशब्दनिर्वचनेनाक्षशब्दनिर्वचनस्यापिस्मारितत्वेनस्मृतस्योपेक्षानर्हत्वरूपात्प्रसंगादित्यर्थः ॥ [४३१३]नञुपपदादिति । नञुपपदात्क्षैक्षयइत्यस्माद्धातोःआदेचउपदेशेऽशिति । उपदेशेएजंतस्यधातोरेचआत्वंस्यात्शितोन्यस्मिन्प्रत्ययेविवक्षितइत्यनेनऐकारस्यआत्वे नक्षाइतिजातेनलोपोनञइतिनञोनस्यलोपेअक्षाइतिजाते आतोनुपसर्गेकः। आदंताद्धातोरनुपसर्गेउपपदेकप्रत्ययस्स्यादितिसूत्रेणकप्रत्ययेलशक्वतद्धितइतिककारलोपेआतोलोपइटिच । आजादावार्धधातुकेकितिङितिचप्रत्ययेइटिचपरेधात्वाकारस्यलोपस्स्यादित्यनेनधात्वाकारलोपेअक्ष्अक्षेतिरूपं । नन्वातोनुपसर्गेकइतिसूत्रेणात्रकथंकप्रत्ययः । अनुपसर्गेकर्मण्युपपदइत्युक्तत्वात् । उदाहृतंचगांददातीतिगोदःकंबलदइति । प्रकृतेचकर्मणउपपदस्याभावादितिचेत् । सत्यं । एवंहिसूत्रक्रमःकर्मण्यण् । ह्वावामश्च। आतोनुपसर्गेकः । सुपिस्थइति। तत्रपूर्वसूत्रात्कर्मणीत्यनुवृत्तिमभिप्रेत्यतथाव्याख्यातं। अत्रकर्मणीतिनानुवर्तते । उत्तरसूत्रात्सुपीत्येतदाकृष्यते । तथाचानुपसर्गेसुबंतेउपपदेआदंताद्धातोःकप्रत्ययस्स्यादित्यभियुक्तैर्व्याख्यातत्वे

नप्रकृतेचनञुपरिप्राप्तस्यसुपअव्ययादाप्सुपइतिलोपेननञस्सुबंतत्वात्तस्मिन्नुपपदेयुक्तःकप्रत्ययइतिनैतत्सूत्रोदाहरणमसंगत मितिद्रष्टव्यं ॥ [४३१४]अन्वर्थमिति । अन्वर्थं युक्तार्थं । निर्वचनलभ्योर्थस्तत्रास्तीत्यर्थः । नत्वश्वकर्णादिवद्रूढमितिभा वः । उपचारो गौणीवृत्तिः ॥ [४३१५]स्वरूपेणनित्यस्यापीति । सूक्ष्मरूपेणनित्यस्यापीत्यर्थः । भूतेंद्रियप्राणगुणसूक्ष्मरूपं चनित्यकमितिवचनात् । तस्य भिन्नेंद्रियस्य । अहंकारशब्देनतैजसाहंकारोग्राह्यः । तथाचभूततैजसाहंकारसंबंधिनो येऽवयवाअंशास्तैरुपचयरूपोत्पत्तिरस्तीत्यर्थः । अत्रादौभिन्नानांप्राकृतानांसूक्ष्मेंद्रियाणांतैजसाहंकारावयवैरुपचयस्तदनं तरंतैजसाहंकारादुपचितानांतेषांपश्चात्पंचभूतावयवैरुपचयइतिक्रमोज्ञातव्यः । यथोक्तंभागवततात्पर्ये । सूक्ष्मेंद्रियाणि संत्येवस्युःस्थूलान्यप्यहंकृतेः । तेषांभूतैरुपचयस्सृष्टिकालेविधीयतइति ॥ [४३१६]मुख्यासंभवादिति । सर्वप्रकारेणक्षया भावरूपाक्षशब्दमुख्यार्थस्यभिन्नेंद्रियेष्वसंभवादित्यर्थः ॥ [४३१६]एकदेशेति । अक्षशब्दमुख्यार्थेस्वरूपेंद्रियेसर्वथाक्षयाभावेनै कदेशाक्षयोस्ति । भिन्नेंद्रियेष्वप्येकदेशाक्षयोस्ति । तथाचैकदेशाक्षयरूपमुख्यार्थसदृशगुणयोगादक्षशब्दस्यगौणीवृ त्तिरित्यर्थः । प्रकृतोपयोगंदर्शयति ॥ [४३१६]एतेनेति । अनुभवस्य साक्षिजानुभवस्य । तद्विरोधेन साक्ष्यनुभवविरोधे न ॥ [४३१७]उच्यतइति । नचानुभवविरोधआगमस्यप्रामाण्यमित्यनेनेत्यर्थः । एतेनेत्युक्तंविशदयति ॥ [४३१८]स्वरूपेंद्रियेति । साक्षी त्यर्थः ॥ [४३१८]संभवपरिशेषेति । सहस्रादौशतादिविज्ञानंसंभवः । प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगात्परिशिष्यमाणेबुद्धिःपरिशे षः । यथाचैत्रमैत्रयोर्नायंचैत्रइत्युक्तेऽन्यस्मिन्मैत्रइतिज्ञानं संभवादिकमनुमा । उपपत्तिस्वरूपत्वादित्यत्रसाध्याविशिष्टतापरि

हारायोपपत्तिस्वरूपत्वादित्येतद्व्याख्याति ॥ [४३।६] स्यांसीति ॥ [४३।६] संभवादिकमनुमैवेति । देवदत्तःशतवान्सहस्रवत्त्वादित्येवंसं भवेऽनुमानप्रकारोद्रष्टव्यः । यथाहुःइहभवतिशतादौसंभवाद्यासहस्रान्मतिरपियुतिभावात्सानुमानादभिन्नेति । तथाऽयं मैत्रोभवितुमर्हतिचैत्रमैत्रयोरन्यतरत्वेसत्यचैत्रत्वाद्व्यतिरेकेणघटवदितिपरिशेषेप्यनुमानप्रकारोज्ञातव्यः । घटेविशेषणाभाव प्रयुक्तविशेष्याभावेनहेतुव्यतिरेकोद्रष्टव्यः ॥ [४३।६] ऐतिह्यस्यापीति । इहाहुर्वृद्धाइतिप्रवादपारंपर्यमैतिह्यं । यथा वटेवटेवैश्रवणश्च त्वरेचत्वरेशिवः ॥ पर्वतेपर्वतेरामःसर्वत्रमधुसूदनइत्यादि । इदंचप्रायःप्रमाणमेवनभवति । यदिचप्रमाणंतर्हिपदार्थस्मृत्यादि कमपेक्ष्यसंसर्गप्रमाजनकत्वादागमेंतर्भावोवाच्यइत्यर्थः । यथाहुः । जगतिबहुनतथ्यंनित्यमैतिह्यमुक्तंभवतिचयदितथ्यंनाग माद्भिद्यतेतदिति । नन्वर्थापत्त्यादीनामनुमानांतर्भावकथनपरेअर्थापत्त्युपमाभावाइतिवाक्यएवसंभवपरिशेषावपिस्थापयि त्वाऽनुमानांतर्गताइत्यंतर्भावःकुतोनोक्तःसंभवपरिशेषयोरप्यर्थापत्त्यादिवदनुमानांतर्भावेसमानेसतिविप्रकर्षेनिमित्ताभावा दित्यतआह ॥ [४३।१०] अर्थापत्त्यादीनीति । वादिभिः प्राभाकरभाट्टवेदांतिभिः । यथोक्तंकारिकायां । अर्थापत्त्यासहैतानिच त्वार्याहप्रभाकरः । अभावषष्ठान्येतानिभाट्टावेदांतिनस्तथेति ॥ [४३।१०] नतुसंभवादीनीति । बहुभिर्वादिभिःप्रमाणत्वेननांगी कृतानिकिंतुकैश्चिदेवपौराणिकैरितिभावः । संभवैतिह्ययुक्तानितानिपौराणिकाजगुरितिकारिकोक्तेरितिध्येयं ॥ [४३।१६] प्रातीति कमेवेति । आपातप्रतीत्यैवसिद्धमित्यर्थः । अनुमानप्रामाण्योपयुक्तंप्रत्यक्षागमयोर्माहात्म्यंनामकीदृशमित्यतआह ॥ [४६।११] अनुकूलाभ्यामिति । अनुकूलेनतर्केणसनाथेसतिसाधने ॥ साध्यव्यापकताभंगात्पक्षेनोपाधिसंभवइतिवचनादित्यर्थः ।

तथाचप्रतिपक्षोपाध्यादिनिरासकत्वमेवानुमानप्रामाण्योपयुक्तंतयोर्माहात्म्यमितिभावः । ननुयस्मिन्ननुमानेव्याप्तिपक्षधर्म तावत्त्वेनस्वतएवप्रामाण्यंसिद्धमस्तिप्रतिपक्षोपाध्यादिशंकाचनास्तितादृशस्थलेकथंप्रत्यक्षागममाहात्म्यादनुमानंप्रमाणतांया ति । तत्रप्रत्यक्षागमाभ्यांप्रतिपक्षाद्यनिरासेनतयोर्निरुक्तमाहात्म्याभावादित्यतस्तादृशस्थलाभिप्रायेणप्रमाणतामित्येतद्व्या चष्टे ॥ [४३।१२] अर्थनिश्चायकतामिति । तादृशस्थलेप्रत्यक्षागमयोर्निरुक्तमाहात्म्याभावेनतन्माहात्म्यादनुमानस्यप्रामाण्या भावेपितत्संवादेनार्थनिश्चायकत्वमस्तीत्यर्थइत्याहुः ॥ [४३।१३] एतेनेति । प्रत्यक्षागममाहात्म्यादितिवचनेनेत्यर्थः । आगमशब्दस्या निरुक्तत्वाद्व्यूनतापरिहारायाह ॥ [४३।१३] एवमिति । अर्थो तींद्रियोधर्माधर्मादिरूपः ॥ [४३।१३] दृष्टव्येति । आसमंताद्गमयतिधर्माधर्मौ परंपदं । यच्चाप्यतींद्रियंत्वन्यत्तेनासावागमस्स्मृतइत्यनुव्याख्यानानुसारेणद्रष्टव्येत्यर्थः । प्रकृतोपयोगंदर्शयति ॥ [४३।१४] एतेनेति । नैवान्यथातस्यनियतत्वंक्वचिद्भवेदित्यनेनेत्यर्थः ॥७॥ इतिब्रह्मतर्कवाक्यं ॥७॥ [४३।१४] प्रकृतमिति । नचजीवेश्वराभे दएवतात्पर्यमागमस्य तत्रप्रमाणाभावादित्यनेनप्रकृतंसर्वागमानांभेदएवतात्पर्यंनाभेदइतिप्रमेयमित्यर्थः ॥ [४३।१४] उक्तमेवेति । प्र त्यक्षादेरागमस्यप्राबल्येपिनोपजीव्यप्रमाणविरोधेप्रामाण्यमित्यनेनोक्तमुपजीव्यविरोधेनैक्यागमाप्रामाण्यरूपमर्थमित्यर्थः ॥ [४३।१६] उक्तत्वादिति । उपजीव्यविरोधेतुनप्रामाण्यममुष्यचेत्यत्रेत्यर्थः ॥ उपपत्तिसिद्धत्वाच्चेति [४३।१७] । उपजीव्योपजीवकयोर्विरोधेन तावदुपजीवकंविरोधेनोपजीव्यस्याप्रामाण्यंयुक्तं । विषयाभावेस्वस्यैवाप्रामाण्यप्राप्तेरित्युक्तोपपत्तिसिद्धत्वाच्चेत्यर्थः ॥ भेद एवेति । अतत्त्वमसीतिपदविभागमंगीकृत्येत्यर्थः ॥ [४३।२०] अपूर्वतेति । प्रमाणांतराप्राप्तार्थप्रतिपादकत्वलक्षणापूर्वतेत्यर्थः ॥

[४३।२८]यदत्रोक्तमिति । आगमंविनाईश्वरस्यैवासिद्धेरित्यनेनप्रत्यक्षानुमानाभ्यामीश्वरस्यैवासिद्ध्यातद्भेदस्याप्यसिद्धत्वेनभेद वाक्यानांनानुवादकत्वमित्युक्तमित्यर्थः ॥ [४३।२२]भिन्नविषयत्वादिति । प्रमाणांतरस्यजीवेश्वरस्वरूपमात्रविषयकत्वेनतद्भेदा विषयकत्वादितिभावः । (तथात्वेतत्प्रमाणांतरविरोधेनैवाभेदागमाप्रामाण्यप्राप्तेरितिभावः ।) प्रमाणांतरेणसिद्धावित्यनंतरं अनुवादकत्वमितिवर्तते । सा भेदस्यापिप्रमाणांतरेणसिद्धिः ॥ [४३।२४]नकथंचिदिति । कथंचित्कथमपि । अनुपरोधोनेत्यर्थः । उपरोधएवस्यादितियावत् ॥ [४४।१]एवमपीति । भेदवाक्यानामननुवादकत्वपक्षेपीत्यर्थः ॥ [४४।१]स्यादिति । भेदवाक्यानामननु वादित्वेनप्रबलत्वादितिभावः ॥ [४४।२]उभयतःफाशारज्जुरिति । भेदवाक्यानामनुवादकत्वांगीकारेभेदस्यप्रमाणांतरसिद्धे रंगीकार्यत्वेनयेनप्रमाणेनभेदसिद्धिरंगीक्रियतेतत्प्रमाणेनैवाभेदवाक्यस्यबाधस्स्यात् । तत्परिहारायभेदस्यप्रमाणांतरसिद्ध त्वानंगीकारेभेदवाक्यानामननुवादित्वेनप्राबल्यप्राप्त्यातद्विरोधएवाभेदवाक्यानांस्यादित्येवंभेदस्यप्रमाणांतरसिद्धत्वांगी कारेतदनंगीकारेचेत्युभयतःफाशारज्जुर्गलबंधकरज्जुरित्यर्थः । फाशारज्जुरित्येवपाठः । फाशास्याद्गलबंधिकेत्यभिधाना त् । पाशारज्जुरितिपाठेपौनरुक्त्यमर्थासंगतिश्चेतिज्ञातव्यं ॥ [४४।२]भेदएवेति । अतत्त्वमसीतिपदच्छेदमंगीकृत्येत्यर्थः । शंकते । जीवेश्वरभेद[४४।२]इत्यादिना । तर्हिप्रत्यक्षादिनैवविरोधस्स्यादित्याशयेनसिद्धांतीशंकते ॥ [४४।३]किंत्विति । उत्तरमाह ॥ [४४।३]तत्प्र त्यक्षादिकमिति । ननुप्रत्यक्षादीनामप्रामाण्येकथंलोकानांतत्रप्रमाणत्वव्यवहारइत्यतआह ॥ [४४।३]व्यावहारिकत्वमात्रेणे ति । व्यावहारिकार्थविषयकत्वमात्रेणप्रमाणवाचोयुक्तिर्योगोघटना नतुपारमार्थिकविषयकत्वेनेत्यर्थः । अतत्त्वावेदकमप्र

माणमितियावदितिभावः । तत् ऐक्यवाक्यं । तेन भेदप्रमाणेनप्रत्यक्षादिना ॥ **वक्ष्यामइति** । मिथ्यावादित्वचश्रुतेः कथमैक्यस्यसत्यत्वमित्यत्रेत्यर्थः । नन्वप्रमाणसिद्धप्रतिपादकत्वेनेतिवक्तव्यं । कथमप्रमाणसिद्धेनेत्युक्तमित्यतआह ॥ [४४।५] **प्रतिपादितेनेति** । अप्रमाणभूतप्रत्यक्षादिसिद्धेनभेदेनप्रतिपादितेननिमित्तेनेत्यर्थः॥ [४४।६] **भिन्नविषयत्वंस्यादिति** । अप्रमाणभूतप्रत्यक्षादिसिद्धार्थस्याविद्यमानत्वप्राप्त्याप्रमाणभूतवेदप्रतिपादितार्थस्यविद्यमानत्वप्राप्त्याभिन्नार्थविषयकत्वंस्यादित्यर्थः ॥ [४४।६] **द्वयमपीति** । विद्यमानघटावगाहिप्रत्यक्षतत्प्रतिपादकागमवदितिभावः ॥ [४४।६] **अप्रमाणंवेति** । विद्यमानेपिघटेतदभावावगाहिप्रत्यक्षतदभावप्रतिपादकागमवदितिभावः॥ [४४।७] **विभागइति** । प्रत्यक्षादिकमप्रमाणंभेदवाक्यंप्रमाणमितिविभागइत्यर्थः । प्रत्यक्षभेदागमयोर्भिन्नविषयत्वापादनइष्टापत्तिरित्यतआह ॥ [४४।७] **भिन्नविषयत्वेचेति**॥ [४४।७] **परस्परपराहतमिति** । प्रत्यक्षादिकमप्रमाणंभेदवाक्यंप्रमाणमितिविभागेभिन्नविषयत्वप्राप्त्यानुवादकत्वोक्तिव्याघातः । अनुवादकत्वोक्तौचसमानविषयकत्वप्राप्त्याउक्तरीत्याद्वयोःप्रामाण्यस्याप्रामाण्यस्यवाप्राप्त्याप्रामाण्याप्रामाण्यविभागकथनंव्याहतमित्यर्थः । **श्रुते रैक्यश्रुतेः** ॥ [४४।११] **प्रबलस्येति** । तथाचप्रबलैक्यवाक्यप्रामाण्यंदुर्बलप्रत्यक्षादिविरोधाभावसापेक्षंनभवति । नहिहरिणशावाभावमपेक्ष्यासिंहोवनमवगाहते । अतोद्वितीयकोटेरनंगीकारान्नान्योन्याश्रयइतिभावः ॥ [४४।१२] **श्रुतीति** । ऐक्यश्रुतीत्यर्थः । उपहारः प्रापणं । स्वातंत्र्येण प्रत्यक्षाद्यनपेक्षतया । स्वविषये भेदप्रतिपादने । कुतइत्यतआह ॥ [४४।१६] **तस्येति** । ऐक्यवाक्यस्येत्यर्थः । एतदित्युक्तंविवृणोति ॥ [४४।१७] **प्रमाणांतरेति** । इतिविपरीतमुच्यतइत्यन्वयः ॥ [४४।१८] **प्रसिद्धेति** । उपक्रमोपसंहारावभ्यासोपूर्वताफ

लमित्यादिप्रमाणप्रसिद्धेत्यर्थः । अपूर्वमित्यस्यव्याख्यानंप्रमाणांतराप्राप्तमिति । प्रमाणांतरापूर्वमितिपाठेपूर्वप्रमाणांतरेणा
प्रतिपन्नमित्यर्थः । अन्येषांवाक्यानां भेदवाक्यानां । एवमुत्तरत्रापि । तदेकवाक्यत्वात् ऐक्यवाक्यैकवाक्यत्वात् । सार्व
ज्ञदुःखादेस्सत्वत्वेजीवेश्वरयोरैक्यायोगान्नेहनानेत्यादौतन्निषेद्धुंभेदकधर्मप्रतिपादनेनभेदप्रतिपादकानांयस्सर्वज्ञः योनिम
न्येप्रपद्यंतइत्यादीनामैक्यप्रतिपादनायोपयुक्तत्वेनैक्यवाक्यैकवाक्यत्वंद्रष्टव्यं । एतदुच्यते प्राबल्यमुच्यते ॥ [४४।२२] तदविरो
धइति । प्रमाणांतराविरोधेसत्यपूर्वनामाश्रित्यप्राबल्यमुच्यतइत्यर्थः ॥ अविचारेणेति । आपाततःप्रतीतस्येत्यर्थः । त
दर्थस्य तेषांवाक्यानामर्थस्यशून्यजगत्कारणत्वस्य । अन्येषां सदेवसोम्येत्यादिवाक्यानां । तदेकवाक्यतांइदंवाइत्यादिशू
न्यजगत्कारणत्वप्रतिपादकवाक्यैकवाक्यतां ॥ [४४।२४] अविशेषादिति । प्रमाणांतरविरोधेपिप्राबल्यहेतोरपूर्वतायाअविशिष्ट
त्वात् । इत्यादीनांसर्वागमानामित्यन्वयभ्रांतिंवारयितुमाह ॥ [४४।२४] इत्यादीनामर्थस्येति ॥ [४४।२५] एतेनेति । अतिप्रसंगस्थलेइदं
वाइत्यादिवाक्यार्थस्याविचारेणप्रतीयमानत्वकथनेनेत्यर्थः । तथाचेदंवाइत्यादिवाक्यवदैक्यवाक्यस्यापिसर्वप्रमाणविरुद्धत्वा
न्नापूर्वतामात्रेणप्राबल्यमित्यभिप्रायः । शंकते ॥ [४४।२६] प्रमाणांतरेणेति ॥ [४५।१] विनाशित्वादिति । नचसमवायिकारणनाशप्रयुक्त
कार्यनाशेव्यभिचारःशंक्यः । तत्रापिसमवायिकारणावयवादेरेवकस्यचिदवशिष्टत्वेनसाध्यस्यापिसत्त्वादित्याहुः । घटादिका
र्यमादायसिद्धसाधनतापरिहारायादिकार्यमित्युक्तं । सोत्प्रासं सोल्लुंठं । सोपहासमित्यर्थः ॥ [४५।२] अनुवादित्वंस्यादिति ।

युक्तिसिद्धार्थप्रतिपादकत्वादित्यर्थः । ननुकथमनेनयुक्तिविरोधस्याननुवादित्वेहेतुत्वमुप(यात)पादितमित्यतआह ॥ ततश्चे
ति । युक्तिसिद्धत्वेऽनुवादित्वप्रसंगादित्यर्थः ॥ [४५।७] विरोधिनीयुक्तिरिति । इदंवाइत्यादिवाक्यानांयद्युक्तिविरोधउच्यते
साशून्यस्य जगत्कारणत्वविरोधिनीविमतोविनाशःसच्छेषइत्यादिकायुक्तिरित्यर्थः ॥ [४५।७] साधिकामिति । इदंवाइत्यादि
वाक्यानामनुवादित्वार्थशून्यजगत्कारणत्वसाधिकामित्यर्थः ॥ [४५।८] अननुवादित्वस्यहेतुरिति । इदंवाइत्यादिवाक्याना
मितिशेषः । तथाचसाधकयुक्तेराभासत्वेइदंवाइत्यादिवाक्यार्थस्यप्रमाणांतरासिद्धत्वप्राप्त्यायुक्तिविरोधोऽननुवादित्वस्यहे
तुर्भवत्येवेत्यर्थः ॥ [४५।९] यदभिप्रेतमिति । एतेनतत्त्वमसीत्यादिवाक्यानामपिजीवब्रह्मैक्यमविचारेणैवार्थतयाप्रतीयतइतिसू
चयतीत्युक्तत्वादितिद्रष्टव्यं । ननुतर्ह्यैक्यागमस्यप्रत्यक्षादिविरोधएवस्यादित्यतआह ॥ [४५।१०] प्रत्यक्षादेश्चेति ॥ किंचिदिति ।
विषयापहारमित्यर्थः । पुनरुक्तिपरिहारायोपसंहारव्याजेनेत्युक्तं ॥ [४५।११] प्रागुक्तमेवेति । नचाप्रमाणसिद्धेनानुवादित्वंप्रमाण
स्यभवतीतिप्रागुक्तमेवेत्यर्थः ॥ [४५।१३] अप्रमाणसिद्धत्वइति । अप्रमाणभूतप्रत्यक्षादिसिद्धत्वइत्यर्थः । भेदावगाहिप्रत्यक्षादेर
प्रामाण्यइतियावत् ॥ [४५।१४] अतश्चेति । प्रत्युताभेदवाक्यानामेवदौर्बल्यंभेदवाक्यानामेवप्राबल्यमित्यर्थः ॥ [४५।१६] परिहृतामपी
ति । बहुप्रमाणसंवादश्चदार्ढ्यहेतुरेवेत्यनेनेत्यर्थः । तर्हिपुनरुक्तिरित्यतउक्तं ॥ [४५।१६] अधिकमिति ॥ [४५।१६] वैकुंमिति । तथासत्य
भ्यासादेरपीत्यनेनेतिशेषः ॥ [४५।१७] नोपेक्षेति । द्वितीयादिप्रमाणसंवादस्येतिशेषः । अनेन दार्ढ्यहेतुत्ववचनेन । वैयर्थ्यं सं

वादस्येतिशेषः ॥ [४५।१८] **विशेषेति** । अतिशयेत्यर्थः ॥ [४५।१८] **अन्यथेति** । विषयेविशेषानाधायकस्यापिद्वितीयादिप्रमाणस्यदार्ढ्यहेतुत्वइत्यर्थः । तत्स्यात् दार्ढ्यहेतुत्वंस्यात् । विषयेऽतिशयानाधायकत्वाविशेषादितिभावः ॥ [४५।१९] **तन्मात्रगोचरस्यापीति** । पूर्वप्रमाणगृहीतार्थमात्रविषयकस्यापीत्यर्थः । विषयेविशेषानाधायकस्यापीतियावत् । दार्ढ्यहेतुत्वं निःशंकप्रमितिहेतुत्वं । तदनंगीकारे संवादस्यदार्ढ्यहेतुत्वानंगीकारे । ननुअभ्यस्यतइत्यभ्यासइतिकर्मव्युत्पत्त्याएकप्रकारेणासकृदुच्चार्यमाणवाक्यस्याभ्यासपदार्थत्वेऽभ्यासस्यएकप्रकारासकृदुच्चार्यमाणवाक्यस्याप्रामाण्यंस्यादितिवाक्यस्योपेक्षणीयत्वरूपमप्रामाण्यमेवापाद्यं । नत्वप्रामाण्यहेतुत्वमित्यन्योपेक्षणीयताहेतुत्वमसंगत्वापत्तेरतोव्याचष्टे ॥ [४५।२०] **अभ्यसनमभ्यासइति** । वारंवारमुच्चारणमित्यर्थः । तथाचभावव्युत्पत्तिरेवाभिप्रेता । कर्मव्युत्पत्त्यावाक्यंनग्राह्यमितिभावः । एवंचवारंवारंवाक्योच्चारणस्यवाक्योपेक्षणीयताहेतुत्वेउच्चार्यमाणस्यवाक्यस्योपेक्षणीयत्वमर्थात्प्राप्तमेवेतिज्ञातव्यं॥ [४५।२०] **निगमनमिति**।अत्रापिनिगमनपदेनोपसंहरणमेवग्राह्यं । नतूपसंह्रियमाणंवाक्यं येनासंगतिस्स्यादित्यर्थः॥ [४५।२२] **प्रतितंत्रसिद्धांतइति**। स्वतंत्रएवसिद्धोर्थःपरतंत्रैर्निवारितः। प्रतितंत्रोयथान्यायेसर्वज्ञस्यप्रमाणतेतिकारिकानुसारेणतल्लक्षणंद्रष्टव्यं । असिद्धं अज्ञातं । कुतइत्यतआह ॥ [४५।२३] **ऐक्यस्येति** । नन्वैक्यस्यदुर्बोधत्वेकस्यापिप्रथमवाक्येनैक्यबोधोनस्यात् । ततश्चयस्यासिद्धमितिविशेषोक्तिर्नस्यादित्यतआह ॥ [४५।२३] **पुरुषाणांचेति** । मृदुशब्देनसूक्ष्ममुच्यते । अधिमात्राधिमात्रतरशब्दौस्थूलस्थूलतरवाचिनौ । आदिपदेनस्थूलतमग्रहणं ॥ [४५।२४] **भेदभिन्नत्वादिति** । भेदभिन्नबुद्धिमत्त्वादित्यर्थः । तथाच प्रथमवाक्येनबोधोमृदुबुद्धीनामेवभविष्यति।

ननुमध्यादिबुद्धिमतां । अतस्तदर्थंद्वितीयादिवाक्यमपेक्षितमितिभावः। ननुप्रत्यक्षादिनाऽनिश्चितोभेदोवाक्येनकथंनिश्चीय तइत्यतआह ॥ [४५।२४] प्रत्यक्षादेरिति ॥ [४५।२४] एतेनेति । प्रत्यक्षादिनाभेदोयेननानिश्चितइतिवचनेनेत्यर्थः ॥ [४५।२४] अनधिगतेति । भेद वाक्यानांप्रत्यक्षाद्यनिश्चितभेदप्रतिपादकत्वादित्यर्थः ॥ [४६।१] एवंतर्हीति। अभेदेतात्पर्याभावइत्यर्थः॥ [४६।१] विषयस्येति । प्रतिपा द्यार्थस्येत्यर्थः॥ [४६।१] एकवाक्यतानस्यादिति। तस्य। अर्थैक्यगर्भत्वादितिभावः। यथोक्तंजैमिनिना। अर्थैकत्वादेकंवाक्यमिति। ननुसदागमैकविज्ञेयमित्यनेनसमतीतक्षराक्षरत्वादिविशिष्टेविष्णावेवसर्वसदागमानांमहातात्पर्यस्योक्तत्वादत्रपुनस्सर्वोत्तमत्व एवमहातात्पर्योक्तौतद्विरोधस्स्यादित्यतआह ॥ [४६।२] यदुक्तमिति । समतीतक्षराक्षरत्वादिविशिष्टेविष्णौसर्वसदागमानांमहाता त्पर्योक्तौतत्सर्वोत्तमत्वएवमहातात्पर्यमुक्तंभवतीतिभावः । ननुविष्णोःसर्वोत्तमत्वेसर्वसदागमानांमहातात्पर्यप्रकारःकथमि त्यतआह ॥ [४६।२] तत्प्रकारश्चेति ॥ [४६।२] प्रागेवेति । इयंमाताअयंपितासुरूपोसीत्यादिवाक्यव्याख्यानावसरे अनेनैतांवेदवाक्यानां योजनांसूचयतीत्यादिनाऽस्माभिर्वर्णितइतिनात्रपुनःप्रदर्शितइतिभावः । ननुअनेनैतांवेदवाक्यानांयोजनांसूचयतीत्यादिनो क्तप्रकारेणसमतीतक्षराक्षरत्वादिलक्षणेविष्णौमहातात्पर्यप्रकारोयोजयितुंशक्यतइतितदेवनियामकमित्याशंक्यनिराकरोति । [४६।३] नापीति ॥ [४६।४] अन्यथापीति । अत्राद्वैतवादिनोवदंति । मंत्रब्राह्मणलक्षणस्तावद्वेदइत्यादिनोक्तप्रकारेणसर्वस्याप्यागमस्य जीवेश्वराभेदएवतात्पर्यमित्यपियोजनायामयाकर्तुंशक्यत्वादितिभावः ॥ [४६।४] उक्तत्वादिति । सर्वोत्तमंज्ञापयंतिमहातात्पर्य मत्रहीतितत्रोक्तत्वादितिभावः। वासुदेवेन वसुदेवपुत्रेणश्रीकृष्णेन।उक्तं गीतायां।अक्षरएवचेत्यत्रैवकारचशब्दयोरेकत्रप्रयोगो

नुपपन्नः।एवकारस्यान्यव्यावर्तकत्वाच्चशब्दस्यान्यसमुच्चायकत्वादित्यतोभिन्नक्रमेणएवकारस्यान्वयंदर्शयति ॥ द्वावेवेति । ननुक्षराक्षरात्मकस्यसर्वस्याप्रत्यक्षत्वादिमावितिकथमुक्तमित्यतआह ॥ प्रमितौविति । प्रमाणप्रमिताविवित्यर्थः । अक्षरशब्दवाच्यायारमायास्सरस्वत्यादिस्त्रीणांचक्षरशब्देनसंग्राह्यत्वात्तासांचपुरुषत्वाभावात्पुरुषपदंव्याचष्टे ॥ पुरुषौचेतनाविति।नचपुंवच्छक्तिमत्त्वात्तासांपुरुषशब्देनग्रहणोपपत्तेश्चेतनपरतयाव्याख्यानंकुतःकार्यमितिवाच्यं। तासांपुंवच्छक्तिरहितत्वात् । एकस्याःश्रियएवतच्छक्तिमत्त्वात् । यथोक्तंछांदोग्यभाष्ये । पुँल्लिंगेनोच्यतेश्रीश्चपुंवच्छक्तिमतीक्वचिदिति ॥ द्वावेवेत्यस्योपपत्तयइति । लोकइत्यनुक्तावुत्तमःपुरुषस्त्वन्यइत्युत्तरत्रोत्तमस्यतृतीयस्यापिपुरुषस्यवक्ष्यमाणत्वेनद्वावेवेत्येतदनुपपन्नंस्यादितिभावः । ननुविष्णोरपिलोकगतत्वात्कथंलोकइत्यनेनद्वावेवेत्यवधारणोपपत्तिरित्यतआह ॥ ईशितव्यवर्गइति । प्रेर्यवर्गे अस्वतंत्रवर्गइत्यर्थः । वर्गस्समूहः । ब्रह्माशिवस्सुरेशाद्याःशरीरक्षरणात्क्षराइत्यादिप्रमाणानुसारेणोक्तं ॥ ब्रह्मादयोजीवाइति । लक्ष्मीरक्षरदेहत्वादक्षरेतिप्रमाणानुसारेणाह ॥ महालक्ष्मीरिति। श्रुत्यादीति। तथाचपरमात्मेत्युदाहृतइत्यस्यपरमात्माव्यवस्थितइतितैत्तिरीयोपनिषदुदाहृतइत्यर्थोद्रष्टव्यः। ननूत्तमःपुरुषइतिप्रतिपादकोवेदःशब्दसाम्येनचेत्तर्हिपरमपुरुषइत्युदाहृतइतिभवेत्। अर्थसाम्येनचेत्परमचेतनइत्युदाहृतइतिभवेत्। तथाचपरमात्मेत्युदाहृतइत्ययुक्तमित्याशंक्यार्थसंमतिरियमित्याशयेनाह॥आत्मशब्दोहीति। सर्वोपलक्षणमिति । महरादिसर्वलोकोपलक्षणमित्यर्थः । अन्यथा लोकत्रयमात्रविवक्षायांमहरादिलोकस्थितजनोत्तमत्वेयुक्तिर्नस्यादितिभावः । भगवान्सर्वलोकोत्तमः । धारणपोषणादिकर्तृ

त्वादितियुक्तिमभिप्रेत्यतत्रव्याप्तिमुपपादयति ॥ योऽहमीश्वरस्यांते ॥ तदाविष्टस्य लोकत्रयाविष्टत्य ॥ नाशप्रसंगइति । द

ह्यमानगेहांतर्गतवदितिभावः ॥ [४६।१०] ऐश्वर्यादिति । अघटितघटकसामर्थ्यादित्यर्थः । अग्निस्तंभनविद्यावतोदाहाभाववदितिभा

वः ॥ [४६।११] सप्रमाणकमाहेति । तथाचयस्मात्क्षरमित्यनेनाहंपुरुषोत्तमशब्दवाच्यः । समतीतक्षराक्षरत्वात् । व्यतिरेकेणघटव

दितिप्रमाणमुक्तमितिज्ञातव्यं । अपिचेत्युभयोरपिसमुच्चयार्थकत्वादेकत्रोभयवैयर्थ्यमित्याशंक्याह ॥ [४६।११] क्षरंचेत्यन्वयइति ।

उपसंहारेसर्वश्रुतिस्मृतीनामितिवक्ष्यमाणत्वात्तदनुसारेणाह ॥ [४६।११] लोकेपौरुषेयागमइति ॥ [४६।११] अत्रेति । आत्मनःक्षराक्षरोत्तम

त्वरूपार्थइत्यर्थः । आत्मनः अर्जुनंप्रत्युपदेष्टुःस्वस्यकृष्णस्य ॥ [४६।१२] फलमाहेति । उपक्रमोपसंहारावभ्यासोपूर्वताफलं ॥ अर्थ

वादोपपत्तीचलिंगंतात्पर्यनिर्णयइतिवचनेन । फलस्यतात्पर्येलिंगत्वावगमादितिभावः ॥ [४६।१२] संज्ञात्वेनेति । रूढत्वेनेत्यर्थः । त

थाचयोमामेवं यस्मात्क्षरमतीतोहमित्यादिनोक्तरीत्यायोगवृत्त्यैव पुरुषोत्तमशब्दवाच्यंजानाति । नत्वश्वकर्णादिशब्दवद्रूढ्ये

त्यर्थोद्रष्टव्यः ॥ [४६।१२] संमोहेति। भगवत्पुरुषोत्तमत्वापारमार्थिकत्वज्ञानस्यमिथ्याज्ञानत्वादितिभावः।ननुयोगवृत्त्याभगवतःपुरुषो

त्तमशब्दवाच्यत्वरूपप्रमेयविशेषंजानतःकथंसर्वज्ञत्वमित्यतआह ॥ [४६।१३] अस्यैवेति । भगवत्पुरुषोत्तमत्वस्यैवेत्यर्थः । ननुसर्वभावे

नेत्यस्यसर्वत्वेनेतियद्यर्थस्तर्ह्युत्तमःपुरुषस्त्वन्यइत्यादिविरोधस्स्यादतोव्याचष्टे ॥ [४६।१३] सर्वप्रकारेणेति । पितामातासुहृद्बंधुर्भ्रा

तापुत्रस्त्वमेवमे ॥ विद्याधनंचकामश्चनान्यत्किंचित्त्वयाविनेतिप्रमाणोक्तरीत्यापितृत्वादिनासर्वप्रकारेणेत्यर्थः ॥ [४६।१४] ततःकि

मितीति । सर्वविच्चभजनमात्रयोरेवाफलत्वादितिभावः । ननुबुद्धाबुद्धिमानित्ययुक्तं बुद्ध्वेतिक्त्वाप्रत्ययेनबुद्धेःपूर्वकालीन

त्वमुच्यते बुद्धिमानित्यपरकालीनत्वं तथाचैकस्याएवबुद्धेःकथंपौर्वापर्यमित्यतआह ॥ [४६।१४] बुद्धिमान्परोक्षज्ञानीति । भूम
निंदाप्रशंसासुनित्ययोगेतिशायने॥ संबंधेस्तिविवक्षायांभवंतिमतुपादयइतिवचनेनप्रशंसायांमतुपोविधानात् परोक्षज्ञानापेक्ष
याऽपरोक्षज्ञानस्यप्रशस्यत्वाद्बुद्धिमानित्यपरोक्षज्ञानीकथ्यतइत्यर्थः । तथाचबुद्ध्वेत्यस्यपरोक्षतोज्ञात्वेत्यर्थोद्रष्टव्यः । तथाच
बुद्ध्योर्भेदाद्युक्तंपौर्वापर्यमितिभावः । ननूदाहृतभगवद्वचनेनविष्णोस्सर्वोत्तमत्वेसदागमानांकथंमहातात्पर्यंप्रतीयतइत्यतस्तद
र्शयति ॥ [४६।१५] अत्रेहीति । अत्रसर्वविस्त्वंनामसर्वशास्त्रार्थवित्त्वं। पुरुषोत्तमत्वज्ञानिनः सर्वशास्त्रार्थवित्त्वंतुपुरुषोत्तमत्वस्यसर्व
शास्त्रार्थत्वंविनानसंभवति । तच्चकर्मादिपरसर्वागममहातात्पर्यंविनानसंभवतीत्येवंपौरुषेयापौरुषेयाणांसर्वागमानांविष्णोस्स
र्वोत्तमत्वएवमहातात्पर्यमितिस्फुटंप्रतीयतइत्यर्थः। देवानामितिकर्तरिषष्ठी। देवैरित्यर्थः॥ [४६।१६] देवःस्तुत्यइति। दिवुक्रीडाविजिगी
षाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिष्वितिधातुव्याख्यानादितिभावः । तदन्यदित्यस्यार्थमाह ॥ [४६।१७] तदन्यत्रेति ।
[४६।१७] प्रतिपत्त्यर्थत्वादिति । अंतःकरणशुद्धिद्वारेणेत्यर्थः । सर्वागमानामित्यस्यपुरुषार्थइत्यत्रापिसंबंधः षष्ठ्यर्थसंबंधश्चसाध्य
साधनभावइत्यभिप्रेत्याह ॥ [४६।१८] सर्वागमसाध्यइति ॥ [४६।१८] उक्तमेतदिति । विष्णोःसर्वोत्कर्षेसर्वागमानांतात्पर्यमित्युक्तमेतत्प्रमे
यंसत्यंनमिथ्येत्यर्थः । उत्कर्षइत्यत्रावधारणार्थकचशब्दस्य तुशब्दस्यान्यत्रेत्यत्र परशब्दस्यमुख्यंतात्पर्यअवांतरंतात्पर्यमि
त्युभयत्रसंबंधइत्यभिप्रेत्ययोजनामाह ॥ [४६।१९] सर्ववेदानामित्यादिना । भेदे शास्त्रभेदे ॥ [४६।२२] उपाध्यंतरेति । विषयप्रयोजनै
क्यव्यतिरिक्तस्यनिमित्तांतरस्याभावादित्यर्थः ॥ [४६।२२] वेदशास्त्रादिति । वेदयंतीतिव्युत्पत्त्यावेदशब्दवाच्यश्रुतिस्मृतिलक्षण

शास्त्रादित्यर्थः । मोक्षार्थत्वे मोक्षप्रयोजनकत्वे ॥ [४६।२५] **भेदप्रसंगादिति** । अर्थैक्याभावेनवाक्यभेदप्रसंगादित्यर्थः । तथाभा
वं महातात्पर्यगोचरत्वं ॥ [४६।२६] **अन्यथेति** । अभिप्रेतप्रयोजनहेतुभूतस्यविषयत्वानंगीकारइत्यर्थः ॥ [४६।२६] **संबंधेति** । जन्यजनकभा
वरूपसंबंधेत्यर्थः ॥ [४६।२६] **अनुपादेयत्वप्रसंगादिति** । वक्तृश्रोत्रोरभिमतमनन्यसाध्यंफलमधिकृत्यतद्धेतुभूतंप्रमाणांतराप्रा
प्तमर्थंप्रतिपादयतांवाक्यानांसमूहस्यैवशास्त्रत्वादितिभावः । तथाविधः सर्वोत्कृष्टः ॥ [४७।२] **मन्यमानानामिति** । नस्वर्गादेः
फलांतरमित्यादिवचनानुसारेणेतिशेषः । ननुतदर्थमित्येवोक्तावपितादर्थ्यस्यप्रतीतत्वाच्चतुर्थ्यनुपपत्तिरित्यतआह ॥ [४७।३] **सचा**
सावर्थश्चेति । केचित्तुतस्यार्थस्तदर्थइत्यन्यथाप्रतीतिवारणायव्याचष्टे । सचासावितीत्याहुः । ननुसंसारेपरिवर्तमानानांत
द्दशायांपरानंदरूपमोक्षाभावात्परानंदोमोक्षएवेत्येतद्बाधितार्थमतोव्याचष्टे ॥ [४७।४] **उद्देश्यइतिशेषइति** । परानंदरूपमोक्षएव
प्रार्थ्यइत्यर्थः । ननुपरिवर्तंतामितिकथं । नचवाच्यंपरीत्युपसर्गपूर्वकाद्वृतुवर्तनेअस्माद्धातोर्लटःशतृशानचावप्रथमासमानाधि
करणइतिसूत्रेणपरस्मैपदिनिलटःशत्रादेशेशकारऋवर्णयोर्लोपे वृत्अत्इतिजाते गुणेतस्यरपरत्वे वर्त्अत्इतिजाते उगिदचां
सर्वनामस्थानेधातोःअधातोरुगितोनलोपिनोंचतेश्चनुमागमस्यादितिसूत्रेणउगित्त्वान्नुमागमे उम्इत्यस्यलोपेभिदचोंत्यात्प
रः । अंत्यादचःपरोमित्स्यादितिसूत्रेणमित्त्वादंतेजातेवर्तन्त्इतिजाते संयोगांतस्यलोपइतितकारलोपेपरिवर्तन्इतिभवतित
स्यषष्ठीबहुवचनंपरिवर्ततामितिभवतीति । वृत्धातोर्नित्यात्मनेपदित्वात् । तथाचपरीत्युपसर्गपूर्वकात्वृतुधातोर्लटःशतृशा

नचावितिसूत्रेणात्मनेपदिनिलटःशानजादेशेशकारचकारयोर्लोपेगुणेरपरत्वे आनेमुक् । आनेपरेअदंतांगस्यमुगागमस्स्या दितिसूत्रेणमुक्इत्यागमेउक्इत्यस्यलोपेआद्यंतौटकितावितिकित्त्वादंतेजातेपरिवर्तम्आनपरिवर्तमानेतिआत्मनेपदिनिरूपं भवति । तस्यषष्ठीबहुवचनंपरिवर्तमानानामित्येवभवेन्नतुपरिवर्ततामित्यतआह ॥ [४७।४] व्यत्ययोबहुलमितिपरस्मैपदमिति। धातूनांपरस्मैपदित्वात्मनेपदित्वयोर्बहुलंव्यत्ययोभवतीतिसूत्रार्थः। एवंचात्मनेपदिधातोरपिव्यत्ययेनपरस्मैपदित्वमाश्रित्यप रिवर्ततामित्युक्तमितिभावः॥[४७।५] कर्मसाध्योवेति। कर्मणैवहिसंसिद्धिमास्थिताजनकादयइतिवचनादितिभावः। उत्तरत्रयस्यप्र सादादितिश्रुतौमोक्षस्यविष्णुप्रसादलभ्यत्वंकथ्यतेतदनुसारेणप्रतिज्ञावाक्यस्यापितथैवाभिप्रायमाह॥ [४७।६] विष्णुप्रसादेनलभ्य तइति॥अन्यथामोक्षस्यविष्णुप्रसादालभ्यत्वएववाक्यमुदाहर्तव्यंस्यान्नतुतल्लभ्यत्वे।तथाचयस्यप्रसादादितिवाक्योदाहरण मयुक्तंस्यादितिभावः।स्वांतनुं स्वकीयांतनुं।प्रकाशयतिअपरोक्षज्ञानविषयोभवतीत्यर्थः।परमोविचिंत्यः।परमत्वेनविचिंत्यइत्य भिप्रेत्यसर्वोत्कृष्टतयाज्ञातव्यइत्युक्तं। प्रीत्यर्थमिति प्रसादस्यात्रमोक्षसाधनत्वाकथनात्पूरितमितिज्ञातव्यं। स्वांतनुमित्यस्यैव विवरणं॥ [४७।८] अविद्यावृतंस्वरूपमिति। जीवस्वरूपमित्यर्थः॥ [४७।९] एवंमुत्तरत्रापीति। उत्पत्तिस्थितिसंहाराइतिवाक्येअज्ञानांज्ञा नदइतिवाक्येबंधकोभवपाशेनेतिवाक्येचेत्यर्थः।प्रसादंविनामोक्षदातृत्वज्ञानदत्वभवपाशमोचकत्वाद्यसंभवात्तेष्वपिवाक्येष्व र्थात्प्रसादोऽवगम्यतइतिज्ञातव्यमित्यर्थः । उत्पत्तिकर्तृत्वादेःप्रत्येकंलक्षणत्वेसृष्टिकर्तृत्वस्यविरिंचे संहारकर्तृत्वस्यरुद्रे मोक्ष दातृत्वस्यवायौविष्णुर्हिदातामोक्षस्यवायुश्चतदनुज्ञयेतिवचनात् अज्ञानबंधदातृत्वयोर्दुर्गादेव्या मतिव्याप्तिपरिहारार्थमेक

राडित्युक्तमित्यर्थः। तथाचस्वातंत्र्येसत्युत्पत्तिकर्तृत्वंस्वतंत्रत्वेसति संहारकर्तृत्वमित्यादिरूपेणलक्षणस्यविवक्षितत्वान्नविरिंचा दिष्वतिव्याप्तिरितिभावः । सृष्ट्याद्यष्टकर्तृत्वस्यविशिष्टस्यैवलक्षणत्वेऽतिव्याप्त्यभावात्स्वरूपकथनार्थंतद्विशेषणमितिज्ञात व्यं॥ अविद्यानिवृत्तिं[४७।१०]दइति।लिंगशरीरभंगदइत्यर्थः। आनंददइतिपृथगुक्तत्वादितिभावः॥ शक्तिं[४७।१०]दइति । जीवस्यानं दानुभवस्वरूपत्वेनानागंतुकत्वाच्छक्तिदइत्युक्तमितिभावः । भवपाशाच्चमोचकइतिपृथगुक्तत्वादाह ॥ [४७।१०]अयमेवार्थइति।आ नंदानुभवशक्तिदइत्ययमेवार्थइत्यर्थः। कर्मादिनेत्यादिपदेनश्रवणादिग्रहणं॥नासौमोक्षं[४७।११]साधनमिति। कर्मणात्वधमःप्रोक्तः प्रसादःश्रवणादिभिः। मध्यमइत्युक्त्वा प्रसादात्त्वधमाद्विष्णोःस्वर्गलोकःप्रकीर्तितः। मध्यमाज्जनलोकादिरित्युक्तत्वान्ना सौकर्मादिसाध्यःप्रसादोमोक्षसाधनमित्यर्थः॥ [४७।११]परमंप्रीतिरेवेति । अत्युत्तमप्रसादएवेत्यर्थः । ज्ञानसंपत्त्याप्रसादस्तूत्त मोमतइत्युक्त्वाउत्तमस्त्वेवमुक्तिदइत्युक्तत्वादितिभावः॥ [४७।१४]प्रतिपत्तिरिहेति । अभेदज्ञानादप्रीतिरित्युत्तरवाक्येज्ञानपदे नान्यथोपासनारूपाप्रतिपत्तिरेवविवक्षिता। कुतइतिचेत् । भृत्यस्यराज्ञा शिष्यस्यगुरुणालोकेऽभेदज्ञानाभावात् । अतस्त त्रज्ञानशब्देनप्रतिपत्तेरेवग्राह्यत्वात्तदनुसारेणात्राप्यन्यथोपासनारूपाप्रतिपत्तिरेवज्ञानशब्देनोच्यतइत्यर्थः । प्रीयते प्रीतिमा न्भवति ॥ [४७।१६]निमित्ताभावादिति । उत्तमेनाधमंप्रतिअभेदप्रतिपत्तौकृतायांअधिकगुणारोपणेनतन्मानितत्वंयथाऽधमस्य प्रीतौनिमित्तमस्तितथात्रनिमित्ताभावादित्यर्थः॥ [४७।१७]येनेति । अभेदप्रतिपत्तेःकर्तव्यत्वेनेत्यर्थः ॥ [४७।१७]प्रतिपत्त्यर्थमपीति । अविद्यमानोपास्त्यर्थमपीत्यर्थः॥ [४७।२०]नैवमिति । भयमत्सरादिदोषशून्यत्वेनतदभेदप्रतिपत्तौकृतायांतदप्रीतिर्नभवतीत्यर्थः॥

[४७।२०] तथांसतीति । तस्याप्रीत्यभावइत्यर्थः ॥ [४७।२०] अपराधपरिहारस्यापीति । अपराधसहस्राणिक्रियंतेहर्निशंमया । तानि सर्वाणिमेदेवक्षमस्वमधुसूदनेत्यादिनेत्यर्थः । नन्वीश्वरस्याप्रीत्यादिरूपबुद्धिवैषम्यसद्भावेसर्वात्मनःसमदृशइत्यादिभागवतवाक्यविरोधइत्यतआह ॥ [४७।२१] अतएवेति । अपराधपरिहारकरणान्यथानुपपत्त्याऽप्रीतिसद्भावादेवेत्यर्थः । सर्वात्मनइत्यादेरेवप्रकृतोपयोगित्वेपितत्कृतमित्यत्रतच्छब्दपरामर्श्यदर्शयितुंनिंदनेतिपूर्वश्लोकोदाहरणमितिज्ञातव्यं । प्रधानपरयोः देहात्मनोः । तत्कृतं निंदनादिकृतं । मतिवैषम्यं अप्रीत्यादिरूपं ॥ [४७।२२] भक्तकृतेति । यदिभक्तःकदाचित्प्रमादादसुरावेशप्रयुक्तद्वेषेणनिंदनाद्यपराधंकरोतितर्हितदीयांपूर्वतनींभक्तिमेवापेक्ष्यान्यावेशकृतंतात्कालिकद्वेषकृतंनिंदनादिकमनिरूप्यतस्मिन् प्रीयतइत्येवनतुसर्वैरप्यपराधेकृतेसतीत्यर्थः । अतएवशिशुपालदंतवक्रविषयएवसप्तमस्कंधेइदंश्लोकद्वयंप्रवृत्तमित्यवगंतव्यं । भक्ताएवहितेपूर्वंशिशुपालादयःशापादेवविद्वेषिणइतिप्रसिद्धेरितिभावः ॥ [४७।२२] एतेनेति । अभेदेनप्रतिपत्तावीश्वरस्याप्रीतिकथनेनेत्यर्थः । प्रतिपत्त्यर्थतां उपासनार्थतां ॥ [४७।२३] गुणोत्कर्षज्ञानादेवेति । नकर्मादिनेत्यर्थः ॥ [४७।२४] कर्मकरेभ्यइति । सेवाकारिभ्योभृत्येभ्यइत्यर्थः ॥ [४७।२४] इतिचेति । शेषइतिवर्तते ॥ [४७।२४] तेनेति । तदभिप्रेतध(ना)रादिसर्वदानेन । तेषां राज्ञां । तत्र गुणोत्कर्षवक्तरि । ननुकर्मणायमभिप्रैतिससंप्रदानं । दानकर्मणायमभिप्रैतिससंप्रदानसंज्ञस्स्यादितिसूत्रेणसंप्रदानसंज्ञायां संप्रदानेचतुर्थीतिसूत्रेणविप्रायगांददातीत्यत्रविप्रायेतिवत्वदतेइतिचतुर्थीस्यान्नतुवदतइतिषष्ठीत्यतआह ॥ [४७।२५] संप्रदानत्वस्येति । विवक्षातःकारकाणिसंभवंतीतिवचनादितिभावः ॥ [४७।२५] शेषविवक्षयेति । तथाच । शेषे उक्तकारकेभ्योन्यःशे

षस्तद्विवक्षायांषष्ठीस्यादितिसूत्रेणवदतःषट्कारकभिन्नत्वस्यविवक्षिततत्वाद्रजकस्यवस्त्रंददातीत्यत्ररजकस्येतिवदत्रापिषष्ठीयु
क्तेत्यर्थः। केचित्तुसंप्रदानत्वस्याविवक्षिततत्वादित्यस्यकर्मणायमभिप्रैतिससंप्रदानं । स्वत्वपरित्यागेनपरस्वत्वापादनंदानं ।
तत्कर्मणायमभिप्रैतिससंप्रदानसंज्ञस्स्यादितिसंप्रदानत्वविधायकस्यकर्मणेतिसूत्रस्याविवक्षिततत्वात्वक्तुमिष्टत्वाभावान्महाभा
ष्यकारेणप्रत्याख्याततत्वादितियावदित्यर्थः। यथोक्तंमहाभाष्ये । कर्मणायमभिप्रैतीत्यत्रायंयोगोनशक्योवक्तुं खंडिकोपा
ध्यायःशिष्यायचपेटिकांददातीत्यादिप्रयोगेशिष्येस्वत्वपरित्यागादिरूपसंप्रदानत्वासंभवाच्छिष्यायेतिचतुर्थीनश्रूयेततीत्या
हुः। यद्वावदतइत्येतत्द्वितीयाबहुवचनमित्यभिप्रेत्ययोजनांतरमाह ॥ [४८।१] वदतःप्रतीतिवेति । तथाचलक्षणेत्थंभूताख्यान
भागवीप्सासुप्रतिपर्यनवइतिसूत्रेणप्रतिशब्दस्यकर्मप्रवचनीयसंज्ञाविधानात्तद्योगे कर्मप्रवचनीययुक्तेद्वितीयेतिसूत्रेणचतुर्थ्य
पवादकत्वेनद्वितीयाविधानादत्रापिकर्मप्रवचनीयार्थकप्रतिशब्दाध्याहारकरणेनतद्योगेउक्तसूत्रेणद्वितीयैवजातेतिनदोषइति
भावः ॥ [४८।२] सत्पुरुषत्वादिति । उत्तमपुरुषत्वादित्यर्थः । नीचपुरुषेव्यभिचारपरिहारायसदितिविशेषणं ॥ [४८।३] तथाविधादि
ति । गुणोत्कर्षज्ञानसाध्यादुत्तमादित्यर्थः । आत्मनः स्वस्यकृष्णस्य । भजतिमामित्यात्मनएवभजनकर्मत्वोक्तेरित्यर्थः । न
नुजीवब्रह्मणोरभेदेसर्वागमानांमहातात्पर्यमित्यत्रमत्प्रक्रियैवप्रमाणं । मंत्रब्राह्मणलक्षणस्तावद्वेदइत्यादिनैक्यसर्वागमानांम
हातात्पर्यस्यमत्प्रक्रियानुसारेणोपपादितत्वादित्यतआह ॥ [४८।१०] प्रक्रियांत्विति ॥ ७ ॥ पूर्वग्रंथसंगतत्वेनोत्तरग्रंथमवतारय
ति ॥ [४८।१२] एवंतावदित्यादिना । अस्तुभेदसापेक्षत्वं ततःकानोहानिरित्यतआह ॥ [४८।११] भेदस्त्विति । अन्योन्याश्रयेणप्रत्यक्षेण

भेदसिद्धिंदूषयिष्यन्भूमिकामारचयति ॥ [४८।९३] भेदोहीति ॥ [४८।९२] स्वतंत्रइति । अन्यानालिंगिततयेत्यर्थः । भेदइत्येवाप्रतीतेरि
तिभावः । किंतुएकस्यैवभेदस्यद्विष्ठत्वपक्षेघटपटौभिन्नौभेदवंतावितिघटपटविशेषणतयावाघटपटयोर्भेदइतिघटपटविशेष्यत
यातद्व्यावर्त्यतयातद्विशिष्टतयेतियावत् भेदःप्रतिभासतइत्यन्वयोद्रष्टव्यः ॥ [४८।९३] भेदद्वयांगीकारेणेति । घटपटौभिन्नावि
त्यत्रघटात्पटोभिन्नःपटाच्चघटोभिन्नइतिघटपटधर्मिकंभेदद्वयमेवप्रतीयतइत्यंगीकारेणेत्यर्थः ॥ [४८।९३] अन्यतरमात्राश्रयत्वेपी
ति । अन्यतरमात्राश्रयत्वपक्षेपीत्यर्थः ॥ [४८।९३] संबंधिमात्रेति । भेदस्यसंबंधिव्यतिरिक्तान्यपदार्थापेक्षायाअभावात्केवलसंबंध्य
पेक्षैवास्तीत्यर्थः। तथाचभेदस्यसंबंधिकपदार्थत्वेनकेवलंसंबंध्यपेक्षायांसत्यांधर्मिप्रतियोगिभावमनपेक्ष्यगत्यंतरंनास्तिधर्मिप्रति
योगिभावेनैवसंबंध्यपेक्षास्तीतियावत् । भेदोहिधर्मितयैकंसंबंधिनं प्रतियोगितयाचापरंसंबंधिनमपेक्षतइत्यर्थः । एकएव
भेदोद्विष्ठइतितार्किकाणांपक्षेऽन्योन्याश्रयमुपपादयति ॥ [४८।९४] तथाचेत्यादिना । तथाचान्योन्याश्रयतेत्यंतेन । इदंवाक्यं
बुद्ध्याविवेकेनेत्थंयोज्यं । घटपटौभिन्नावितिद्वित्वावच्छिन्नघटपटयोर्विशेष्यतयाप्रतीतौसत्यांतद्विशेषणीभूतभेदप्रतीतिःकु
तइत्यतस्तदुपपादयितुमुक्तं ॥ [४८।९५] विशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वादिति । घटपटयोर्भेदइत्यत्रघटपटयो
र्विशेषणतयाप्रतीतौसत्यांतद्विशेष्यतयाभेदप्रतीतिःकुतइत्यतस्तदुपपादयितुंविशेषणादिप्रतीतेर्विशेष्यादिप्रतीतिकार्यत्वादि
त्यादिपदद्वयंप्रयुक्तं । तथाचघटपटयोर्भेदइतिविशिष्टप्रतीतेर्विशेषणप्रतीतिकार्यत्वादितितदर्थः । नन्वत्रविशेषणप्रतीतेर्विशे
ष्यप्रतीतिकार्यत्वादितिकथं । नहिदंडप्रतीतिर्देवदत्तप्रतीतिकार्येतिचेत् । अत्रकेचित् । विशेषणशब्देनविधेयंग्राह्यं विशेष्य

शब्देनचोद्देश्यं। एवंचविधेयप्रतीतेरुद्देश्यप्रतीतिकार्यत्वादित्यर्थः। सिद्धंधर्मिणमुद्दिश्यसाध्यधर्मोविधीयतइतिवचनादित्याहुः। तन्नस्वरसं उद्देश्यविधेयभावस्यवाक्यएवदृष्टत्वेनप्रतीतावदर्शनात्। तस्याएवचात्रप्रकृतत्वादिति। वस्तुतस्तुविशेषणशब्देनससंबंधिकपदार्थग्रहणं। विशेष्यशब्देनचसंबंधितावच्छेदकप्रकारकसंबंधिग्रहणं। तथाचससंबंधिकपदार्थप्रतीतेस्संबंधितावच्छेदकप्रकारकसंबंधिज्ञानकार्यत्वादित्यर्थः। अत्रससंबंधिकपदार्थप्रतीतेस्संबंधिज्ञानकार्यत्वादित्येवोक्तौप्रमेयत्वादिनारूपेणघटपटादिसंबंधिज्ञानेसतिघटपटौभिन्नौघटपटौसंयुक्तावित्यादिप्रतीतिस्स्यादतउक्तं। संबंधितावच्छेकप्रकारकसंबंधिज्ञानकार्यत्वादिति। तत्रचनप्रमेयत्वंसंबंधितावच्छेदकं। अधिकवृत्तित्वात्किंतुद्वित्वमेवेतिनोक्तदोषः। तथाचप्रकृतेघटपपटौभिन्नावित्यत्रभेदरूपससंबंधिकपदार्थप्रतीतेर्द्वित्वरूपसंबंधितावच्छेदकप्रकारकघटपटरूपसंबंधि ज्ञानकार्यत्वंवाच्यमितिभावः॥ भेदप्रतीत्यविनाभूतत्वादिति[४८।१६]। द्वित्वप्रतीतेर्भेदप्रतीतिजन्यत्वादित्यर्थः। अन्यथाऽन्योन्याश्रयतानवकाशात्॥ [४८।१७]तथाचान्योन्याश्रयतेति। तथाहि। घटपटौभिन्नावित्यत्रद्वित्वावच्छिन्नघटपटयोर्विशेष्यतयाप्रतीतौसत्यांतद्विशेषणीभूतभेदप्रतीतिः। कुतः। विधेयप्रतीतेरुद्देश्यप्रतीतिकार्यत्वादितिकेचित्। वस्तुतस्तुससंबंधिकपदार्थप्रतीतेस्संबंधितावच्छेदकप्रकारकसंबंधिप्रतीतिकार्यत्वात्भेदप्रतीतौसत्यांचद्वित्वावच्छिन्नघटपटोभयप्रतीतिर्द्वित्वप्रतीतेर्भेदप्रतीतिकार्यत्वात्। तथाघटपटयोर्भेदइत्यत्रापिद्वित्वावच्छिन्नघटपटयोर्विशेषणतयाप्रतीतौसत्यांतद्विशिष्टभेदज्ञानं। कुतः। विशिष्टप्रतीतेर्विशेषणप्रतीतिकार्यत्वात्। भेदज्ञानेचद्वित्वावच्छिन्नघटपटोभयज्ञानं। भेदप्रतीतिजन्यत्वाद्वित्वप्रतीतेरित्येवमेकस्यैवभेदस्यद्विष्ठत्वपक्षेऽन्योन्या

श्रयतेत्यर्थः। घटपटौभिन्नावित्यत्रघटपटधर्मिकंभेदद्वयमेवप्रतीयतइतिपक्षेप्यन्योन्याश्रयत्वमुपपादयति॥ [४८।१७]अन्यतरेति ॥ धर्मिप्रतियोगि[४८।१७]भावापेक्षश्चेति । धर्मिप्रतियोगिभावमनपेक्ष्यसंबंधिमात्रापेक्षायांगत्यंतराभावादित्युक्तत्वादितिभावः । तामुपपादयति॥ [४८।१७]घटात्पटस्येत्यादिना॥ [४८।१९]अन्यथेति। धर्मिप्रतियोगित्वप्रतीतेर्भेदप्रतीत्यपेक्षाभावइत्यर्थः ॥ [४८।१९]विलक्षणप्रतीत्यनुपपत्तेरिति। प्रत्युतघटात्घटस्येतिप्रतीत्यापत्तेरितिभावः। इत्यन्योन्याश्रयतेतिसंबंधः । तथाहिघटात्पटोभिन्नइत्यत्र प्रत्येतव्यभेदाधिकरणपटप्रतियोगिकभेदवत्त्वेनघटज्ञानेजातेतस्यप्रतियोगित्वज्ञानं । तस्मिंश्चसतिघटप्रतियोगिकपटधर्मिकभेदज्ञानं । ततश्चपटेप्रतियोगित्वज्ञानं । तस्मिंश्चसतिपुनस्तत्प्रतियोगिकघटधर्मिकभेदज्ञानं । ततश्चतस्यप्रतियोगित्वज्ञानमित्येवंरूपेणभेदद्वयांगीकारपक्षेपिधर्मिप्रतियोगिभावप्रतीत्यपेक्षयाऽन्योन्याश्रयताद्रष्टव्येत्यर्थः॥ [४८।२०]उक्तानुसारेणेति । विशेषणविशेष्यतयेत्यतःपूर्वंद्वित्वावच्छिन्नयोरित्यनंतरंचप्रतीताविति शेषपूरणंकृत्वाविशेषणविशेष्यभावश्चभेदापेक्षइत्यत्रविशेषणविशेष्यपदयोःस्वज्ञानोपलक्षकत्वं धर्मिप्रतियोग्यपेक्षयेत्यत्रधर्मिप्रतियोगिपदयोर्भावप्रधानत्वंस्वज्ञानोपलक्षकत्वं भेदापेक्षंच धर्मिप्रतियोगित्वमित्यत्रभेदधर्मित्वप्रतियोगित्वपदानांस्वज्ञानोपलक्षकत्वमुक्त्वाविशेषणविशेष्यतयेत्यादिपदानियोज्यानीत्यर्थः । पदार्थस्वरूपत्वाद्भेदस्येत्युक्तेप्रतियोगिनोपिपदार्थत्वेनतत्स्वरूपत्वमपिभेदस्यप्राप्नोति । तथात्वेघटाद्घटस्यभेदइतिप्रतीतिःप्रसज्येतेत्यतआह ॥ [४८।२०]धर्मीहेति । इहवाक्येपदार्थशब्देनधर्म्युच्यतेनप्रतियोगीत्यर्थः ॥ [४८।२१]नभेदोयुगधर्मइति । एकएवभेदउभयधर्मइतिनेत्यर्थः । ननुभेदोयद्येकस्यधर्मोपरेणनिरूप्यस्तर्हिघटपटौभिन्नावित्यत्रैकस्यैवभेदस्यकथमुभयधर्म

त्वप्रतीतिरित्यतआह ॥ [४८।२१] **घटपटौभिन्नावित्यत्रेति** । ननुघटपटयोर्भेदइत्यत्रघटपटधर्मिकभेदद्वयमवयोदप्रतीयततोह घटपटयोर्भेदाविति द्विवचनप्रयोगस्स्यान्नतुघटपटयोर्भेदइत्येकवचनप्रयोगइत्यतआह ॥ [४८।२२] **एकवचनंत्विति** । ननुभेदस्यध र्मिस्वरूपत्वेनधर्मिप्रतीत्यपेक्षयाऽन्योन्याश्रयाभावेपिप्रतियोगिस्वरूपत्वाभावाद्भेदावधित्वेनप्रतियोगित्वज्ञानेभेदज्ञानंभेद ज्ञानेचतदवधित्वेनप्रतियोगिज्ञानमितिप्रतियोगिप्रतीत्यपेक्षयाऽन्योन्याश्रयस्तुस्यादेवेत्यतआह ॥ [४८।२३] **घटस्येति** ॥ [४८।२३] **तद्धर्मि केति** । घटधर्मिकेत्यर्थः । प्रकारांतरेणप्रतियोगिप्रतीत्यपेक्षयाऽन्योन्याश्रयंशंकते ॥ [४८।२४] **तथापीति** ॥ [४८।२४] **प्रतिपन्नभेदस्येति** । प्र त्येतव्यभेदाधिकरणप्रतियोगिकभेदवत्त्वेनज्ञातस्यघटस्येत्यर्थः । प्रतियोगित्वात् प्रतियोगित्वेनज्ञानादित्यर्थः । भेदसिद्धावित्य नंतरंघटस्यप्रतियोगित्वप्राप्त्येतिशेषः॥[४८।२४] **भेदसिद्धिरिति**। तथाचघटस्यप्रतियोगित्वप्राप्त्यातत्प्रतियोगिकपटधर्मिकभेदसिद्धि रित्यन्योन्याश्रयइत्यर्थः॥[४८।२५] **विधीयमानभेदस्येति**। प्रत्येतव्यभेदाधिकरणप्रतियोगिकभेदवतोघटस्येत्यर्थः। तथाचघटेप्रत्येतव्यभे दाधिकरणप्रतियोगिकभेदस्यसत्तयाभाव्यमित्येवनतुतज्ज्ञानमप्यपेक्षितं येनान्योन्याश्रयस्स्यादितिभावः ॥ [४८।२५] **प्रतीतिमात्रेणे ति** । घटत्वादिनाप्रतीतिमात्रेणेत्यर्थः॥ [४८।२५] **प्रतियोगित्वोपपत्तेरिति**। पटधर्मिकभेदंप्रतीतिशेषः । इदमत्राकूतं । यथाहिगोर्गवय सादृश्यज्ञानाभावेपिवस्तुतोगवयसादृश्यवतोगोत्वादिनाप्रतीतिमात्रेणगवयविसदृशत्वेनाप्रतीतिमात्रेणवागवयगतसादृश्यप्र तियोगित्वबुद्धिर्भवत्येवंवस्तुतःप्रत्येतव्यभेदाधिकरणप्रतियोगिकभेदवतोघटादेर्घटत्वादिनाज्ञानमात्रेणप्रतियोगित्वज्ञानोपप

त्तेर्घटत्वादिनाज्ञानमात्रमेवापेक्षितं । नचवाच्यंघटत्वादिनाप्रतीतिमात्रेणप्रतियोगित्वज्ञानेपटाद्यभिन्नतयाज्ञातस्यापिघटादेः पटधर्मिकभेदंप्रतिप्रतियोगित्वंज्ञायेतेति । तदाघटत्वादिनाज्ञानाभावात् । यद्वापटाद्यैक्येनाप्रतीतस्यघटादेर्घटत्वादिनाज्ञानमात्रेणप्रतियोगित्वज्ञानमुपपद्यतइत्युच्यमानत्वाददोषइति ॥ [४८।२५] एतेनेत्यादि । दंडदेवदत्तयोर्विशेषणविशेष्यभावस्यतदुभयभेदप्रतीतिसापेक्षतायादृष्टत्वेनभेदस्यापिस्वातंत्र्येणकदाप्यप्रतिभासेनकयोश्चिद्विशेषणतयाविशेष्यतयावाप्रतीयमानत्वे नतत्रविशेषणविशेष्यभावप्रतीतेर्भेदांतरप्रतीतिसापेक्षत्वंवाच्यं । सोपिभेदःपुनर्विशेषणविशेष्यभावेनैवप्रतीयतइतिपुनस्तत्प्रतीतेर्भेदांतरप्रतीतिसापेक्षत्वंवाच्यं । तदप्येवमितिभेदप्रतीतिपरंपरयानवस्थास्यादित्यनवस्थाप्रसंगोपि एतेन पदार्थस्वरूपत्वाद्भेदस्येतिघटभेदयोरेकत्वोक्त्याभेदाभावकथनेनापास्तइत्यर्थः । तथाचघटभेदयोर्भेदाभावेनविशेषणविशेष्यभावस्यैवाभावान्नतदर्थंभेदज्ञानापेक्षेतिभावः । यदिक्वचित्तयोर्विशेषणविशेष्यभावप्रतीतिरस्तितदापिनतदर्थंभेदज्ञानापेक्षाकिंतु घटभेदयोस्सविशेषाभेदांगीकारेणतदुपपत्तेः । यत्रदंडदेवदत्तयोर्विशेषणविशेष्ययोर्भेदोस्तितत्रापिविशेषणत्वादिप्रतीतौनभेदज्ञानापेक्षा किंतुविद्यमानभेदयोर्दंडदेवदत्तयोर्दंडत्वादिनाप्रतीतिमात्रेणविशेषणविशेष्यभावप्रतीत्युपपत्तेरितिद्रष्टव्यं ॥ [४९।१] भेदपूर्वंवस्त्विति । आदौभेदंविषयीकृत्यपश्चाद्वस्तुविषयीकरोतीत्यर्थः ॥ [४९।१] वस्तुपूर्वंभेदमिति । आदौवस्तुविषयीकृत्य पश्चाद्भेदंविषयीकरोतीत्यर्थः ॥ [४९।२] विरम्यव्यापारेति । स्थित्वास्थित्वाव्यापारोविरम्यव्यापारः । अस्यचेतनधर्मत्वेनजडेप्रत्यक्षेऽयोगादित्यर्थः ॥ [४९।२] अतएवेति । विरम्यव्यापारायोगादेवेत्यर्थः ॥ इत्येतदपिनि[४९।३]रवकाशमिति । एतदपिदूषण

मवकाशशून्यमित्यर्थः । धर्मिस्वरूपत्वाद्भेदस्यधर्मिप्रतीतेरेवभेदप्रतीतिस्त्वनभेदवस्तुप्रतीत्योःकार्यकारणभावस्यवाभावेनयौ
गपद्यसंभवादितिभावः । सापेक्षत्वात्सावधेश्चतत्त्वेद्वैतप्रसंगतः । एकाभावादसंदेहान्नरूपंवस्तुनोभिदेत्युक्तंभेदस्यवस्तुस्व
रूपत्वाभावेयुक्तिपंचकंदूषयिष्यन्सापेक्षत्वाद्भिदाभेदोनवस्तुनोरूपंस्वरूपमित्युक्तामाद्यांयुक्तिमाशंक्यनिराकरोति ॥ भवे
[४।१।३]दयमित्यादिना । परिहारोऽन्योन्याश्रयपरिहारः ॥ [४।१।४]अस्मादयंपटइतिवेति । घटात्पटोभिन्नइतिवदितिशेषः ।
अस्मादयं[४।१।४]पटइतिवेति । घटात्पटस्यभेदइतिवदितिशेषः । जातुचित् कदाचित् । भेदधर्मिस्वरूपयोः भेदस्वरूपधर्मि
स्वरूपयोः । अस्वरूपत्वमित्यस्यनिस्स्वरूपत्वार्थकत्वभ्रमंवारयितुमाह ॥ धर्मिस्व[४।१।७]रूपत्वाभावइति । तथात्वादित्यस्या
भिप्रायो धर्मिप्रतियोगिप्रतीत्यपेक्षयाप्रतीय[४।१।६]मानत्वोपपत्तेरिति॥ [४।१।६]एतेनेति । ऐक्यवदितिमूलवाक्येनेत्यर्थः॥ [४।१।१०]अन्यं
तरेति । मायावादिमतेऽनैकांत्यमित्यर्थः। जीवब्रह्मैक्यस्यतेनैवांगीकृतत्वादितिभावः॥ ऐक्यंन[४।१।१०]स्वरूपमिति । प्रत्यक्चैतन्य
स्वरूपंनभवतीत्यर्थः। तथाचसाध्यस्यापिसत्त्वान्नव्यभिचारइतिभावः। अस्वरूपत्वे ब्रह्मस्वरूपत्वाभावे। तत्परस्य ऐक्यपरस्य॥
[४।१।१२]नसापेक्षमिति।तथाचहेतोरेवाभावान्नव्यभिचारइतिभावः॥तथा[४।१।१२]सतीति । ऐक्यस्यधर्मिप्रतियोगिसापेक्षत्वाभावइत्यर्थः ॥
[४।१।१२]तत्त्वंपदार्थेति । तत्त्वमसीतिमहावाक्येन त्वंतदसीतिजीवस्यब्रह्मणैक्येबोधितेधर्मिप्रतियोगिभूत त्वंतत्पदार्थस्वरूपजिज्ञा
सायांतत्स्वरूपनिरूपणायप्रवृत्तानांविज्ञानघनः योनिमन्येप्रपद्यंते सत्यंज्ञानमनंतमित्यादिवेदांतवाक्यानामैक्यपरमहावा
क्येनैकवाक्यतोच्यमानाऽयुक्तास्यात् । ऐक्यस्यजीवब्रह्मरूपधर्मिप्रतियोगिसापेक्षत्वाभावांगीकारादितिभावः ॥ प्रतीत्यो

[४१।१३] रेवेति । ऐक्यप्रतीतिप्रत्यक्चैतन्यरूपब्रह्मप्रतीत्योरित्यर्थः । तद्विषयस्य ऐक्यस्य। तथाचैक्येहेतोरेवाभावान्नव्यभिचारइति भावः । ननुप्रत्यक्चैतन्याभिन्नस्यैकस्यैवैक्यस्यसापेक्षत्वादिनाविरुद्धप्रतीतिद्वयविषयत्वंकथंयुक्तं विरोधादित्यतआह ॥ [४१।१४] एकस्यैवाग्नेरिति ॥ सापेक्षानिरपेक्षानुमितिप्रत्यक्षेति । अनुमितेर्ज्ञातकरणसापेक्षत्वात्प्रात्यक्षिकज्ञानस्यतदभावादितिभावः । यद्वाअनुमितेर्व्याप्तिलिंगादिज्ञानसापेक्षत्वात्प्रात्यक्षिकज्ञानस्यज्ञानसापेक्षत्वाभावात् । नचदंडीदेवदत्तइतिप्रात्यक्षिकविशिष्टज्ञानंविशेषणज्ञानसापेक्षंदृष्टमितिवाच्यं । विशिष्टज्ञानस्यविशेषणविशेष्येंद्रियसन्निकर्षतदुभयासंसर्गाग्रहाभ्यामेवोपपत्तौविशेषणज्ञानस्यतत्राकारणत्वादितिभावः ॥ [४१।१४] प्रकृतेपीति । अत्रापिभेदप्रतीतिधर्मिभूतपटप्रतीत्योरेवसापेक्षत्वनिरपेक्षत्वे नतुतद्विषयस्यभेदस्येतिवक्तुंशक्यत्वेनस्वरूपासिद्धिरितिभावः । अंगीकृत्यचैतदुक्तं । वस्तुवस्तुभेदस्यनिरपेक्षधर्मिस्वरूपत्वेपिसापेक्षत्वंयुक्तं । धर्मिणानिर्विशेषाभेदानंगीकारात् विशेषस्यभेदप्रतिनिधित्वादित्याशयेनाह ॥ [४१।१४] अधिकेश्चात्रेति । कदाचिद्धर्मिस्वरूपसिद्धौभेदसिद्धेःपरेणाभ्युपगतत्वादितिवक्ष्यमाणत्वेनस्वरूपासिद्धिपरिहारायकदाचिदित्युक्तमितिज्ञातव्यं । ननुसंशयविपर्ययापेक्षयापूर्वंपुरुषरजतभेदाप्रतीतिदशायांस्थाणुशुक्तिकारूपंधर्म्यपिनप्रतीयते । एवंचस्थाणुशुक्तिकाप्रतीतावपीत्युक्तमयुक्तं । तथाचतत्प्रतीतावपीतिहेतुविशेषणस्यासिद्धिरेवेत्यतआह ॥ [४१।१७] नैह्यप्रतीतइति । संशयादेर्धर्मिज्ञानसाध्यत्वेनस्थाणुशुक्तिकारूपधर्मिस्वरूपस्यैवाप्रतीतौसंशयादिरेवनस्यात् । अतस्संशयादितःपूर्वंधर्मिस्वरूपप्रतीतेरंगीकार्यत्वान्नविशेषणासिद्धिरितिभावः । ननुऐक्यवचनेनधर्मिप्रतीतावपिभेदाप्रतीतिःकथंपरस्यसंमतेतिज्ञायतइत्यतआह ॥

[४१।१८] अभेदाविरोधित्वेनेति । सर्वंखल्विदंब्रह्मेतिवाक्यबोध्योयोब्रह्मणस्सर्वाभेदस्तदविरुद्धत्वेनेत्यर्थः । ब्रह्माभिन्नत्वेनैक्यंवद तइतियावत् । ऐक्यस्यब्रह्मभिन्नत्वेसर्वंखल्विदंब्रह्मेतिवाक्यबोध्यसर्वाभेदोविरुध्येतेतिभावः । केचित्तु । ननुजीवेश्वरैक्यंवद तइत्युक्तं विशिष्टयोरैक्यायोगादित्यतउक्तं ॥ [४१।१८] अभेदाविरोधित्वेनेति । भिद्यतेनेनेतिभेदोविशेषः । नविद्यतेभेदोय स्यतदभेदं निर्विशेषचैतन्यंतदविरोधित्वेनतत्स्वरूपत्वेनेत्यर्थः । ब्रह्मस्वरूपत्वेनेतिवक्तव्येएवमुक्तिस्तुऐक्यस्यब्रह्मातिरिक्त त्वेतेनैवब्रह्मणस्सविशेषत्वप्राप्त्यानिर्विशेषत्वंनस्यादितियुक्तिसूचनार्थमित्याहुः ॥ [४१।१९] सिद्धेपीति । अहमितिस्वप्रकाशतया सिद्धेपीत्यर्थः ॥ [४१।१९] अन्यथेति । प्रत्यक्चैतन्याभिन्नस्याप्यैक्यस्यसिद्धत्वांगीकारइत्यर्थः ॥ [४१।१९] उपदेशेति । तत्त्वमसीत्याद्युपदेशे त्यर्थः ॥ [४१।१९] आनर्थक्येति । सिद्धेर्थेउपदेशस्यव्यर्थत्वादितिभावः ॥ [४१।१९] विप्रतिपत्तीति । मायावादितत्त्ववादिनोरित्यर्थः । नि श्चितेर्थेतदयोगादितिभावः । तथापि ऐक्यस्यासिद्धत्वेपि । तत्स्वरूपतया प्रत्यक्चैतन्यस्वरूपतया ॥ [४१।२०] अन्यतरेति । मा यिमतेऐक्येऽनैकांतिकइत्यर्थः । गूढाभिसंधिराशंकते ॥ [४१।२०] स्वरूपमपीति । प्रत्यक्चैतन्यस्वरूपमपीत्यर्थः ॥ [४१।२१] अपरिहारा दिति । तत्प्रतीतावप्यप्रतीयमानत्वप्राप्त्याव्यभिचारापरिहारादित्यर्थः । पूर्वपक्ष्यभिसंधिमुद्धाट्यतंदूषयति ॥ [४१।२१] विशेषणप्र क्षेपेति । असतिप्रतिबंधकइतिहेतुविशेषणप्रक्षेपेत्यर्थः । तथाचासतिप्रतिबंधकेतत्प्रतीतावप्यप्रतीयमानत्वरूपहेतोरेवाभा वान्नव्यभिचारइतिभावः ॥ [४१।२१] अत्रापीति । धर्मिप्रतीतावपिभेदाप्रतीतावित्यर्थः ॥ [४१।२२] ऐक्याद्विशेषमिति । स्वप्रकाशतयाप्र

त्यक्चैतन्येसिद्धेप्यैक्यंनसिद्धं नैवंभेदःकिंतुधर्मिस्वरूपसिद्धौसिद्धएवेत्यैक्याद्भेदस्यविशेषमाचष्टइत्यर्थः ॥ [४१।२२]नियमंमिति ।
आचष्टइतिवर्तते । अनेनसिद्धएवेत्येवकारस्यसंबंधस्सूचितोभवति।कथमेवकारेणनियमलाभइतिचेत् । उच्यते । स्वरूपदर्शने
भेदस्सिद्धएवेतिवाक्यवृत्त्याविशेषणसंगतोयमेवकारइत्युक्तंभवति । तस्यचेतरपदार्थतावच्छेदकेसमभिव्याहृतपदार्थतावच्छे
दकव्याप्यत्वार्थकत्वस्यशंखःपाडुरएवेत्यादौदर्शनेनात्रापिधर्मिस्वरूपदर्शनेभेददर्शनस्यव्याप्यत्वलाभात् । यदाधर्मिस्वरूप
दर्शनंतदाभेददर्शनमितिव्याप्त्यपरपर्यायोनियमोलभ्यतइतिभावः । नियमःकुतोवक्तव्यइत्यतआह ॥ [४१।२२]कदाचिदिति ।
तथाचतद्वैलक्षण्यकथनायनियमःकथ्यतइतिभावः । ननुप्रायइतिकथमुक्तं भूमार्थेप्रायशः प्रायेणेत्यव्ययस्यैवदर्शनेनप्राय
शः प्रायेणेत्येववक्तव्यत्वादित्यतआह ॥ [४१।२३]भूमार्थमिति । प्रायइत्यव्ययमितिसंबंधः । भूमाबाहुल्यं तदर्थकमित्यर्थः । त
थाचप्रायशःप्रायेणेतिवत्प्रायइत्यप्यव्ययंभूमार्थकमस्तीतिनदोषइतिभावः । अन्येतुप्रायइतिशब्दोऽनशनार्थस्तावदस्ति ।
प्रायोनिरशनेपुमानित्यभिधानेनानशनार्थस्यप्रायशब्दस्यपुल्लिंगताविधानात् । प्रायोपविष्टाइतिप्रयोगाच्च । प्रायइत्यस्या
व्ययपरत्वेसमासायोगेनशब्दरूपत्वावगमात्तथाचनकेवलंप्रायइतिशब्दोस्तिकिंत्वव्ययमप्यस्ति तच्चाव्ययंप्रकृतेभूमार्थमित्य
र्थइत्याहुः । प्रायइतिविशेषणस्यकृत्यमाह॥ [४१।२४]प्रायइतीति॥ [४१।२४]संशयादिति । संशयविपर्ययस्थलेपिसर्वतोवैलक्षण्यदर्शनेत
दुच्छेदएवस्यादितिभावः । संशयविपर्ययस्थलेपिसर्वतोविलक्षणंपदार्थस्वरूपंनदृश्यतइतियत्प्रायइतिविशेषणेनोक्तं तदंगी
कृत्यैवोक्तं । वस्तुतस्तुसंशयादिस्थलेपिविशेषंवक्ष्यामइत्याह ॥ [४१।२४]तत्रापीति । संशयादिस्थलेपिसर्वतोवैलक्षण्यंप्रतीतमेव ।

नचतर्हिसंशयायोगइतिवाच्यं । एकएवखल्वेकस्यवस्तुनोभेदः अनेकत्वप्रमाणाभावात् । सचभेदोवस्तुप्रतीता[illegible] ।
किंतुतस्यघटप्रतियोगिकत्वंपटप्रतियोगिकत्वमित्यादयोनंताधर्माः । तत्रभेदनिष्ठोयत्प्रतियोगिकत्वरूपोधर्मस्साद्दश्यादिव
शान्नप्रतीयते तत्रसंशयादिकमुत्पद्यते । नतुतत्रापिभेदस्याप्रतीतिरिति ज्ञात्वैवेतिवाक्यव्याख्यानावसरेवक्ष्यामइत्यर्थः ।
ननुव्यावृत्तिरेवद्दश्यतेनतुभेदइत्यतआह ॥ [४९।२५]व्यावृत्तिरेवचेति । नन्वेकस्मिन्ननेकभेदसद्भावेनस्थाण्वादौघटादिप्रतियोगि
कभेदस्यद्दष्टत्वेपिपुरुषत्वादिसंशयानुरोधेनपुरुषादिप्रतियोगिकभेदस्याद्दष्टत्वात्तमेवभेदंपक्षीकृत्यधर्मिप्रतीतावप्यप्रतीयमान
त्वहेतुनाधर्मिस्वरूपत्वाभावस्साध्यतेहेत्वसिद्धेरभावादित्यतआह ॥ [४९।२५]नचैकस्मिन्वस्तुनीति । भेदस्यान्योन्याभावरूपत्वेन
तद्भेदेऽधिकरणभेदस्यैवप्रयोजकत्वेन तदभावादितिभावः । संशयादिकंचप्रकारांतरेणोपपादयिष्यतइतिहृदयं । सावधेरित्यु
क्तांयुक्तिमाशंकते ॥ [४९।२६]तथापीति । अवधिशब्दस्संबंधिपरः । तथाचसावधेरित्युक्तस्यसंबंधिसाहित्येनएकस्यसंबंधितयेति
यावत् । प्रतीयमानत्वादित्यर्थमभिप्रेत्योपपादयति ॥ [४९।२६]पटस्यभेदइत्यादिना । इतिचेत्यनंतरंशेषइतिवर्तते ॥ अनैकांति
[५०।२]कत्वमिति । उभयवादिरीत्येतिशेषः ॥ [५०।३]उदाहरणीयमिति । अनैकांत्यस्थलत्वेनेत्यर्थः । ब्रह्मणआनंदमितिब्रह्मसंबंधि
तयाप्रतीतिसद्भावेपितत्स्वरूपत्वस्यैवसत्त्वादितिभावः ॥ [५०।३]तत्रेति । पदार्थस्यस्वरूपं ब्रह्मणआनंदमित्यादावित्यर्थः । किम
पि उपचारादिकं ॥ [५०।३८]तर्ह्यत्रापीति । तत्रयथाआनंदादेर्ब्रह्मादिस्वरूपत्वेपिसंबंधप्रतीतेरुपचारादिरूपंनिमित्तांतरमुच्य
ते । एवंभेदस्यधर्मिभूतपटस्वरूपत्वेपिपटस्यभेदइतिसंबंधितयाप्रतीतौनिमित्तमभेदेभेदकार्यकारिरूपंविशेषंवक्ष्यामइत्यर्थः ।

अन्यथासिद्धिरिति । पक्षीभूतेभेदेसंबंधितयाप्रतीयमानत्वंचधर्मिस्वरूपत्वाभावरूपंसाध्यंविनाविशेषेणैवसंभवतीत्यन्यथासिद्धिरित्यर्थः। तत्र पदार्थस्यस्वरूपं ब्रह्मणआनंदमित्यत्र॥ **नप्रतीतिरिति**। तथाचसंबंधितयाप्रतीयमानत्वरूपहेतोरेवाभावान्नव्यभिचारइतिभावः॥ **अत्रापीति** । पटस्यभेदइत्यपिव्यपदेशमात्रमितिवक्तुंशक्यत्वेनसंबंधितयाप्रतीयमानत्वहेतोरभावात्स्वरूपासिद्धिरित्यर्थः। ननुतथापिभेदोनधर्मिस्वरूपंपटोभिन्नइतितद्विशेषणतयाप्रतीयमानत्वात्। यद्यद्विशेषणतयाप्रतीयतेनतत्तस्यस्वरूपं। यथादंडोदेवदत्तस्येत्यतआह ॥ **अनयैवेति**। आनंदंब्रह्मणइत्यादौव्यभिचारप्रसंगादेवेत्यर्थः॥ **भेदसाधिकेति**। भेदस्यधर्मिस्वरूपाद्भेदसाधिकेत्यर्थः॥ **अतएवेति**। विशेषणतयाप्रतीतेर्भेदसाधकत्वाभावादेवेत्यर्थः ॥ **सर्वतोविलक्षणंहीति** । पदार्थस्वरूपंसर्वतोविलक्षणंसर्वस्माद्भिन्नमितिपदार्थस्वरूपविशेषणतयाप्रयोगइत्यर्थः ॥ **निमित्तांतरकल्पनमिति**। संबंधितयाप्रतीतौभेदातिरिक्तंविशेषरूपंनिमित्तांतरकल्पनमित्यर्थः॥ **तत्रैवेति** । धर्मिस्वरूपत्वएवेत्यर्थः। यो मायावादी ॥ **तद्विशेषेति**। तस्यभेदस्यधर्मिस्वरूपत्वरूपप्रमेयविशेषेप्रमाणचिंतयेत्यर्थः। आर्द्रकवणिजोवहित्रचिंतावद्व्यर्थत्वादितिभावः। ननुभेदस्वरूपएवप्रमाणाभावाद्भेदोमयानांगीक्रियतइत्यतआह॥ **स्वरूपइति**। भेदस्वरूपसद्भावेप्रत्यक्षमेवप्रमाणमितिभेदस्तुवस्तुस्वरूपदर्शनएवसिद्धइत्यनेनोक्तमित्यर्थः । नन्वन्योन्याश्रयादिबाधकबाधितंप्रत्यक्षंनभेदस्वरूपेप्रमाणंभवितुमर्हतीत्यतआह॥ **तस्यचेति**। भेदग्राहिप्रत्यक्षप्रमाणस्येत्यर्थः। ननुतथापिभेदोमिथ्याभेदत्वाच्चंद्रभेदवदित्यनुमानमेवभेदप्रत्यक्षस्यबाधकंभविष्यतीत्यतआह॥ **अनुमानमात्रेणेति** ॥ **वक्ष्यतइति**।

तर्कमात्रतःप्रत्यक्षबाधनइत्यादिनेत्यर्थः । तथात्वेकालात्ययापदिष्टमात्रोच्छेदप्रसंगइत्याशयः । यः तार्किकः । ननुयर्हिसर्वतोवैलक्षण्यंज्ञायतेतर्हिसंशयमात्रोच्छेदप्रसंगइतिचेत्तत्राह ॥ अत्रापीति । प्रायःसर्वतोविलक्षणंहीतिवाक्यइवेत्यर्थः ॥ नियामकाभावादिति । धर्म्यभेदपक्षेतुतत्स्वरूपत्वमेवतद्दर्शनएवप्रतिभासेनियामकमस्तीत्याशयः ॥ ततःकिमिति । सर्वतोवैलक्षण्यज्ञानानंगीकारेकिंतत्साध्यमनिष्टमित्यर्थः । सर्वतोवैलक्षण्यज्ञानाभावस्यमयांगीक्रियमाणत्वादिष्टापादनमितिभावः । आत्मविषये आत्मस्वरूपेधर्मिणि ॥ समानधर्मेति । धर्मिकोट्यालिंगितद्रव्यत्वादिरूपसमानधर्मेत्यर्थः । समानधर्मादेस्सद्भावादितिपाठेआदिपदेनविप्रतिपत्तिग्रहणं । भूतचतुष्टयात्मकजडदेहातिरिक्तात्माभाववादिनांचार्वाकाणांसद्भावादितिभावइत्याहुः । ननुनसमानधर्मदर्शनमात्रस्यसंशयहेतुत्वं । तथात्वेसर्वत्रसंशयप्रसंगात् किंतुविशेषादर्शनसहकृतस्यैव । प्रकृतेचसंशयप्रतिबंधकीभूतस्यसर्वव्यावृत्तिरूपविशेषदर्शनस्यैवसद्भावान्नसंशयइत्यतआह ॥ प्रतिबंधकस्यचेति । व्यावृत्तिज्ञानाभावस्यत्वयैवोच्यमानत्वादितिभावः । ननुयदिनस्वरूपंभेदइत्यादिनाभेदस्यधर्मिस्वरूपत्वेकिंप्रमाणमुपन्यस्तमित्यतआह ॥ इदमुक्तंभवतीति । भेदपक्षस्य धर्मिस्वरूपत्वाद्भिन्नत्वपक्षस्य । सर्वत्र आत्मादिविषये ॥ परिशेषादिति । भेदोधर्मिस्वरूपं धर्मिणासहानुपपन्नभेदवत्त्वात् । धर्मिस्वरूपवदितिपरिशेषानुमानप्रयोगोद्रष्टव्यः । ननु धर्मिप्रतीतौभेदोनप्रतीयते । नचसर्वत्रसंशयापत्तिः । भेदस्तावदादौधर्मिस्वरूपदर्शनानंतरंपश्चात्प्रत्येष्यते । सचप्रत्येष्यमाणोभेदइदानींप्रसक्तमपिसंशयादिकंनिरोत्स्यति । यद्धीयत्रप्रतिबंधिकातत्सामग्र्यपितत्रप्रतिबंधिकेतिन्यायेनभेददर्श

नस्यसंशयप्रतिबंधकत्वेनतत्सामग्र्याधर्मिप्रतीतिरूपायाअपितत्रप्रतिबंधकत्वात् । तथाचधर्मिप्रतीतावपिभेदाप्रतीतौसर्वत्रसंशयादिप्रसंगरूपोक्तसाधकाभावेनधर्मिणासहभेदस्यभेदोपपत्तेर्धर्मिणासहानुपपद्यमानभेदत्वरूपःपरिशेषहेतुरसिद्धइत्याशंक्यनिराकरोति ॥ नचवाच्यमिति । प्राक् धर्मिप्रतीतिसमये । अखंडे निर्भेदे ॥ अनुवादइति । पश्चाद्भेदप्रतीतिकालेइत्यर्थः । तथाचपूर्वंधर्मिप्रतीतिसमयएवभेदप्रतीतिरंगीकार्येतिभावः ॥ संशयादीति । आत्मनिघटइत्यादिनोक्तसंशयादिप्रसंगइत्यर्थः । तथाचधर्मिप्रतीतावपिभेदाप्रतीतौसंशयादिप्रसंगरूपोक्तबाधकसद्भावेनैवधर्मिणासहभेदस्यभेदानुपपत्तेर्धर्मिस्वरूपत्वसाधकस्यधर्मिणासहानुपपद्यमानभेदवत्त्वरूपपरिशेषहेतोर्नासिद्धिरितिभावः । ननुधर्मिप्रतीतिकालेअजागलस्तनायिततयायथाकथंचिद्भेदोपिप्रतीयतएवातोनसंशयाद्यवकाशइत्याशंकते ॥ अथेति ॥ आपातजायामिति । प्रथमाक्षसन्निकर्षजायांकिंचिदिदमित्येवंरूपायामित्यर्थः । भेदज्ञानमात्रंनसंशयविरोधि । किंतुविशेषणविशेष्यभावापन्नतयातदीयत्वेनतज्ज्ञानं । नहिनिर्विकल्पकज्ञानेभेदस्यतदीयत्वंभासते । अतोदुर्वारःसंशयादिप्रसंगइत्याह ॥ तस्येति ॥ एतद्विषयेति । एतद्धर्मिकेत्यर्थः ॥ अन्यथेति । तदीयतयानवगतस्यापितद्धर्मिकसंशयादिप्रतिबंधकत्वइत्यर्थः ॥ सर्वत्रेति । स्थाणुर्वापुरुषोवेत्यादिसंप्रतिपन्नस्थलेपीत्यर्थः । तत्राप्यापातजायांसंविदिभेदावभासस्यसत्त्वादितिभावः । असंदेहादित्युक्तांयुक्तिमाशंकते ॥ ननुयदीति ॥ तथासतीति । धर्मिप्रतीतावेवप्रतीयतेचेदित्यर्थः । एकएवकुतइत्यतआह॥ अनेकत्वइति । भेदोनामान्योन्याभावः । अन्योन्याभावभेदेचाधिकरणभेदःप्रयोजकस्तस्यात्राभावादितिभा

वः। नचप्रतियोगिभेदेनाभावभेदादन्योन्याभावप्रतियोगिनांचानेकत्वात्तस्याप्यनेकत्वमितिवाच्यं। तथात्वेएकघटप्रतियोगिकानांप्रागभावादिचतुर्णामभावानांभेदोनस्यात्। नचघटनिष्ठोभेदोऽनेकः। अनेकनिरूप्यत्वात्। भूतलनिष्ठघटपटाद्यभाववदित्यनुमानमत्रमानमितिवाच्यं। अनेकविषयनिरूप्येसमूहालंबनज्ञानेऽनेकतंतुपटादिसंबंधिनिरूप्येसमवायादौचव्यभिचारात्। अभावत्वेसत्यनेकनिरूप्यत्वादितिहेतुविशेषणेचैकघटनिरूप्येप्रागभावध्वंसादावनेकत्वरूपसाध्यस्यसत्त्वेपिअनेकनिरूप्यत्वाभावात्तस्मिन्सत्यसंभवइतिन्यायेनाप्रयोजकत्वादित्याशयः॥ [५०।२०] प्रतीयंतएवेति। अनेकत्वएवहिनप्रतीयेतेतिभावः। तर्हिसंशयाद्यनुपपत्तिरित्याशंकते॥ [५०।२१] किंत्विति। उत्तरमाह॥ [५०।२२] तस्येति॥ [५०।२२] अन्यथोपपत्तेरिति। सादृश्यादिवशात्पदार्थविशेषप्रतियोगिकत्वाप्रतिभासनिमित्तेनैवोपपत्तेरित्यर्थः॥ [५०।२३] यथेति। धर्मिप्रतीतौभेदाप्रतीत्येत्यर्थः। आत्मनिआत्मरूपेधर्मिणि। घटत्वादिज्ञानमित्युत्तरवाक्यानुकूल्यायनवेत्यस्यार्थमाह॥ [५०।२४] घटोवेत्यर्थइति॥ [५१।१] एष्टव्यमेवेति। धर्मिणामितिशेषः॥ [५१।१] तेनविनेति। धर्मिणांसर्वतोव्यावृत्तिज्ञानंविनेत्यर्थः। ननुधर्माणामसाधारण्यज्ञानार्थंधर्मिणांव्यावृत्तिज्ञानंकुतएष्टव्यमित्यतआह॥ [५१।२] नहीति। अविविक्तत्वे अव्यावृत्तत्वे॥ [५१।२] असाधारण्यमिति। तदितरावृत्तित्वेसतितद्वृत्तित्वरूपासाधारणधर्मत्वमित्यर्थः। तथाचान्यत्रतदितरत्वंज्ञातव्यं तत्प्रतियोगिकभेदस्यात्राज्ञानेतदितरत्वस्यैवान्यत्रज्ञातुमशक्यत्वादितिभावः। सर्वज्ञानस्य साक्षिरूपस्य। ननुसामान्यतः सर्ववैलक्षण्यज्ञानसद्भावएवकिंप्रमाणं। येनसामा

न्यतःसर्वज्ञानस्यप्राणभृन्मात्रवृत्तित्वमंगीकर्तव्यमित्यतआह ॥ नसर्वात्मकमिति ॥ स्वयमेवेति । सर्वासंकीर्णमित्यर्थः । सर्वव्यावृत्तमेवेतियावत् । भेदस्यधर्मिस्वरूपत्वेसर्वाद्वैतप्रसंगइत्युक्तयुक्तिंस्वयमाशंक्यनिराकरोति ॥ नन्वित्यादिना ॥ केवलस्येति । भेदइत्येवाप्रतीतेरितिभावः ॥ सर्वाद्वैतप्रसंगइति । सर्वप्रतियोगिकभेदस्यधर्मिस्वरूपत्वेविशिष्टस्ययद्भवतितद्विशेषणस्यापिभवतीतिन्यायेनप्रतियोगितयाविशेषणीभूतस्यसर्वस्यापिधर्मिस्वरूपत्वापत्त्यासर्वाद्वैतप्रसंगइत्यर्थः ॥ प्रतियोगिनइति । नहिप्रतियोगिनोभेदेविशेषणत्वं । येनविशिष्टस्यधर्मिस्वरूपत्वेविशेषणस्यापितत्स्यात् । किंतूपलक्षणत्वेननिरूपकत्वरूपंबहिरंगत्वमेव । अतोविशेषणत्वाभावान्नोक्तन्यायेनविशेषणीभूतस्यसर्वस्यधर्मिस्वरूपत्वमित्यर्थः । ननुप्रतियोगिनोनिरूपकतयोपलक्षणत्वपक्षेपियन्निरूप्यस्ययद्भवतितत्तन्निरूपकस्यापिभवतीतिन्यायेनप्रतियोगितयासर्वनिरूप्यस्यभेदस्यधर्मिस्वरूपत्वेनिरूपकस्यापिसर्वस्यधर्मिस्वरूपत्वमापद्यतइतिपुनस्सर्वाद्वैतप्रसंगइत्यतआह॥ कुत्रचेदमिति॥ स्वदृष्टिपक्षपातमिति । सर्वाद्वैतापादनायलंबकर्णन्यायस्यैवानुसरणरूपमित्यर्थः । लौकिकींदृष्टिं । लौकिकंदृष्टांतमिति यावत् । रीतिः प्रकारः । लंबकर्णमानयेतिन्यायेनप्रतियोगिघटितस्यधर्मिस्वरूपत्वं । उतचित्रगुन्यायेनकेवलस्यैवेतिप्रकारद्वयमध्येकंप्रकारमित्यर्थः ॥ प्रतीत्यनुसरणमिति । लौकिकदृष्टांतानुसरणमितियावत् । ननुप्रतीत्यनुसरणमकृत्वा चित्रगुन्यायस्त्यज्यतइतिचेत्तत्राह ॥ प्रतीत्यतिक्रमेत्विति । येननिरूपितस्ययद्भवतितत्तन्निरूपकस्यापिभवतीतिव्याप्तिबलात्प्रकृतेसर्वाद्वैतापादनंकर्तव्यं । तत्रेयंव्याप्तिःकुत्रोपलब्धेतिपृष्टेलंबकर्णमानयेत्यादावितिलौकिकदृष्टांतानुसरणंकर्तव्य

मेव । तदतिक्रमेत्वापादनेव्याप्तेर्ग्रहीतुमशक्यत्वेनतदसिद्ध्यातर्कस्यप्रशिथिलमूलत्वापत्तेस्सर्वाद्वैतापादनमप्यशक्यमित्यर्थः ॥ विदारणात्मनइति । भिदृविदारणइतिधातोःकरणसाधनत्वमंगीकृत्यभिद्यतेविदीर्यतेविभज्यतेऽनेनेति व्युत्पत्त्याविदारकस्वरूपस्यविभागजनकस्वरूपस्येत्यर्थः । तस्यापि घटस्यापि । विदारणं विभागः ॥ तदवयवानामपीति । विभागजनकत्वरूपोभेदस्स्वभावइतितेष्वपिविदारणापत्त्याक्रमेणसर्वशून्यतापत्तिरित्यर्थः । भेदनं विदारणं । विभागइतियावदितिभावसाधनएवायंभेदशब्दोंगीक्रियतेनकरणसाधनइत्याशयेनाह ॥ किंतुविदारणमिति । यथोक्तमनुव्याख्याने । विदारणार्थोधातुश्चविभागगुणवाचकइति । तथाचविभागरूपभेदस्यघटस्वरूपत्वेघटोविभागरूपंविदारणमेवस्यात् । नतुघटस्यविदारणं एवंचतस्यापिविदारणंस्यादित्याद्युक्तमयुक्तंस्ववृत्तिविरोधादितिभावः । भेदशब्दस्यकरणसाधनत्वमंगीकृत्याप्याह ॥ विदारकत्वेपीति । विभागजनकस्वभावत्वेपीत्यर्थः ॥ प्रतियोगिनोधर्मिणं विदारयेदिति । भेदोहियस्ययतस्तंततोविदारयेन्नयंकमपियतःकुतश्चित् । तथाचप्रतियोगिनःसकाशादेवचधर्मिणोभेदोंगीकृतः । नतुस्वस्मादेवेति । तमेवधर्मिणंततःप्रतियोगिनःसकाशादेवविदारयेन्नतुस्वस्मादेवेत्यर्थः । यथोक्तमनुव्याख्याने । यतोन्यस्यप्रतियोगित्वमिष्यते । प्रतियोगिनोहिभेदोयंनतुस्वस्मात्कथंचनेति । अत्रविशेषबलाद्विभागजनकत्वस्वभावत्वरूपभेदस्यधर्मत्वमंगीकृत्यधर्मिणंविदारयेदित्युक्तं । वस्तुतस्तुविभागजनकत्वस्वरूपस्यभेदस्यधर्मिस्वरूपत्वेधर्मिणएवस्वसंबंध्यन्यपदार्थविदारकत्वंप्राप्तं । नतुस्वविदारकत्वमितिद्रष्टव्यं । ननुतथापिविदारकंलवित्रादिस्वसंबद्धंकेशादिकंस्वसंबद्धात्म

देशाद्विदारयतीतिदृष्टं । विदारकस्वभावस्यभेदस्यधर्मिस्वरूपत्वेधर्मिणैवतादात्म्यरूपस्संबंधःप्राप्तोनप्रतियोगिना । तथा चप्रतियोगिनासंबंधाभावात्कथंततोधर्मिणंविदारयेदित्यतआह ॥ प्रतियोगिनिरूप्यत्वंचेति । तथाचतन्निरूप्यत्वमेव प्रतियोगिनासाकंभेदस्यसंबंधइतिभावः ॥ स्वरूपस्यापीति । धर्मिस्वरूपस्यापीत्यर्थः ॥ उपपादितमिति । नचधर्मिप्र तियोग्यपेक्षयाभेदस्यास्वरूपत्वं ऐक्यवत्स्वरूपस्यैवतथात्वादित्यनेनैक्यप्रतिबंद्यासिद्धांतेसविशेषाभेदांगीकारेणचोपपादि तमित्यर्थः ॥ अंगीकृत्यचेति । विदारणशब्दोभावसाधनःकरणसाधनश्चेतिपक्षद्वयेयत्समाधानमुक्तंतत् भिदूविदारणइति भिदूधातोर्विदारणार्थत्वमंगीकृत्यैवोक्तमित्यर्थः । तर्हिवस्तुतत्त्वंकिमित्यतआह ॥ वस्तुतस्त्विति ॥ विदारणात्मेति । अत्रा स्माकंविवक्षितइतिशेषः ॥ अन्योन्याभावएवेति । इदमुक्तंभवति । क्रियावाचित्वमाख्यातुमेकैकोर्थःप्रदर्शितः । प्रयो गतोनुगंतव्याअनेकार्थाहिधातवइतिवचनाद्भिदिर्विभागवचनोऽन्यत्ववचनश्च । भिन्नोघटइत्युक्तेस्फुटितइतिगम्यते । भि न्नंगगनंघटादित्युक्तेअन्यदितिविज्ञायते । तत्रविभागोविदारणात्मानान्यत्वं । अन्यत्वमेवात्रप्रकृतंनविभागइत्यन्यतालक्षण स्यभेदस्यवस्तुस्वरूपत्वेऽस्माभिःकथितेविदारणप्रसंगेनशून्यतापादनमसंगतमेवछलत्वादिति । ननुविभागस्यान्यत्वस्यच कोविशेषोयेनैवमुच्यतइतिचेन्न । विदारणार्थोधातुश्चविभागगुणवाचकइत्यनुव्याख्यानेगुणग्रहणेनैवपरिहृतत्वात् । विभागो हिगुणतयावैशेषिकादिभिरुपपादितोऽन्यताचान्योन्याभावइतिभावाभावरूपतयास्फुटस्तयोर्भेदः । यस्तुमायावादीगुणादि प्रक्रियांनानुमन्यतेसतु अविदारणेपिद्यास्यस्यभिन्नावोष्ठौतुतस्यचेत्यनुव्याख्यानोक्तरीत्याबोधनीयः । तथाहि । यदामाया

वादीतत्वादिभिरस्माभिःपराजितस्सन्निरुत्तरतयातूष्णीमास्तेतदासंयुक्तयोस्तदीययोरोष्ठयोर्विदारणलक्षणविभागाभावेप्यो
ष्ठौभिन्नौभवतएव । तथैवप्रतीतिरप्यस्त्येव । तथाचतत्रभिन्नावित्यस्यान्योन्याभावलक्षणभेदवंतावित्येवार्थोवक्तव्यः । एवं
चयदभावेयदस्तितत्ततोन्यदितिप्रसिद्धमेव । अतोविभागादन्योन्याभावरूपोभेदोऽर्थांतरमेवेतिसुधोक्तरीत्यैवोपपादनंद्रष्ट
व्यं । सर्वशून्यतापत्तिरित्युक्तंसर्वशून्यतापादनंच विभागेनाल्पतैवस्यात्कुतएवचशून्यता । नशून्यानांहिसंयोगाद्भावो
वस्तुनइष्यतइत्यनुव्याख्यानोक्तरीत्यापरिहर्तव्यं । एकाभावादित्युक्तांयुक्तिमाशंक्यनिराकरोति ॥ तथापीत्यादिना ॥
अनेकत्वंस्यादिति । अनेकत्वाधारत्वंस्यान्नत्वेकत्वाधारतेत्यर्थः ॥ तदवयवानामपीति । अनेकत्वैकार्थसमवायिनोभे
दस्यतत्स्वरूपत्वात्तेषामप्यनेकत्वाधारत्वंस्यादित्यर्थः ॥ नभवेदिति । तस्यतत्समाहाररूपत्वात्तत्कार्यत्वाद्वेतिभावः ॥ सं
ख्यारहितस्येति । एकत्वानेकत्वसंख्यारहितस्येत्यर्थः ॥ शून्यत्वेति । संख्यायास्सामान्यगुणत्वादितिभावः ॥ एवंही
ति । अनेकत्वैकार्थसमवायिनोभेदस्यपटस्वरूपत्वइत्यर्थः ॥ अनेकत्वंस्यादिति । अनेकस्यभावःअनेकत्वं तस्यभावस्त्व
तलावितिभावेत्वप्रत्ययविधानात् । तथाचानेकनिष्ठोधर्मस्स्यादित्यर्थः ॥ नत्वनेकइति । अनेकत्वाधिकरणभूतोधर्मीत्य
र्थः । भेदपटयोरभिन्नत्वेनयथाभेदोऽनेकनिष्ठोधर्मस्तथातदभिन्नःपटोप्यनेकतंत्वादिनिष्ठधर्मएवस्यान्नत्वनेकत्वाधिकरणभूतो
धर्मी । तथाचपटस्याप्यनेकत्वंस्यादित्युक्तमनेकत्वाधारत्वापादनमसदितिभावः । अंगीकृत्याप्याह ॥ अनेकत्वेपीति । प

टस्यानेकत्वाधारत्वेपीत्यर्थः । एकत्वं एकत्वाधिकरणत्वं । नन्वेकस्यनानेकत्वं विरोधादितिचेत्तत्राह ॥ **स्वस्मिन्निति** । तेन एकत्वाभावेन । ननुएकत्वानेकत्वयोर्विरोधस्यभवद्भिरंगीकृतत्वेनपररीत्यैवपरंप्रत्यापादनान्नममपूर्वोत्तरविरोधइत्यतआह ॥ **नह्यत्रेति** । स्वस्मिन्नेकोन्येनसहितोनेकइतिविरोधाभावादित्यनेनैकत्वानेकत्वयोरस्मन्मतेविरोधएवनास्तीत्युक्तमित्यर्थः । यदुक्तंसंख्यारहितस्यद्रव्यस्यशून्यतापत्तिरिति तन्न । वैशेषिकाणांगुणादिपंचकवन्मायावादिनांब्रह्मवदगुणस्यापिसत्त्वसंभवेनसंख्याराहित्यस्यशून्यतानापादकत्वादित्यवधेयं ॥ **बाधकाभावादिति** । सापेक्षत्वादितिकारिकोक्तबाधकपंचकाभावादित्यर्थः॥ **साधकेति**। यदिनस्वरूपंभेदइत्यादिनोक्तपरिशेषानुमानरूपसाधकसद्भावाच्चेत्यर्थः॥छ॥ शंकते ॥ **पटइत्यादिना**। प्रतियोगिभूतस्येत्यतःपूर्वंतथात्वइतिपूरणीयं ॥ **युगपज्ज्ञानेति** । युगपज्ज्ञानोत्पत्तीत्यर्थः । ननुमूलेज्ञानयौगपद्याभावो दोषइत्यनुक्त्वायुगपज्ज्ञानानुत्पत्तिरित्यनुत्पत्तिपर्यंतंकस्माद्भावनंकृतमित्यतस्तत्कृत्यमाह ॥ **यद्यपीत्यादिना** ॥ **वध्यघातुकभावेनेति** । प्रथमक्षणेसंशयःद्वितीयक्षणेचतन्निवर्तकंविशेषदर्शनंभवति । एवंचसंशयविशेषदर्शनयोर्मूषकमार्जारवद्वध्यघातुकभावेनयुगपदवस्थानरूपयौगपद्यमस्त्येव । अन्यथावध्यघातुकभावस्यैवायोगात् । तथाचज्ञानानांयुगपदवस्थानरूपयौगपद्याभावस्यलोकेदृष्टत्वात्प्रकृतेसर्वव्यावृत्ततयापटःप्रतीयतइत्यंगीकारेधर्मिप्रतियोगिज्ञानयोर्युगपदवस्थानरूपयौगपद्यप्रसंगइत्यापादनेइष्टापादनंस्यादितिभावः । कुतोनास्तीत्यतआह ॥ **मनसइति** । ननुमनसोऽणुत्वेनयुगपदिंद्रियद्वयसन्निकर्षासंभवेप्येकेंद्रियसन्निकर्षस्तावदस्त्येव । तथाचैकस्मादिंद्रियाद्युगपज्ज्ञानद्वयंजायतामित्यतआह ॥ **एकेंद्रियविषयेपी**

ति । एकेंद्रियरूपाधिष्ठानेमनस्सन्निकर्षस्यसत्त्वेपीतिव्याख्येयं । नन्वात्मगुणानांयुगपदुत्पत्त्यदर्शनादित्ययुक्तं । लिंगपराम
र्शानंतरमनुमितिजननकालेलिंगसंस्कारस्याप्यात्मनिजायमानत्वेनवन्ह्यनुमितिलिंगसंस्कारलक्षणविजातीयात्मगुणयोर्युगप
दुत्पत्तिदर्शनादतउक्तं ॥ **सजातीयेति** । केचित्तुलिंगपरामर्शानंतरंतदनुव्यवसायोत्पत्तिकालेलिंगसंस्कारस्यापिजननाद्वि
जातीयसंस्कारानुव्यवसायोत्पत्तिव्यावृत्त्यर्थंसजातीयपदमित्याहुः । अन्येतुअनुमितिजननकालेधर्मादेरप्यात्मनिजननाद्वि
जातीयानुमितिधर्माद्युत्पत्तिव्यावृत्त्यर्थंसजातीयपदमित्याहुः ॥ **नचेतीति** । तथाच नचयुगपज्ज्ञानानुत्पत्तिर्दोषइ
तिमूलस्यएकेनैवेंद्रियेणयुगपत्सजातीययोर्ज्ञानयोरनुत्पत्तिर्दृष्टेतिहेतोःप्रकृतेपटःप्रतीयमानस्सर्वव्यावृत्ततयैवप्रतीयतइत्यंगी
कारेएकेनैवेंद्रियेणसजातीययोःप्रतियोगिभूतसर्वधर्मिभूतपटविषयकयोर्ज्ञानयोर्युगपदुत्पत्तिप्रसंगरूपोदोषस्स्यादित्यर्थोद्रष्ट
व्यः । मूलेदर्शनशब्देनज्ञानग्रहणेदीपसहस्रदर्शनेतेसर्वेसहस्रदीपाज्ञायंतइतिपुनरुक्तिः । अनुव्यवसीयंतइत्यर्थांगीकारे
चप्रकृतासंगतिरतोव्याचष्टे ॥ **दृश्यंतेऽनेनेति** । सामान्यतइतिपदाभिप्रायमाह ॥ **यद्यपीत्यादिना** ॥ **युगप**
दिति । एकेनैवेंद्रियेणयुगपत्सजातीयानेकज्ञानोत्पत्तीत्यर्थः । सामान्यशब्दार्थमाह ॥ **समुदायेति** । प्रतियोगिभू
तसर्वधर्मिभूतपटविषयकसमूहालंबनस्येत्यर्थः । शिष्यःशंकते ॥ **नन्विति** ॥ **साक्षिरूपामति** । सर्वसामान्यतो
यस्मात्सर्वैरेवानुभूयतइत्यनुव्याख्यानाद्युक्तिबलादित्यर्थः ॥ **सर्वदासत्येवेति** । साक्षिरूपज्ञानस्यनित्यत्वादितिभा
वः ॥ **आक्षेपपरिहाराविति** । युगपज्ज्ञानोत्पत्त्यापादनरूपाशंका समूहालंबनज्ञानांगीकारेणपरिहारश्चेत्यर्थः ॥ **सत्य**

मित्यादि । सामान्यतस्सर्ववैलक्षण्यप्रतीतावेवत्वदुक्तोपपादनंसंगच्छते । तत्रप्रतियोगिभूतसर्वज्ञानस्यसाक्षिरूपत्वात् । यदाविशेषतोघटात्पटोभिन्नइतिघटप्रतियोगिकव्यावृत्तिःपटेप्रतीयते । तत्रघटपटज्ञानोत्पत्तियौगपद्यंप्रसज्यतएव नहिप्रति योगिभूतघटज्ञानंसाक्षिरूपंयेनत्वदुक्तरीतिस्तत्रसंगच्छतइतिभावः । मूलोक्तंसमाधानंस्थलविशेषाभिप्रायमित्याह ॥ तत्रेति ॥ संस्कारेति । यदसन्निहितंधर्मिप्रतियोगिनोरन्यतरत्तत्तद्विषयकपूर्वानुभवजन्यसंस्कारेत्यर्थः ॥ एकज्ञानेति । यत्सन्निहितंधर्मिप्रतियोगिनोरन्यतरत्तद्विषयमेकमेवज्ञानमुत्पद्यतइत्यर्थः ॥ इत्यादीति । यत्सन्निहितंधर्मिप्रतियोगिनोरन्यतरत्तत्तद्विषयकमेवज्ञानमुत्पद्यतइत्यर्थः । इत्यादीत्यादिपदेनधर्मिप्रतियोगिनोरुभयोरप्यसन्निधानेसंस्कारव्यापारकेणमनसासमुदायविषयैकज्ञानोत्पत्तिरितिद्रष्टव्यं ॥ इतिवेति । अन्यतरमात्रावशेषस्स्यादितिभावः ॥ विद्यमानयोरेवेति । उभयोरपिसत्त्वांगीकारेणनान्यतरमात्रावशेषइतिभावः । अभेदविशेषयोरुभयोःप्रयोजनमाह ॥ तत्राभेदेनेति । अन्योन्याश्रयादिपरिहारइत्यत्रादिपदेनभेदप्रतीतिपरंपरयानवस्थाप्रसंगस्य तथाप्रत्यक्षंकिंभेदमेवगोचरयेदुतवस्त्वपीत्यादिनोक्तदूषणस्यचग्रहणं । अन्यतरमात्रावशेषादिकमित्यत्रादिपदेनशब्दपर्यायत्वग्रहणं । नन्वन्यतरमात्रावशेषाभावादेर्भेदनिर्वाह्यत्वेनकथंविशेषान्निर्वाहइत्यतआह ॥ विशेषस्येति । अभिन्नेवस्तुनिभेदकार्यकारित्वस्यैवविशेषलक्षणत्वादितिभावः । सर्वाभेदवादिभिरपीत्यनेनापिशब्दोविरोधद्योतनार्थइत्युक्तंभवति । अतएवाह ॥ किमुतेत्यादि । सर्वाभेदादिवादिभिरपी

तिपाठेआदिपदेनभेदाभेदवादिग्रहणं । पदार्थान् द्रव्यगुणादीन् । अन्यै स्तार्किकादिभिः । ननुसर्वाभेदवादिभिर्विशेषस्यकं ठतोनंगीकृतत्वात्कथमंगीकृतएवेत्युच्यतइत्यतआह ॥ अंगीकृतप्रायइति । अतएवमूलगतापिशब्दस्यनास्मत्समुच्चयार्थत्वं । अस्माभिःकंठतएवविशेषस्यांगीकृतत्वादितिभावः । कथमंगीकृतप्रायइत्यतआह ॥ तदविनाभूतस्येति । विशेषाविनाभूतस्यज्ञानानंदादेरन्यतरपरिशेषाभावापरपर्यायत्वादेरर्थस्येत्यर्थः ॥ पदसमन्वयबलेनेति । समन्वयोहिद्विविधः । पदसमन्वयोवाक्यसमन्वयश्चेति । तत्रवैदिकानामपर्यायानंतशब्दानांब्रह्मण्युपक्रमादिप्रमाणकःशक्तितात्पर्यलक्षणस्संबंधः । पदसमन्वयस्तन्न्यायेनेत्यर्थः । अन्यथापृथक्पृथगर्थेषुवाचकतयावस्थितपदसमुदायरूपवाक्यानामंततोभगवत्परत्वंवाक्यसमन्वयः । तत्पक्षेएतद्वाक्यस्यपृथिव्यादिव्यावृत्तिमात्रप्रतिपादकत्वेनवाक्यद्वयप्रतिपाद्यव्यावृत्त्योर्ब्रह्मसंबंधित्वासिद्धिरितिभावः । आत्मशब्दार्थस्य ब्रह्मणः ॥ वाक्यद्वयेति । नेतिनेतीतिद्विराम्नातत्वादितिभावः ॥ भेदइति । ब्रह्मणापरस्परंचेत्यर्थः ॥ अखंडेति । निर्भेदार्थनिष्ठत्वरूपेत्यर्थः । मूलंयोजयति ॥ तत्रेति । अत्यंताभेदइतिमूलेशेषपूरणं । ब्रह्मणाअत्यंताभेदे । यद्यदभिन्नाभिन्नं । तत्तेनाभिन्नमितिव्याप्तिबलात्परस्परंचात्यंताभेदइत्यर्थः । मूलेविशेषपदंबुद्ध्याविविच्यषष्ठ्यंतं कृत्वातेनचशब्दस्यसंबंधइत्यभिप्रेत्योक्तं ॥ विशेषस्यचानंगीकारइति ॥ पुनरुक्तीति । ब्रह्मरूपैकार्थप्रतिपादकत्वादित्यर्थः । पुनरुक्तिः । पर्यायता । एवमुत्तरत्रापिज्ञातव्यं । अत्यंताभेदांगीकारेनिमित्तकथनायोक्तं ॥ नेहनानास्तीति । इह ब्रह्मणि । किंचन किमपिव्यावृत्त्यादिकं । नाना भिन्नं । नास्तीत्यर्थः । तथाचव्यावृत्त्योर्ब्रह्मणश्चात्यंताभेदानंगीकारेएतद्वा

क्यविरोधस्स्यादितिभावः । पौनरुक्त्यादीत्यादिपदेनव्यावृत्तिद्वयस्यब्रह्मणश्चविशेषणविशेष्यभावानुपपत्तेरन्यतरमात्रावशे षस्यचसंग्रहः ॥ [५२।८] एवंमादीति । नेतिनेतीत्यादिवाक्यगतेत्यर्थः । व्यावृत्त्योः पृथिवीव्यावृत्तिजलादिव्यावृत्त्योः । लक्ष्यार्थो ब्रह्म ॥ [५२।९] अखंडार्थतेति । निर्भेदार्थनिष्ठत्वरूपेत्यर्थः ॥ [५२।९] वैयर्थ्येति । एकेनैवपदेनब्रह्मणोलक्षितत्वात्पदांतरवैयर्थ्यंस्यादित्यर्थः ॥ [५२।१०] नानाविधारोपेति । पृथिवीजलाद्यभेदरूपेत्यर्थः । तथाचसएषआत्मापृथिवीवन्न जलादिवन्नेतिप्रतिपादने नतत्तदभेदारोपपरिहारोभवतीतिभावः ॥ [५२।१०] प्रतिपाद्येति । लक्षणयाप्रतिपाद्येब्रह्मणिपृथिव्यादिव्यावृत्तिरूपविशेषणानामनर्पणेतत्तदभेदारोपपरिहारस्याप्यनुपपत्तेरित्यर्थः । विशेषार्पणेचनिर्विशेषार्थनिष्ठत्वनिर्भेदार्थनिष्ठत्वरूपाखंडार्थताहानिरितिभावः । यथोक्तमनुव्याख्याने नव्यावृत्त्याप्रयोजनं । व्यावृत्तस्याविशेषत्वइति । निर्विशेषाभेदे ब्रह्मणापरस्परंचेतिशेषः । पौनरुक्त्यादीत्यादिपदेनपदांतरवैयर्थ्यग्राह्यं । चशब्दस्यार्थमाह ॥ [५२।११] इतश्चेति । किंचेत्यर्थः । निर्विशेषाभेदः परस्परमितिशेषः । अभिन्नमपि परस्परमभिन्नमपीत्यर्थः । सातिशयं सविशेषात्यंताभिन्नं । तन्मात्रं निर्विशेषात्यंताभिन्नं ॥ [५२।१३] अत्रेति । सर्वाभेदवादिनामायिनाविशेषोंगीकार्यइत्यत्रेत्यर्थः ॥ [५२।१४] तथाविधमेवेति । व्यावृत्त्यपरपर्यायभेदप्रतिपादकमेवनेतिनेतीतिवाक्यमुदाहृतमित्यर्थः । नकेवलंप्रस्तुतभेदप्रतिपादकत्वादेवास्यवाक्यस्योदाहरणं किंतुप्रयोजनांतरानुरोधेनापीत्याह ॥ [५२।१४] कापीति । कुत्रापि । जगतिवाब्रह्मणिवेत्यर्थः ॥ [५२।१४] भेदानभ्युपगताविति । भेदरूपपदार्थस्यैवानभ्युपगमइत्यर्थः ॥ [५२।१४] एतद्वाक्ये

ति । भेदप्रतिपादकनेतिनेतीतिवाक्येत्यर्थः ॥ [५२।१४] अनेनेति । नेतिनेतीत्यत्रसर्ववैलक्षण्यांगीकारादितिमूले नेतिनेतीतिवाक्योदाहरणेनेत्यर्थः । तथाचैतद्वाक्यविरोधपरिहारायभेदस्यांगीकर्तव्यत्वेभेदखंडनंक्रियमाणंस्वव्याहतमित्याशयः । तस्माद्भेददर्शनंयुक्तमेवेत्युपसंहारवाक्याशयमाह ॥ [५२।१४] **किंचात्रेत्यादिना** । अत्र धर्मिंप्रतियोग्यपेक्षयाभेदसिद्धिर्भेदापेक्षंचधर्मिप्रतियोगित्वमित्यन्योन्याश्रयतयाभेदस्यायुक्तिरितिवाक्येभेदविषयेकथमापादनंत्वयाक्रियतइत्यर्थः । आपादनप्रकारंशंकते ॥ [५२।१५] **यदिभेदइति** ॥ [५२।१५] **विपर्ययेति** । नचान्योन्याश्रयाणिकार्याणिभवंतितस्माद्भेदोनदृश्यतइतिविपर्ययपर्यवसानंनसंभवतीत्यर्थः ॥ तत्रहेतु[५२।१५]**र्भेददर्शनस्यसंमतत्वेनेति** । अनुमानतर्कागमादिव्यवहारंकुर्वतस्तवभेददर्शनस्यसंमतत्वात् । अनुमानतर्कयोर्लिंगसाध्यापादकभेदसापेक्षत्वात् । अन्यथासाध्यावैशिष्ट्यादिप्रसंगादेरनुमानादेरेवानुत्थानात् । आगमस्यापिपदपदार्थसंसर्गादिभेदसापेक्षत्वात् । अन्यथागामानयेत्यादेरागमस्याबोधकत्वापत्तेः । अतोभेददर्शनंतवापिसंमतमेवेतिप्रतितर्कपराहतिरितिभावः । यथोक्तंवादावल्यां । यदिभेददर्शनंनस्यात्तर्ह्यनुमानादिसकलव्यवहारविधुरःपरःप्रसज्येतेतिप्रतितर्कपराहतत्वादिति । किंचभेददर्शनस्यासंमतत्वेभेदनिराकरणमेवायुक्तंस्यात् । तस्यप्रतियोगिज्ञानपूर्वकत्वादित्यपिद्रष्टव्यं । तस्य भेददर्शनस्य ॥ [५२।१६] **प्रमात्वाप्रतिबंधकत्वादिति** । यदिभेदोधर्म्यादिप्रतीतिमपेक्ष्यप्रमीयेततदान्योन्याश्रयस्स्यात् । नचान्योन्याश्रयाणिकार्याणिभवंति । तस्माद्भेददर्शनंनप्रमेतिवक्तव्यं । स्यादिदंयदिधर्म्यादिप्रतीतेर्भेदप्रमात्वावच्छेदेनका

रणत्वंस्यान्नंचैवं तथात्वेधर्मिप्रतियोगिप्रतीतिमतोभेदभ्रमःक्वापिनस्यात् । नचेष्टापत्तिः । अंगुल्यवष्टंभादिनाद्वितीयचंद्र
दर्शनानंतरमयंचंद्रोऽस्माच्चंद्राद्भिन्नइतिचंद्रभेदभ्रमस्यानुभवसिद्धस्यापह्नोतुमशक्यत्वात् । तस्माद्भेदप्रतीतित्वावच्छेदेनै
वधर्म्यादिप्रतीतेःकरणतायाअवश्यंवाच्यत्वेनप्रकृतेधर्म्यादिप्रतीत्यपेक्षयाप्राप्तान्योन्याश्रयस्यभेदप्रतीतिप्रतिबंधकत्वमेववा
च्यं । नतुप्रमात्वप्रतिबंधकत्वमित्यर्थः । वास्तवत्वं पारमार्थिकत्वं ॥ परास्तमिति । अन्योन्याश्रयेणभेददर्शनस्यवास्तवत्वं
निराक्रियतइत्युक्त्याप्रमात्वमेवनिराक्रियतइत्युक्तंस्यात् । तन्नसंभवति । अन्योन्याश्रयत्वस्योक्तरीत्याप्रमात्वाप्रतिबंधकत्वा
दित्यर्थः । दुष्टस्य भेदस्य ॥ व्यावहारिकसत्त्वमपीति । अन्योन्याश्रयेणभेददर्शनस्यप्रमात्वनिराकरणेभेदस्यपारमा
र्थिकसत्त्वएवनिषिद्धोनतुव्यावहारिकंसत्त्वं तत्तुत्वयांगीकृतमस्तीत्यर्थः । ननुव्यावहारिकसत्त्वोपेतेवस्तुन्यन्योन्याश्रयोनदू
षणमितिचेत्तत्राह ॥ नहीति । अवास्तवी । पारमार्थिकसत्यानभवति । किंतुव्यावहारिकसत्येत्यर्थः । ततएव घटादेव ।
पुनःप्रकारांतरेणापादनंशंकते ॥ अर्थेति ॥ धर्म्यादिप्रतीत्यपेक्षैवेति । नचान्योन्याश्रयाणिकार्याणिभवंति । तस्माद्ध
र्म्यादिप्रतीत्यपेक्षयाभेदोनप्रतीयतइतिविपर्ययपर्यवसानेसविशेषणेहीतिन्यायेनभेदप्रतीतेर्धर्म्याद्यपेक्षैवनिवर्ततइत्यर्थः । वि
शिष्टनिषेधाभिप्रायेणशंकते ॥ प्रकारांतराभावादिति । धर्म्यादिप्रतीत्यपेक्षयाप्रतीयमानत्वरूपप्रकारभिन्नप्रकारस्यभे
ददर्शनेऽभावाद्धर्म्यादिप्रतीत्यपेक्षयाप्रतीयमानत्वरूपप्रकारस्यान्योन्याश्रयेणनिवृत्तौभेददर्शनस्यैवनिवृत्तिःप्राप्तेत्यर्थः ॥
दर्शनमात्रस्येति । भेददर्शनमात्रस्येत्यर्थः । अन्यथातन्निराकरणानुपपत्तिरित्यर्थः । एवंचविशेष्यभूतभेददर्शननिराक

रणस्यबाधितत्वेनविशिष्टनिषेधायोगाद्विशेषणीभूतंधर्म्यादिप्रतीतिसापेक्षत्वमेवनिवर्तते । सविशेषणेविधिनिषेधौविशेषणमुपसंक्रामतस्सतिविशेष्यबाधइतिन्यायादितिभावः । ननुदर्शनमात्रस्यांगीकृतत्वेपिप्रमात्वंवास्तवत्वंवातस्यनिराक्रियतइतिचेत्तत्राह ॥ [५२।२०] प्रमात्वादीति ॥ [५२।२०] उक्तत्वादिति । अन्योन्याश्रयत्वस्यप्रमात्वाप्रतिबंधकत्वादित्यनेनेत्यर्थः । प्रकारांतरं धर्म्यादिप्रतीत्यपेक्षयाप्रतीयमानत्वरूपप्रकारभिन्नंप्रकारमित्यर्थः ॥ [५२।२१] अस्मिन्नेवेति । धर्म्यादिप्रतीत्यपेक्षयाप्रतीयमानत्वरूपप्रकारएवेत्यर्थः । स्वयं स्पष्टदृष्टंभेददर्शनमित्यर्थः । अत्रोदाहरणमाह ॥ [५२।२१] नहीति ॥ [५२।२१] परिचितचरेति । भूतपूर्वेचरडितिस्मरणात् । पूर्वंपरिचितंपरिचितचरमित्यर्थः ॥ [५२।२१] बीजासंभवेति । बीजादुत्पत्त्यसंभवेत्यर्थः । परिचितेषु बीजेषु ॥ [५२।२३] अनुमानादिनेति । अनुमानेनपक्षसाध्यलिंगरूपेस्वविषये । आगमेनपदपदार्थसंसर्गरूपेस्वविषयइत्यर्थः । अनुमानेव्याप्यव्यापकादिभेदाप्रतीतौसाध्याविशिष्टत्वापत्त्यातदुच्छेदएवस्यात् । एवमागमेपिपदपदार्थभेदाप्रतीतौसंसर्गबोधायोगादागमोच्छेदापत्तिरितिभावः । एवंचभेदेप्रत्यक्षादिप्रमाणत्रयमुक्तंभवति ॥ [५२।२३] वक्ष्यमाणन्यायेनेति । नहिप्रमाणदृष्टस्यतर्कबाध्यत्वमित्यादिनावक्ष्यमाणन्यायेनेत्यर्थः ॥ [५२।२४] कथमिति । तथाचानुमानेनभेदप्रतीतिर्नसंभवति । तत्रव्याप्यव्यापकादिभेदोऽनुमानेनबोद्धव्यस्तस्मिन्नप्यनुमानेव्याप्यादिभेदःपुनरनुमानांतरेणेत्यनवस्थास्यादितिभावः ॥ [५२।२४] नांगीकरोतीति । प्रत्यक्षेणेतिशेषः । तथाचानुमानापेक्षितव्याप्यव्यापकादिभेदःप्रत्यक्षेणैवज्ञातोभविष्यतीतिनानवस्थेतिभावः ॥ [५२।२४] तथासती

ति । यदिपरोभेदप्रतीतिमात्रंनांगीकुर्यादित्यर्थः ॥ [५।२।२४] **व्यवहारइति** । अनुमानव्यवहारस्यसाध्यलिंगव्याप्त्यादिभेदसापेक्षत्वादागमव्यवहारस्यचपदपदार्थसंसर्गादिभेदसापेक्षत्वेनभेदप्रतीत्यनंगीकारेसनस्यादित्यर्थः । ननुभेदप्रतीतिमात्रांगीकारेपितस्याःप्रतीतेःप्रमात्वंनिराक्रियते । भेदोमिथ्याभेदत्वाच्चंद्रभेदवदित्यनुमानेनभेदप्रतीतेर्बाधितत्वात् । नहिबाधकबाधिताप्रतीतिःप्रमाभविष्यतीत्यतआह ॥ [५।२।२५] **प्रमात्वनिवृत्तिकारणस्येति** ॥ [५।२।२५] **अनुपदमेवेति** । यच्चप्रमाणदृष्टानामपीत्यादिनाऽनुपदमेवेत्यर्थः ॥ ७ ॥ **इतिभेदप्रकरणं** ॥७॥ [५।२।२६] **एतत्त्वंत्विति** । एतत्परस्यतंत्वंतरनिष्ठात्यंताभावप्रतियोगित्वंसिद्धमेवास्ति । एतत्तंतुष्वेवास्तीतिवक्तव्यं । तत्रापितदत्यंताभावसाधनेमिथ्यात्वमेवसिध्यति । प्रतिपन्नोपाधावत्यंताभावप्रतियोगित्वस्यैवमिथ्यात्वादितिभावः । अप्रयोजकतांपरिहर्तुमनुकूलतर्कमाह ॥ [५।३।१] **विपक्षइति** । पक्षेसाध्याभावशंकायामित्यर्थः । पक्षेविपक्षजिज्ञासाविच्छेदस्तदनुग्रहइतिकारिकावचनात् ॥ [५।३।१] **दृक्संबंधेति** । दृश्यस्येतिशेषः । तथाचदृक्दृश्यसंबंधेत्यर्थः । तथाहि । यदिजगत्सत्यंस्यात्तदादृक्दृश्ययोस्संबंधोनस्यात् । चैतन्यरूपायादृशोदृश्यस्यचसंयोगसमवाययोरयोगाद्दृग्रूपचैतन्यस्यासंगत्वेनविषयित्वानुपपत्त्याविषयविषयिभावस्यचासंभवाद्दृशिदृश्यंजगदध्यस्तमित्यधिष्ठानाध्यस्तत्वरूपाध्यासिकसंबंधएववाच्यः । नह्ययंसंबंधोजगतस्सत्यत्वेसंभवतीतिमिथ्यात्वमेववाच्यमितिभावः ॥ [५।३।२] **सत्यस्स्यादिति** । धर्मिणएवमिथ्यात्वेतद्धर्मस्यसत्यतायालोकेऽदर्शनादितिभावः । विमतोभेदो जीवेश्वरभेदः । विमतंतात्त्विकस्वांतर्भेदहीनंमतत्वतः । यदित्थंतत्तथायद्वत्खंतथेदंततस्तथेतिकारिकोक्तानुमानमाह ॥ [५।३।३] **विमतमिति** । विमतंचेतनजडरूपंसर्वं । व्यावहारिकभे

दांगीकारेणबाधवारणायतात्त्विकपदं । अभावरूपाधर्मोनाद्वैतंनिघ्नंतीतिमंडनमिश्रोक्तेरनृतव्यावृत्तिर्ब्रह्मभिन्नातात्त्विकीतिम
तेअनृतव्यावृत्तिरूपतात्त्विकभेदवत्त्वस्यैवचैतन्येसत्त्वेनबाधवारणायस्वांतरित्युक्तं स्वस्वरूपांतर्गतोयोभेदः पंचभेदस्तद्धीन
मित्यर्थः । मतत्वात् मतिविषयत्वात्दृश्यत्वादित्यर्थः ॥ [५३१४] प्रत्येकंसमुदितानिचेति । यज्ञदत्तेंद्रियंदेवदत्तस्यैवज्ञानक
रणं इंद्रियत्वाद्देवदत्तेंद्रियवदितिप्रत्येकं विमतानियज्ञदत्तविष्णुदत्तादिसर्वेंद्रियाणिदेवदत्तस्यैवज्ञानकरणानींद्रियत्वादे
वदत्तेंद्रियवदितिसमुदितानिपक्षीकृत्यप्रयोक्तव्यमित्यर्थः । व्यावहारिकभेदांगीकारेणबाधवारणायतत्त्वतइत्युक्तं । अप्रयोज
कतांपरिहरति ॥ [५३१५] विपक्षइति । जीवानांपरमात्माभेदांगीकारेलाघवं भेदांगीकारेचेतनबहुत्वप्राप्त्याकल्पनागौरवमित्यर्थः ॥
[५३१६] धर्मिग्राहकतयेति । प्रमाणदृष्टानामित्युक्तत्वादितिभावः । कथंकालात्ययापदिष्टत्वमित्यतस्साध्याभावग्राहकत्वादित्याह ॥
[५३१०] धर्मिग्राहकाणिहीति ॥ [५३१३] रूपसंपत्त्येति । अंगसंपत्त्येत्यर्थः ॥ [५३१४] समानमिति । प्रत्यक्षादिप्रामाण्येसिद्धेतद्विरुद्धत्वादनु
मानस्याप्रामाण्यसिद्धिः । अनुमानाप्रामाण्यसिद्धौतद्विरोधाभावात्प्रत्यक्षादिप्रामाण्यसिद्धिरितीतरेतराश्रयत्वंसमानमि
त्यर्थः । द्वितीयकोटिरसिद्धेत्याह ॥ [५३१४] प्रत्यक्षादीनामित्यादिना । प्रबलस्यदुर्बलविरोधाभावापेक्षानास्तीत्यत्रदृष्टांतमाह ॥
[५३१५] नहीति।तत्रयथाहरिणत्वपंचाननत्वादिजात्यैवप्राबल्यदौर्बल्ये तथाप्रत्यक्षत्वानुमानत्वरूपजात्यैवप्राबल्यदौर्बल्येइत्याशयः॥
[५३१६] दाहेति । नेदंरजतंदाहच्छेदादिमत्त्वादित्याद्यनुमानेत्यर्थः ॥ [५३१७] अन्यथेति । रजतत्वादिप्रतीतेरनुमानबाधितत्वानंगीकार
इत्यर्थः । अबाधितत्वेन अबाधितत्वप्रसंगेन । तस्याः प्रत्यक्षादिप्रतीतेः ॥ [५३१७] भ्रमत्वंनस्यादिति । भ्रमत्वस्यबाधैकवेद्यत्वा

दितिभावः । ननुप्रत्यक्षत्वाविशेषात्कथमियंशुक्तिरितिप्रत्यक्षस्यप्राबल्यमित्यतउक्तं ॥ [५३।१७] परीक्षादिसहकृतेति । दाहच्छेदाद्यनुमानरूपपरीक्षेत्यर्थः ॥ [५३।१८] वदंतेति । केवलार्थकमात्रशब्दप्रयोगेणेत्यर्थः । ननुनीलंनभइतिप्रत्यक्षं नभोननीलंविभुत्वादित्यनुमानबाध्यंदृष्टं । तथाप्रादेशपरिमितश्चंद्रमाइतिप्रत्यक्षं अष्टाशीतिसहस्राणिविस्तीर्णोयोजनानितु । प्रमाणंतत्रविज्ञेयं कलाःपंचदशैवत्वित्यागमबाध्यंदृष्टं । अतोनहिप्रमाणदृष्टस्यतर्कबाध्यत्वमित्युक्तमसदित्यतआह ॥ [५३।१९] एवमन्यत्रापीति । नभोनैल्यप्रत्यक्षमनुमानमूलभूताव्याकृताकाशस्यानीलत्वावगाहिसाक्षिप्रत्यक्षेणैवबाधितं । नानुमानमात्रात् । तथाचंद्रप्रादेशमात्रत्वावगाहिप्रत्यक्षं यद्दूरस्थत्वादिदोषयुक्तंतत्परिमाणादावयथार्थमितिसाक्षिप्रत्यक्षेणैवनिश्चितत्वात्तेनैवबाधितं । नागममात्रात् । एवंप्रबलप्रत्यक्षेणैवबाधितत्वात्ततःपरंप्रवर्तमानावनुमानागमौबाधकाविवोच्येते । राजगौरवेणराजभृत्येनामात्यइवेत्यर्थः । यथाहुः । दुर्बलस्यप्रमाणस्यबलवानाश्रयोयदा । तदापिविपरीतत्वमिति । केवलानुमानेत्युपलक्षणं । केवलागमेत्यपिग्राह्यं ॥ [५३।२१] तर्हीति । अनुमानेनैवप्रत्यक्षबाधांगीकारइत्यर्थः । ननुनकालात्ययापदिष्टलोपप्रसंगः । वह्निरनुष्णःपदार्थत्वादित्यनुमानस्यस्पार्शनप्रत्यक्षात्प्राबल्याभावेनप्रत्यक्षेणैवानुमानस्यबाधसंभवादित्यतआह ॥ [५३।२२] सर्वत्रैवमिति । व्याप्तिपक्षधर्मतावत्त्वेनतस्याप्यनुमानस्यप्रबलत्वात्तेनैवप्रत्यक्षबाधोभविष्यतीतिकालात्ययापदिष्टलोपस्तदवस्थइत्यर्थः । हेतुसूचकभूतपदोक्तंभूतत्वंनजातिर्मूर्तत्वेनसांकार्यप्रसंगात् । पृथिव्यादिपंचकान्यतमत्वस्यापृथिवीत्वरूपप्रकृतसाध्येविरोधेनहेतुत्वासंभवात् । अतोभूतत्वंनिर्वक्ति ॥ [५३।२३] बाह्येंद्रियग्राह्यगुणवत्त्वलक्षणस्यभूतत्वस्येति । दिक्कालयोरपिगुणवत्त्वेनभूतत्वपरिहा

रायेंद्रियग्राह्येतिगुणविशेषणं । तथात्वेआत्मनोपिमनोरूपांतरेंद्रियग्राह्यगुणवत्त्वेनभूतत्वपरिहारायबाह्येत्युक्तं । तथाचपृथिव्यप्तेजोवाय्वाकाशानांघ्राणरसनचक्षुस्त्वक्श्रोत्ररूपबाह्येंद्रियग्राह्यगंधरसरूपस्पर्शशब्दरूपगुणवत्त्वाद्भूतत्वमितिद्रष्टव्यं ॥ [५३।२३] व्याप्तिंसाधयतीति । अनेनगंधवद्द्रव्यंपृथिवीनभवतिभूतत्वादबादिवदित्यनुमानेभूतचतुष्टयस्यपृथिवीत्वादृष्टेरित्येतन्न केवलंहेतुमतिसाध्याभावादर्शनप्रतिपादकत्वेनव्यभिचारादर्शनप्रतिपादकंकिंत्वपृथिवीत्वदृष्टेरितिनञोव्यत्यासेनसहचारदर्शनप्रतिपादकमपिभवतीत्युक्तंभवति । अतएवोत्तरत्रव्यभिचारादर्शनादिनेत्यादिपदप्रयोगेणसहचारदर्शनंगृहीतं । तथाचव्यभिचारादर्शनसहचारदर्शनयोरुक्तत्वात्ताभ्यांव्याप्तिस्साधिताभवतीत्यर्थः ॥ [५३।२३] स्पष्टैवेति । घ्राणरूपबाह्येंद्रियग्राह्यगंधरूपगुणाश्रयत्वेनभूतत्वस्यपक्षीभूतपृथिव्यांस्पष्टत्वादित्यर्थः । पृथिवी पृथिवीनेतिसाधनेप्रतिज्ञापदयोर्व्याघातपरिहारायपृथिव्याअपीत्येतद्व्याचष्टे ॥ [५३।२४] गंधवतइति । ननुगंधवत्त्वमेवपृथिवीत्वं । तथाचगंधवद्द्रव्यंगंधवद्द्रव्यंनेतिसाधनेपुनस्तदवस्थः प्रतिज्ञापदव्याघातइत्यतआह ॥ [५३।२४] पृथिवीत्वमिति । व्यभिचारादर्शनादिनेत्यादिपदेनसहचारदर्शनग्रहणं । तथाचव्यभिचारादर्शनादिनासिद्धायाव्याप्तिस्तद्वत्त्वादित्यर्थः । व्याप्त्यादीत्यादिपदेनपक्षधर्मताग्रहणं ॥ विषमो[५३।२५]यमुपन्यासइति । पृथिव्याअपिपृथिवीत्वंनस्यादित्युपन्यासःप्रकृतेविषमोनुकूलोनभवतीत्यर्थः । अनेन अनुमानेन ॥ [५४।१] अन्यथेति । पृथिवीत्वरूपप्रतियोगिज्ञानाभावेपृथिवीत्वाभावरूपसाध्यस्यज्ञातुमशक्यत्वादप्रसिद्धविशेषणत्वमित्यर्थः ॥ [५४।१] उपजीव्यत्वेनेति । प्रतियोगिग्राहकत्वेनेत्यर्थः ॥ [५४।२] अन्यथेति । अनुमानस्यैवप्रत्यक्षबाधकत्वइत्यर्थः । स्वस्यैव अनुमानस्यैव ॥ [५४।२] उदया

भावेति । पृथिवीत्वरूपप्रतियोगिज्ञानाभावेनतदभावरूपसाध्यस्याप्रसिद्धत्वापत्त्याऽप्रसिद्धविशेषणत्वेनोदयाभावप्रसंगादित्यर्थः । तत्रैव पक्षीभूतेगंधवद्द्रव्यएव । तेजोवयविनः तेजोरूपावयविनः ॥ [५४।३] ज्ञातत्वादिति । तथाचतत्रैवभग्नव्याप्तिकमनुमानमेवाप्रमाणमित्यर्थः । नैवंप्रकृतेस्तीतिवैषम्यमित्याह ॥ [५४।४] नचैवंप्रकृतइति । जीवाःपरमात्मनस्तत्त्वतोनभिद्यंतइत्यत्रभेदाभावरूपसाध्यधर्मप्रतियोगिभूतभेदस्यघटपटादौज्ञानसंभवेनपृथिवीत्वादिवत्पक्षएवज्ञातव्यत्वनियमाभावान्नोक्तरीत्यापक्षएवभग्नव्याप्तिकमनुमानमित्यर्थः ॥ [५४।५] साध्यधर्मप्रतियोगीति । साध्यधर्मस्ययःप्रतियोगीतद्ग्राहकमेवेत्यर्थः ॥ [५४।५] तद्विरोधश्चेति । प्रकृतेमिथ्यात्वानुमानेधर्म्यादिग्राहकत्वेनप्रत्यक्षस्योपजीव्यत्वात् । तथाजीवाःपरमात्मनस्तत्त्वतोनभिद्यंतइत्यादौसाक्षिप्रत्यक्षस्यपक्षीभूतजीवग्राहकत्वात्तेनचासार्वज्ञादिविरुद्धधर्माधिकरणत्वेनपरमात्मभेदस्यैवगृहीतत्वात्तादृशभेदवत्त्वेनप्रत्यक्षसिद्धजीवपक्षीकारेणपरमात्मभेदाभावसाधनेधर्मिग्राहकत्वेनोपजीव्यप्रत्यक्षबाधोऽनुमानस्यास्तीत्यर्थः। अतएवोक्तंप्रमाणदृष्टानामपिपदार्थानामिति । भ्रांतित्वमितिपदस्वारस्यमंगीकृत्यव्याचष्टे ॥ [५४।६] भावेक्तइति । तथाचदर्शनस्य प्रत्यक्षस्येतितदर्थइत्याह ॥ [५४।६] प्रत्यक्षस्येत्यर्थइति । इष्टस्येतिपदस्वारस्यमंगीकृत्यापिव्याचष्टे ॥ [५४।६] अर्थवेति । [५४।७] सर्वप्रमाणविरुद्धत्वादिति । सर्वप्रमाणविरुद्धत्वादित्यभिप्रेत्येत्यर्थः । आभासत्वेतारतम्याभावान्नितरामित्ययुक्तमित्यतआह ॥ [५४।८] शंकेति । नन्वनुमानेनैवप्रत्यक्षंबाध्यतइत्युच्यते । ननुतर्हिकालात्ययापदिष्टस्यदोषतावात्याज्याव्यवस्थापकंवावक्तव्यमितिचेत्तत्राह ॥ [५४।८] नन्वस्त्यत्रव्यवस्थेति ॥ [५४।८] शुष्केति । प्रमाणानुकूल्यरहितेत्यर्थः । उपजीव्येन प्रत्यक्षेण ।

उपजीव्यंप्रत्यक्षमितिद्वितीया । ननूपजीव्यस्यानुमानबाधितत्वेनाप्रामाण्यधर्म्याद्यसिद्ध्याऽनुमानप्रवृत्तिरेवनस्यादितिचेत् । तत्रपृच्छामः । किंनिषेध्यसमर्पकत्वेनतत्प्रामाण्यमपेक्षितं धर्मिप्रमित्यर्थंवा । नाद्यइत्याह ॥ [५४।९] प्रसक्तीति । प्रसक्तिहेतुत्वेनयदुपजीव्यंतस्येत्यर्थः । प्रत्युततत्प्रामाण्यंनिषेधविरोध्येवेतिभावः । नद्वितीयइत्याह ॥ [५४।९] प्रतीतीति । धर्मिणइतिशेषः । तथाचप्रतीतिमात्रेणाश्रयत्वोपपत्त्यातस्याःप्रतीतेःप्रामाण्यंनापेक्षितंयेनतज्जनकत्वेनोपजीव्यस्यप्रामाण्यमपेक्षितंस्यादितिभावः । नन्वस्तुप्रमाणानुकूलानुमानस्योपजीव्यप्रत्यक्षबाधकत्वं । प्रकृतभेदप्रपंचमिथ्यात्वसाधकानुमानजातस्यप्रमाणानुकूल्याभावात्कथंबाधकत्वमित्यतआह ॥ [५४।९] प्रकृतंचेति ॥ [५४।१०] आगमेति । तत्त्वमसीत्यागमेत्यर्थः ॥ [५४।१०] तत्त्वमसीत्याद्यागमानामिति । एतज्ज्ञापनायैवमूलेसर्वश्रुतीतिश्रुतिमात्रंविरोधित्वेनगृहीतमित्यवगंतव्यं ॥ [५४।१०] निराकृतत्वादिति । अत्रचोपजीव्यत्वेनप्रमाणप्राबल्याद्भेदएवतात्पर्ययुक्तमित्यादिनानिराकृतत्वादित्यर्थः ॥ [५४।११] भिन्नविषयकत्वेनेति । समानसत्ताकवस्तुविषयकत्वाभावोभिन्नविषयकत्वं तेनेत्यर्थः । भिन्नविषयकत्वमुपपादयति ॥ [५४।११] भेदप्रपंचस्येत्यादिना । व्यावहारिकं सत्त्वं । नन्वनुमानस्यापिव्यावहारिकसत्ताप्रतिषेधकत्वाद्भिन्नविषयकत्वंनास्तीत्यतउक्तं ॥ [५४।१२] व्यावहारिकींसत्तामनुपमृद्येति ॥ [५४।१३] गोचरयतीति । भिन्नविषयकत्वेनेतिसंबंधः । नन्वेवंचेदपृथिवीत्वानौष्ण्यसाधकानुमानप्रत्यक्षयोरपिबाध्यबाधकभावोनस्यात् । अनुमानेनपृथिवीत्वौष्ण्ययोरभावःपारमार्थिकस्साध्यते । प्रत्यक्षेणतुव्यावहारिकमेवपृथिवीत्वमौष्ण्यंचगृह्यतइतिभिन्नविषयकत्वादितिवक्तुंशक्यत्वादित्यतआह ॥ [५४।१३] अपृथिवीत्वाद्यनुमानमिति । प्रत्यक्षं पृथिवीत्वौष्ण्यावगाहिप्रत्यक्षं ॥ [५४।१३] अपर

मार्थेति । पृथिवीत्वमौष्ण्यं तदुभयाभावश्चव्यावहारिकएवेतिसमानसत्ताकवस्तुविषयकत्वेनसमानविषयकत्वादितिभावः । सइतितच्छब्दस्यप्रकृतभेदाभावपरत्वप्रतीतिवारणायानूद्यार्थमाह ॥ [५४।२४] **सभेदइति** । अभावप्रतियोगित्वेनभेदस्यापिप्रकृतत्वादितिभावः ॥ [५४।२५] **परमार्थसत्त्वेति** । तथाचभेदग्राहिप्रत्यक्षाभेदसाधकानुमानयोस्समानसत्ताकवस्तुविषयकत्वेनसमानविषयकत्वाद्युक्तएवबाध्यबाधकभावइतिभावः । परिशेषप्रकारमेवाह ॥ [५४।२५] **भेदप्रपंचमित्यादिना** । असौ भेदप्रपंचः । ननुसदेकस्वभास्यभेदस्यसदसद्रूपत्वाभावेनसदसद्वैलक्षण्यंयुक्तमेवेतिकथंतद्दूष्यतइत्यतआह ॥ [५४।२८] **सदसद्वैलक्षण्यंनामेति** [५४।२८] **रहितत्वमिति** । तत्रप्रमाणाभावादित्यर्थः । शंकते ॥ [५४।२८] **दृश्यत्वादीति** । अर्थापत्तेरन्यथोपपत्तिंदूषणमाह ॥ [५४।२२] **अत्यंतासत्त्वेनैवेति** । ननुविकल्पानुसारेणकुतोनदूष्यतइत्यतआह ॥ [५४।२४] **परेणांगीकृतत्वादिति** ॥ [५४।२०] **असद्विशिष्टेति**। असद्विशेषणकेत्यर्थः ॥ [५४।२५] **विशेषणेति** । असद्रूपेत्यर्थः ॥ [५४।२५] **विशिष्टेति** । असत्ख्यातिरूपविशिष्टेत्यर्थः । विशिष्टज्ञानेविशेषणज्ञानस्यकारणत्वादितिभावः । ततःकिमित्यतआह ॥ [५४।२५] **नचेति** । अप्रतीतस्य ॥ असत्ख्यातिरूपविशिष्टस्य । अभावज्ञानेप्रतियोगिज्ञानस्यकारणत्वादितिभावः ॥ [५४।२६] **प्रतिषेधेति** । असत्ख्यातिप्रतिषेधेत्यर्थः॥ [५५।१] **स्वक्रियेति** । मूकोहमितिवदितिभावः॥ [५५।२] **अर्थापत्तेःफलेनविरोधःस्यादिति** । असच्चेन्नप्रतीयेतेतिख्यात्यन्यथानुपपत्तेरसत्प्रतीतिप्रतिक्षेपकत्वाद्विपर्ययपर्यवसानलभ्यस्यासद्वैलक्षण्यज्ञानलक्षणस्यार्थापत्तिफलस्यासत्ख्यात्याक्षेपकत्वेनार्थापत्तेःफलेनविरोधस्स्यादित्यर्थः । ननुशुक्तेरजतत्वमितिध

र्मनिर्देशःअनिर्वचनीयत्वेचरजतस्यानिर्वचनीयमिदंरजतमित्यत्रधर्मिनिर्देशइतिविचित्रप्रयोगःकिमर्थमित्यतोत्ररजतत्वमिति संसर्गारोपः इदंरजतमितितादात्म्यारोपइत्यारोपद्वयसद्भावात्तदभिप्रायेणेत्याह ॥ अत्यंतासतइत्यादिना। संसर्गः समवायः। भावनिर्देशः रजत्वमितिधर्मनिर्देशः। द्रव्यनिर्देशः रजतमितिधर्मिनिर्देशः । नन्वनुभवत्वाविशेषात्कथमस्यानुभवस्यप्राबल्यंयेनबाधकत्वंस्यादित्यतआह ॥ **बाधकप्रत्ययस्येति**। विशेषदर्शनजन्यत्वादितिभावः ॥ **सत्त्वाभावविषय इति**। नचतावतासत्त्वप्राप्तिः। अनिर्वचनीयरूपतृतीयकोट्यंगीकारादितिभावः । नन्वयंबाधकप्रत्ययःसत्त्वाभावविषयः कुतः। असत्त्वविषयकएवकिंनस्यादित्यतआह ॥ **शुक्तिरजतादेरिति** ॥ **अस्येति**। रजतस्येत्यर्थः। अन्यथाप्रवृत्तिर्नस्यादितिभावः। एतेनेत्युक्तंविशदयति ॥ **प्रतीतिमात्रेति**। असत्त्वेनेत्यर्थः ॥ **प्रतिषेधेति** । असत्ख्यातिप्रतिषेधेत्यर्थः। आदिपदेनासद्वैलक्षण्यज्ञानग्रहणं । नन्वेवमसतःप्रतीत्यंगीकारे असच्चेन्नप्रतीयेतेत्यापादनानुपपत्त्यार्थापत्त्यनुपपत्तिरित्यतआह ॥ **सत्त्वेनेति** । तथाचासच्चेत्सत्त्वेननप्रतीयेतेत्यापादनकरणान्नविरोधइत्यर्थः ॥ **सत्त्वेनेतिशेषइति**। अन्यथाऽसतःख्यात्ययोगादित्यनेनगतार्थता असतःसत्त्वप्रतीतिरित्युत्तरग्रंथानानुगुण्यंचस्यादितिभावः। अभ्रांतौ प्रमायां॥ **प्रकृतेति**। बाधकप्रतीतेस्सत्त्वाभावविषयकत्वमसद्वैलक्षण्योपपादनेनार्थापत्तिसमर्थनंचप्रकृतंतदनुपयोगादित्यर्थः । अयंभावः। असतःसत्त्वेनप्रतीतिरभ्रांतौनास्तीत्युक्त्याअसच्चेत्सत्त्वेननप्रतीयेतेतिसत्त्वप्रकारकप्रमाविषयत्वाभावआपादितस्स्यात् । ओमितिचेत्तथात्वेऽसतस्सत्त्वेनप्रमित्यसंभवेपिसत्त्वेनभ्रमसंभवात्सत्त्वेनभ्रमगोचरस्यापिशुक्तिरजतादेरसत्त्वस्यैवोप

पत्तेरसदेवरजतंप्रत्यभादितिबाधकप्रत्ययस्यसत्त्वाभावरूपविषयांतरकल्पनमर्थापत्त्याऽसद्वैलक्षण्योपपादनंचानुपयुक्तंस्या दितिनासतस्सत्त्वेनप्रतीतिस्सिध्यतीति । एवमन्यथाख्यातिलक्षणमुक्त्वासर्वान्प्रत्यप्यसतस्सत्त्वेनप्रतीत्युपपादनमस्मा भिःकर्तव्यं तन्नसिध्यतीत्यर्थः । कुतइत्यतआह ॥ अन्यथाख्यातिवादिभिरपीति । अन्यत्रविद्यमानमेवान्यत्रारो प्यतइत्यन्यथाख्यातिवादिभिस्तार्किकैरित्यर्थः ॥ असतइति । सतएवसत्त्वेनप्रतीत्यंगीकारादितिभावः ॥ व्याख्यानंकृ तमिति । भ्रमविषयप्रदर्शनंकृतमित्यर्थः । एवमनंगीकारेबाधकमाह ॥ यद्यसदित्यादिना । यदीत्यनंतरमसतःसत्त्वेन सतश्चासत्त्वेनप्रतीतिमनंगीकृत्येतिशेषः । अवधारणव्यावर्त्यंदर्शयितुमाशंकते ॥ सतइति । शुक्तेरापणस्थरजतात्मताप्रती तिरित्यर्थः । सा सदंतरात्मता ॥ अनुपपत्तिरेवेति । असतएवासत्त्वेनप्रतीतत्वादित्यर्थः ॥ कथमिति । असत्याएवस दंतरात्मतायास्सत्त्वेनप्रतीतत्वादित्यर्थः । ननुअसन्योधर्मस्तस्यसत्त्वेनप्रतीतिरंगीक्रियतेनतुधर्मिणः । तथाचासतस्संसर्ग स्यतादात्म्यरूपस्यवाधर्मत्वेनसत्त्वेप्रतीतिस्संभवतीतिचेत्तत्राह ॥ असतइति । धर्मिणः आरोप्यस्यरजतस्य । नन्वन्यत्रविद्य मानस्यैवान्यत्रारोपांगीकारादारोप्यस्यान्यत्रसत्त्वमेवासतोधर्मिणस्सत्त्वेनप्रतीतिर्नास्तीत्यत्रनियामकमित्यतआह ॥ अत्र प्रतीतस्येति ॥ आंतरस्येति । विज्ञानरूपत्वेनांतरस्यरजतस्येत्यर्थः ॥ अतोन्यथेति । असतोभ्रांतावपिसत्त्वेनप्रतीत्य नंगीकारइत्यर्थः । बाधकप्रत्ययस्य असदेवरजतंप्रत्यभादित्यस्य । विषयांतरं सत्त्वाभावरूपं ॥ नापीति । असच्चेद्भ्रांता वपिसत्त्वेननप्रतीयेत प्रतीयतेचसत्त्वेन तस्मादसन्नेतिवक्तुंनशक्यते । असत्त्वेपिसदंतरात्मतावद्बाह्यत्ववच्चप्रतीतिसंभवादि

तिभावः । ममतुनकश्चिद्दोषइत्यन्वयः । अनिर्वचनीयतया प्रातिभासिकतया ॥ तथेति । अनिर्वचनीयतया असत्त्वेन चेत्यर्थः । प्रवृत्त्यभावप्रसंगमुपपादयति ॥ [५५।२३] नहीत्यादिना ॥ [५५।२४] प्रतीतिमात्रादिति । तथाचप्रवृत्त्यन्यथानुपपत्त्यासत्त्वेन प्रतीतिर्नांगीकार्येतिभावः ॥ [५५।२५] अनुभवेति । तथात्वेरजतपदश्रवणमात्रादपिप्रवृत्त्यापत्तेरितिभावः । विधिनिषेधौ अस्तित्वनास्तित्वे । रजतमितिप्रतीतावस्तीतिवाविषयीक्रियेतनास्तीतिवा तावत्धूयप्रत्ययायोगादित्यर्थः । तत्सत्त्वं रजतनिष्ठं सत्त्वं ॥ [५५।२५] अनिर्वचनीयताविरोधादिति । रजतस्येतिशेषः । अत्रसर्वत्रानिर्वचनीयशब्दःप्रातिभासिकपरोद्रष्टव्यः । तदुपपादयति ॥ [५५।२६] नहीति । ननुसदिदंरजतमितिप्रतीयमानंसत्त्वंनासत्येनासतःसत्त्वस्यसत्त्वेनप्रतीतिप्रसंगः । किंनामब्रह्मणिपारमार्थिकमिवांबरादेर्मायोपाधिकंव्यावहारिकमिव रजतेप्यविद्योपाधिकंप्रातिभासिकंसत्त्वमस्त्येवेतिसत्त्रैविध्यांगीकारादित्याशयेनशंकते ॥ [५६।२] ननुरजतस्यापीति । व्यावहारिकत्वाप्रतीतौ प्रातिभासिकत्वेनैवप्रतीतावित्यर्थः । तस्माद्व्यावहारिकत्वंप्रतीयतइतिवाच्यं । तच्चप्रातिभासिकेऽसदेवेत्यसतस्सत्त्वेनप्रतीतिःप्राप्तेतिभावः । तृतीयंपक्षमाशंकते ॥ [५६।३] सत्यमिति । सा व्यावहारिकता ॥ [५६।४] शुक्तिकेदंतेति । शुक्तिकानिष्ठेदंतासंसर्गोयथारजतेऽनिर्वचनीयएवारोपितःप्रतीयतइदंरजतमितितद्वदित्यर्थः ॥ [५६।४] तद्व्यावहारिकतासंसर्गस्येति । शुक्तिगतव्यावहारिकतासंसर्गस्यापीत्यर्थः । प्रतिभासोरजतइतिशेषः ॥ [५६।८] आपातादिति । नहियस्यव्यावहारिकत्वंव्यावहारिकंतत्प्रातिभासिकमितिसंभवतीतिभावः । तथात्वं प्रातिभासिक

त्वं ॥ तद्व्यावहारिकतेति । रजतेप्रतीयमानव्यावहारिकसत्त्वनिष्ठाव्यावहारिकतेत्यर्थः ॥ प्रातिभासिकत्वानुपपत्तेरि
ति । रजतस्येतिशेषः । रजतनिष्ठव्यावहारिकसत्त्वनिष्ठव्यावहारिकतायास्सत्त्वेरजतस्यप्रातिभासिकत्वानुपपत्तेरित्यर्थः । द्वि
तीये रजतनिष्ठव्यावहारिकसत्त्वनिष्ठव्यावहारिकत्वस्यासत्त्वइत्यर्थः ॥ अर्थसेति । रजतनिष्ठव्यावहारिकसत्त्वनिष्ठाव्यावहा
रिकतापीत्यर्थः ॥ यत्रैवारोपपर्यवसानमिति । अपर्यवसानरूपानवस्थांगीकारेव्यापारांतराभावप्रसंगेनतत्परिहारायकियद्दू
रंगत्वायत्रैवव्यावहारिकतायाअनिर्वचनीयत्वमनंगीकृत्यप्रातिभासिकत्वमसत्त्वंवांगीकृत्यारोपपरंपरापर्यवसानमुच्यतेतत्रैवे
त्यर्थः ॥ प्रवृत्त्यभावइत्यादि । प्रातिभासिकत्वेतथैवप्रतीतौप्रवृत्त्यभावः । असत्त्वेऽसतःसत्त्वेनप्रतीतिप्रसंगइत्यर्थः । ननुसिद्धां
तेपिशुक्तिरजतेसत्त्वंतावत्प्रतीयतइत्यंगीकार्यं । अन्यथाप्रवृत्तिर्नस्यात् । तथाचतत्सत्त्वंसदसद्वा । नाद्यः । रजतस्यापिसत्त्वा
पत्तेः । द्वितीयेकिमसत्त्वेनप्रतीयते । सत्त्वेनवा । नाद्यः । प्रवृत्त्यभावप्रसंगात् । द्वितीयेतदपिसदसद्वेतिविकल्पकरणेनानवस्थास
मानेतिचेत् । मैवं । रजतमितिविधिप्रत्ययमात्रस्यैवसत्त्वविशिष्टरजतविषयकत्वाभ्युपगमात् । नचसत्त्वस्यापरंसत्त्वमस्माभिर
भ्युपगम्यते येनानवस्थास्यात् । किंतुरजतविधिप्रत्ययमात्रादेवप्रवृत्त्युपपत्तेः । नचैवंपरस्याभ्युपगमः । सत्त्वेप्यवांतरभेदांगी
कारेणतत्प्रतीतिमात्रस्यप्रवृत्त्यनुपयोगित्वादिति । ननुबीजांकुरानवस्थावत्प्रमाणसिद्धवस्तुविषयकत्वान्नेयमनवस्थादूषणमि
त्यतआह ॥ नचेयमिति । रजतानिर्वचनीयत्वस्यैवाप्रामाणिकतयासिद्धत्वादितिभावः ॥ मूलक्षतेरभावादिति । य
दर्थमुत्तरोत्तरानुसरणंतन्मूलं तत्क्षतेरभावादित्यर्थः । मूलक्षयकरींप्राहुरनवस्थांहिदूषणमितिवचनादितिभावः ॥ परंपरा

[५६।१४]कल्पकाभावोवेति । उत्तरोत्तरपरंपराकल्पकंमूलं तदभावोमूलक्षतिः सात्रनास्ति । परंपराकल्पकमेवास्तीतियावदित्यर्थः॥ [५६।१४]अथवाप्रयोजनपरिक्षयइति । मूलंनामप्रयोजनंतत्परिक्षयोमूलक्षतिः । सात्रनास्ति । प्रयोजनमेवास्तीतियावदित्यर्थः ॥ [५६।१४]आद्यात्वस्तीति । परंपराकल्पकाभावरूपामूलक्षतिरस्तीत्यर्थः ॥ नचतद[५६।१५]स्तीति । प्रथमस्यरजतस्यानिर्वचनीयत्वंनास्ति । रजतस्यासत्त्वेनतदनिर्वचनीयत्वस्याप्रामाणिकत्वादित्यर्थः । तदभिप्रायमाह ॥ पूर्वपू[५६।१५]र्वेति । प्रयोजनपरिक्षयरूपापिमूलक्षतिरस्ति । प्रथमस्यपूर्वपूर्वस्यरजतस्यानिर्वचनीयत्वसिद्धिर्हिउत्तरोत्तरानिर्वचनीयपरंपराकल्पनेप्रयोजनं तदिहनास्ति। पूर्वस्यरजतस्यानिर्वचनीयतायाःप्रामाणिकत्वेनासिद्धतयातदर्थंकल्प्यमानोत्तरोत्तरारोपपरंपरायाअप्यसिद्धिरितिप्रयोजनपरिक्षयरूपापिमूलक्षतिरस्तीत्यर्थः । अपरेतुपूर्वपूर्वेत्यस्यइत्यभिप्रायमाहुः । तथाहिरजतानिर्वचनीयत्वस्याद्याप्यसिद्ध्यातदारोपानुपपत्तौतस्यप्रवृत्तिजनकत्वायकल्प्यमानोत्तरोत्तरव्यावहारिकत्वारोपाणामसिद्ध्याप्रथमारोपात्प्रवृत्तिलक्षणंकार्यंत्वन्मतेनस्यादितिप्रयोजनपरिक्षयरूपामूलक्षतिरस्तीति । बाधकप्रत्ययः असदेवरजतंप्रत्यभादितिप्रत्ययः । अन्यथा सत्त्वाभावविषयत्वेन । ननुपरेणापिमिथ्यैवरजतंप्रत्यभादितिबाधकज्ञानस्यवस्तुगत्याऽनिर्वचनीयविषयकत्वांगीकारादिष्टापत्तिरित्यतआह ॥ स्फु[५६।१७]टमिति । अनिर्वचनीयमिदमित्यनिर्वचनीयत्वप्रकारकमित्यर्थः ॥ विषयांतरं सत्त्वाभावरूपं ॥ अनिर्वचनीय[५६।१९]तावाचीति । सदसद्वैलक्षण्यवाचीत्यर्थः । मिथ्याशब्दस्याभाववाचित्वेमिथ्यैवरजतमितिसामानाधिकरण्यायोगइत्यतआह ॥ अ[५६।२०]भावप्रतियोगीति । अत्रवाक्येऽभावइतिपदेनात्यंताभावप्रतियोग्यसदुच्यतइत्यर्थः । तथाचप्रतियो

गिप्राधान्यविवक्षयारजतंमिथ्येत्यस्यरजतमत्यंताभावप्रतियोगीत्यर्थोद्रष्टव्यइतिभावः । निषेधप्राधान्यविवक्षयाप्याह ॥ न
भवतीति । कर्तृव्युत्पत्त्येत्यर्थः । तथाचरजतंमिथ्येत्यस्यरजतप्रतियोगिकात्यंताभावइत्यर्थोद्रष्टव्यइतिभावः ॥ ततोनिर
र्थकइति । मिथ्याशब्दस्यानिर्वचनीयवाचकत्वाभावेऽन्यस्यतद्वाच्यस्याभावान्मिथ्याशब्दोनिरर्थकइतिभावः । तद्वाचित्वं
मिथ्याशब्दस्येतिशेषः । अभिधानाद्यभावात्कथंचिदित्युक्तं ॥ तद्बलादेवेति । भ्रांत्युत्थितस्यमिथ्यैवरजतंप्रत्यभादित्य
नुवादबलादेवेत्यर्थः ॥ सर्वमिति । सदसद्विलक्षणेवस्तुनिप्रमाणं मिथ्याशब्दस्यसदसद्विलक्षणरूपानिर्वचनीयवस्तुवाच
कत्वमितिसर्वमित्यर्थः ॥ तस्येति । यद्बलात्कल्पनीयं । तस्यमिथ्याशब्दस्येत्यर्थः ॥ अनुमानस्येति । शुक्तिरजतादिकं
अनिर्वचनीयंबाध्यत्वाद्व्यतिरेकेणात्मवदित्यनुमानस्येत्यर्थः ॥ अनुभूतार्थविपरीतप्रतिपादकत्वमिति । एतदनुमानात्प्रा
क्साध्यंकुत्रापिदृष्टांते नानुभूतमित्यननुभूतार्थप्रतिपादकत्वमित्यर्थः ॥ इतियावदिति । अन्यथाबाधकथनाभिप्रायेऽस
देवरजतंप्रत्यभादित्यनेनगतार्थता सदसतोर्द्वयोरेवेत्युपपादनानानुगुण्यंचस्यादितिभावः ॥ धर्मत्वादिति । व्यतिरेकिध
र्मत्वादित्यर्थः । अन्यथाप्रमेयत्वादौव्यभिचारापत्तेरितिद्रष्टव्यं ॥ रूपरसवदिति । ननुदृष्टांतद्वयंकिमर्थमुपात्तं । नचवा
च्यंसत्त्वासत्त्वयोर्द्वयोःपक्षत्वात्तदनुसारेणेति । अनित्येवाङ्मनसे मूर्तत्वाद्धटवदित्यभियुक्तप्रयोगानुपपत्तेस्तत्रापिघटपटव
दितिप्रयोगापातादितिचेदुच्यते । अत्रसाध्येत्यंताभावप्रतियोगिनीइत्यत्रैकात्यंताभावप्रतियोगित्वेसाध्येसत्त्वासत्त्वयोरेका

त्यंताभावप्रतियोगित्वाभावेनबाधापत्त्यात्यंताभावद्वयप्रतियोगित्वस्यैवसाध्यतयावक्तव्यत्वंतत्ररूपवादित्यकस्यैवदृष्टांतस्यो क्तौतत्रात्यंताभावद्वयप्रतियोगित्वाभावेनसाध्यवैकल्यापत्तेस्तत्परिहारायदृष्टांतद्वयोपादानमितिभावः । रूपरसयोर्वायुरूपै कधर्मिनिष्ठात्यंताभावप्रतियोगित्वेनदृष्टांतेसाध्यंद्रष्टव्यं ॥ [५६।२६] केवलव्यतिरेकीति । शुक्तिरजतादिकमनिर्वचनीयंबाध्यत्वा दात्मवदितिकेवलव्यतिरेक्यनुमानेनेत्यर्थः ॥ [५७।१] साध्याव्यापकतेति । रासभरूपैकधर्मिनिष्ठात्यंताभावप्रतियोगित्वेसत्य पिपरस्परविरहव्यापकत्वरूपविरुद्धत्वस्यैवसत्त्वादितिभावः ॥ प्रतिषेध्ये[५७।१]त्यादि । अत्रप्रतिषेधशब्दोत्यंताभावपरः । तथा चाविरुद्धत्वंनामपरस्परविरहरूपत्वाभावः । परस्परात्यंताभावानात्मकत्वमितियावत् । एवंचनगोत्वाश्वत्वयोस्साध्याव्या पकतेतिभावः । प्रतिषेधशब्दस्यात्यंताभावपरत्वमनंगीकृत्याभावमात्रपरत्वांगीकारेवायुरूपैकधर्मिनिष्ठात्यंताभावप्रतियोगि नोरूपतद्ध्वंसयोःरूपस्यप्रतिषेध्यत्वेनध्वंसस्यरूपप्रतिषेधत्वेनप्रतिषेध्यप्रतिषेधात्मकत्वरूपविरुद्धत्वस्यैवसत्त्वेनसाध्याव्यापक तास्यादितिद्रष्टव्यं॥ [५७।२] अनेनेति । द्वयोरेवेत्येवकारेणतृतीयप्रकाराभावप्रतिपादनेनेत्यर्थः । तथाचसद्वैलक्षण्यसाधनेऽसत्त्व स्यैवप्राप्त्यापुनरसद्विलक्षणमित्युक्तेव्याघातः । एवमसद्विलक्षणत्वसाधनेसत्त्वस्यैवप्राप्त्यापुनःसद्विलक्षणमित्युक्तेव्याघात इतिभावः ॥ [५७।२] सूच्यतइति । दोषोपपादनमेवक्रियतेनतुकंठतस्तत्कीर्तनमतःसूच्यतइत्युक्तमितिभावः ॥ [५७।३] उपसंहरन्निति । अतोऽनिर्वचनीयत्वाभावादित्यंशेनोपसंहारोद्रष्टव्यः॥ परिशेषसिद्ध[५७।३]मर्थमिति । सदसद्वैलक्षण्येप्रमाणाभावादित्यादिना ग्रंथेनकृतोयःपरिशेषस्तत्सिद्धोयोर्थोभेदस्यपारमार्थिकसत्यत्वरूपस्तमित्यर्थः । सत्यत्वप्राप्तेरित्यनेनतत्प्रदर्शनंद्रष्टव्यं ॥ [५७।३] प्रकृत

मिति । नाद्वितीयत्वंयुज्यतइत्यनेनप्रकृतानुसरणंद्रष्टव्यं । असत्त्वंप्रतिक्षिपन्नित्युक्तं । तत्प्रतिक्षेपःकेनांशेनक्रियतइत्यत आह ॥ **असतइत्यादिकमिति** । अनुमानैः दृश्यत्वाद्यनुमानैः ॥ **तद्बाधनमिति** । तैरनुमानैस्तासांश्रुतीनांबाधनमि त्यर्थः । मिथ्यावादित्वेचेति चशब्दसमुच्चेयंदोषमाह ॥ **परिशेषेति** । भेदस्यानिर्वचनीयत्वादेरयोगेनपरिशेषात्सत्यत्वसि द्धेर्भेदश्रुतीनांतत्त्वावेदकत्वान्नानुमानादिबाध्यत्वमितिभावः ॥ **तथात्वेति** । मिथ्यावादित्वेत्यर्थः । ननुश्रुतित्वाविशेषेप्य न्योन्याश्रयादिबाधकेनभेदस्यसत्यत्वायोगात्तच्छ्रुतीनांमिथ्यावादित्वं बाधकाभावेनैक्यस्यसत्यत्वात्तच्छ्रुतीनांतत्त्वावेदक त्वमंगीक्रियतइत्यतआह ॥ **बाधकानामिति** । उपजीव्यप्रत्यक्षादिविरोधरूपाणामित्यर्थः । अत्रापि ऐक्येपि । विमतो मायावादी । अवेदवादीभवितुमर्हति वेदोक्तमिथ्यात्वांगीकर्तृत्वादित्यत्रसाध्यावैशिष्ट्यमाशंकते ॥ **नन्विति** । व्याप्यव्या पकभावादिकमित्यत्रादिपदेननिश्चितत्वसंदिग्धत्वादिग्रहणं ॥ **विवक्षितत्वादिति** । साध्यतयेतिशेषः । हेतोस्स्वरूपासिद्धि माशंकते ॥ **ननुमयेति** । वेदैकदेशस्य वेदांतभागस्य । तथाचवेदैकदेशवेदांतभागोक्तस्यसत्यत्वांगीकारान्नसमस्तवेदोक्तमिथ्या त्वांगीकारित्वंममेतिस्वरूपासिद्धिरितिभावः॥ **तत्साम्यादिति** । वेदैकदेशस्यतत्त्वावेदकत्वांगीकारित्वसाम्येनत्वयोच्यमानं तेषामवेदवादित्वंनस्यादितिभावः । तदुपपादयति॥**नहीति**॥**स्वदर्शनेति**।बौद्धदर्शनेऽहिंसापरमोधर्मइतिप्रतिपादितं।वेदेपि नहिंस्यात्सर्वाभूतानीत्युच्यते । एवंचस्वदर्शनानुगुणस्यभूताहिंस्यत्वस्यसत्यत्वंतैरंगीकृतमित्यर्थः । भेदाश्रयं भेदसापेक्षं ।

उच्यमानस्य कर्मादेः ॥ [५७।१७] **मिथ्यात्वांगीकारादिति** । तथाचबौद्धादिवत्सर्वथाऽप्रामाण्यांगीकारस्यैवप्राप्तत्वादितिभावः ॥ [५७।१७] **किमनेनेति** । मंदाधिकारिणःप्रतिवेदोभेदाश्रयंकर्मादिकंप्रतिपादयतीतिजल्पितेनकिमित्यर्थः ॥ [५७।१७] **ऐक्यज्ञानस्येति** । तथा चाग्निहोत्रादिवाक्यानामैक्यज्ञानोपयुक्तबुद्धिशुद्ध्यर्थंकर्मादिप्रतिपादकत्वादैक्यएवमहातात्पर्यमंगीकृतं । तथाचवाच्यस्यक र्मादेर्मिथ्यात्वेपितात्पर्यार्थभूतैक्यस्यसत्यत्वान्नवेदाप्रामाण्यमितिभावः । बौद्धैश्चनैवमंगीकृतमितिहृदयं ॥ [५७।१७] **भेदवासनेति** । भेदाश्रयस्यकर्मादेरैक्यज्ञानविरोधित्वेनभेदवासनादार्ढ्यहेतुतयोप(कार)पादकत्वाभावेनांगत्वानुपपत्तेरित्यर्थः। तथाचाग्निहो त्रादिवाक्यानामैक्येमहातात्पर्यानुपपत्तेर्वाच्यस्यचकर्मादेर्मिथ्यात्वादप्रामाण्यमेवेतिभावः । असौवेदभागः । कर्मादिप्रति पादकोवेदभागइत्यर्थः । नैवंबौद्धाआहुरितिभावः । अनुवादोभवन्विधानायवास्यान्निषेधायवा । नाद्यइत्याह ॥ [५७।१८] **अनुवा दइति** । विधानरूपप्रयोजनाभावादितिभावः । द्वितीयंशंकते ॥ [५७।१८] **नेहनानेति** । इहब्रम्हण्यारोपितं नाना नानाविधंकर्मा दिकंजगत्किमपिनास्तीत्यर्थः॥[५७।१९]**प्राप्त्यभावादिति**।तथाचनित्यातींद्रियप्रतिपादकवेदभागस्यनानुवादकत्वंसंभवतीतिभावः । ननुस्वर्गापूर्वादेरतींद्रियत्वेनवेदातिरिक्तप्रमाणेनप्राप्त्यभावेपिवेदेनैवप्राप्तंधर्मादिकंवेदेनप्रतिषिध्यतइतिचेत्तर्ह्युन्मत्तवाक्य वत्सुतरामप्रामाण्यतादवस्थ्यमित्याह ॥ [५७।१९] **वेदप्राप्तेति** । वेदप्राप्तस्यवेदेनैवप्रतिषेधइत्यर्थः । तत्त्वस्य ब्रह्मणः । अवेद्यत्वेन त्वन्मतइतिशेषः । एकदेशस्यापि वेदैकदेशस्यवेदांतभागस्यापि । तथाचनप्रामाण्यमितिभावः । तथाचबौद्धसाम्यंतदवस्थ

मितिहृदयं। ननुतत्त्वस्यावेद्यत्वेनवेदांतभागस्यतत्त्वावेदकत्वलक्षणप्रामाण्यासंभवेपिसिद्धंतुनिवर्त्तकत्वादित्युक्तत्वेनाज्ञाननिवृत्तिरूपप्रयोजनहेतुत्वेनप्रामाण्यमुपपद्यतइत्याशंकते ॥ **तथापीति** ॥ **अन्यथेति** । प्रयोजनहेतुत्वेनप्रामाण्यंचेदित्यर्थः ॥ **मणिप्रभाविषयेति**। मणिप्रभाधर्मिकेत्यर्थः।तथाचमणिप्रभायांमणिभ्रमेणप्रवृत्तस्यमणिलाभोभवति। तथाचमणिभ्रमस्यमणिलाभरूपप्रयोजनहेतुत्वसद्भावेनप्रामाण्यंस्यादितिभावः। इदमुपलक्षणं। तृणादिदर्शनेकिंचफलवत्त्वंनिगद्यतइत्यनुव्याख्यानोक्तरीत्यातृणादिदर्शनस्यप्रामाण्यंनस्यादित्यपिद्रष्टव्यं । ननुमणिप्रभायांमणिभ्रमस्यापिप्रयोजनवत्त्वलक्षणंप्रामाण्यंमयांगीक्रियतएवेतीष्टापत्तिरित्यतआह ॥ **लोकसिद्धार्थेति** । मणिभ्रमस्यप्रामाण्यरूपोर्थोनलोकसिद्धइतिभावः ॥ **स्वरूपेणेति** । कंठतइतिभावः। विरोधिप्रमाणानि भेदसाधकानि ॥ **समर्थितानीति** । परोक्तार्थांतरनिराकरणेनेत्यर्थः ॥ **प्रस्तावमिति** । उपक्रममित्यर्थः । तथाचकथंचेतिवाक्यस्यनचजीवेश्वराभेदएवतात्पर्यमागमस्येत्यनेननगतार्थतेतिभावः । प्रत्यक्षविरोधादिकमित्यत्रादिपदेनप्रत्यक्षासिद्धत्वंग्राह्यं । इत्यादिश्रुतिभिरित्यत्रादिपदेननिर्दुःखत्वनिर्दोषत्वप्रतिपादिकायानिरनिष्टोनिरवद्यइतिश्रुतेर्ग्रहणं । कस्यचित्प्रत्ययइत्यनुक्त्वासाक्ष्यपरपर्यायानुभवग्रहणंकिमर्थमित्यतआह ॥ **आत्मनीति** । जीवइत्यर्थः । निर्दुःखोनिर्दोषइत्यनयोःकृत्यंवक्तुमाह ॥ **नैवयमिति** ॥ **परोपाधिकस्येति** । मिथ्याभूतसर्वघटितस्येत्यर्थः । यत्स्वरूपंपरोपाधिकंतन्मिथ्या । यथांगुल्यवष्टब्धनयनोपाधिनिमित्तोपरश्चंद्रमाः । सार्वज्ञादिकंचतथाऽतोमिथ्येतिभावः ॥ **तदनुभवेति** । मिथ्याभूतसार्वज्ञाद्यनुभवेत्यर्थः । निर्गुणेनब्रह्मणैक्यंब्रूमइतिसंबंधः ॥ **निर्दुःखइतीति** ।

निर्दुःखनिर्दोषस्वरूपेणनिर्गुणेनाप्यैक्यानुभवोनास्तीत्यर्थः ॥ रत्नतत्त्वमिवेति । यथापाषाणविशेषत्वेनदृश्यमानस्यापिर त्नस्य तत्त्वं याथात्म्यं रत्नपरीक्षारूपशास्त्रानुगृहीतप्रत्यक्षवेद्यंतथेत्यर्थः ॥ शास्त्रेति । ऐक्यज्ञानंसंशयोत्तरप्रत्यक्षरूपं तत्र शास्त्रंविशेषदर्शनरूपमितिभावः ॥ अधिगतेति । अधिगतशास्त्रस्यापिगौडपादसंकरादेर्निर्गुणब्रह्मणैक्यसाक्षात्काररूपा नुभवोनास्तीत्यर्थः । नन्वधिगतशास्त्रस्यगौडपादादेरैक्यसाक्षात्कारोनास्तीतिकुतोज्ञायते परबुद्धेरप्रत्यक्षत्वादित्यतआह ॥ ऐक्यसाक्षात्कारोहीति । सविलासां देहेंद्रियभिक्षाटनादिकार्यसहितां ॥ ततश्चेति । अविद्योच्छेदेसतीत्यर्थः ॥ भेददर्शनेति । ऐक्यसाक्षात्कारवत्त्वेनाविद्याकार्यभूतदेहेंद्रियादिरूपभिन्नप्रपंचदर्शनरहितस्येत्यर्थः ॥ नस्यादिति । तथा चशरीरपालनाद्यर्थंभिक्षाटनादिप्रवृत्तिरूपकार्यान्यथानुपपत्त्याऽविद्यावस्थानमंगीकार्यं । तेनज्ञायतेतेषामैक्यसाक्षात्कारो नास्तीति । एवंचकस्यचिदित्युक्तंयुक्तमितिभावः । नन्वविद्यायांविच्छिन्नायामपितल्लेशस्यावस्थितत्वात्तदवस्थाननिमित्ता प्रवृत्तिस्तेषामितिचेत्तत्राह ॥ नहीति । अविद्यायाअखंडत्वेननिरंशत्वादितिभावः ॥ तथात्वेवेति । अविद्यायाअंशांगी कारेवेत्यर्थः । प्रारब्धकर्मादीत्यादिपदेनपूर्वसंस्कारग्रहणं । नन्वैक्यसाक्षात्कारवतोपिशरीरपालनाद्यर्थाभिक्षाटनादिप्रवृत्ति रस्तीत्यत्रमत्प्रक्रियैवप्रमाणमित्यतआह ॥ प्रक्रियामात्रस्यचेति ॥ उक्तरूपद्वयेति । सर्वज्ञत्वंसर्वेश्वरत्वंचद्वयंमि लित्वाएकंरूपं । निर्गुणत्वंनिर्दोषत्वंचेतिद्वयंमिलित्वाऽपरंरूपमितिरूपद्वयविपर्ययेणेत्यर्थः । नन्वहमसर्वज्ञइत्यादिप्रत्यक्षे णकथमैक्यंविरुद्धं उक्तप्रत्यक्षस्यभेदाविषयकत्वादित्यतआह ॥ योहीति ॥ अनुभवसिद्धत्वादिति । प्रत्यक्षेध

र्मिणिभेदकधर्मसाक्षात्कारस्यभेदसाक्षात्कारव्याप्तत्वादितिभावः ॥ **ब्रह्मरूपेति** । निर्गुणब्रह्मणोयद्रूपंनिर्दुःखत्वंनिर्दो षत्वंचतद्विपर्ययेणेत्यर्थः ॥ **तदनुगतइति** । तद्व्यापकीभूतइत्यर्थः ॥ **क्षतिमिति** । ऐक्यस्यहान्यावहोनेत्यर्थः । अनुभवस्वरूपस्यसत्यत्वादाह ॥ **मिथ्याविषयत्वादिति** ॥ **तत्रेति** । अहंदुःखीरागादिदोषवांश्चेत्यनुभवइत्यर्थः । शिष्यःशंकते ॥ **नन्विति** ॥ **तत्कथमिति** । तथाचसिद्धांतेप्यस्यानुभवस्यमिथ्यात्वेन नचमिथ्यानुभवोयमित्ये वंदुःखाद्यनुभवस्यमिथ्यात्वनिराकरणेऽपसिद्धांतइतिभावः ॥ **तस्येति** । तथाच नचमिथ्यानुभवोयमितिमूलेनदुःखा दिस्वरूपस्यसत्यत्वेनदुःखादिस्वरूपानुभवस्यैवभ्रांतित्वंनिराक्रियते । नतुदुःखादेरात्मसमवेतत्वानुभवस्यापि । अतो नापसिद्धांतइतिभावः । ननुदुःखादिस्वरूपस्यसत्यत्वेपिविमुक्तश्चविमुच्यतइत्यादिश्रुतिविरोधस्स्यात् । दुःखादिबंध स्यसत्यत्वेपूर्वविमुक्तत्वोक्त्ययोगात् । मिथ्यात्वेतुवस्तुतोबंधस्याभावाद्विमुक्तत्वोक्तिरुपपद्यतइत्येवंविमुक्तश्चविमुच्यतइत्या दिवचनानांदुःखादिमिथ्यात्वप्रतिपादकानांतत्सत्यत्वांगीकारेबाधकानांसत्त्वेनकथंतदभावइत्यतआह ॥ **अस्वभावत्वा दिति** । दुःखादेर्मिथ्यात्वाभावेप्यस्वभावत्वानित्यत्वमात्रेणतद्युक्तजीवस्यविमुक्तत्वंयुज्यतइतिनैतद्वाक्यंदुःखादिमिथ्या त्वेमानमित्यर्थः । यथोक्तंभाष्ये । प्रमादात्मकत्वाद्बंधस्यविमुक्तत्वंचयुज्यतइति ॥ **प्रकृतमिति** । तथाचजीवेशयो रितिशेषइतिभावः । अतदितिनपुंसकलिंगोपपत्त्यर्थंतस्मादन्यद्ब्रस्त्वित्युक्तं ॥ **प्रजापतिवाक्यवदिति** । यएषोंतर

क्षणिपुरुषोदृश्यतएषआत्मेतिहोवाचेतिवाक्यवादित्यर्थः ॥ नचास्याति । पित्रापुत्रप्रत्युपादिष्टस्यापीत्यर्थः ॥ प्रसिद्धेमिति । उपक्रमोपसंहाराावभ्यासोपूर्वताफलं । अर्थवादोपपत्तीचलिंगंतात्पर्यनिर्णयइतिप्रमाणप्रसिद्धमित्यर्थः । आगमासिद्धत्वं ॥ एतदागमासिद्धत्वमित्यर्थः ॥ [५८।२६] अकारप्रश्लेषेणेति । अकारप्रश्लेषस्याकःसवर्णेदीर्घइतिशास्त्रानुसंधानाधीनतयाप्रसिद्ध्य पेक्षयाविलंबोपस्थितिकत्वादितिभावः । स्थाननवकेपीत्यत्रस्थानशब्दस्य वाक्यंप्रकरणंस्थानमित्युक्तानेकप्रकरणात्मकस्था नरूपप्रमाणपरत्वंनसंभवति । एकैकस्यखंडस्यैकैकप्रकरणत्वेनप्रत्येकंस्थानत्वाभावादतःप्रकरणसमुदायवाचिनास्थानशब्दे नतदेकदेशभूतंप्रकरणंलक्ष्यतइत्यभिप्रेत्यव्याचष्टे॥ [५५।१] स्थाननवकेपिनवस्वपिप्रकरणेष्विति । अन्यत् ऐक्य । अन्यत्र भेदे ॥ [५९।४] सधर्मेति । शब्दोनित्यःकृतकत्वात्घटवदित्यत्रकृतकत्वरूपधर्मसहितघटरूपदृष्टांताभिधानसामर्थ्यादित्यर्थः ॥ [४३।४] संदिग्धेति । शब्दोनित्यः अनित्यः इत्युभयथापिपदच्छेदसंभवादितिभावः । ननुसन्मूलास्सोम्येमास्सर्वाःप्रजास्सदायतनास्स त्प्रतिष्ठाइतिमूलोदाहृतानांवाक्यानांदृष्टांतप्रतिपादकत्वाभावात्स्थाननवकेपिभेदएवदृष्टांताभिधानादितिकथमुक्तमित्यत आह॥ [५९।६] अत्रेति ॥ [५९।६] अन्यानीति । सन्मूलाइत्यादीनीत्यर्थः॥ [५९।७] अतोपीति । नायमभेदोपदेशइतिसंबंधः॥ [५९।७] असहायस्यैवेति । एकमेवाद्वितीयमितिवाक्यगतैकशब्दार्थानुवादोयं । एकशब्दोयमन्यप्रधानासहायसंख्याप्रथमसमानवाचीतिकैयटोक्तेः अस्त्येकशब्दोसहायवाची एकाग्नयःएकहलानीतिमहाभष्योक्तेश्चैकशब्दस्यासहायवाचित्वावगमादित्यर्थः । स्वप्नांतं स्वप्न स्यांतःसुप्तिःतंस्वप्नांतं ॥ [५९।१०] जागरस्वप्नयोरिति । एवमेवखलुसोम्यैतन्मनोदिशंदिशंपतित्वेतिवाक्याभिप्रायानुवादइतिज्ञा

तव्यं ॥ [५९।१०] अभिधायेति । सतासोम्यतदासंपन्नोभवतीतिवाक्येनेत्यर्थः ॥ [५९।१२] अशनायापिपासयोरिति । अशनायापिपासे सोम्यविजानीहीत्युक्तयोरशनायापिपासयोर्यत्रैतत्पुरुषोशिशषतिनामयत्रैतत्पुरुषःपिपासतिनामेत्यादिनोक्तक्रमेणपर्यालोचन याजीवस्येश्वरमूलकाशनायापिपासावत्त्वस्येश्वरस्यजीवसंबंध्यशनायापिपासामूलत्वस्यचप्रतीतस्यजीवानांभगवदधीनत्वं विनानुपपत्तिरित्येवंजीवानांभगवदधीनत्वंप्रतिपाद्येत्यर्थः ॥ १ ॥ ननुज्ञातेर्थेभूयइतिपुनरुपदेशप्रार्थनमनुपपन्नमित्यतस्तदभि प्रायमाह ॥ [५९।१३] नमंत्तोन्यइति । संपद्यामहे इदानीं । संपन्नाः पूर्वं । संपत्स्यामहे उत्तरत्र ॥ [५९।२०] भंगइति । नानावृक्षरसेष्वव्य भिचारइत्यर्थः ॥ २ ॥ [५९।२२] गंगाद्यानदीदेवताइति । अन्यथाजडग्रहणेचेतनत्वेसतिभेदेनमयानुपलभ्यमानत्वादितिचेतनत्व विशिष्टहेतोर्व्यभिचाराप्राप्तेरितिभावः । ननुप्राच्यादिशब्दस्यदिग्विशेषरूढत्वात्कथंप्राच्यःप्रतीच्योनद्यइतिसामानाधिकर ण्यमित्यतआह ॥ [५९।२२] प्रागंचनादिति । अंचुगतिपूजनयोः । प्राचीदिगभिमुखंगमनादित्यर्थः । पुरस्तात् प्राचीदिगभिमुखं ॥ [५९।२२] स्यंदंतस्रवंतीति । स्यंदूप्रस्रवणइतिधातोरित्यर्थः । प्रत्यगंचनात् प्रतीचीदिगभिमुखंगमनात् । पश्चात् प्रतीचीदिगभिमुखं । तथाचप्राच्यादिशब्दानांयौगिकत्वाद्युक्तंसामानाधिकरण्यमितिभावः । ननुनदीदेवतानांकथंसमुद्रादुत्पत्तिरित्यतआह ॥ [५९।२३] समुद्रादुत्पन्नजलत्वादिति । ननुनदीजलस्यापिकथंसमुद्रादुत्पत्तिरित्यतउक्तं ॥ [५९।२३] मेघादिद्वारेणेति । नदीनांसमुद्रेप्रवे शेनपरस्परंमिश्रीभावेपिवायुस्तत्तन्नद्युदकंविवेकेनज्ञात्वामेघेकृत्वाप्रवर्षतितेननदीषुजलपूर्तिर्भवतीतिहिपौराणिकीप्रसिद्धिः ।

यथोक्तं । स्वकीयमुदकंनद्यःसमुद्रेनैवजानते ॥ वायुस्तुतत्पृथग्ज्ञात्वामेघेकृत्वाप्रवर्षतीति । तथाचाभिमन्यमानजलानां समुद्रादुत्पन्नत्वात्तदभिमानिदेवतास्वपितदुत्पन्नत्वव्यवहारोयुक्तइतिभावः ॥ **तथापिससमुद्रएवभवतीति** । नदीनां समुद्रेप्रवेशेपिसः समुद्रः।समुद्रएवभवतिनतुनद्यइत्यर्थः । इदंचोत्तरत्रविवृतंभविष्यति ॥ **नविदुरिति** । स्वाभिमन्यमानंज लंविविक्ततयानविदुरित्यर्थः । आगच्छामहे इदानीं उत्पत्स्यामहे उत्तरत्र उत्पन्नाःस्मः पूर्वं ॥ **एवंपरमेश्वरेस्थित्वापी** त्यादि । नन्वेतत्किमर्थमुच्यते उपनिषदिव्याख्येयाभावादितिचेदुच्यते । नहिगृहादागतस्यगृहेप्रविष्टस्येत्युत्तरत्रभगव त्पादैर्जीवागमनक्रियांप्रतिब्रह्मणोपादानत्वं । जीवप्रवेशक्रियांप्रत्यधिकरणत्वंचेत्युभयंविवक्षितमित्युच्यते । अतएवनदी- समुद्रदृष्टांतेद्वयस्यापिविवक्षितत्वाच्चेतिटीकापि । अतस्तदनुसारेणेदंपूरितमितिध्येयं ॥ **अनैकांत्यमुक्तंभवतीति** । नदी देवतास्वितिशेषः । ननुनदीदेवतासुकथंव्यभिचारः । मिश्रितत्वेनस्वाभिमन्यमानजलज्ञानाभावेपिगंगादिदेवतानांपरस्परं भिन्नत्वेनस्वस्वरूपज्ञानसद्भावादितिचेत्सत्यं।स्वाभिमन्यमानतयास्वदेहभूतजलानांपरस्परंमिश्रितत्वेनपंचद्रौपदीवदेकदेहव त्त्वन्यायप्राप्त्याविवेकाज्ञानेक्षीरनीरवच्चिद्योगात्स्वपरस्वरूपज्ञानमत्यंतविविक्ततयानास्तीतिव्यभिचारकथनंनानुपपन्नमिति भावः ॥३॥ **अवस्थानासंभवादिति** । तथाचावस्थानस्यैवासंभवेजीवन्स्रवेदित्यादिकंबाधितमेवस्यादितिभावः ॥ **पुनः** **पुनर्भृशंवेति** । पेपीयमानइतियङंतःशब्दः। यङ्च धातोरेकाचोहलादेःक्रियासमभिहारेयङितिसूत्रेणपौनःपुन्येभृशापरपर्या येक्रियासमभिहारेस्मर्यते। अतइत्थंव्याख्यातमितिद्रष्टव्यं॥ **यथावृक्षजीवस्येत्यादि** । तथाचजीवस्येश्वरानुग्रहप्रयुक्तसुखदुः

खभाक्त्वात्तदधीनत्वमितिभावः। एवमेवखलुसोम्यविद्धीतिहोवाचेतिवाक्यंव्याख्याति॥एवंमानुषशरीरेपीति॥४॥संद्वा वादिति। तथाचसूक्ष्मभूतःपरमात्मापिजीवेनदृश्यतैवेतिभावः।अनाहृत्याभित्त्वैवाहृतंभिन्नंभिन्नेतिपुत्रेणनपितुःप्रतारणंकृतमि तिसूचयितुंआहृत्यतद्भित्त्वातांभित्त्वेत्युक्तमितिद्रष्टव्यं। ननुभगवन्निितिसंबुद्धिस्स्यान्नतुभगवइतीत्यतआह॥ मतुवसोरुसंबु द्धौछंदसीति। मत्वंतस्यवस्वंतस्यचरुस्स्यात्संबुद्धौपरतश्छंदसिविषयइतिसूत्रार्थः। अलोंत्यपरिभाषयारुरित्यादेशःषष्ठीनिर्दि ष्टस्यांत्यस्यैव । तथाचभगशब्दान्मतुप्प्रत्ययेउपइत्यस्यलोपेमादुपधायाश्चमतोर्वोऽयवादिभ्यइतिसूत्रेणमतुपोमकारस्यवका रेभगवदितिप्रातिपदिकनिष्पत्तौसत्यांपश्चात्संबुद्धौभगवत्सुइतिस्थितेमतुवसोरितिसूत्रेणतकारस्यरुरित्यादेशेभगवरुइतिजा तेतस्यविसर्गेसंबुद्धौसोर्लोपेभगवइतियुक्तमितिभावः। नन्वणुशब्दात्पृथ्वादिभ्यइमनिज्वेतिसूत्रेणपृथ्वादिगणेभ्योभावेइमनि च्प्रत्ययविधानादस्यापितद्ग्रहणस्थत्वेनभावेइमनिच्प्रत्ययेपृथोर्भावःप्रथिमेतिवदणोर्भावोऽणिमेतिभवति । तथाचाणिमानं अणुत्वंनपश्यसीत्यसंगतमित्यतआह॥ भावभविग्रोरिति। धर्मधर्मिणोरित्यर्थः। तथाचाणिमानमणुमित्यर्थमभिप्रेत्याह॥ परमसूक्ष्ममिति । दार्ष्टांतिकेवृक्षफलधानास्थानीयान्दर्शयन्कथमनेनोक्तशंकापरिहारइत्यतआह ॥ अत्रवृक्षइत्या दिना । इत्युक्तंभवतीत्यंतेन। तत्र एवंसति । तदंतर्गतइत्यनंतरंपरमात्मानदृश्यतइतिवर्तते ॥ ५ ॥ प्रत्यक्षमिवेति। नमुख्यतःप्रत्यक्षमितीवशब्दः ॥ एवमन्यत्रापीति । यत्ततोन्यद्विभक्तत्वेनैवपश्येदितिवाक्यशेषादित्यादावित्यर्थः। दोषांरात्राविति। ननुश्रुतौदोषायामित्यश्रवणाद्रात्राविितिकथंसप्तम्यंततयाव्याख्यानंकृतमितिचेदुच्यते । दोषेत्यपिस

प्रत्येकवचनमेवदोषाङ्इतिस्थितेङकारलोपदोषाइइतिजातपूर्वसवर्णदीर्घदोषत्यवभवति । तथाचरात्रावितिव्याख्यानंयुक्त मितिद्रष्टव्यं । नन्ववेत्युपसर्गपूर्वकाद्धाधातोर्लुङ्लङ्लृङ्क्ष्वडुदात्तः एषुपरेषुअंगस्याडागमस्स्यादितिसूत्रेणलङ्यडागमेटित्त्वा दादौजातेअवाधाइतिस्यान्नत्ववधाइतीत्यतआह ॥ [६०।१९] बहुलंछंदसीति । छंदस्यडागमोविकल्पेनभवतीत्यर्थः । एवंचात्राडा गमोनजातइतिभावः । नन्वडभावोपिनसंभवति । तथाहि । नमाङ्योगे । माङ्योगेअट्नस्यादितिमाङ्योगएवाटोनिषिद्ध त्वात् । मैवंवादीःमाहिभूदित्यादिप्रयोगदर्शनात्प्रकृतेमाङ्योगाभावात्कथमडभावइत्यतउक्तं ॥ [६०।१९] अमाङ्योगेपीति । छंदसि माङ्योगाभावेपिक्वचिदडागमोनभवतीत्यर्थः । एवंचप्रकृतेमाङ्योगाभावेप्यडागमाभावःछंदस्त्वादुपपद्यते । अतोऽवधाइ त्युपपन्नमितिभावः । अवयवात् एकदेशात् । एकदेशं स्वल्पंजलं आचांतवंतं आचमनंकृतवंतं ॥ [६०।२३] संवर्ततइति । कार्या त्मनानाशेपिकारणात्मनासम्यग्वर्ततइत्यर्थः । इत्याद्यनंतरमित्यादिपदेनांतादाचामेतिमध्यादाचामेतिअंत्यादाचामेतीतिवा क्यत्रयंग्राह्यं ॥ [६०।२३] इतिवेति । तच्छश्वत्संवर्ततइतिवाक्यस्यार्थइत्यर्थः । कथमनेनोक्तशंकापरिहारइत्यतआह ॥ [६०।२३] अनेनेति ॥ [६०।२४] भगवानिति । नदृश्यतइत्यर्थः ॥ ६ ॥ ननुधनिकपुरुषस्याभिनद्धाक्षमितिभूतार्थकक्तप्रत्ययांतंविशेषणमुक्तंतेनचोरैराल यनात्पूर्वमेवतस्याक्षिबंधनमन्येनकृतमभूदित्यक्षिबंधनस्यान्यकर्तृकत्वंप्रतीयतेअन्यथाऽभिनद्धाक्षमित्यनुवादायोगादितिप्र तीतिपरिहारायक्तप्रत्ययस्यवर्तमानार्थत्वमभिप्रेत्याक्षिबंधनस्यचोरकर्तृकत्वज्ञापनायव्याचष्टे ॥ [६।१२] अक्षिणीबद्ध्वेतियावदि ति । नायमक्षिबंधनानुवादःकिंतुतद्विधिरेवेत्यर्थः । एवंसत्यक्षिबंधनानयनयोरुभयोरपिचोरकर्तृकत्वेनसमानकर्तृकत्वात्

बद्धेतिक्त्वाप्रत्ययोपपत्तिरितिभावः॥ [६।१३] उच्चैःशब्दमिति। ध्माशब्दाग्निसंयोगइतिधातोरितिभावः । एतांदिशमितिद्वितीया सप्तम्यंतत्वेनव्याख्याता। तत्रकिंनियामकमित्यतआह ॥ [६।१४] व्यत्ययइति । बहुलंविभक्तीनांव्यत्ययोभवतीतिसूत्रार्थः ॥ [६।१५] स्मृतिमानिति । दिग्विशेषावस्थितगंधारदेशप्राप्तिहेतुतदुपदिष्टमार्गस्मृतिमानित्यर्थः । तद्विस्मृतौगंधारोपसंपत्त्ययोगादिति भावः । दार्ष्टांतिकेजीवेऽभिनद्धाक्षत्वंदर्शयितुमनाद्यविद्यादिभिराच्छादितनिजज्ञानइत्युक्तं। संसारेत्यरण्यप्रतिनिधिवचनं। प्राध्मायीतेत्युक्तस्यतात्पर्यतःप्रतिनिधिवचनंजातजिज्ञासइति । सग्रामादित्यादिनोक्तस्यप्रतिनिधिवचनं । क्रमापन्नानीति क्रमप्राप्तानीत्यर्थः । गंधारानेवेत्यस्यदार्ष्टांतिकं ॥ [६।१६] जन्मभूमिमिति । स्वरूपाविर्भावेनावस्थानभूतमित्यर्थः । उपसंपद्यत इत्यस्यप्रतिनिधितयादार्ष्टांतिकेउक्तस्यपुरुषोवेदेत्यस्यार्थः॥ [६।१६] पद्यतिप्राप्नोतिचेति। उपपूर्वकस्यपद्यतेर्ज्ञानप्राप्तिरूपोभयार्थत्वात्। पुरुषोवेदेत्युक्तविदेरपिवेदनलाभोभयार्थकत्वादितिभावः॥ [६।१।१२] अन्यत्स्तेयमिति । परोक्षतोहरणंस्तेयमित्यर्थः। ननुयथा सोम्यपुरुषंगंधारेभ्यइतिप्रकरणस्थंएवमेवेहाचार्यवान्पुरुषोवेदेतिवाक्यंपुरुषंसोम्योतेत्यंतिमेप्रकरणेकस्मात्पठितमित्यतआह। [६।१।१४] स्थानांतरस्थमपीति ॥ [६।८।१४] सर्वत्रसंबध्यतइति । पुरुषंसोम्योपतापिनमितिखंडेएवंमानुषशरीरेभगवदधीनत्वंयआचार्यवान्पुरुषःसएवतदुपदेशेनवेदेतिशकुनिसूत्रखंडेसंबध्यते । तथापुरुषंसोम्योतेतिखंडेपियःआचार्यवान्पुरुषस्सएवैवंचोरापहार्यदृष्टांतेनैक्यज्ञानिनोऽनर्थोभेदज्ञानिनोमोक्षइतिप्रमेयंवेदेतिदार्ष्टांतिकपूरकतयासंबध्यते । एषुचखंडषट्केषुसन्मूलाइतिखंडे एवमेवखलुसोम्यैतन्मनइति यथासोम्यमध्वितिखंडेएवमेवखलुसोम्येमास्सर्वाःप्रजास्सतिसंपद्येति इमास्सोम्येतिखंडेएवमे

वखलुसोम्येमास्सर्वाःप्रजास्सतआगम्योति अस्यसोम्यमहतोवृक्षस्यातखंडएवमेवखलुसोम्यविद्धीतिहोवाचेति न्यग्रोधफल मितिखंडेतंहपितोवाचयंवैसोम्यैतमिति लवणमेतदितिखंडेतंहोवाचात्रवावकिलतत्सौम्येतिदार्ष्टांतिकवाक्यानिसंतितेष्वपी दंवाक्यंएवमेवैतत्खंडोक्तंप्रमेयमाचार्यवानेवपुरुषस्तदुपदेशादितियावत् । वेदनान्यथेत्येवंतत्तत्खंडोक्तप्रमेयस्यदौर्लभ्यज्ञाप नायसंबध्यतइत्यर्थः । ननुअल्पाच्तरंपूर्वं । द्वंद्वसमासेयदल्पाचूतरंतत्प्राक्प्रयोज्यमितिसूत्रात्धवखदिरावितिवत्सूत्रशकु न्योरितिवक्तव्यंशकुनिसूत्रयोरितिकथमुक्तमित्यतआह ॥ [६।३।३६] अनित्यत्वादिति । आन्महतस्समानाधिकरणजातीययोः । समुद्राभ्राद्घइत्यत्राल्पाच्तरस्यापिजातीयशब्दस्याभ्रशब्दस्यचपश्चात्प्रयोगेणानित्यत्वंज्ञायतइत्यर्थः । केचित्तुअभ्यर्हितंपूर्व मित्यभ्यर्हितस्यापिपूर्वप्रयोगोक्तेरल्पाचूतरमित्यस्यानित्यत्वंज्ञायते । प्रकृतेचसूत्रापेक्षयाशकुनेश्चेतनत्वेनाभ्यर्हितत्वात्प्रथम प्रयोगइतिभावइत्याहुः । ननुतावन्नजानातीतिवत्तावज्जानातीत्यपिश्रवणात्ज्ञाज्ञप्राणादिनियामकयोरितिवक्तव्येऽज्ञेत्येक स्यैवग्रहणंकिमर्थमित्यतआह ॥ [६।१।१६] ज्ञस्याप्युपलक्षणमिति ॥ [६।१।१६] तत्संबंधादिति । द्रव्यस्वामित्वरूपात्संबंधादित्यर्थः ॥ [६।१।१६] राज्ञापीति । अपहार्यशब्देनोच्यतइत्यर्थः । तथाचचोरराज्ञोरिवजीवेश्वरयोरपिनैक्यंकिंतुभेदएवेतिभावः ॥ [६।३।३८] नतुभेदस्य विद्यमानतापीति । तथाचभेदस्याभावादेवतदपरिज्ञानमुच्यतइतिभावः । आपन्नाः नभेदंजानंतीतिवर्तते । मधुभावा पन्ननानावृक्षरसदृष्टांताभिप्रायेणपरमानंदेनेत्युक्तं । नदीसमुद्रदृष्टांताभिप्रायेणापरिच्छिन्नेनेत्युक्तमितिद्रष्टव्यं । ब्रह्मणोम धुवदानंदरूपत्वात्समुद्रवदपरिच्छिन्नत्वाच्चेतिभावः । भेदस्यविद्यमानतायांयुक्त्यंतरस्यानुक्तत्वाच्चशब्दस्यवैयर्थ्यमित्यतआ

ह ॥ [६।१२२] उपपत्त्यंतरेति । तदेवोपपत्त्यंतरंदर्शयति ॥ [६।१२३] नानावृक्षरसाहीत्यादिना । अत्ररसशब्देनरसवंतःपुष्पावयवाग्रा ह्याः । अन्यथाकेवलगुणानामेवरसानांग्रहणेस्वसमवेतमित्युच्यमानंमधुप्रतिसमवायिकारणत्वमयुक्तंस्यात् । गुणानांसमवा यिकारणत्वाभावात् । केवलंगुणानांपरिणामाभावेनस्वपरिणाममित्युच्यमानपरिणामिकारणत्वायोगाच्चेतिभावः । स्वसम वेतंभिन्नमितितार्किकरीत्या स्वपरिणाममित्यादिपरिणामवादिरीत्येतिद्रष्टव्यं । ननुनदीसमुद्रदृष्टांते चशब्दसमुच्चितमुपप त्त्यंतरंकिमित्यतआह ॥ [६।१२४] नदीसमुद्रदृष्टांतेत्विति ॥ [६।१२४] वक्ष्यंतीति । नहिभिन्नानांनदीजलपरमाणूनामित्यादिनेत्यर्थः । तथाचनानावृक्षरसदृष्टांतएवोपपत्त्यंतरसमुच्चायकोयंचशब्दोनतुनदीसमुद्रदृष्टांतेपीतिभावः ॥ [६।१२५] उक्तेरिति । सतिसंपद्यन विदुःसतआगम्यनविदुरितिवाक्याभ्यामित्यर्थः ॥ [६।१२५] अपादानत्वोक्तेरिति । विश्लेषावधिरपादानं । यथोक्तं । ध्रुवमपाये ऽपादानमिति। अपायोविश्लेषःतस्मिन्सतियद्ध्रुवंतदपादानसंज्ञंस्यात्। अपादानेपंचमी। शृंगाच्छरोजायते। गोमयाद्वृश्चिकोजा यतइत्युदाहरणं । अत्रचसतआगम्येत्यागमनक्रियांप्रतिसतोब्रह्मणोपादानत्वोक्तेरित्यर्थः। ततोपि उक्तेरपि । ननुनानावृक्षर सदृष्टांते सतिसंपद्येतिदार्ष्टांतिकवाक्यानुसारेणगृहेप्रविष्टस्येत्यादौवक्तव्यं । नदीसमुद्रदृष्टांतेसतआगम्येतिदार्ष्टांतिकवा क्यानुसारेणगृहादागतस्येतिपश्चाद्वक्तव्यं । एवंक्रमेणवक्तव्येकथंतमुलंघ्यगृहादागतस्यगृहेप्रविष्टस्येतिव्यत्यासेनोक्तमित्यत आह ॥ [६।१२६] क्रमस्येति । एवमुक्तौनिमित्तांतरंचाह ॥ [६।१।] नदीसमुद्रदृष्टांतेद्वयस्यापिविवक्षितत्वाच्चेति । तास्समुद्रात्समु द्रमेवापियंतीतिदृष्टांतवाक्येनदीकर्तृकागमनक्रियांप्रतिसमुद्रस्यापादानत्वंसमुद्रादित्यनेनोक्तं । नदीकर्तृकप्रवेशलक्षणक्रियां

प्रतिकर्मत्वंसमुद्रमेवेत्यनेनोक्तं । तदनुसारेणएवमेवखलुसोम्येमास्सर्वाःप्रजास्सतआगम्येतिदार्ष्टांतिकवाक्येपिसतःप्रजाकर्तृकागमनक्रियांप्रत्यपादानत्वमुक्तं । प्रजाकर्तृकप्रवेशक्रियांप्रतिसतःकर्मत्वमपितत्रविवक्षितमितिवक्तव्यं । अतएवपूर्वखंडार्थकथनसमयेएवंपरमेश्वरेस्थित्वापितमाश्रिताःस्मइतिनविदुरित्युक्तं । तथाचतास्समुद्रात्समुद्रमेवेतिदृष्टांतवाक्यानुसारेणदार्ष्टांतिकेसतोपादानत्वंपूर्ववक्तव्यं । कर्मत्वंचपश्चाद्वक्तव्यं । तदपेक्षयागृहादागतस्यगृहेप्रविष्टस्येत्युक्तमित्याशयः । ननुनानावृक्षरसदृष्टांतेजीवप्रवेशक्रियांप्रतिसतोब्रह्मणःकर्मत्वेनसंतंसंपद्येतिवक्तव्यं । नतुसतिसंपद्येति । अतस्तदनुसारेणगृहंप्रविष्टस्येतिवक्तव्यंनतुगृहेप्रविष्टस्येतितत्राह ॥ [६२।१]विवक्षातइति । इत्यतः इतिवचनात् ॥ [६२।२]अनर्थेति । व्याघ्रत्वापत्तिरूपेत्यर्थः । अभिधानं तइहव्याघ्रोवेत्यादिनोच्यमानं । अधिकरणत्वाद्युक्त्येत्यादिपदेनापादानत्वग्रहणं । एतेनैवेत्युक्तंविशदयति ॥ [६२।३]कर्तुरिति । ऐक्यस्य ऐक्यव्यपदेशस्य ॥ [६२।७]शेषोक्तिरिति । दार्ष्टांतिकवाक्येसतआगम्येत्युक्तत्वात्तास्समुद्रादित्यत्राप्यागच्छंतीतिशेषःपूरितइत्यर्थः ॥ [६२।८]ससमुद्रएवेति । अत्रसइत्यनूद्यसमुद्रइतिव्याख्यातं । अत्रसमुद्रएवभवतीतिसमुद्रत्वंविधेयत्वेनप्रतीयते । यद्विधेयंतद्विशेषणमेव । यथापर्वतस्याग्निमत्त्वं । एवंचसमुद्रत्वस्यविशेषणत्वप्राप्त्यातदन्वितैवकारस्यायोगव्यवच्छेदकत्वेन नैतासामित्यन्ययोगव्यवच्छेदप्रदर्शनमयुक्तंस्यात् । अतस्सइत्युद्देश्यतयाविशेष्यत्वंतत्संगतोयमेवकारोन्ययोगव्यवच्छेदार्थकइत्याशयेनससमुद्रएवेत्युक्तंसमुद्रत्वंनविशेषणं । एवंचनैतासामित्यत्रनदीषुसमुद्रत्वयोगव्यवच्छेदप्रदर्शनंयुक्तमितिद्रष्टव्यं । विशेष्यसंगतैवकारस्थलेऽन्यत्रैवविशेषणव्यवच्छेदस्सिध्यतीत्यत्रबीजभूतंन्यायमाह ॥ यतो

[६२।८]वधारणमिति । अवधारणं अवधारणार्थकैवकारइतियावत् । यतो यत्पदसमभिव्याहृतं । तत स्तत्पदवाच्या दन्यत्र । तत्फल मवधारणफलंव्यावृत्तिरूपमस्तीत्यतः एतन्न्यायादेतल्लभ्यतइत्यर्थः । एवंचात्रसमुद्रवाचितच्छब्दसमभिव्याहृतमवधारणं अतस्तदन्यत्रनदीषुसमुद्रत्वव्यावृत्तिरूपमवधारणफलंलभ्यतइतिभावः । शंकते ॥ [६२।९]**यदीत्यादिना** ॥ [६२।१०]**स्वलिंगवचनाभ्यामिति** । ताइतिस्त्रीलिंगबहुवचनाभ्यामित्यर्थः । जलसमुदायस्यपूर्वमप्रकृतत्वात्सइतिपरामर्शायोगइत्यभिप्रेत्यकथंचिदित्युक्तं । नोदनं द्रवद्द्रव्यसंबंधः । अभिघातः स्पर्शवद्वेगवद्द्रव्यसंबंधः ॥ [६२।११]**क्रियेति** । क्रिया क्रियातोविभागः विभागात्पूर्वदेशसंयोगनाशः उत्तरदेशसंयोगोत्पत्तिरितिक्रमेणेत्यर्थः ॥ [६२।१२]**अवयवविनाशेसतीति** । एवंचद्रवद्द्रव्यभूतनदीसमुद्रयोःपरस्परसंबंधेन स्पर्शवद्वेगवद्द्रव्यभूतवायुसंबंधेनवा क्रियाविभागादिक्रमेणनदीसमुद्ररूपावयवविनाशेसतीत्यर्थः । उतेत्यत्राप्यवयवविनाशेसतीतिवर्तते। तैः नदीसमुद्रकारणीभूतैः । अनुमानेविजातीयत्वमुपाधिरित्यभिप्रेत्यशंकते ॥ [६२।१४]**भिन्नानामपीति** ॥ [६२।१५]**अविशेषादिति** । सजातीयत्वाविशेषादित्यर्थः । मूलेसमितावित्यस्यसभायामित्यर्थः । मूलेद्वित्राणामित्यस्यद्वौवात्रयोवाद्वित्रास्तेषामित्यर्थः ॥ [६२।१६]**वृद्ध्यभावेति** । ऐक्येवृद्धिर्नस्यादितिभावः ॥ [६२।१७]**एतेनेति** । महाजनसमितिप्रविष्टानांद्वित्राणामपितदैक्यापातेनवृद्ध्यभावप्रसंगेनचेत्यर्थः ॥ [६२।१८]**नैकस्यापीति** । नदीसमुद्ररूपावयवविनाशेनभिन्नैरेवनदीसमुद्रपरमाणुभिःसमुद्ररूपस्वतंत्रावयविनएकस्योत्पन्नत्वेनकस्यकेनैक्यंस्यादितिभावः । प्रत्युतायंपक्षस्तवविरुद्धश्चेत्याह ॥

नचेति ॥ जीवब्रह्मेति । नदीसमुद्रस्थानीयेत्यर्थः ॥ वस्त्वंतरेति । समुद्राख्यापरावयविस्थानीयेत्यर्थः ॥ नष्टेष्विति । आपरमाण्वंतमितिशेषः ॥ [६२।१७] अवयव्यंतरेति । तार्किकरीत्यापीलुपाकप्रक्रियान्यायेनेतिभावः ॥ [६२।१७] संयोगमात्रमिति । नैक्यमित्यर्थः ॥ [६२।१८] अनेनैवन्यायेनेति । नानारसोपेतावयविनाशेसतितत्कारणपरमाणूनांपरस्परमैक्यमितिपक्षस्यमहाजनसमितावित्युक्तन्यायेनायोगात् । अवयविनाशेसतिभिन्नैरेवपरमाणुभिरपरोमध्वाख्योवयवीजायतइतिपक्षस्यकस्यापिकेनाप्यैक्याभावप्रसंगेनदार्ष्टांतिकेपरस्यानिष्टत्वाच्चायुक्तत्वात् । अविनष्टानामेवावयविनांपरस्परमैक्यंभवतीत्यस्यमहाजनसमितिप्रविष्टद्वित्राणामपितदैक्यापातेनवृद्ध्यभावप्रसंगेनचायुक्तत्वादेकतामित्यस्याविनष्टानामेवावयविनांसंयोगमात्ररूपमिश्रतामित्येवार्थोवगंतव्यइत्यर्थः ॥ [६२।२०] स्वात्मवाचीति । जीववाचीत्यर्थः ॥ [६२।२१] प्रत्यग्भावमेवेति । अंतरवस्थितत्वरूपंप्रत्यक्त्वंनिमित्तीकृत्यजीवमेववदेदित्यर्थः ॥ [३२।२२] स्वात्मनाचेतीति । सएतेनैवस्वात्मनापरेणेमंगर्भमाविशतिपरेणजायतेपरेणकर्मकुरुतेपरेणनीयतेपरेणोन्नीयतेतंवाएतमभिवदंतिस्वात्मेति । एषह्येवानंदमादत्तेएषह्येनंजीवमभिजीव्यजीवत्येषउद्गमयत्येषआगमयतीत्युत्तरयोर्वाक्ययोस्सत्त्वात् । सोस्माच्छरीरादुत्क्रम्यामुंलोकमभिगच्छत्यमुष्मादिमंलोकमागच्छतीतिवाक्योक्ताउत्क्रांत्यादयोजीवस्यस्वात्मनाच परमात्मनैवनस्वातंत्र्येणेतिसूत्रार्थोद्रष्टव्यः ॥ [६२।२२] विप्रतिपन्नंप्रतीति । सूत्रस्यार्थांतरंवदिष्यामीतिवदंतंप्रतीत्यर्थः ॥ [६२।२३] आङ्पूर्वकात्तनोतेरिति । आङ्पूर्वात्तनुविस्तारइत्यस्मात्इमन्प्रत्ययेटेः । डितिपरेभस्यटेर्लोपःस्यादितिसूत्रेणडित्त्वाट्टिभूतस्यान्इत्यस्यलोपेआत्मन्आत्मन्इतिनकारांतप्रातिपदिकनिष्पत्त्यनंतरंस्वाद्युत्पत्तौआत्मेतिभवतीति

द्रष्टव्यं ॥ [६२।२३]बृंहतेर्मन्प्रत्ययइति। बृहवृद्धौवृद्धिःपूर्णत्वं। तच्चगुणतः। तथाचास्मात्मन्प्रत्ययेअमागमे मिदचोंत्यात्परः । अंत्यादचःपरोमित्स्यादितिसूत्रेणमित्त्वादंत्यादचःपरंजातेब्र अह् मन् इतिजातेइकोयणचीतियणादेशेब्रह्मन्इतिप्रातिपदिकंनिष्पद्यतइत्यर्थः । अपीतशब्देनकथमैक्यमुक्तमित्यतआह ॥ [६२।२४]यावदिति । यावत्प्रमेयमित्यर्थः । अखंडवृत्तिं रूढिं । अस्मात् अपीतशब्दात् ॥ [६२।२६]अनेनेति । अपीतइत्यनेनशब्देनेत्यर्थः । तदुपपादयति ॥ [६२।२६]अपिर्हीति । अपिधाने आच्छादने ॥ [६२।२६]वर्ततइति । अपिधानतिरोधानपिधानाच्छादनादिष्वितिकोशादित्यर्थः ॥ [६२।२६]निष्ठाप्रत्ययइति । क्तप्रत्ययइत्यर्थः । क्तक्तवतूनिष्ठेतिस्मरणात् । तथाचापिपूर्वकात्इण्गतावित्यस्मात्क्तप्रत्ययेककारलोपेअपीतइतिभवति ॥ [६२।२६]कर्तरीति । अपि आच्छादनंयथास्यात्तथास्वंइतःप्राप्तोभवतीत्यर्थः । नन्वथापिप्राप्तिरेवप्राप्ता नतुप्रवेशइत्यतआह ॥ [६३।१]ततश्चेति ॥ अपिहितस्यगतिरिति । यथातिरोहितस्यपक्षिणोगतिःकुलायप्रवेशंविनानसंभवतितथातिरोहितस्यजीवस्यगतिःस्वशब्दवाच्यपरमात्मप्रवेशंविनानसंभवतीत्यर्थः ॥ [६३।२]तस्येचेति । ऐक्यपर्यायस्यापीतशब्दस्येत्यर्थः ॥ [६३।२]अक्रियार्थत्वादिति । ऐक्यस्य क्रियारूपत्वाभावेनतद्वाचकापीतशब्दस्यक्रियावाचकत्वाभावादित्यर्थः ।तथाचापीतशब्दस्यक्रियावाचित्वेहिक्रियायाःकर्मापेक्षायांद्वितीयानिर्देशोपेक्षितस्स्यान्नचैवमितिभावः । ननुभवतीतिक्रियावाचिपदसद्भावात्तत्रकर्मापेक्षायांद्वितीयानिर्देशो युक्तइतिचेत्तत्राह ॥ [६३।२]भवतेश्चेति । भूधातोस्सत्तार्थकत्वेनाकर्मकत्वादित्यर्थः । वृद्धिक्षयभयजीवितमरणंलज्जासत्तास्थिति

जागरणं । शयनक्रीडारुचिदीप्त्यर्थधातुगणंतमकर्मकमाहुरितिवचनादितिभावः ॥ इणिइति । इण्धात्वर्थभूतायाःप्राप्त्यप
रपर्यायायाःगतेरित्यर्थः ॥ [६३१४] विधानादिति । सहयुक्तेऽप्रधानइतिसूत्रेणेत्यर्थः । पुत्रेणसहागतःपितेत्युदाहरणं । ननुकथमे
तत् । यद्यत्रसहयोगःस्यात्तर्ह्येवतद्योगेतृतीयाऽऽपादनीयास्यात्सएवनास्तीतिचेत्सत्यं । अस्माभिरश्रुतकल्पनमापाद्यते ।
एवंचैक्यस्यसहार्थापेक्षत्वादपीतशब्दस्यैक्यार्थत्वेसहशब्दयोगःस्यात् । ततश्चतद्योगेचस्वेनेतितृतीयानिर्देशश्चस्यादित्युभ
यस्याप्यापादनादितिभावः ॥ प्रवेशासं[६३१६]भवादिति । स्वस्येतिशेषः । कर्तृकर्मविरोधादितिभावः ॥ [६३१७] अन्यदिति । जीवे
श्वरयोराश्रयाश्रयिभावरूपंप्रमेयंप्रतिज्ञायतत्रशकुनिसूत्रदृष्टांतमुक्त्वादार्ष्टांतिकेमनसःप्राणाश्रयत्वकथनमयुक्तं असंगतत्वा
दित्यर्थः । शंकते ॥ [६३११] अस्तीति । तात्पर्यज्ञापकं आश्रयाश्रयिभावेनजीवेश्वरयोरेवोपक्रांतत्वरूपमित्यर्थः । तथापीतिशे
षः ॥ मनः[६३११]प्राणशब्दयोरिति । मनइतिजीवःप्राणइतिपरमात्मेत्यत्रउच्यतइतिशेषोक्त्यातयोःशब्दयोःशक्तिरुक्ता । त
त्कुतइत्यर्थः ॥ [६३१२] इत्यादिरिति । संसारीपुद्गलउद्दिष्टइत्यन्वयोद्रष्टव्यः ॥ [६३१३] असुन्निति । तथाचउन्इत्यस्यलोपेमनसूइति
प्रातिपदिकंनिष्पद्यतइत्यर्थः । तत्रज्ञापकमाह ॥ [६३१३] पुत्रईतीति । पुन्नाम्नोनरकात्त्रातापुत्रइत्यभिधीयतइतिपुत्रशब्दनिर्वचन
परेवाक्येपुच्छब्दस्यनरकवाचित्वदर्शनादित्यर्थः ॥ [६३१३] पंचाद्यजित्यादि । तथाचपुच्छब्दोपपदात्गॄनिगरणेऽस्मात्कर्तरिपचा
द्यचिगॄअइतिस्थितेसार्वधातुकार्धधातुकयोः अनयोःपरयोरिगंतांगस्यगुणःस्यादितिसूत्रेणगॄइत्यत्रत्यॠकारस्यगुणे उरण्रपर
इतिरपरत्वे पुत्गरेतिजाते अचिविभाषा रोलत्वंस्यादजादौप्रत्ययेपरइतिरस्यलत्वेझलांजशझशीतितकारस्यदकारेपुद्गलेति

रूपमित्यर्थः ॥ षष्ठीसमासइति । तथाचपुतोगलःपुद्गलइत्यर्थः । कृदतिङिति तिङ्वर्जप्रत्ययस्यकृत्त्वोक्तेरच्प्रत्ययस्यकृत्त्वात्तद्योगेकर्तृकर्मणोःकृतीतिषष्ठ्याएवानुशासनादितिभावः ॥ शीङोनुपूर्वादिनिरिति । अनुपूर्वकात्शीङ्स्वप्नेअस्मादिनिप्रत्ययेसार्वधातुकार्धधातुकयोरितिसूत्रेणेकारस्यएकाररूपेगुणेशेइन्इतिजाते एचोयवायावः । एचःक्रमादय्अव्आय्आव्एतेस्युरचीतिसूत्रेणएकारस्यायादेशेअनुशय्इन् अनुशयिन्निति प्रातिपदिकनिष्पत्तिरित्यर्थः । चैवशब्दयोरन्यसमुच्चायकान्यनिषेधकयोरेकत्रविरोधेनसंबंधायोगादाह ॥ संसार्येवेति ॥ प्रपूर्वादिति । प्रपूर्वात्अनचेष्टायां अस्मात्पचाद्यचि अनितेः उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्यणत्वंस्यादितिसूत्रेणनस्यणत्वेप्राणेतिरूपं ॥ निर्दोषत्वादिति । निर्दोषोहिसाधुरित्युच्यतइतिभावः ॥ घटस्यमृदिवेति । परिणामवादिभास्कररीत्योक्तं । मायावादिरीत्याह ॥ भुजंगस्यरज्जुरिवेति । निर्विकारत्वश्रुतिविरोधेनब्रह्मणःपरिणामित्वरूपोपादानत्वायोगात्भुजंगंप्रतिरज्जुर्यथाविवर्ताधिष्ठानत्वेनोपादानंतथाब्रह्मापिस्थावरजंगमात्मकप्रपंचारोपाधिष्ठानत्वेनोपादानमित्यर्थः । तदुपपादयति ॥ नहीति । एवंप्रजास्सदात्मकंब्रह्माश्रित्यैवस्थितिंलभंतइतिसदायतनाइत्यर्थः । उपलक्षणमेतत् । भुजंगोरज्जुमनाश्रित्यस्थितिंलभतइत्यपि द्रष्टव्यं । तत्तात्पर्यमाह ॥ सत्स्वरूपतामेवेति । ननुस्रष्टृत्वादेरिवोपादानत्वादेरपिग्रहणसंभवेभेदएवोच्यतइतिकथंनियम्यतइत्यतआह ॥ एतदुक्तंभवतीति ॥ उपादानादिष्विति । मूलशब्दउपादाने । आयतनशब्दःस्थितिकालेआश्रये । प्रतिष्ठाशब्दश्चांतेपर्यवसानेननियतइत्यर्थः । मूलादिशब्दाःनियमेनोपादानादिवाचिनोनभवंतीतिभावः ॥ कारणादिसा

त्रांत । मूलशब्दःकारणमात्रवाची आयतनशब्दआश्रयमात्रवाची प्रतिष्ठाशब्दश्चस्थापकत्ववाचीत्यर्थः ॥ आगमवाक्यांतरेति । स्रष्टृत्वादित्यागमवाक्येत्यर्थः । स्रष्टृत्वादितिप्रमाणेप्रतिप्रतिकल्पेषुमुक्तानांस्थापनात् । एवंविरुद्धधर्माधिकरणत्वाद्विष्णुस्संसारिणोऽन्योमतइत्यर्थः ॥ [६३।२०] निमित्तकारणादिरिति । एवंचसत्ब्रह्ममूलंनिमित्तंयासांताःसन्मूलाः । सद्ब्रह्मायतनमाश्रयोयासांतास्सदायतनाः । सत्परंब्रह्मैवमुक्तौप्रतिष्ठापकंयासांतास्सत्प्रतिष्ठाइत्यर्थः ॥ [६३।२२] विनाशाभावेति । नजीवोम्रियतइत्युक्तत्वादितिभावः । अनेनजीवेनात्मनानुप्रविश्येतिवाक्यस्योदाहृतदृष्टांतवाक्येष्वभावात्किमर्थंतदुदाहरणमित्यतआह ॥ [६३।२३] व्याकरवाणीत्यतःपरमत्रवेतिशेषइति । ननुजीवशब्दस्यपरमात्मवाचकत्वेपिवृक्षपरमात्मनोरेवभेदस्सिध्यति नजीवपरमात्मनोरित्यतआह ॥ [६४।१] वृक्षशब्देनेति । अन्यथातेनायंमोदतेनित्यंवृक्षावस्थांगतोपिसन्नित्येतदयुक्तंस्यादितिभावः ॥ [६४।१] अत्रेति । अनेनजीवेनात्मनानुप्रभूतइतिदार्ष्टांतिकवाक्यइत्यर्थः ॥ [६४।३] व्यर्थस्यादिति । जीवेनानुप्रभूतइत्येतावतापूर्णत्वादितिभावः ॥ [६४।३] द्वयमपिव्यर्थंस्यादिति । हंताहमिमास्तिस्रोदेवताअनुप्रविश्यनामरूपेव्याकरवाणीत्येतावतापूर्णत्वादितिभावः । एतेनेत्युक्तंविशदयति ॥ [६४।३] जीवेनानिरुद्धेनेति । आत्मनेत्यस्यार्थःपरमात्मनेति । अत्र दार्ष्टांतिकवाक्ये । तथाचानिरुद्धरूपेणप्रवेशकथनायदार्ष्टांतिकवाक्येआत्मेत्येतत्सार्थकमेवेतिभावः ॥ [६४।४] आत्मनेतिव्यर्थमिति । परेणवृक्षशब्देनजीवस्याग्रहीतत्वादनेनजीवेनानुप्रभूतोऽयंवृक्षःपेपीयमानोमोदमानस्तिष्ठतीत्येतावतापूर्णत्वादात्मनेतिव्यर्थमितिभावः ॥ [६४।४] अर्थसंभवादिति । तथाचजीवेनात्मनेतिपदद्वयमपिसार्थकमितिभावः । ननुतद्वाक्यदृष्टांतीकरणंकिमर्थमित्यतआह ॥

[६४।१४]दृष्टांतीकरणंचेति ॥ [६४।१४]प्रसंगादिति । एतद्वाक्यव्याख्यानेनतस्यापिस्मारितत्वादित्यर्थः । स्मृतस्योपेक्षानर्हत्वंप्रसंग
इतितल्लक्षणादितिभावः । एतद्वाक्यव्याख्यानाकरणेबाधकमाह ॥ [६४।१५]अन्यथेति । नन्वैक्यंप्रतीयतांकोदोषइत्यतआह ॥
[६४।१५]तथाचेति । श्रुतौत्रिवृत्करणस्यैवोक्तत्वेनपंचीकरणानुक्तेस्तदनुसारेणमहाभूतानीत्यस्यार्थमाह ॥ [६४।१८]तेजोबन्नानीति । प्रथम
वाक्यार्थो दृष्टांतीकृतवाक्यस्यार्थः ॥ [६४।१८]शेषेणेति । महाभूतानीत्यर्धव्यतिरिक्तसार्धश्लोकेनेत्यर्थः । जडव्यावृत्त्यर्थंचेतनत्वे
सतीत्युक्तं । ईश्वरव्यावृत्त्यर्थमीश्वरादन्यत्वमित्युक्तं । नचमहालक्ष्म्यामतिव्याप्तिरितिवाच्यं । ईश्वरपदेनतस्याअपिग्रह
णादितिज्ञातव्यं । देवताश्रुत्या देवताशब्देनेत्यर्थः । ननुभवत्पक्षेपितेजोबन्नानांचेतनत्वेनप्रवृत्त्युपपत्तेस्तेषुभगवत्प्रवेशोपिव्य
र्थइत्यतआह ॥ [६४।१४]चेतनानामपीति ॥ [६४।१४]स्वतइति । नऋतेत्वक्रियतइतिश्रुत्याईश्वरव्यतिरेकेणकस्यापिस्वतःप्रवृत्त्यभावस्यो
क्तत्वादितिभावः । वृक्षशरीरं जडभूतं ॥ [६४।१८]पानशब्देति । पानप्रतिपादकपेपीयमानशब्दोदितइत्यर्थः । भोगादिकमित्युक्ता
दिपदार्थमाह ॥ [६४।१९]ताभ्यांचेति । नन्वेतत्सर्वमनएवेतिश्रुत्यासुखादीनामंतःकरणपरिणामत्वेनतद्धर्मत्वप्रतीतेःकथंचेतनध
र्मत्वमित्यतआह ॥ [६४।१९]अंतःकरणेति । चेतनस्वामिकत्वमेवात्रचेतनधर्मतयाविवक्षितमितिभावः ॥ [६४।२०]एतदिति । शरीरेत्यर्थः ।
यथोक्तंपरैरपि । यदवच्छिन्नेआत्मनिभोगस्तद्भोगायतनंशरीरमिति । ननुभौतिकस्यशरीरस्यकथंप्रकृतिकार्यत्वमित्यतआ
ह ॥ [६४।२१]भूतान्यपीति । नित्यानांचतुर्विंशतितत्त्वसूक्ष्मरूपाणांप्रकृतिशब्दवाच्यतायाःपुराणेषुप्रसिद्धत्वेनभूतानामपिप्रकृतिश
ब्दवाच्यत्वादितिभावः ॥ [६४।२३]कुत्सायामिति । तथाचचेतनकः कुत्सितज्ञानवानित्यर्थः । ज्ञानस्यकुत्सितत्वंकुतइत्यत

आह ॥ देहात्मेति ॥ चैतन्येसतीति । चेतयतेजानातीतिचेतनस्तस्यज्ञानवतोभावोधर्मश्चैतन्यंज्ञानंतस्मिन्सतीत्यर्थः । जातमात्रामृगागावोहस्तिनःपक्षिणोझषाइत्यादिनादेहात्मविवेकज्ञानस्यप्राणभृन्मात्रसिद्धत्वस्योपपादितत्वात्स्फुटतरविवेकरूपेचैतन्येसतीतिव्याख्येयं ॥ [६४।२३] भोगासंभवादिति । रागादिदोषनिमित्तकभोगासंभवादित्यर्थः । तथाचदेहात्मनोःस्फुटतरविवेकज्ञानाभावप्रयुक्तदेहाभिमानसद्भावेनरागादिदोषवत्त्वेनकुत्सितज्ञानवत्त्वात्तत्प्रयुक्तसुखदुःखभोक्तायंभवतीतिभावः ॥ [६४।२३] संसारिणाविशिष्टइति । केवलदेहस्यपेपीयमानत्वासंभवेपिसंसारिजीवविशिष्टस्यतत्संभवादितिभावः ॥ [६४।२४] उपचारप्रसंगइति । भोगकारणत्वरूपगुणयोगेनजीववाचकपेपीयमानादिशब्दस्यदेहेउपचारप्रसंगइत्यर्थः ॥ [६४।२४] अविनाशोक्तेरिति । नजीवोम्रियतइत्युक्तत्वादितिभावः ॥ [६४।२४] पूर्ववाक्यमिति । सएषजीवेनात्मनेतिपूर्ववाक्यमित्यर्थः ॥ [६४।२५] प्राणैर्वियुज्यतइति । इदमित्यस्यसंसारिजीवपरत्वमनंगीकृत्यजडशरीरपरत्वांगीकारेजीवापेतंवावकिलेदंनश्यतीतिप्रयोगःस्यान्नतुम्रियतइति । नहिघटोम्रियतइतिप्रयोगःक्वचिद्दृष्टइतिभावः ॥ [६५।१] अर्थासंभवादिति । जीवप्राणधारणइतिधातोर्जीवशब्दप्रवृत्तिनिमित्तभूतार्थस्यमुख्यतःप्राणधारकत्वस्यजीवेऽसंभवादित्यर्थः । अस्तुस्वातंत्र्येणप्राणधारकत्वमपिसंसारिणइत्यतआह ॥ [६५।१] अन्यथेति । अहंमृतस्यामितीच्छायाअभावेपिमरणंभवति तन्नस्यात् । प्राणधारणरूपजीवनस्यस्वाधीनत्वादित्यर्थः ॥ [६५।४] तथात्रापीति । अनेनापिशब्दोविष्णुवाचकपदसद्भावमात्रसमुच्चयार्थइत्युक्तंभवति ॥ [६५।४] पूर्वोक्तरीत्येति । यथासूक्ष्मवटबीजेदृश्यमानेपियत्प्रभावात्वटावस्थानंसबीजांतर्गतःपरमात्मापरमसूक्ष्मत्वान्नदृश्यते तथाजीवादपिसूक्ष्मत्वात्तदंतर्ग

तोपिपरमात्मानदृश्यतइतिपूर्वोक्तरीत्येत्यर्थः ॥ अर्थसंभवादिति । अणिमशब्दार्थभूतस्यमुख्याणुत्वस्याणोरणीयानिति श्रुत्यापरमेश्वरएवसंभवादणिमानंननिभालयसइत्युक्ताद्दृश्यत्वरूपवाक्यार्थस्यचतस्मिन्नेवसंभवादित्यर्थः ॥ प्रयोगाच्चेति । अणिमशब्दस्यपरमेश्वरेप्रयोगाच्चेत्यर्थः ॥ मूलेइत्युक्तत्वादिति । इतिप्रकृतत्वादित्यर्थः ॥ नन्वत्रेति । यंवैसोम्यैतमणिमानमितिवाक्यइत्यर्थः । नन्वत्राणिमशब्देनपरमात्मैवोच्यतइतिवक्तव्यं । सएषोणिमेतिपूर्वखंडांतेऽणिमशब्देनपरमात्मनएवप्रकृतत्वात्यंवैसोम्येतिवाक्येयमेतमणिमानमितिपरामर्शउपपद्यते । धानाग्रहणेत्वप्रकृतपरामर्शइतिचेत्तत्राह ॥ तासामपिप्रकृतत्वादिति । अण्व्यइवेमाधानाइतिपूर्ववाक्यइत्यर्थः । ननुधानानांकथमणुशब्देनप्रकृतत्वमित्यतउक्तं ॥ अणुत्वेनेति । सूक्ष्मत्वेनेत्यर्थः ॥ यमेतमितिपरामर्शेति । यमेतमणिमानमितिपरामर्शेत्यर्थः । धानाहीत्यनंतरंअण्व्यइवेतीतिशेषः । स्त्रीलिंगप्रयोगादित्युपलक्षणमित्यभिप्रेत्यबहुवचनांतेनेत्युक्तं । धानास्विवशब्दप्रयोगाभावादिवशब्दाच्चेति कथमुक्तमित्यतउक्तं ॥ इवशब्दशिरस्केनेति ॥ अणुशब्देनेति । भावप्रत्ययरहिताणुशब्देनेत्यर्थः ॥ भावप्रत्ययांतेनेति । पृथ्वादिभ्यइमनिज्वेतिसूत्रेणाणुशब्दाद्भावेइमनिच्प्रत्ययइतिभावः ॥ शब्दभेदादिति । स्त्रीलिंगप्रयोगादित्यनेनशब्दभेदउपपादितः । स्त्रीलिंगबहुवचनांतभावप्रत्ययरहिताणुशब्दोधानास्वण्व्यइतिप्रयुक्तः । अत्रत्वतादृशोणिमशब्दइतिशब्दभेदादित्यर्थः । इवशब्दाच्चेत्यनेनार्थविरोधउपपादितस्तमुपपादयति ॥ इवशब्देनहीति । धानानामितिशेषः ॥ अत्रंत्विति । यंवैसोम्येतमणिमानमितिवाक्येइवशब्दाभावात्परमात्मनोमुख्यमेवाणुत्वमणिमशब्देनावगम्यतइत्यर्थः ॥

अस्मिन्पक्षइति । अणिमशब्दस्यधानावाचकत्वमंगीकृत्ययथासूक्ष्मधानासामर्थ्यात्तत्परिणामीमहान्न्यग्रोधस्तिष्ठतीत्याद्यु क्तप्रकारेणवाक्ययोजनापक्षइत्यर्थः । ननुवटोपादानस्यधानांतस्सत्त्वात्तत्सामर्थ्यान्महान्न्यग्रोधस्तिष्ठतीतिवक्तुंधानाभेदना दिकंसार्थकमितिचेत्तत्राह ॥ [६५।१३] धानायाएवेति । ननुनचाभेदेकश्चिदागमइत्युक्तोपपादनसमयएवैतदात्म्यमितिवाक्यमुदा हृत्यसम्यग्व्याख्येयमत्रोदाहृत्यव्याख्यानेत्वसंगतिरित्याशंकापरिहारायोक्तं ॥ परमात्मनि वृत्तिप्रदर्शनार्थमुदाहृतइति [६५।१३]। अत्रप्रकरणे परमात्मन्यणिमशब्दस्यवृत्तिः सद्भावः । प्रयोगइतियावत्तत्प्रदर्शनार्थमुदाहृतइत्यर्थः । अतोनासंगतिरिति भावः । एतत्सद्ब्रह्म । ननुकथमनेनजीवेश्वरैक्यंलभ्यतेऽतस्तत्तात्पर्यमाह ॥ [६५।१४] एतेनेति । यदिदंजगत् आत्मवज्जीववत् । तत्सदाख्येनात्मनाब्रह्मणैवात्मवदित्यर्थः । तद्व्यावर्त्यमाह ॥ [६५।१५] नान्योस्तीति । अन्यः सदन्यः । संसारी जीवः । तथाच जीवेश्वरैक्यलाभइतिभावः । एतदीयमित्यनंतरं इत्यर्थइतिशेषमभिप्रेत्याह ॥ [६५।१६] एतदीयमित्यर्थइत्यर्थइति । एतदीय मित्यर्थमुपपादयति ॥ [६५।१६] एतत्सदात्मेत्यादिना । तर्ह्युक्तरीत्याजीवेश्वराभेदःप्राप्तएवेतिचेत्तत्राह ॥ [६५।१६] आत्मशब्दस्त्विति । ननुतर्हीदंसर्वमेतदात्मेत्येवस्यान्नत्वैतदात्म्यमितिभावार्थकष्यञ्प्रत्ययप्रयोगः । एतत्स्वामिकमितिभवदभिप्रेतार्थस्यभाव प्रत्ययंविनापिसिद्धेरितिचेत्सममेतत्तवापीत्याह ॥ [६५।१६] भावप्रत्ययस्त्विति । भावार्थकष्यञ्प्रत्ययस्तवापिव्यर्थः । एतत्सदा त्मायस्य एतेनसदाख्येनात्मनेत्यादित्वदभिप्रेतार्थस्यापितंविनैवसिद्धेरित्यर्थः । ननुसुखमेवसौख्यमित्यत्रेवएतदात्मैवैतदा त्म्यमितिष्यञ्प्रत्ययस्यस्वार्थिकत्वंमयास्वीक्रियतइतिचेत्सममममापीतिभावः । ननुगुणवचनब्राह्मणादिभ्यःकर्मणिचेतिसूत्रे

णकर्मणिभावेचष्यञ्प्रत्ययोविहितः । जडस्यकर्मभावोवाजाड्यं । ब्राह्मणस्यकर्मभावोवाब्राह्मण्यमिति । तथा चतुर्वर्णादिभ्यःस्वार्थउपसंख्यानमितिवार्तिकेनस्वार्थेष्यञ्प्रत्ययोविहितः । चत्वारोवर्णाएवचातुर्वर्ण्यं । त्रयोलोकाएवत्रैलोक्यं । चत्वारआत्मानएवचातुरात्म्यमिति तथाचतस्येदमितिसंबंधार्थेकथंष्यञ्प्रत्ययोव्याख्यायतइत्यतउक्तं ॥ विचित्राहितद्धितगतिरिति ॥ एतदात्मनइदमिति । एतदात्मनःसंबंध्येतदीयमित्यर्थः ॥ तद्धितोयमिति । तद्धितष्यञ्प्रत्ययांतमित्यर्थः । तथाचएतदात्मशब्दात्संबंधार्थेष्यञ्प्रत्ययेषःप्रत्ययस्येतिप्रत्ययाद्यस्यषस्यलोपेहलंत्यमितिञकारलोपेतद्धितेष्वचामादेः । ञ्णितिणितिचप्रत्ययेपरेअचामादेरचोवृद्धिस्स्यादितिसूत्रेणञित्त्वादादिवृद्धौनस्तद्धितइतिटिलोपेसतिऐतदात्म्यमितिरूपमितिभावः । ननुविचित्राहितद्धितगतिरितिवचनानुसारेणतस्येदमित्यर्थेष्यञ्प्रत्ययाश्रयणंगौणमितिचेत्तत्राह ॥ वैयर्थ्यादिति । त्वत्पक्षेतस्यस्वार्थिकत्वाश्रयणेनव्यर्थत्वादित्यर्थः॥ अर्थांतरेति । तस्येदमित्येवंसंबंधरूपार्थांतरेत्यर्थः । कथमुच्यतइत्यतस्ताव्द्याख्याति ॥ सोणिमैवेति ॥ आत्मेतिशब्दोयस्येति । आत्मेतिशब्दोवाचकोयस्येत्यर्थः । आत्मशब्दः आत्मशब्दवाच्यः । तद्विषयः तत्प्रतिपादकः । प्रत्यगात्मनि अंतरात्मनि जीवइत्यर्थः । ईश्वरस्तुपरमात्मेतिसोपपदात्मवाच्यतयाप्रसिद्धइतिभावः ॥ वायुरुद्रावपीत्यपिग्राह्यमिति । तथाचनानुमानात्मकागमपरिकल्पितरुद्रोत्रवाच्यइतिभाष्यानुसारेणप्रकृतिशब्दोरुद्रस्य । एतैरेवहेतुभिर्नजीवोवायुश्चेतिभाष्यानुसारेणजीवशब्दोवायोरुपलक्षकइत्यर्थः । द्युभ्वा

द्यायतनमितिसूत्रमुदाहृत्यनप्रकृतिजीवावित्युक्त्याद्युभ्वाद्यायतनमितिप्रथमसूत्रमपिप्रकृतेर्द्युभ्वाद्यायतनत्वप्रतिषेधकमितिप्रतीयतेअतआह॥ [६५।२३] नप्रकृतिर्जीवाविती‌ति ॥ [६५।२३] उत्तरसूत्रद्वयार्थइति । नानुमानमितिसूत्रं । नानुमानात्मकागमपरिकल्पितरुद्रोत्रवाच्यः । भस्मधरोग्रत्वादितच्छब्दाभावादितिन्यायेनप्रकृतिवाचकशब्दाभावान्नानुमानात्मकागमपरिकल्पिताप्रकृतिरत्रवाच्येतिनप्रकृतिर्द्युभ्वाद्यायतनमित्येवंद्वितीयंसूत्रंप्रकृतेर्द्युभ्वाद्यायतनत्वप्रतिषेधकं । प्राणभृच्चेतिसूत्रंएतैरेवहेतुभिर्नजीवोवायुश्चेतिभाष्योक्तरीत्याजीवस्यतत्प्रतिषेधकमित्यर्थः । ननुस्वशब्दपर्यायात्मशब्दादितिकुतोव्याख्यायतेकिंनामस्वातंत्र्यात्स्वइतिप्रोक्तइतिप्रमाणप्रसिद्धविष्णुवाचकस्वशब्दसद्भावादितिकुतोनव्याख्यायतइत्यतआह ॥ [६५।२३] स्वशब्दाभावादिति । यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनस्सहप्राणैश्चसर्वैस्तमेवैकंजानथआत्मानमन्यावाचोविमुंचथअमृतस्यैषसेतुरितिविषयवाक्येस्वइतिशब्दःस्वशब्दःतस्याभावादित्यर्थः । नन्वथापिस्वस्यवाचकःशब्दःस्वशब्दइत्यंगीकृत्यस्ववाचकनारायणादिशब्दसद्भावादितिकस्मान्नव्याख्यायतइत्यतआह ॥ [६५।२४] वाचकशब्दस्यापीति । विष्णुवाचकस्यान्यस्यनारायणादिशब्दस्याप्यदर्शनादित्यर्थः ॥ [६५।२४] प्रतिपाद्यइति । द्युभ्वाद्यायतनत्वेनेत्यर्थः ॥ [६५।२५] परमात्मैवेति । द्युभ्वाद्यायतनमित्यर्थः । स्वशब्दादित्यस्यार्थआत्मशब्दादिति । नानुमानं । प्राणभृच्चेत्यस्यार्थोनजीवादिरिति [६५।२५] । अतच्छब्दादित्यस्यविष्णावेवात्मशब्दस्यरूढत्वान्नशिवादिकान् । श्रुतिर्वक्तीत्यनुव्याख्यानानुसारेणार्थमाह ॥ [६५।२५] आत्मशब्दादिति । भस्मधरोग्रत्वादितच्छब्दाभावादितिभाष्यंमनसिनिधायातच्छब्दादित्यस्यैवार्थांतरमाह ॥ [६५।२५] तदीयशब्दाभावाच्चेति । आत्म

शब्दंयतोहेतुंकृत्वाजीवंन्यवारयत् । स्वशब्दात्प्राणभृच्चैवनोक्तइत्येववेदराट् । यद्यात्मशब्दोजीवेपिकथंसविनिवारयेत् ।
आत्मशब्दोदितस्तस्माद्विष्णुरेवनचापरइत्यनुव्याख्यानंमनसिनिधायोपपादयति ॥ [६५।२६] यद्यात्मशब्दइत्यादिना ॥ [६५।२६] अत्रार्थ
इति । द्युभ्वाद्यायतनस्यविष्णुत्वेजीवादित्वाभावेचेत्यर्थः । [६५।२६] विरुद्धत्वप्रसंगादिति । आत्मशब्दस्यप्रत्यगात्मनिजीवएव
रूढत्वेद्युभ्वाद्यायतनंविष्णुरेवात्मशब्दवाच्यत्वादित्यनुमानेआत्मशब्दवाच्यत्वहेतोरविष्णुत्वेनव्याप्तत्वाद्विरुद्धत्वप्रसंगः ।
द्युभ्वाद्यायतनंनजीवादिरात्मशब्दवाच्यत्वादित्यनुमानेप्यात्मशब्दवाच्यत्वस्यजीवत्वेनव्याप्तत्वाच्चविरुद्धत्वप्रसंगइत्यर्थः ॥
[६६।१२] अमुख्यययावृत्त्येति । मुख्यवृत्त्याऽऽत्मशब्दवाच्यत्वमेवतत्रहेतुत्वेनविवक्षितमित्यर्थः ॥ [६६।१३] तनोतेरिति । तनुविस्तारइति
धातोरित्यर्थः । विस्तारोव्याप्तिः ॥ [६६।१३] माङ्माने इति । मानंज्ञानंलयश्चैवनिर्माणंचापिकथ्यतइतिवचनान्मानमितिज्ञानंनि
र्माणंचोच्यतइत्यर्थः । ततश्चाङ्पूर्वकात्तनुविस्तारेमाङ्मानेआभ्यांडन्प्रत्ययेडित्त्वात्धातुद्वयेपिटिभूतस्यान्इत्यस्यआइत्य
स्यचलोपेआत्म्अन्आत्मन्इतिप्रातिपदिकसिद्धिः । ननुधातुद्वयोपरिएकःप्रत्ययःकथमानीयतेवैयाकरणसंप्रदायाभावादि
तिचेन्न । अदिभूभ्यांडुतजितिसूत्रेणादभक्षणेभूसत्तायामितिधातुद्वयोपर्येकंडुतच्प्रत्ययमानीयाद्भुतमितिरूपस्योणादिवृत्तौ
साधितत्वादित्यवधेयं ॥ [६६।१५] ससइत्यर्थः ॥ स्यादिति । सआत्मेतितच्छब्देनऐतदात्म्यमितिप्रकृतात्मैवपरामर्शनीयस्तथाचा
त्माआत्मेत्यर्थस्स्यादित्यर्थइत्याहुः । वस्तुतस्तुसोणिमैवात्मेतिव्याख्यानादुभयोरपिपरमात्मवाचकत्वेनविश्वंविष्णुरितिवत्प
र्यायत्वप्राप्त्यावैयर्थ्यादित्यर्थः । ननुसोणिमात्मशब्दवाच्यइत्यात्मशब्दवाच्यत्वंविधीयतइतिनोक्तदोषइत्याशंक्यनिराकरो

ति ॥ [६६।५] नचेति ॥ [६६।५] वैयर्थ्यादेवेति । आत्मशब्दवाच्यत्वविधानस्यापिवैयर्थ्यादितिभावः । एतेनेत्युक्तंविशदयति ॥ [६६।५] आततत्वादीति । आततत्वादिज्ञापनार्थमात्मशब्दवाच्यत्वंविधीयतइतिनवैयर्थ्यमितिभावः ॥ [६६।६] इत्युक्तइति । आत्म्यमित्यनेनेत्यर्थः ॥ [६६।६] एतदित्युक्तमिति । ऐतदात्म्यमितिवाक्येएतदित्युक्तमित्यर्थः ॥ [६६।६] तस्यैवेति । एतदात्मेत्यस्यैवेत्यर्थः । इदं सआत्मेतिवाक्यं । सोणिमेति एतदित्यस्यविवरणं । आत्म्यमित्यत्रत्यात्मशब्दानुवादआत्मेति । तथाचऐतदात्म्यमित्यस्यएषः पूर्वमणिमशब्देनप्रकृतश्चासावात्माचैतदात्मातस्येदमैतदात्म्यमित्यर्थोद्रष्टव्यइत्युक्तंभवति ॥ [६६।६] इत्युक्तत्वादिति । इतिवाक्येनजीवेशाभेदस्यप्रतिपादितत्वादित्यर्थः ॥ [६६।७] व्यर्थमेवेति । तेनाप्यभेदस्यैवप्रतिपादनेनपुनरुक्तिप्रसंगादित्यर्थः । इत्यादीत्यादिपदेनभेदएवदृष्टांताभिधानादित्यस्यग्रहणं । इत्यत्रचेत्यस्यार्थो ॥ [६६।८] ऽत्रापिवाक्यइति । यदास्यप्राणादीनित्येवंरूपवाक्यस्यास्मिन्प्रकरणेऽभावादाह ॥ [६६।८] इत्यादेरिति । अर्थस्येत्यर्थः । अतएवप्रतीतेरितिप्रतीतिपदाध्याहारेणवाक्यंयोजितमित्यवगंतव्यं ॥ [६६।९] इतिवक्तव्यइति । यदाददातितदाजानातीत्यर्थप्रतिपादनायतस्ययावन्नवागित्यत्रेतिवक्तव्यं । इदमुपलक्षणं । यदास्यप्राणादीन्परोग्रसतीत्यर्थप्रतिपादनाय अथयदास्यवाङ्मनसिसंपद्यतइत्यत्रचेतिवक्तव्यमित्यर्थः॥ [६६।९] इतिवचनमिति । एवंसमग्रवाक्योदाहरणेकर्तव्ये एकदेशोदाहरणमित्यर्थः ॥ [६६।९] प्रदर्शनार्थमिति । तद्वशत्वमेवोक्तमित्युक्तेकेनांशेनतद्वशत्वमुक्तमितिशंकापरिहारायतत्प्रतिपादकप्रदर्शनार्थमित्यर्थः॥ [६६।११] अन्यत्सर्वमिति । एतद्वाक्यशेषभूतंतावन्नजानातीतिवाक्यं तथातस्ययावन्नवाङ्मनसिसंपद्यतइत्यारभ्यतावज्जानातीत्यंतंसमग्रंवाक्यमित्यर्थः॥ [६६।१३] ब्रह्मात्मत्वाभिसंधितस्यागावि

ति। तत्त्यागोब्रह्मात्मत्वाभिसंधित्यागः अनृतब्रह्मान्यत्वाभिसंधिरित्यर्थः।ननुस्तेनापहार्यदृष्टांतस्यसाक्षाद्भेदाविषयकत्वाद्भेद एवायंदृष्टांतइतिकथमुक्तमित्यतःपरंपरयातदुपपादकोयमित्याशयेनाह॥ [६६।१५]मोक्षघातविषयएवेति। अन्याभिमतं अन्याभिमानविषयं। तदभिमंता मदीयमितितत्रस्वाभिमानकर्ता॥ [६६।१७]पराभिमता(नम)र्थमिति। यथानृताभिसंधस्तेनोहन्यतेएव मनृतभेदाभिसंधिमत्त्वेनसत्यब्रह्मात्मत्वाभिसंधित्यागवत्त्वेनचस्तेनत्वात्सत्संपन्नोप्यविद्वानावर्तते । आवर्तनमेवचास्यहनन स्थानीयमित्येवंस्वकीयब्रह्मात्मत्वाभिसंधित्यागवतोभेदज्ञानिनःस्तेनोपमत्वरूपंपराभिमतार्थमित्यर्थः। स्वकीयंपरित्यजन्स्तेनोनभवतिचेत्कीदृशइत्यतआह॥ [६६।१८]मंदोवेत्यादि।मंदो मूर्खः॥ [६६।१८]लोकानुसारादिति। अन्याभिमतेवस्तुनिस्वाभिमतिकर्तुः स्तेनत्वस्यलोकेदृष्टत्वादित्यर्थः। नैपुणं कौशलं। अभिप्रेतार्थं अंतर्यामिणोब्रह्मत्वादिरूपं॥ [६६।२२]एकविभक्तित्वादिरूपइति। अहंब्रह्मेतिसमानविभक्तिकत्वरूपइत्यर्थः । आदिपदेनभिन्नप्रवृत्तिनिमित्तानांशब्दानामेकस्मिन्नर्थेवृत्तिरूपंसामानाधिकरण्यं ग्राह्यं॥ [६६।२३]अज्ञानादिकमिति। शास्त्रतत्त्वज्ञानाभावः। आदिपदेनमिथ्याज्ञानंग्राह्यं। अज्ञानस्यकामादिहेतुकत्वेगीतासंमतिमाह॥ [६६।२४]इच्छाद्वेषेति। द्वंद्वमोहोनामवैषयिकसुखस्यदुःखादेश्चहेयतयाज्ञानाभावः। यथोक्तंगीताभाष्ये द्वंद्वमोहेन सुखदुःखादिविषयमोहेन। इच्छाद्वेषयोःप्रवृद्धयोस्सतोर्नहिकिंचित्सुखादिकंहेयतयाज्ञातुंशक्यमिति ॥ [६६।२६]आगंतुकत्वादिति। शास्त्रतत्त्वाज्ञानिनइतिशेषः। सृष्ट्यनंतरंशरीरेसतिप्राप्तत्वादितिभावः। यथोक्तंगीतायां। सर्वभूतानिसंमोहंसर्गेयांतिपरंतपेति। व्याख्यातंचतद्भाष्येभगवच्चरणैः। सर्गमारभ्यशरीरेहिसतीच्छादयइति। ननुनिरानंदत्वापक्रमनस्त्वाशिवत्वानांयथायथंजड

मुक्तियोग्येष्वतिप्रसक्तत्वेनकथंमूलकारणत्वमित्यतआह ॥ एतेनेति । पदत्रयेणेत्यर्थः । गुणानीत्यनूद्यनपुंसकत्वंछांदसमि
त्यभिप्रेत्यव्याचष्टे ॥ गुणानिसार्वज्ञादिगुणानिति ॥ नयोजयंतीति । तथाचब्रह्मनिष्ठसार्वज्ञादिगुणानांजीवनि
ष्ठदुःखादिगुणानांचमिथ्यात्वमुक्त्वाचिन्मात्रैक्यमेववदंतीतिभावः । तमएवपरायणमित्यत्रापितमःशब्दस्यपूर्वप्रकृततमो
गुणपरत्वप्रतीतिवारणायव्याचष्टे॥ तमोनरकविशेषइति । महातमस्त्रिधाप्रोक्तमूर्ध्वंमध्यंतथाधरमितिप्रमाणप्रमितनित्य
नरकविशेषइत्यर्थः ॥ तद्बलादिति । तद्विरोधादितिभावः ॥ परिमाणेति । महत्त्वाणुत्वरूपेत्यर्थः ॥ जीवत्वादीति ।
ईश्वरेतदभावादितिभावः ॥ प्रयोजनेति । स्वप्रयोजनेत्यर्थः । ईश्वरःस्वप्रयोजनानपेक्षयैवप्रवर्ततेनैवंजीवइतिभावः ।
अन्वयःतादात्म्यरूपः । अयोग्यो बाधितः । ननुकिंयोग्यतया आकांक्षासन्निध्योस्सद्भावात्तावन्मात्रेणैववाक्यप्रामाण्योप
पत्तेरित्यतआह ॥ सिंहोदेवदत्तइत्यादाविति । आदिपदेनाग्निनासिंचेदित्यादेर्ग्रहणं । तथाचतत्रआकांक्षासन्निध्यो
स्सद्भावेपियोग्यतायाअभावेनवाक्याप्रामाण्यदर्शनादितिभावः ॥ अन्यथेति । ऐक्यवाक्येषुयोग्यतांगीकारइत्यर्थः ॥
योग्यतासंपत्त्येति । भेदवाक्यविरोधाभावेनयोग्यतासंपत्त्येत्यर्थः । सतितस्मिन्नित्यनंतरंतद्विरोधेनेतिशेषः । यथापक्षी
चसूत्रंचेत्यादिवाक्यस्यनवप्रकरणयुक्तार्थेसर्वस्मिन्नार्थसमाख्यात्वंस्पष्टंनप्रतीयतेऽतस्तदध्याहारेणसम्यग्व्याचष्टे ॥ यथापक्षी
चेत्यादिना । यथापक्षीचसूत्रंचतथासर्वदैवविलक्षणावित्युक्त्याशकुनिसूत्रदृष्टांतप्रतिपादकवाक्यस्यभेदे वैसादृश्यरूपेवै
लक्षण्येचेत्युभयत्रतात्पर्यं नानावृक्षरसनदीसमुद्रदृष्टांतप्रतिपादकवाक्ययोस्तुसाक्षाद्व्यावर्तकधर्मप्रतिपादनएवतात्पर्यमित्यु

क्तंभवति । उपनिषत्क्रमानुसारेणतथापीतिवाक्यमादौयोजयति ॥ [६७।११] यथाधानागतइति । यद्यपितथापीत्येवमर्थप्रतीतिवा रणायतथेत्यस्यापेक्षितंदृष्टांतंपूरयति ॥ यथाधानागतइति । अपीत्यतःपूर्वंभिन्नइतिशेषइत्यभिप्रेत्यभिन्नोपीत्युक्तं । तथा चयथाधानागतोहरिःसूक्ष्मत्वान्नदृश्यते । तथाजीवादपिसूक्ष्मरूपत्वाज्जीवाद्भिन्नोपिपरमोहरिर्मंदद्दष्टीनांजीवाद्भेदेननदृश्य तइत्यर्थः। शुद्धोदलवणेयथातथाप्रेरकोपिसन्नदृश्यतइत्यन्वयमभिप्रेत्याध्याहारेणसम्यग्व्याचष्टे॥ [६७।१२] यथाशुद्धोदलवणेइति । उपनिषत्क्रमानुसारेणाह ॥ [६७।१३] यथापुंविषयाविति । यथापुंविषयौभिन्नावित्यन्वयमभिप्रेत्यदार्ष्टांतिकमध्याहरति ॥ [६७।१२] बद्धा क्षेत्यादिना ॥ [६७।१३] गुरूपदेशेनेति । तस्ययथाभिनहनंप्रमुच्यप्रब्रूयादित्युक्तत्वान्नेत्रपटलंप्रमुच्यमार्गोपदेष्टैवगुरुरितिभावः । जीवेश्वरावपिगुरूपदेशेनद्रष्टृदृश्यभाववंतावितिसंबंधः । यथाचोरापहार्यौचतथाजीवेश्वरौभिन्नावित्यन्वयमभिप्रेत्यव्याच ष्टे ॥ [६७।१४] यथाचोरापहार्याविति ॥ [६७।१४] शंकितचोरेति । वस्तुगत्यानचोरइत्यर्थः । शंकितचोरश्चासौसत्याभिसंधश्चेतिविग्र हः । अन्यथेत्येतदनूद्यव्याचष्टे ॥ [६७।१५] अन्यथैक्यज्ञानेनेति । ऐक्यज्ञानस्यबंधमात्रफलकत्वे तेषांतमःशरीराणांतमएवपराय णमित्युक्तविरोधस्स्यादतोव्याचष्टे ॥ [६७।१५] नित्यनरकेपात्यंतइति । वायुर्किंकरैरितिशेषः ॥ ७ ॥ [६७।१७] प्राप्तिंदर्शयितुमिति । साधारणप्राप्तिरसाधारणप्राप्तिर्वादिप्राप्तिःश्रुतितात्पर्यापरिज्ञानप्राप्तिरितिचतुर्धाप्राप्तिदर्शनायादौसाधारणप्राप्तिंदर्शयितु मागमवाक्यंपठतीत्यर्थः । वायवःप्राणापानाद्यावृत्तयः । अन्योयस्तमविज्ञायेतियत्तच्छब्दयोर्विद्यमानत्वात्सइत्येतदधि कमित्यतआह ॥ [६७।१८] यस्सविष्णुरिति । सप्रसिद्धोविष्णुरित्यनुवादरूपत्वान्नवैयर्थ्यमित्यर्थः ॥ [६७।१८] प्राणशब्देनवायवइति ।

पूर्वमिंद्रियपदसमभिव्याहाराभावात्प्राणशब्दइंद्रियवायूभयपरत्वेनव्याख्यातः । अत्रतुतदभावाद्वायुमात्रपरत्वेनव्याख्यात
इतिद्रष्टव्यं । ननुआत्मनइतिवक्तव्येत्मनइतिकथमुक्तमित्यतआह ॥ [६७।१८] मंत्रेष्विति । आङितिटासंज्ञा । मंत्रेषुआङिपरेआ
त्मनआदेराकारस्यलोपोभवतीत्यर्थः । पुरुत्मनेत्याद्युदाहरणं । नन्वत्रसूत्रेतृतीयाविभक्तावेवात्मनआदेर्लोपोविहितोनषष्ठी
विभक्तौपरतः । अतोत्रैतत्सूत्रोदाहरणमसंगतमितिचेन्न । आङीत्युपलक्षणं । षष्ठीविभक्तौपरतोलोपोभवतीत्यपिव्याख्या
नान्नासंगतिः । अतएवोक्तंप्रक्रियाकौमुद्यां । आङिअन्यत्रापीति । अन्यथाबध्यतइत्यस्यसंसारपदवींयातीत्यनेनपौनरुक्त्यं
प्रतीयतेतोव्याचष्टे ॥ [६७।१९] नकेवलमिति । तथाचअन्यथाजीवेशयोर्वैलक्षण्यमज्ञात्वाआत्मनोदेहादिनेतृत्वज्ञानेन केवलंसंसा
रपदवींयातीत्येवन किंतुनित्यनरकेबध्यतेचेत्यर्थः । ननुकथमनेनैक्यप्राप्तिरुपपादितेत्यतआह ॥ अत्रेत्यादिना [६७।१९] । नन्वे
तावताभगवल्लक्षणाभिमानएवप्राप्तोनतदैक्याभिमानइत्यतआह ॥ [६७।२०] लक्षणाभिमानोनामेति । यावद्द्रव्यभाविलक्षणस्य
धर्मिणात्यंताभिन्नत्वात्तल्लक्षणाभिमानेतदैक्याभिमानएवप्राप्तइतिभावः । सर्वेषांप्राणभृतामैक्यज्ञानप्राप्तावित्यनेनसाधार
णीप्राप्तिरुपपादितेतिज्ञेयं । ननुतर्हिसर्वान्प्रत्यैक्यप्रतिषेधःकर्तव्यः । श्वेतकेतुंप्रत्येवैक्यप्रतिषेधःकस्मात्क्रियतइत्यतउक्तं ॥
श्वेतकेतूपलक्षितानामिति [६७।२१] ॥ [६७।२२] असाधारणीमिति । श्वेतकेतोरेवैक्यज्ञानंप्राप्तमस्तीत्येवंरूपामसाधारणीमित्यर्थः । स्त
ब्धएयायेत्यात्मनोन्यमित्यत्रस्तब्धएयायेतीतिशब्दस्यअत्रोपदिश्यतइत्यनेनसंबंधइत्याह । स्तब्धएयायेत्यत्रोच्यतइतिसंबं
धइति । उपदिश्यतइत्यस्यार्थानुवादउच्यतइति । सर्वान्वेदानधीत्येत्यत्रवाक्येभगवद्भक्तिर्नोपदिश्यतइत्यतआह ॥ इत्या

दावत्रषष्ठेध्याय[६७।२४]इति । अनूचानत्वादिगुणप्रदत्वेनपरमात्माज्ञानमात्रस्यकथमैक्यप्राप्तिरूपत्वमित्यतआह ॥ अहमेवे[६७।२५]ति । अविनीतस्य आर्येष्वनम्रस्येत्यर्थः । ननुतल्लक्षणाभिमानएवप्राप्तोनतदैक्यज्ञानमित्यतआह ॥ परमात्मलक्षणा[६७।२६]भिमानेतदैक्यप्राप्तेरिति । पूर्वएवाभिप्रायः ॥ प्रक्रमासंगतिरिति[६७।२६] । श्वेतकेतोःपरमात्मैक्याभिमानेनस्तब्धतायाः प्राप्तत्वात्तत्परिहारायेदंवाक्यमुपक्रांतं । तथाचातत्त्वमसीतिपरमात्मभेदोपदेशेनतत्प्रतिषेधएवकर्तव्योनतुतत्त्वमसीत्यैक्यबोधनंकार्यं । तथात्वेस्तब्धतादार्ढ्यस्यैवप्राप्तेरित्युपक्रमासंगतिरित्यर्थः ॥ प्रवाहरूपेणेति[६८।२] । यथोक्तमनुव्याख्याने । अनादिकालतोवृत्तास्समयाहिप्रवाहतः । नचोच्छेदोस्तिकस्यापिसमयस्येति । नन्वस्यवाक्यस्यवादिप्राप्तनिराकरणपरत्वंकथंज्ञायते । येनदृष्टांतत्वंस्यादित्यतस्तज्ज्ञापकमाह ॥ एकआहुरितिवचनादिति[६८।५] । श्रुतितात्पर्यापरिज्ञानमात्रेणकथमैक्यप्राप्तिरित्यतआह॥ अन्यार्थप्रतीत्याचेति[६८।६] । जीवस्यब्रह्मैक्यरूपान्यार्थेत्यर्थः ॥ इत्यादिश्रुतितात्पर्येति[६८।७] । स्वरूपभूतरमणज्ञानरूपमुक्तिकामोभगवत्प्रीत्यर्थदर्शपूर्णमासाभ्यांयजेतेत्येवंरूपश्रुतितात्पर्येत्यर्थः ॥ अनीश्वरविषयमिति[६८।८] । ईश्वरविषयं ईश्वरार्पणबुद्ध्याक्रियमाणंनभवतीत्यर्थः । नन्वत्रकाम्यकर्मनिंदैवप्रतीयते नतुप्रतिषेधइत्यतआह ॥ निंदायाइति[६८।९] । निंदारूपार्थवादस्येत्यर्थः । तथाचाश्रूयमाणोपिकाम्यकर्मप्रतिषेधोनिंदावचनबलात्कल्पनीयइतिभावः । नन्वीश्वरविषयकाम्यकर्मणःश्रुतिव्यतिरिक्तप्रमाणादेवप्राप्तत्वान्नश्रुतितात्पर्यापरिज्ञानेनप्राप्ताविदमुदाहरणमित्यतआह ॥ नचैवंविधस्ये[६८।१०]ति । अन्नदानादिकमित्यत्रादिपदेनप्रपादानादिकंग्राह्यं । अतएवकर्मनिर्णयटीकायांपूर्तमन्नप्रपादानादीतिव्याख्यातं ।

ततो[६८।९]द्वंद्वइति । ततःइष्टापूर्तशब्दयोर्भिन्नार्थत्वादित्यर्थः । पदप्रतिपाद्ययोरर्थयोर्भेदेद्वंद्वसमासस्यभेदेद्वंद्वइतिविधानादि
तिभावः । नन्विष्टंचपूर्तंचेष्टापूर्तेइतिद्विवचनंस्यादित्यतआह ॥ तस्यैक[६८।९]वद्भावइति । द्वंद्वस्यैकवद्भावेनियामकमाह ॥
[६८।१०]सर्वोद्वंद्वइति । तथाचसनपुंसकं यस्यैकवद्भावस्सनपुंसकंस्यादिति नपुंसकत्वेइष्टापूर्तमितियुक्तमितिभावः । नन्विष्टापूर्त
मितिकथंदीर्घः । देवताद्वंद्वेच । देवतावाचिपदयोर्द्वंद्वसमासेपूर्वपदेदीर्घोभवतीतिसूत्रार्थः । इंद्राग्नी । इंद्राबृहस्पती । इं
द्रावरुणौ । अग्नीषोमावित्याद्युदाहरणं । तथाचप्रकृतेइष्टापूर्तमित्यस्यदेवताद्वंद्वत्वाभावात्कथंदीर्घइत्यतआह ॥ अ
न्येषा[६८।१०]मपीति । देवतावाचिपदभिन्नपदानामपिद्वंद्वसमासेक्वचिद्दीर्घोभवतीतिसूत्रार्थः । तथाचेष्टापूर्तमितिद्वंद्वसमासे
दीर्घोपपत्तिरितिभावः । अन्यदित्यस्यव्याख्यानंपरंब्रह्मेति । श्रेयइत्यस्यपूज्यमितिव्याख्यानं । तात्पर्यमाह ॥ त
त्प्र[६८।१०]सादमिति । इतियावदितिशेषः । वेदयंतइतिस्वार्थेणिजितिभावेनोक्तं ॥ जा[६८।११]नंतीति ॥ द्वे[६८।११]प्रासीइति । सा
धारणासाधारणाख्येद्वेप्राप्तीइत्यर्थः ॥ प्रमि[६८।११]तत्वादिति । प्रेरकःसर्व(जीवानां)देहानां सर्वान्वेदानधीत्येतिप्रमितत्वा
दित्यर्थः । ननुवादिप्राप्तिश्रुतितात्पर्यापरिज्ञानप्राप्त्योःकथंप्रमितत्वाभावः । तद्धैकआहुः इष्टापूर्तमितिवाक्यद्वयेवा
दिप्राप्तश्रुतितात्पर्यापरिज्ञानप्राप्तयोर्निषेधस्यदृष्टत्वादितिचेत्तत्राह ॥ [६८।११]दृष्टांतोहीति । कथंदर्शितमित्यतआह ॥ केचि
[६८।१२]दितीति । केचिदितिकुवादिप्राप्तत्वं शास्त्रतत्त्वमविज्ञायेतिश्रुतितात्पर्यापरिज्ञानप्राप्तत्वंचोक्तमित्यर्थः । उपसंहरति ॥
अ[६८।१३]तइति ॥ ७ ॥ इतिचतुर्थाऐक्यप्राप्त्युक्तिः ॥ ७ ॥ तज्जलानित्यत्रतज्जेत्यस्यव्याख्यानं । तज्जत्वादिति । लेत्य

दावत्रषष्ठेध्यायइति । अनूचानत्वादिगुणप्रदत्वेनपरमात्माज्ञानमात्रस्यकथमैक्यप्राप्तिरूपत्वमित्यतआह ॥ अहमेवे ति । अविनीतस्य आर्येष्वनम्रस्येत्यर्थः । ननुतल्लक्षणाभिमानएवप्राप्तोनतदैक्यज्ञानमित्यतआह ॥ परमात्मलक्षणा भिमानेतदैक्यप्राप्तेरिति । पूर्वएवाभिप्रायः ॥ प्रक्रमासंगतिरिति । श्वेतकेतोःपरमात्मैक्याभिमानेनस्तब्धतायाः प्राप्तत्वात्तत्परिहारायेदंवाक्यमुपक्रांतं । तथाचातत्त्वमसीतिपरमात्मभेदोपदेशेनतत्प्रतिषेधएवकर्तव्योनतुतत्त्वमसीत्यैक्यबो धनंकार्यं । तथात्वेस्तब्धतादार्ढ्यस्यैवप्राप्तेरित्युपक्रमासंगतिरित्यर्थः ॥ प्रवाहरूपेणेति । यथोक्तमनुव्याख्याने । अनादि कालतोवृत्तास्समयाहिप्रवाहतः । नचोच्छेदोस्तिकस्यापिसमयस्येति । नन्वस्यवाक्यस्यवादिप्राप्तनिराकरणपरत्वंकथंज्ञाय ते । येनदृष्टांतत्वंस्यादित्यतस्तज्ज्ञापकमाह ॥ एकआहुरितिर्वचनादिति । श्रुतितात्पर्यापरिज्ञानमात्रेणकथमैक्यप्राप्ति रित्यतआह॥ अन्यार्थप्रतीत्याचेति । जीवस्यब्रह्मैक्यरूपान्यार्थेत्यर्थः ॥ इत्यादिश्रुतितात्पर्येति । स्वरूपभूतरमणज्ञा नरूपमुक्तिकामोभगवत्प्रीत्यर्थंदर्शपूर्णमासाभ्यांयजेतेत्येवंरूपश्रुतितात्पर्येत्यर्थः ॥ अनीश्वरविषयमिति । ईश्वरविषयं ईश्वरार्पणबुद्ध्याक्रियमाणंनभवतीत्यर्थः । नन्वत्रकाम्यकर्मनिंदैवप्रतीयते नतुप्रतिषेधइत्यतआह ॥ निंदायाइति । निं दारूपार्थवादस्येत्यर्थः । तथाचाश्रूयमाणोपिकाम्यकर्मप्रतिषेधोनिंदावचनबलात्कल्पनीयइतिभावः । नन्वीश्वरविषयका म्यकर्मणःश्रुतिव्यतिरिक्तप्रमाणादेवप्राप्तत्वान्नश्रुतितात्पर्यापरिज्ञानेनप्राप्ताविदमुदाहरणमित्यतआह ॥ नचैवंविधस्ये ति । अन्नदानादिकमित्यत्रादिपदेनप्रपादानादिकंग्राह्यं । अतएवकर्मनिर्णयटीकायांपूर्तमन्नप्रपादानादीतिव्याख्यातं ।

[६८।१९]ततोद्वंद्वइति । ततःइष्टापूर्तशब्दयोर्भिन्नार्थत्वादित्यर्थः । पदप्रतिपाद्ययोरर्थयोर्भेदेद्वंद्वसमासस्यभेदेद्वंद्वइतिविधानादि तिभावः । नन्विष्टंचपूर्तंचेष्टापूर्तेइतिद्विवचनंस्यादित्यतआह ॥ [६८।१९]तस्यैकवद्भावइति । द्वंद्वस्यैकवद्भावेनियामकमाह ॥ [६८।१९]सर्वोद्वंद्वइति । तथाचसनपुंसकं यस्यैकवद्भावस्सनपुंसकंस्यादिति नपुंसकत्वेइष्टापूर्तमितियुक्तमितिभावः । नन्विष्टापूर्त मितिकथंदीर्घः । देवताद्वंद्वेच । देवतावाचिपदयोर्द्वंद्वसमासेपूर्वपदेदीर्घोभवतीतिसूत्रार्थः । इंद्राग्नी । इंद्राबृहस्पती । इं द्रावरुणौ । अग्नीषोमावित्याद्युदाहरणं । तथाचप्रकृतेइष्टापूर्तमित्यस्यदेवताद्वंद्वत्वाभावात्कथंदीर्घइत्यतआह ॥ अ [६८।१९]न्येषामपीति । देवतावाचिपदभिन्नपदानामपिद्वंद्वसमासेक्वचिद्दीर्घोभवतीतिसूत्रार्थः । तथाचेष्टापूर्तमितिद्वंद्वसमासे दीर्घोपपत्तिरितिभावः । अन्यदित्यस्यव्याख्यानंपरंब्रह्मेति । श्रेयइत्यस्यपूज्यमितिव्याख्यानं । तात्पर्यमाह ॥ त [६८।१९]त्प्रसादमिति । इतियावदितिशेषः । वेदयंतइतिस्वार्थेणिजितिभावेनोक्तं ॥ [६८।११]जानंतीति ॥ [६८।११]द्वेप्राप्तीइति । सा धारणासाधारणाख्येद्वेप्राप्तीइत्यर्थः ॥ [६८।११]प्रमितत्वादिति । प्रेरकःसर्व(जीवानां)देहानां सर्वान्वेदानधीत्येतिप्रमितत्वा दित्यर्थः । ननुवादिप्राप्तिश्रुतितात्पर्यापरिज्ञानप्राप्त्योःकथंप्रमितत्वाभावः । तद्धैकआहुः इष्टापूर्तमितिवाक्यद्वयेवा दिप्राप्तश्रुतितात्पर्यापरिज्ञानप्राप्तयोर्निषेधस्यदृष्टत्वादितिचेत्तत्राह ॥ [६८।११]दृष्टांतोहीति । कथंदर्शितमित्यतआह ॥ केचि [६८।१२]दितीति । केचिदितिकुवादिप्राप्तत्वं शास्त्रतत्त्वमविज्ञायेतिश्रुतितात्पर्यापरिज्ञानप्राप्तत्वंचोक्तमित्यर्थः । उपसंहरति ॥ [६८।१३]अंतइति ॥ ७ ॥ इतिचतुर्धाऐक्यप्राप्त्युक्तिः ॥ ७ ॥ तज्जलानित्यत्रतज्जेत्यस्यव्याख्यानं । तज्जत्वादिति । लेत्य

स्यव्याख्यानंतज्जत्वादिति तस्मिन्लीयमानत्वादित्यर्थः । अन्इत्यस्यार्थस्तदनत्वादिति । तद्ब्रह्मअनंचेष्टकंयस्यतत्तदनं त
त्त्वादित्यर्थः ॥ [६८।१७] प्रागुक्तमिति । पंचमप्रपाठकेउक्तमित्यर्थः ॥ [६८।१८] अन्यज्ञानेनेति । नहिघटज्ञानेनपटज्ञानंसंभवतीत्यर्थः ॥
[६८।१९] नानुपपत्तिरिति । अन्यज्ञानेनान्यज्ञानस्यक्वाप्यदर्शनादित्यनुपपत्तिर्नास्तीत्यर्थः ॥ [६८।२०] मिथ्यात्वमिति । उपादानत्वंप्रति
पादयितुंसृष्टिरुक्ता । उपादानत्वंचारोपाधिष्ठानत्वं तच्चमिथ्यात्वंविनानसंभवतीत्यर्थः ॥ [६८।२१] अन्यथेति । सदेवसोम्येत्यादेरा
रोपाधिष्ठानत्वरूपोपादानत्वप्रतिपादकत्वाभावइत्यर्थः ॥ [६८।२२] उपपत्तयइति । चंडालजीवस्यवैश्वानरपदोक्तब्रह्मणाऽभेदंविना
चंडालेप्रदत्तस्यवैश्वानरेहुतत्वरूपार्थस्योपपन्नत्वाभावादितिभावः ॥ [६८।२३] उत्तरार्धेनेति । तथाचसर्वंखल्विदंब्रह्मेतिपंचमपूर्वभा
गोक्तमिथ्यात्वप्रतिपादकत्वंषष्ठपूर्वार्धस्य । पंचमांतोक्तार्थविवरणरूपत्वंषष्ठोत्तरार्धस्येतिभावः ॥ [६८।२४] स्यादेतदेवंकथंचिदिति।
सृष्टिकरणेनब्रह्मणोजगदुपादानत्वप्रतिपादनेपिभास्कररीत्याजगतोब्रह्मपरिणामत्वमेवप्राप्नोति नमिथ्यात्वं । मायिरीत्यात
त्रारोपितत्वमेवतदुपादानकत्वमितिविवक्षायांतत्रापिसृष्टिकथनमसंगतमेवस्यादितिभावेनकथंचिदित्युक्तं । अत्र पूर्वार्धे । न
न्वीक्षापूर्वकस्रष्टृत्वस्योक्तावप्युपादानत्वमेवकिंनस्यादितिचेन्न । घटाद्युपादानेमृदादावीक्षापूर्वकस्रष्टृत्वादर्शनादित्याह ॥
[६८।२५] नहीति ॥ उपादानत्वमत्राभिप्रेतंनचेत्कीदृशंकारणत्वमभिप्रेतमितिपृच्छति ॥ [६८।२५] किंत्विति । उत्तरमाह ॥ [६८।२५] घटादीनामि
ति । [६८।२६] चशब्दोवधारणइति । एतेनकारणत्वहेतुविवरणार्थंचसृष्टिकथनमितिवक्ष्यमाणरीत्यानुक्तकारणत्वसमुच्चयार्थश्चेति
ज्ञातव्यं । तदुभयंदर्शयति ॥ [६८।२६] सृष्टिकथनंत्विति ॥ [६९।४] अन्यथेति । जगतोब्रह्मव्यतिरेकेणसत्त्वइत्यर्थः । अन्यज्ञानेनान्यज्ञान

स्यक्काप्यदर्शनादितिभावः ॥ [६१।४] तच्चेति । एकविज्ञानेनसर्वविज्ञानंचेत्यर्थः ॥ [६१।४] उपादानत्वेज्ञापितइति । कार्यस्यकारणान न्यत्वेनतद्विज्ञानेनतद्विज्ञानसंभवादितिभावः ॥ [६१।७] एतेनेति । एकविज्ञानेनसर्वविज्ञानेकारणत्वस्यनिमित्तत्वकथनेनेत्यर्थः । उत्तरमाह ॥ [६१।८] हेत्वंतरेति । अत्र एकविज्ञानेनसर्वविज्ञाने ॥ [६१।९] साक्षादिति । तत्परिणामतयेत्यर्थः॥ [६१।९] श्रुतिविरोधादिति । निष्फलमित्यादिनिर्विकारत्वश्रुतिविरोधादित्यर्थः ॥ ननुतत्परिणामित्वरूपंमुख्यमेवोपादानत्वंकिंनस्यात्किंतदारोपाधिष्ठान त्वरूपोपादानत्वकथनेनेत्यतआह ॥ [६१।१०] ब्रह्माश्रितेति ॥ [६१।१०] मायैवेति । नतुब्रह्मेत्यर्थः । ननुसत्यज्ञानेनमिथ्याज्ञानंनभवतीत्य नेनसत्यमिथ्यावस्तुविषयकज्ञानयोःकार्यकारणभावोनिषिध्यते सत्यमिथ्ययोरेकज्ञानविषयत्वंवा । नाद्यइत्याह ॥ [६१।१४] नन्वारो पस्येति ॥ [६१।१४] उद्बुद्धसंस्कारेति । रजतसंस्कारेत्यर्थः ॥ [६१।१४] अधिष्ठानज्ञानमिति । सदृशादृष्टचिंताद्याःस्मृतिबीजस्यबोधकाइ तिवचनादितिभावः । द्वितीयेत्वाह ॥ [६१।१५] किंचेति । संभिन्नतया मिश्रतया इदंरजतमित्यधिष्ठानसंबद्धत्वेनेतियावत् ॥ [६१।१५] केवलमिति । रजतमित्येवेत्यर्थः ॥ [६१।१६] साधारणाकारमिति । इदंत्वादिनाधिष्ठानज्ञानवत्सत्त्वादिनारूपेणब्रह्मज्ञानमित्यर्थः । येनसत्यज्ञानेनमिथ्याज्ञानंनभवतीत्युक्तमयुक्तंस्यादितिभावः ॥ [६१।१६] सर्वार्थज्ञानेष्विति । परमतेसन्घटःसन्पटइत्यादिप्रतीते रनुगतसद्रूपब्रह्मविषयकत्वात् सर्वप्रत्ययवेद्येचब्रह्मरूपेव्यवस्थितइतितद्वचनादितिभावः । इतोपिसाधारणाकारज्ञानमत्रन विवक्षितंप्रकृतानुपयोगादित्याह ॥ [६१।१७] अत्रचेति ॥ [६१।१७] अपूर्वज्ञानोत्पादनायेति । सधारणाकारभिन्नयाथात्म्यविषयकापूर्वज्ञा

नोत्पादनायेत्यर्थः ॥ [६९।१७] अभिमुखीकर्तुमिति । श्वेतकेतुमितिशेषः ॥ [६९।१७] अर्थवादस्येति । येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातं विज्ञातमित्यर्थवादस्येत्यर्थः ॥[६९।१९] शुक्तिरितीति । शुक्तित्वप्रकारकज्ञानवानित्यर्थः । ननुशुक्तिज्ञोपितत्समीपस्थरजतज्ञोभवत्ये वेत्यतआह ॥ [६९।१९] तत्रारोपितरजतज्ञइति । रजतज्ञानवान्रजततयासत्त्वेनजानातीत्यर्थः ॥ [६९।१९] रजतंनास्तीतिजानातीति । निषेध्यत्वेनजानातीत्यर्थः ॥ [६९।२०] इत्युच्यतइति । व्यवह्रियतइत्यर्थः । ननुसर्वाभावज्ञोपिप्रतियोगितयासर्वंजानात्येवातःकथंब्र ह्मयाथात्म्यज्ञानेनसर्वाभावंजानतस्सर्वज्ञत्वाभावोवक्तुंशक्यतइत्यतआह ॥ [६९।२१] अन्यथेति ॥ [६९।२१] उपचारेति । सर्वाभावज्ञानेसर्व विज्ञानपदप्रयोगस्यसर्वविषयकत्वगुणयोगेनोपचारप्रसंगइत्यर्थः । औपचारिकत्वपरिहारमाशंकते ॥ [६९।२१] नन्विति ॥ [६९।२२] सर्वज्ञान मपीति । सर्वयाथात्म्यज्ञानमेवेत्यर्थः । किंतत्सर्वयाथात्म्यज्ञानमित्यतआह ॥ [६९।२२] सर्वस्येति । तथाज्ञानं मिथ्यात्वेनज्ञानं ॥ [६९।२३] कर्मादिविषयेति । कर्मादिप्रतिपादकेत्यर्थः । ज्ञानस्य कर्मादिज्ञानस्य ॥ [६९।२४] अन्यथेति । कर्मादिमिथ्यात्वज्ञानस्यैव कर्मादिप्रतिपादकवेदफलत्वइत्यर्थः ॥ बहुनेति । येनाश्रुतमित्यादिनेत्यर्थः । नन्वधिष्ठानयाथात्म्येज्ञातेसत्यध्यस्तज्ञानंभव त्क्वापिनोपलब्धमित्यदर्शनमेवतद्बीजमितिचेत्तत्राह ॥ [६९।२६] अदर्शनमात्रस्येति । अदर्शनमात्रस्यसामग्र्यंतराभावप्रयुक्तत्वे नाप्यन्यथासिद्ध्याप्रमेयाभावनिश्चायकत्वाभावात् । अन्यथाधर्माद्यतींद्रियपदार्थाभावएवस्यादितिभावः । विरोधप्रकटनाय योजनामाह ॥ [६९।२६] यःशुक्तिज्ञइति । ननुयोधिष्ठानयाथात्म्यज्ञानवान्सतत्रारोपितंनपश्यतीत्यसत् । विशेषदर्शनानिवर्त्येपी

तःशंखइत्यादिसोपाधिकभ्रमेशंखःश्वेतः शंखत्वादित्याद्यानुमानिकेऽधिष्ठानयाथात्म्यज्ञानेविद्यमानेपितत्रारोपितंपैत्यमेवपश्यतीतिव्यभिचारइत्यतोमूले नेदंरजतमितीत्यंशउपात्तइत्याशयवानाह ॥ **सोपाधिकेभ्रमेष्विति** ॥ **नेतिज्ञाने**ति ।एवंचयोधिष्ठानयाथात्म्यज्ञानवान्सइदंतन्नेतिज्ञानवानितिव्याप्तेर्विवक्षिततयापीतःशंखइत्यादावपिदोषवशादेवैवंममप्रतीयतेवस्तुतःपीतंनेतिज्ञानानुवृत्तिरस्त्येवेतिनव्यभिचारइतिभावः । तथाचनेदंरजतमितिपश्यतीत्यस्यनेदंरजतमितिजानातीत्यर्थोवगंतव्यः ॥ **परस्परपरिहारेणेति** । एकस्यसत्त्वदशायामपरंनास्तीत्येवंपरस्परपरिहारेणेत्यर्थः ॥ **साक्षादि**ति । परस्परपरिहाररूपत्वेनेत्यर्थः । तदनंगीकारेबाधकमाह ॥ **व्याघातेति** । अन्यथेतिशेषः । भावाभावयोस्साक्षाद्विरोधानंगीकारेप्रतियोग्यनुयोगिभावव्याघातप्रसंगः प्रतियोग्यनुयोगिभावोनस्यादितियावदित्यर्थः । अन्ययोः तद्विषयकज्ञानयोः । प्रकृतेकथंविरोधइत्यतआह ॥ **शुक्तिकेति** । शुक्तिप्रतियोगिकान्योन्याभावरूपंरजतंतत्प्रतियोगिकान्योन्याभावरूपाचशुक्तिः । अन्योन्याभावस्यधर्मिस्वरूपत्वादित्यर्थः ॥ **तज्ज्ञानयोरपीति** । शुक्तिकारजतज्ञानयोरपीत्यर्थः ॥ **ज्ञानोपलक्षणमिति** । तदभावज्ञानस्येत्यर्थः । यत्र देशे । अस्य नियमस्य । तत्फलितमाह ॥ **तद्देशकालयोरेवेति** । अंगीकारइत्यनंतरमितियावदितिशेषः । कुतोनयुज्यतइत्यतस्तत्सामग्र्यभावादित्याह ॥ **येहीत्यादिना** । आचक्षते षष्ठप्रमाणवादिनोभाट्टाः ॥ **स्वरूपेणेति** । नलिंगतयेत्यर्थः । येनतज्ज्ञानापेक्षायांतस्याप्युपलब्ध्यभावरूपतयानुपलब्ध्यंतरापेक्षायामनवस्थास्यादितिभावः ॥ **अनुपलब्धेरभावादिति** । तदानींप्रतियोगिनएव

सत्त्वेनतदनुपलब्धेरभावादित्यर्थः । अनुपलब्धेर्लिंगत्वेनाभावज्ञानकारणत्वमितिपक्षेत्वाह ॥ [७०।१३] अनुमानपक्षइति । घटोत्रे
दानींनास्ति योग्यत्वेसत्यनुपलभ्यमानत्वादित्यनुमातव्यं तत्रस्वरूपासिद्धिरित्यर्थः । नन्वभावज्ञानंप्रत्यक्षेणभवतीतिमतेऽ
नुपलब्धेरनपेक्षितत्वेनेंद्रियेणैवतत्रतदानींतदभावज्ञानंसंपत्स्यतइत्यतआह ॥ [७०।१३] अप्रत्यक्षेति । वादिभिरपि तार्किकैरपि ॥
[७०।१३] सत्यामेवेति । इंद्रियेणाभावग्रहणेयोग्यानुपलब्धेःसहकारित्वांगीकारादित्यर्थः । सहकारिभूतासाचानुपलब्धिरत्रनास्ती
त्याह ॥ [७०।१४] नहीति । तथात्वेवेत्यनंतरंतन्न्यायेनेतिशेषः । कुत्रापि जगति । तथाचप्रतियोगितदभावयोर्विरोधवार्तैवजगतिलु
प्येतेत्यर्थः । उपसंहरति ॥ [७०।१४] तदेवमिति ॥ ६ ॥ कथमनेनोक्तानुपपत्तिपरिहारइत्यतआह ॥ [७०।१८] इदमुक्तंभवतीति ॥ [७०।२०] अतए
वेति । उपचारांगीकारस्यावश्यकत्वादेवेत्यर्थः ॥ [७०।२०] प्रागेवेति । नतुतदन्यस्यमिथ्यात्वादित्यादिनेत्यर्थः । श्रुतावनुक्तेआ
ह्वाननाशनेमूलेकिमर्थमुक्तेइत्यतआह ॥ [७०।२२] अत्राह्वाननाशनेति ॥ [७०।२२] उपलक्षकत्वमिति । तथाचानाहुतमाहुतंभवतीत्याद्य
पिश्रुतौग्राह्यमितिभावः । दार्ष्टांतिकेयोजयति ॥ कर्मदेवतादीति ॥ [७०।२३] आह्वानेति । एह्यग्नइहहोतेत्यादिनाक्रियमाणेत्य
र्थः । यत्फलं स्वर्गादिरूपं ॥ [७०।२३] भगवच्छ्रवणादिनैवेति । ज्ञानादेवस्वर्गोज्ञानादेवापवर्गोज्ञानादेवसर्वेकामास्संपद्यंतइतिश्रु
तेरितिभावः ॥ [७०।२३] लाघवादिति । कर्मणांदेवतानांचानेकत्वादनेकविषयकश्रवणाद्यपेक्षयाभगवतएकस्यैवश्रवणादिकरणेला
घवमितिभावः ॥ [७०।२४] आधिक्यादिति । फलाधिक्यादित्यर्थः । अन्यत् कर्मदेवतादिविषयकश्रवणादिकं । अल्पत्वात् अ
ल्पफलकत्वात् । मूलेनाशनग्रहणतात्पर्यंदार्ष्टांतिकेदर्शयति ॥ [७०।२४] तथान्यविषयभ्रंशइत्यादिना । अन्यदेवताविषयककर्म

भ्रंशेसतीत्यर्थः । तथाचान्यदेवताविषयककर्मभ्रंशएवतन्नाशइतिभावः । भगवन्नाशस्यासंभवादपराधग्रहणंकृतमित्यवधेयं । तत्रैव भगवच्छ्रवणादावेव । ननुकारणेपितरिज्ञातेतत्पुत्रोयमितिव्यपदेशएवप्राप्तोनज्ञानं । अतःकारणज्ञानेनकार्यज्ञानस्यैवैकविज्ञानेनसर्वविज्ञानेहेतुत्वेनवक्तव्यत्वात्व्यपदेशस्यकथंतत्रहेतुत्वमुच्यतइत्यतआह ॥ [७।१।२६] व्यपदेशादिति । ननुस्वरूपेणपितृज्ञानेपिपुत्रज्ञानादर्शनान्नतयोःकार्यकारणभावइत्यतस्तात्पर्यमाह ॥ [७।१।२६] इदमुक्तंभवतीति ॥ [७।१।१] देवदत्तकारणतयेति । अनेनकारणेचपितरीत्येतद्देवदत्तकारणतयायज्ञदत्तेज्ञातइतिव्याख्येयं नतुस्वरूपेणेतीत्युक्तंभवति ॥ [७।१।१] देवदत्तइत्येवज्ञातइति । पूर्वमितिशेषः । नतुयज्ञदत्तपुत्रत्वेनेत्येवार्थः । अत्रापीत्यनंतरंकारणेज्ञातइतिपदद्वयस्यानुवृत्तिरित्यभिप्रेत्याह ॥ [७।१।३] जगत्कारणत्वादिरूपेणज्ञातइति ॥ [७।१।४] स्वरूपेणेति । भगवत्सृष्टत्वादिनातदधीनत्वंविनेत्यर्थः । व्यर्थत्वमुपपादयति ॥ [७।१।४] अल्पेत्यादिना । अनर्थफलत्वमुपपादयति ॥ [७।१।४] स्वातंत्र्येणेति । कर्मादेर्विश्वस्यभगवत्सृष्टत्वादिप्रकारंविहायस्वरूपेणैवज्ञानांगीकारेस्वातंत्र्येणैवज्ञानप्राह्याऽनर्थफलत्वमित्यर्थः ॥ [७।१।५] तदर्थमपीति । भगवत्सृष्टमेतदितिज्ञानार्थमपीत्यर्थः ॥ [७।१।६] ज्ञायतएवेति । समानसंवित्संवेद्यत्वादितिभावः । निष्ठा भक्तिः ॥ [७।१।८] जगदपीति । कर्मादिकंजगदपीत्यर्थः । ननुचेतनत्वसादृश्याज्जीवस्येश्वरवज्ज्ञानानंदाद्यात्मकत्वानुमानेततएवहेतुतस्तद्वदेवापरिच्छिन्नानंदाद्यनुमानमपिस्यादित्यतआह ॥ [७।१।९] अबाधितविषयइति । यद्वाचेतनत्वसादृश्यात्सर्वेपिजीवायदिज्ञानानंदादिरूपेणविज्ञायंतइत्युच्यतेतर्हितमोयोग्यजीवानामपिचेतनत्वसादृश्याज्ज्ञानानंदाद्यात्मकत्वानुमानापत्तिरित्यतिप्रसंगइतिचेत्तत्राह ॥ [७।१।९] अबाधितेति । तथाचचेतनत्वसादृश्या

ज्ज्ञानानंदाद्यात्मकत्वानुमानंसज्जीवानामेवविवक्षितमितिभावः । तथाचचेतनत्वसादृश्यादित्यस्यतमोयोग्यभिन्नचेतनत्वसादृश्यादित्यर्थोद्रष्टव्यः । तथा जीवाअपीत्येतत्सज्जीवाअपीतिव्याख्येयमित्युक्तंभवति । यथोक्तंतद्गुणसारत्वादित्यत्रसुधायां । यत्सादृश्यंसज्जीवमात्रसाधारण्येनोक्तमिति ॥ [७।१।१०] अन्यतइति । उक्तरीत्याभगवज्ज्ञानादित्यर्थः ॥ ७ ॥ [७।१।१४] अतएवेति । मृदादिदृष्टांतत्रयेप्येकविज्ञानेनसर्वविज्ञानेसादृश्यस्यैवकारणतयाविवक्षितत्वादेवेत्यर्थः ॥ [७।१।१५] मध्योक्तस्यापीति । प्राधान्यात्किंचित्सादृश्यात्कारणत्वाच्चेतिवाक्येमध्योक्तस्यापीत्यर्थः । अतएवेत्युक्तंविशदयति ॥ [७।१।१५] सादृश्यस्येति ॥ सौ[७।१।१५]कर्यादिति । अन्यथाक्रमेणैवोपपादने अंतेकारणत्वस्योपपादनप्रसंगेनतदेवेतिपरामर्शायोगादितिभावः ॥ [७।१।१५] अत्रापिहेतुत्वेनेति । श्रुतावपियथासोम्येत्यादिनादृष्टांतवाक्यत्रयेणैकविज्ञानेनसर्वविज्ञानेहेतुत्वेनविवक्षितत्वइत्यर्थः । त्वन्मतेपिवैयर्थ्यसममित्याह ॥ [७।१।१६] विकारेति । हेतुत्वेन । एकविज्ञानेनसर्वविज्ञानेहेतुत्वेन ॥ [७।१।१६] तत्त्वस्येति । एकविज्ञानेनसर्वविज्ञानरूपतत्त्वस्येत्यर्थः ॥ [७।१।१७] उक्तश्चाचार्यैरेवान्यत्रेति । यथामृत्पिंडविज्ञानात्सादृश्यादेवमृण्मयाः । विज्ञायंतेतथाविष्णोस्सादृश्याज्जगदेवच । यथास्वर्णस्यविज्ञानात्सर्वेलोहमयास्तथा । प्राधान्याद्विष्णुविज्ञानाद्विज्ञातंस्याज्जगत्सदा । अत्यल्पेपिहिविज्ञातेसदृशंतादृशंबहु । ज्ञायतेनखकृंतन्यायथासर्वमयोमयं । किमुविष्णोर्बहोर्ज्ञानादत्यल्पंजगदीदृशमित्यत्रच्छांदोग्यभाष्ये प्रथमदृष्टांतेसदृशमात्रज्ञानात्सदृशमात्रज्ञानं । द्वितीयदृष्टांतेप्रधानसदृशज्ञानादप्रधानसदृशज्ञानं । तृतीयदृष्टांतेअल्पसदृशज्ञानान्महासदृशज्ञानंयदाभवति तदाबहुज्ञानादल्पंज्ञातंभवतीतिकैमुत्यमभिप्रेतमितिदृष्टांतत्रयेविवक्षाभेदःश्रीम

दाचार्यैरेवोक्तश्चेत्यर्थः ॥ [७।१।१७] अधिष्ठानत्वेति । आरोपाधिष्ठानत्वेत्यर्थः। ननूपादानोपादेययोर्भेदेऽन्यज्ञानेनान्यज्ञानासंभवात्कथमेकविज्ञानेनसर्वविज्ञानेउपादानत्वादेर्हेतुत्वमित्यतआह ॥ [७।१।१८] उपादानोपादेययोस्तादात्म्येनेति । नन्वेकशब्दःपिंडशब्दश्चव्यर्थौस्यातामितिवक्तव्यं व्यर्थःस्यादित्येकवचनंकथमुक्तमित्यतआह ॥ [७।१।२०] प्रत्येकमिति । एकशब्दोव्यर्थस्स्यात् पिंडशब्दश्चव्यर्थःस्यादित्येवंप्रत्येकमन्वयादेकवचनंयुक्तमित्यर्थः ॥ [७।१।२४] एकशब्दइति । तथाचेत्यादिकमित्यस्यएकादिकमित्यर्थोद्रष्टव्यः । अत्रादिपदेनमणिशब्दोंत्यावयविवाचकनखनिकृंतनशब्दश्चग्राह्यौ ॥ [७।१।२५] कृष्णायसेनेति । नखनिकृंतनस्यांत्यावयवित्वेनानुपादानतयातत्स्थानेकृष्णायसेनेतिवक्तव्यमित्यर्थः ॥ [७।१।२६] तत्तद्विकारमात्रमिति । एकेनमृत्पिंडेनसर्वंमृण्मयमित्यादिवाक्येसर्वशब्देनव्यक्तिविशेषभूतमृत्पिंडविकारभूतमेवसर्वमुच्यतेनमृत्पिंडांतरकार्यमपीत्यर्थः ॥ [७।२।१] तद्वैयर्थ्येति । सर्वशब्दवैयर्थ्येत्यर्थः ॥ [७।२।२] अंत्यावयवित्वेनेति । द्रव्यानारंभककार्यद्रव्यत्वेनेत्यर्थः । यथाहुःपदार्थविदः । द्रव्यानारंभकंकार्यद्रव्यमंत्यावयवीति । एतद्दूषणपरिहारंशंकते ॥ [७।२।२] नखनिकृंतनग्रहणमिति । उक्तरीत्यामुख्यार्थस्यबाधितत्वादित्यर्थः ॥ [७।२।३] सादृश्येति । अल्पसदृशज्ञानाद्बहुसदृशज्ञानमित्यस्मदुक्तरीत्यासादृश्याभिप्रायेणनखनिकृंतनशब्दस्यमुख्यार्थसंभवेनोपलक्षणत्वाभावादित्यर्थः ॥ ७ ॥ नन्वेतद्वाक्यशेषेनखनिकृंतनमेवसत्यमित्यनुक्त्वाकृष्णायसमित्येवसत्यमितिकृष्णायसपदप्रयोगान्नखनिकृंतनपदंकृष्णायःपिंडोपलक्षकमितिज्ञायतइतिचेन्न । तस्यवक्ष्यमाणरीत्याप्राधान्येस्वतंत्रदृष्टांतत्वेनैवतच्छेषत्वाभावादितिभावः । विकारोघटशरावादिर्वागालंबनमितिसंबंधः । वागालंबनमात्रं । वाचाकेवलमस्तीत्यारभ्यते

नविकारोनामवस्त्वस्तिपरमार्थतइत्यर्थः । इत्युक्तं एकविज्ञानेनसर्वविज्ञानमित्यर्थः ॥ ७ ॥ ननुविकारमिथ्यात्वस्यैकविज्ञाने नसर्वविज्ञानहेतुत्वेउक्तरीत्याएकपिंडादिपदवैयर्थ्यदोषप्रसंगइतिचेत्तत्राह ॥ **श्रुत्यभिप्रायइति** ॥ **उपलक्षणत्वेनेति** । तन्न्यायेनोत्तरवाक्यद्वयमपिव्याख्यातुंशक्यमितिभावः । श्रुत्यर्थइत्यत्रश्रुतिपदस्यवेदवाक्यपरत्वेइत्यत्रवाक्येइतिश्रुत्यर्थइ त्यस्यासंगतत्वापत्तेस्तदर्थमाह ॥ **श्रुत्यावचनवृत्त्यालभ्योर्थइति** । अतस्तानिविकृतानीत्यनंतरंअनित्यानिचेतिशेषःपूर णीयः । अविकृतंनित्यंनामधेयं । मृत्तिकेत्येवेत्यत्रमृत्तिकेत्येवनामधेयमित्यन्वयमभिप्रेत्याह ॥ **मृत्तिकेत्येवेति** । तस्यता त्पर्यार्थः ॥ **संस्कृतमेवेति** । मूलेअविकृतंनित्यमिति नामधेयमित्यनेनार्थाल्लब्धार्थउक्तइत्याह ॥ **अविकृतंनित्यंचेती ति** । ननुसंस्कृतातिरिक्तानिनामानिविकृतानि । ततएवानित्यानि । मृत्तिकेत्येवंसंस्कृतमेवनामधेयमित्युक्तेऽविकृतंनित्यं चेतिकथमर्थाल्लभ्यतइत्यतस्तत्रोदाहरणमाह ॥ **यथास्मिन्ग्रामइति** । उपनिषदिउर्वरितस्यसत्यमित्यस्यार्थमाह ॥ **मूले एतद्वचनंसत्यमितीति** । तत्रसत्यमित्यस्यार्थमाह ॥ **सत्यंयथार्थमिति** । तथाचवाचारंभणंविकारोनामधेयंमृत्तिकेत्ये वेत्येवंमयात्वांप्रत्युपदिष्टंवचनंसत्यं यथार्थं । नतुप्रतारकमितिश्वेतकेतुंप्रत्युद्दालकवचनमितिज्ञातव्यं ॥ **असंगतमिति** । यथासोम्यैकेनेत्याद्युक्तार्थोपपादकत्वाभावादित्यर्थः । प्राधान्यात्तत्परिज्ञानात्प्राकृताज्ञोपिपुरुषः । विद्वानित्युच्यतेसद्भिरे वंनित्यपरात्मविदित्यनुव्याख्यानंमनसिनिधायोपपादयति ॥ **प्राधान्यादित्यादिना** ॥ **तज्ज्ञानाद्यत्फलमिति** । सां केतिकज्ञानाद्यत्फलंविद्वद्व्यवहारगोचरत्वमित्यर्थः ॥ **जगज्ज्ञानफलमिति** । कर्मादिज्ञानफलंस्वर्गादिकमित्यर्थः ॥ **लभ्य**

तइति । ज्ञानादेवस्वर्गइत्यादिश्रुतेरित्याशयः । ननूपनिषदिदृष्टांतत्वज्ञापकाभावात्कथंप्राधान्यादेकविज्ञानेनसर्वविज्ञाने
दृष्टांतपरतयाव्याख्यायतइत्यतआह ॥ [७२।१५] एतदर्थमिति । दृष्टांतत्वज्ञापनार्थमित्यर्थः । तनूर्वर्षिष्ठेत्यादिवदितिभावः । इद
मुपलक्षणं । तेनतद्विज्ञातंस्यादित्येतदप्यनुषंजनीयं । तथाचयथासोम्यवाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यंतेनतद्वि
ज्ञातंस्यादित्यादिरूपेणवाक्यावृत्तिर्द्रष्टव्या । नन्वब्भक्षोवायुभक्षइत्यत्रावधारणार्थकमात्रपदाभावेपियथामात्रपदंलभ्यतेत
द्वदत्रापिकिंनस्यादितिचेन्न । तत्रवैशिष्ट्यादिज्ञापनरूपस्यावधारणकल्पकस्यसत्त्वादिहतदभावादित्याह ॥ [७२।१९] नचेति । नन्व
त्रापिमिथ्यात्वज्ञापनमेवावधारणार्थकमात्रशब्दाध्याहारकल्पकमितिचेत्तत्राह ॥ [७२।२०] किंचेति ॥ [७२।२२] अर्थांतरेति । इतिहेतुप्रक
रणप्रकारावसितेष्वपीत्यभिधानोक्तार्थांतरेत्यर्थः ॥ [७२।२३] यथानवेतीति । विकल्पवाचिनवेत्यर्थकायेशब्दाइत्यर्थः । अन्यथा
शब्दपदार्थकत्वे नवेतिशब्दस्यैवविभाषासंज्ञाप्राप्त्या यद्वाअथवेत्यादेस्सानस्यादितिभावः । केचित्तुइदंहिशब्दशास्त्रं अत्र
विभाषाशब्दोयत्रवर्ततेतत्रैवविकल्पार्थत्वेप्राप्ते तर्ह्यन्यतरस्यामित्यादौविकल्पोनस्यादतःप्रसक्तंशब्दपदार्थकत्वंपरित्यज्य इ
तिशब्दोविकल्परूपार्थपदार्थकत्वंव्यवस्थापयति । तथाचविभाषार्थकान्यतरस्यामित्यादिशब्दपरिग्रहइत्यर्थइत्याहुः ।
तत्तुच्छं । तथात्वेनवेतीत्यस्यानन्वयवैयर्थ्ययोरापत्तेः । तथात्वेविभाषेतिविकल्पइतिवक्तव्यत्वेननवेत्यस्यव्यधिकरणत्वादि
तिद्रष्टव्यं । अर्थप्रकरणेत्वित्यनंतरंप्रसक्तमर्थपदार्थकत्वंनिवार्यैतिशेषः ॥ [७२।२४] गौरितीति । गोशब्दमुच्चारयतीत्यर्थः । अस्मा

कमित्यनंतरंप्रसक्तमर्थपदार्थकत्वंनिवार्येतिशेषः । पूर्वार्धेजगतोमिथ्यात्वमुच्यतइत्यर्थः । कविरित्यनेनपुनरुक्तिपरिहाराय व्याचष्टे ॥ [७३१३] मनसामीशितेति । प्रेरकइत्यर्थः । परिभूःसर्वतोवरइतिप्रमाणोक्तंव्याख्यानमुपपादयितुंविग्रहंदर्शयति ॥ [७३१३] परिभवतीति । सर्वान्प्रति परि परितः समंतात्स्वमेवभवति वशीकरोतीत्यर्थः । तल्लब्धार्थमाह ॥ [७३१३] सर्वतोवरइति । स्वयं स्वयमेव । भूरित्यस्यार्थः ॥ [७३१३] आश्रयइति । विभक्तिव्यत्ययमभिप्रेत्याह ॥ [७३१४] सर्वेष्वपीति । स्पृहणीयं अपेक्षणीयं । वसु द्रव्यं ॥ [७३१६] अनुपयुक्तंनभवतीति । तथाचार्थक्रियाकारित्वात्सत्यत्वमितिभावः ॥ [७३१७] धनवंताविति । धनंवावमघ मितिश्रुतेरितिभावः । अच्छेंद्राब्रह्मणस्पतीइत्युत्तरवाक्यानुसारेणाह ॥ [७३१७] इंद्राबृहस्पतीइति । षष्ठ्यर्थसंबंधंदर्शयति ॥ [७३१७] अधीनमिति । सर्वदेवताप्रत्यक्षमेवतत्रप्रमाणमित्याह ॥ [७३१७] वायुर्वयोरिति ॥ [७३१८] व्रतंकर्मेति । व्रतंविष्टीःकर्मेतितन्नामसुपाठादित्यर्थः । आपइत्यस्यार्थः ॥ [७३१८] सर्वदेवताइति । आपाःइत्यापइतीतिखंडेअप्शब्दस्यसर्वदेवतावाचकत्वोक्तेरापोवैसर्वा देवताइतिश्रुतेश्चेतिभावः । चनेत्यस्यार्थः ॥ [७३१८] अपीति ॥ [७३१८] जानंतीति । तथाचप्रमाणदृष्टत्वात्सत्यत्वमितिभावः ॥ [७३१९] घएवेत्यादि । तथाचप्रावोचंघ प्रावोचमेवेत्यर्थः । नन्वत्रपरमेश्वरकर्मणामेवसत्यत्वं प्राप्तंनतुजगतइत्यतआह ॥ [७३१९] विषयस्येति । कर्मविषयीभूतस्यजगतइत्यर्थः । नन्वनाद्यनंतमितिवाक्येजगतोनाद्यनंतत्वमेवोच्यते नसत्यत्वमित्यतस्तल्लाभायान्यथेत्येतद्व्याचष्टे ॥ [७३१९] बाधितमिति । तथाचक्वापि देशेकालेच कस्यापिपुंसोन्यथा बाधितं नैवेत्यर्थः । अत्राबाधितत्वोक्त्यासत्यत्वमवगम्यतेयतस्तदेवसत्यत्वमितिभावः । प्रकर्षेण बहुकालमितियावत् । नतिष्ठतीत्यप्रतिष्ठमितिपदार्थमभिप्रेत्यतत्रहेतु

माह ॥ [७३।११] बाधितत्वादिति । नहिबाधितंशुक्तिरजतादिकंबहुकालंतिष्ठतीतिभावः ॥ [७३।११] तआसुराइति । तथाचात्रासत्यत्व वादिनांनिंदयासत्यत्वमवगम्यतइतिभावः । नन्वपरस्परसंभूतत्वोक्त्याकथंतेषांनिंद्यत्वं अन्योन्याश्रयग्रस्तत्वेनपरस्परसंभूत त्वोक्तेरेवनिंदाहेतुत्वादित्यतोपरस्परसंभूतत्वंयथानिंदाऽहेतुस्स्यात्तथाव्याचष्टे ॥ [७३।११] परमेश्वराधिष्ठितायाइत्यादिना ॥ [७३।१२] सदसद्रूपामिति । सदसद्विलक्षणत्वेनानिर्वाच्यमित्यर्थः । आत्मशब्देनजीवग्रहणेतस्यनाशासंभवादाह ॥ [७३।१३] नष्टचित्ताइ ति । अल्पज्ञानाः अल्पसम्यग्ज्ञानाः ॥ [७३।१४] स्वप्नमनोरथोयथेतीति । अविद्यमानोह्यवभातिहिद्वयोध्यातुर्धियास्वप्नमनोरथो यथेत्यत्रेत्यर्थः ॥ [७३।१४] तत्कथमिति । ज्ञाननिवर्त्यत्वमेवचमिथ्यात्वमितिभावः ॥ [७३।१५] अनित्यत्वेतीत्यादि । तथाचायंमूलार्थः । पुराणेऽविद्यमानपदप्रयोगविषयत्वेनजगतःस्वप्नमनोरथसाम्यमुच्यते । तत्रजगतोऽविद्यमानपदप्रयोगविषयत्वमनित्यत्वा दिधर्मेणैवनतुबोधनिवर्त्यता ज्ञाननिवर्त्यत्वं जगत्यविद्यमानपदप्रयोगेकारणं । स्वप्नेत्वविद्यमानपदप्रयोगेबोधनिवर्त्यत्वमे वकारणमिति । ननूभयत्राविद्यमानपदप्रयोगनिमित्तानांज्ञाननिवर्त्यत्वानित्यत्वादिधर्माणांभिन्नत्वेनयथातथेतिसाम्यवच नंकथंयुक्तमितिचेदुच्यते । यथाहि । नष्टशब्दप्रयोगनिमित्तयोर्ब्रह्महत्यासुरापानरूपपापयोर्भिन्नत्वेपितद्द्वयंनष्टइतिसाम्य वचनंदृष्टंतद्वदत्रापीतिद्रष्टव्यं । नन्वत्रश्रुतौजगत्यविद्यमानपदप्रयोगेऽनित्यत्वादिधर्माणांनिमित्तत्वमुक्तं । तदयुक्तं । जग न्मध्येघटादीनामनित्यत्वविकारित्वेप्रसिद्धेतत्रजीवादिनित्यपदार्थानामपिपतितत्वेनतेषुपराधीनविशेषावाप्त्यपगमरूपानित्य त्वसद्भावेपिविकारित्वंनसंभवतीत्यतोजीवादिसाधारण्यायविकारित्वंविवृणोति ॥ [७३।१५] विकारित्वमिति ॥ [७३।१५] एकप्रकारेण

ति । सुखदुःखादिनोच्चनीचतादिसद्भावेनप्रलयेनिर्देहतयाऽवस्थितानांसृष्टौदेहसंबंधप्राप्त्यावाजीवानामेकप्रकारेणावस्थानाभावात् । अव्याकृताकाशादिनित्यपदार्थानामपिवियत्पादीयानुव्याख्यानोक्तरीत्यामूर्तसंबंधादिरूपपराधीनविशेषावाप्त्यपरपर्यायस्यविकारस्यसत्त्वात् । एवंचसर्वसाधारण्यायविकारित्वेत्यस्योत्पत्तिमत्त्वेत्यर्थोद्रष्टव्यइत्युक्तंभवति ॥ दुःखप्राचुर्यमिति । ननुपारतंत्र्यदुःखप्राचुर्येजीवेप्रसिद्धेजडेषुपारतंत्र्यसद्भावेपिदुःखप्राचुर्यंकथमितिचेन्न । दुःखप्राचुर्यापादकत्वंदुःखप्राचुर्यमितिजडविषयेव्याख्यानाददोषः । उच्यते अविद्यमानपदे नेतिशेषः । अत्र जगत्यविद्यमानपदप्रयोगे । मूलेबोधासहमित्यस्य बोधस्यासहंज्ञाननिवर्त्यमित्यर्थोद्रष्टव्यः । ननुजगत्यविद्यमानपदप्रयोगेऽनित्यत्वादिकमेवनिमित्तं नतुबोधनिवर्त्यत्वमित्युक्त्यास्वप्नेऽविद्यमानपदप्रयोगेबोधनिवर्त्यत्वंनिमित्तमितिप्राप्त्यामिथ्यात्वंप्रतीयते । तदयुक्तं । स्वाप्नादिपदार्थानांतज्ज्ञानस्यचास्मन्मतेसत्यत्वादित्यतआह ॥ अत्रेति ॥ जाग्रत्त्वादिकमिति । जाग्रत्त्वं जाग्रदृष्टपदार्थाभेदः । आदिपदेनबाह्योपादानकत्वंबाह्यार्थक्रियाकारित्वंचेत्यपिग्राह्यं । कुतइत्यतस्तद्बीजंस्वयमेवदर्शयति ॥ पदार्थानामिति । स्वाप्नपदार्थानामित्यर्थः । ननुपुत्रकलत्रादावास्थानिवृत्त्यर्थंहिजगतःस्वप्नादिसाम्यमुच्यते । साचास्थास्वप्नादिवज्जगतोमिथ्यात्वज्ञापनेनैवनिवर्तनीया नान्यथा अतोमिथ्यात्वेनैवतत्साम्यंवक्तव्यमितिचेत्तत्राह ॥ आस्थानिवृत्त्यर्थंहीति । आस्था आसक्तिः । तर्हिविनिगमनाभावइत्यतउक्तं ॥ प्रमाणविरुद्धेति । अन्येतुस्वप्नादिसाम्यंजगतइत्यत्रस्वप्नादिपदार्थेष्वारोपितंजाग्रत्त्वंस्वप्नादिपदेनोच्यतइतिव्याख्यास्यमानत्वाज्जाग्रत्त्वस्यचात्यंतासत्त्वात्तेनसाकंजगतःकथमनित्यत्वादिधर्मेण

साम्यमुच्यते अत्यंतासतिजाग्रत्त्वेऽनित्यत्वादिधर्माणामभावादित्यतएतेधर्माअभावरूपतयाव्याख्येयाइत्यभिप्रेत्यानित्य
त्वंनित्यत्वाभावइतिव्याख्यातुंशक्यं विकारित्वंभावरूपं तत्कथमभावरूपतयाव्याख्येयमित्यतआह ॥ **विकारित्वमि
ति** । एकप्रकारेणावस्थानाभावइत्यर्थः । एवंपारतंत्र्यंस्वातंत्र्याभावः । दुःखप्राचुर्यंदुःखाप्राचुर्याभावइतिव्याख्येयं । एवं
चनित्यत्वाभावादिधर्मैरेवस्वप्नादिसाम्यंजगतउच्यते नतुबोधनिवर्त्यतात्रस्वप्नादिसाम्येनिमित्तमितिव्याख्येयमित्याहुः ॥
[७३।२१] **माङ्मानइति** । मानंज्ञानंलयश्चैवनिर्माणंचाभिधीयतइतिवचनान्मानंनिर्माणं तथाचमायाशब्दोपपदात्माङ्मानइतिधा
तोःकर्मणियत्प्रत्ययेधातोश्चह्रस्वेमायामयेतिभवतीत्यर्थः । अनेनेत्यत्रअन्इत्यस्यार्थोअनेनेति । तस्यार्थमाह ॥ [७३।२२] **चेष्टके
नेति** । अन्चेष्टायामितिधातोरितिभावः ॥ [७३।२३] **स्वतइति** । अन्यानधीनतयेत्यर्थः । तत्स्वरूपं जगत्स्वरूपं । इं
द्रचापस्यसूर्यवदित्यत्रतत्रतस्यैवेत्यस्यप्रायिकत्वात्प्रथमांताद्वतिः । तथाचेंद्रचापस्यसूर्यवत्सूर्यइवसूर्योयथानियामकस्तथे
त्यर्थमभिप्रेत्योपपादयति ॥ [७३।२४] **सूर्येणविनेति** । भाव्यनिष्टसूचनार्थंकदाचित्सूर्यास्तमयानंतरंतेनविनाप्यवस्थानसद्भावा
त्प्रायेणेत्युक्तं । सत्यत्वे सत्यत्वनियामकत्वे । रहस्यं गोप्यं । ननुसत्यस्यसत्यमितिश्रुतार्थापत्तिरेवप्राणादिजगतस
त्यत्वस्यापारमार्थिकत्वेमानं । तत्रप्राणादिसत्यत्वापेक्षयापरमात्मसत्यत्वस्याधिक्योक्तेरित्यतआह ॥ [७३।२६] **संपन्नानामि
ति** । संपन्नानांसंपन्नत्वस्यराजाधीनत्ववत्सत्यशब्दोक्तप्राणादीनांसत्यत्वमपिपरमात्माधीनमित्यन्यथैवोपपत्तेस्तेषामेषस
त्यंसत्यतायानियामकइत्यनेनोक्तत्वान्नोक्तार्थापत्तिस्तत्रमानमित्यर्थः ॥ [७४।२] **तानेवशब्दानिति** । मायामयादिशब्दानित्यर्थः ।

निर्वक्तुमिति[७४१२] । प्रज्ञाविनिर्मितंयस्मादतोमायामयंजगदितिपूर्वंप्रज्ञायाःमायाशब्दवाच्यत्वमुक्तं । तत्किंरूढ्यायोगेनवेति शंकायांयोगेनेत्याशयेननिर्वक्तुमित्यर्थः । भावयेत् उत्पादयेत् । वासनाशब्दादयमर्थःकथंलभ्यतइत्यतोनिरुच्यदर्शयति ॥ वाप्स्यतइति[७४१३] । भाव्यतइत्यर्थः ॥ एतेनेति[७४१३] । प्रकृष्टंहिमयाभिधमित्यनेनेत्यर्थः । ननुमयेत्ययंमयट्प्रत्ययोनतुशब्दोतस्त दुपरिकथमण्प्रत्ययआनीयतइत्यतउक्तं ॥ स्वतंत्रेति[७४१३] । नतुप्रत्ययभूतोत्रविवक्षितइत्यर्थः ॥ स्वार्थइति[७४१३] । तथाचमयश ब्दात्स्वार्थेऽण्प्रत्ययेणित्त्वादचोञ्णितीतिसूत्रेणादिवृद्धौयस्येतिचेतिभसंज्ञकयकारस्याकारलोपेमयैवमायेतिभवतीत्यर्थः ॥ प्रकृतिरित्यादाविति[७४१४] । प्रकृतिःप्रकृष्टकरणादित्यादावभिधेयं विशेष्यं नोक्तमित्यर्थः ॥ सांचेतीति[७४१५] । प्रज्ञप्तिरपीत्यर्थः। तथाचविष्णुप्रज्ञप्त्योरैक्यमुपपन्नमितिभावः ॥ इत्युक्तमिति[७४१५] । तथाह्यतत्त्वमसीतिनवकृत्वउपदेशस्सदृष्टांतकइतिप्रतिज्ञा तमित्यर्थः ॥ उपपादितमिति[७४१५] । नहिशकुनिसूत्रयोरित्यारभ्यैतावताग्रंथेनेत्यर्थः ॥ ७ ॥ अर्थैकत्वेति[७४१६] । अर्थैकत्वादेकं वाक्यमितिजैमिनिसूत्रादित्यर्थः । ननुकथमनेनोक्तविरोधपरिहारइत्यतआह ॥ गुणोत्कर्षइति[७४१७०] ॥ भावसाधनइति[७४१३३] । भावोधात्वर्थः तंसाधयतिप्रतिपादयतीतिभावसाधनइत्यर्थः ॥ करणसाधनइति[७४१९३] । करणत्वप्रतिपादकइत्यर्थः ॥ तादर्थ्येनेति[७४१९४] । भेदसिद्ध्यर्थत्वेनेत्यर्थः ॥ वस्तुपर्यायइति[७४१३६] । अभिधेयार्थकइत्यर्थः ॥ स्वपरसाधारणइति[७४१९६] । स्वपराभिधाय कइत्यर्थः । ननुस्वशब्दप्रयोगेणकथमितरसर्वव्यावृत्तिबोधइत्यतउक्तं ॥ सिद्धेसतीति[७४१९७] । स्वपरसाधारणरूपशब्देनैवस्व स्मिन्सिद्धे प्राप्तेसति पुनरारंभोनियमार्थः । स्वशब्देनपुनःप्रतिपादनंस्वाख्यमेवरूपं अभिधेयमितिनियमार्थमित्यर्थः । ए

वंचस्वशब्दःस्वेतरसमस्तवस्तुव्यावृत्तिंप्रतिपादयतीतिभावः । नन्वितरसर्वव्यावृत्तिबोधनाययदिस्वशब्दःप्रयुज्यते तर्हिस्व रूपशब्दांतर्गतस्यस्वशब्दस्यव्यावृत्त्यर्थकत्वमेवप्राप्तं तत्कथंव्यावृत्तवस्तुवाचकत्वं तथाचसर्वतोव्यावृत्तंरूपंस्वरूपमित्युक्तमसदित्यतआह ॥ [७४।१८] **धर्मवचनानामिति** । एवंचव्यावृत्तिरूपधर्मवाच्यपिशब्दोव्यावृत्तवस्तुरूपधर्म्यभिधायकोपिभवति । धर्मधर्मिणोरभेदादितिभावः । ननुस्वशब्दस्यव्यावृत्त्यर्थकत्वेपिव्यावृत्तिश्चस्वरूपतेत्युक्तंव्यावृत्तिस्वरूपतयोरैक्यंकथंप्राप्तमित्यतस्तदुपपादयति ॥ [७४।१८] **प्रवृत्तिनिमित्तमेवचेति** । तस्यभावस्त्वतलाविति सूत्रोक्तत्वतलप्रत्ययरूपतद्धितवाच्योधर्मः । शब्दस्ययत्प्रवृत्तिनिमित्तंतदेव । यथाघटत्वादि । एवंचप्रकृतेरूपशब्दसमभिव्याहृतस्वशब्दप्रवृत्तिनिमित्तभूतैवव्यावृत्तिः स्वरूपतेत्यत्रस्वरूपस्यभावःस्वरूपतेतितद्धित(भूत)स्वरूपतल्प्रत्ययवाच्योधर्मइतितयोर्भेदाभावाद्व्यावृत्तिस्वरूपतयोरैक्यमित्यर्थः । ननुव्यावृत्तिस्वरूपतयोरैक्येपिविष्णुस्वरूपव्यावृत्त्योःकथमैक्यमित्यतआह ॥ [७४।१९] **नचात्रेति** । तथाचधर्मधर्मिणोरभेदाद्भवगद्धर्मभूतव्यावृत्तिभगवत्स्वरूपयोरैक्यमितिभावः । ननुभगवत्स्वरूपव्यावृत्त्योरैक्येभगवतस्सर्वस्माद्व्यावृत्तिरितिधर्मधर्मिभावायोगइत्यतआह ॥ [७४।१९] **केवलमिति** । द्विविधे व्यावृत्तिरूपे । व्यावर्तकधर्मरूपेच । ननुभेदकधर्मव्यावृत्त्योर्विष्णुस्वरूपेणाभेदेस्वातंत्र्यादिगुणविशिष्टेसर्वव्यावृत्त्याचविशिष्टेहरौतात्पर्यमित्येतन्नयुक्तं तस्यभेदसापेक्षत्वादित्यतआह ॥ [७४।२०] **विशेषविवक्षायामिति** । अभेदेभेदकार्यकारिविशेषविवक्षयेतियावदित्यर्थः ॥ [७४।२१] **उभयविधेति** । व्यावृत्तिव्यावर्तकधर्मरूपोभयविधेत्यर्थः ॥ [७४।२२] **एवंशब्देनेति** । नेतिनेतीत्यादिकाश्रुतिस्सर्वव्यावृत्ततामेवविष्णोर्वदति । नतुकिमपिजगन्नास्तीतिसर्वासत्त्वंप्रति

पादयतीत्येवंसर्वासत्त्ववादित्वमेवशब्देनव्यावर्तयतीत्यर्थः ॥ ७ ॥ अंतर्याम्यपेक्षयेत्यनंतरमध्याहार्यमाह ॥ प्रवृत्तमिति शेषइति । आद्येवाक्ये अहंब्रह्मास्मीतिवाक्ये । द्वितीये तद्योहमितिवाक्ये ॥ अवांतरविशेषेति । अंशयनभिमतकरणादिरूपः । यथोक्तमनुव्याख्याने । विशेषस्तुकश्चिदीशकृतोभवेदिति । व्याख्यातंचसुधायां । विशेषः इंद्रानभिमतखांडववनदहनादिरूपइति । तृतीये योसावादित्येपुरुषइतिवाक्ये ॥ अथयोन्यामिति । योभगवल्लक्षणांदेवतां अन्यां स्वभिन्नामुपास्ते । कथमित्यतस्तत्प्रकारउच्यते । असौभगवान्मदन्यः अहंचतस्मादन्योस्मीति । नसवेदयथापशुरितिभेदज्ञानिनःपशुत्वोक्तिरूपनिंदया एषैवश्रुतिरभेदेप्रमाणमितिनवाच्यं । अस्याअपिश्रुतेर्योभगवल्लक्षणांदेवतां अन्यां स्वांतर्यामिभिन्नामुपास्ते । कथमन्योसौ अहंमदंतर्यामीचान्यइति । नसवेदयथापशुरित्येवमंतर्यामिभेदज्ञानिनिंदापरतयाऽन्यार्थत्वादितिभावः । श्रुतौतच्छब्दद्वयसद्भावादेकोनुवादपरइत्याशयेनाह ॥ संप्रसिद्धइति । ब्रह्मविषयतया ब्रह्मवाचकतया ॥ नञ्पूर्वकादिति । ओहाकृत्यागइत्यत्रओइत्यनुबंधाकारःएवंकृइत्यपि । हाइत्येवधातुः । तथाचनञ्पूर्वकात्हाइत्यस्माद्धातोःकर्मणिकप्रत्ययेककारलोपे आतोलोपइटिचेतिधात्वाकारलोपे नलोपोनञः । नञोनस्यलोपस्स्यादुत्तरपदइतिसूत्रेणनञोनस्यलोपेसोःअमागमेपूर्वरूपेअहमितिरूपमित्यर्थः । नन्वस्मच्छब्दरूपस्याहमित्यस्यरूढत्वान्ननिर्वचनीयत्वमित्याशंक्यनिषेधति ॥ यद्यपीत्यादिना ॥ अस्मच्छब्दस्यैवेदंरूपमिति । त्वाहौसावितिसूत्रेणयुष्मदस्मदोर्मपर्यंतस्य त्वाहादेशविधानादस्मद्सुइत्यत्रमपर्यंतस्यअहेत्यादेशे अहद्इतिजातेशेषेलोपइतिदकारलोपे ङेप्रथमयोरमितिसोरमादेशे

अहअस्मइतिजाते अमिपूर्वइत्यकारस्यपूर्वरूपेअहमित्यस्मच्छब्दस्यैवेदंरूपमित्यर्थः ॥ [७५।६] तद्वृत्ताविति । अहंशब्दप्रवृत्तावित्यर्थः ॥ [७५।७] निर्वचनंकृतमिति । जीवेरूढत्वेपिहरौतदभावान्निर्वचनंसार्थकमितिभावः । ननुतर्ह्यहंशब्दस्यनानार्थकत्वंस्यादित्यतआह ॥ [७५।७] जीवेपीति । इदमेव अहेयत्वमेव । ननुस्थानिभूतास्मच्छब्दादेशरूपस्याहंशब्दस्यकथंनिर्वचनंयुक्तं । प्रत्ययस्येवादेशस्याप्यनिर्वक्तव्यत्वादित्यतआह ॥ [७५।७] स्थान्यादेशभावस्येति । त्वाहौसावितिपाणिनिनाकल्पितत्वादित्यर्थः । अहमितिशब्दः प्रत्यगर्थभूतजीववाचकत्वेनभगवद्वाचकत्वेनचस्वतस्सिद्धएव । नतुत्वाहौसावितिसूत्रप्रवृत्त्यनंतरंनिष्पन्नः । सूत्रप्रवृत्तिस्तुसिद्धशब्दव्युत्पादनार्थमेवेतिभावः ॥ [७५।८] अस्मदादेशस्यापीति । अस्मदादेशत्वेनपाणिनिनाकल्पितस्याप्यहमित्यस्येत्यर्थः ॥ [७५।८] आभिमुख्यादिति । पराक्त्वेनस्थितत्वादित्यर्थः । अनेन त्वंशब्दवाच्यत्वकथनेन ॥ सूचितमिति [७५।९] । तथाचतद्ब्रह्मत्वं । त्वदंतर्यामीत्यर्थः । असीत्येतदप्यसनादियोगेनेश्वरवाचीतिमंतव्यं । उपलक्षणमित्युक्तमेवदर्शयति ॥ [७५।९] भूतानीति । वनानिविष्णुर्गिरयोदिशश्च ॥ सरित्समुद्राश्चसएवसर्वंयदस्तियन्नास्तिचविष्णुरेवेतिवाक्यशेषः । ननूक्तनिर्वचनबलेनप्रथमैकवचनांतास्मच्छब्दप्रवृत्तावपितद्द्विवचनतद्बहुवचनद्वितीयादिविभक्त्यंतानां मांमात्वांत्वेत्यादिशब्दानांकथंप्रवृत्तिरित्यभिप्रायेणशंकते ॥ [७५।१०] अहंमादीति । आदिपदेनत्वमित्यस्यग्रहणं । अतएवद्वितीयाविभक्त्यंतमेतिपदोपेतऋगंत्यपादोदाहरणंकृतं । इत्यादिकथमित्यत्रादिपदेन ममदेवासोअनुकेतमायन्नित्यादेर्ग्रहणं । मूलेतच्छब्दगाइत्यस्यसः तौतइत्यादितच्छब्दगाइत्यर्थः भूतादिसर्वशब्दगताइत्यत्रादिपदेनभुवनवनगिर्यब्ध्यादिशब्दानांग्रहणं ॥

अखिलान्यपिवचनानीति । ननुभगवतिजीवेचयोगेनयदाहंशब्दःप्रवर्ततेतदा अहंआवांवयमित्यादिरूपेणवशब्दोन्यथा वा। नाद्यः। अस्मदादेशरूपत्वेनरूढत्वेह्येवंशब्दः। निर्वचनकरणेनयौगिकत्वपक्षेतथाशब्दायोगात्। द्वितीयेतुकथंशब्दइतिचेदुच्यते। यदाजीवेरूढ्याहंशब्दःप्रवर्ततेतदास्थान्यादेशभावमंगीकृत्य अहंआवांवयमित्यादिरूपेणप्रसिद्धएवशब्दः । यदातुजीवपरमात्मनोर्योगेनप्रवर्तते तदा अहंअहेअहानीत्यादिरूपेणस्वतंत्रएवशब्दः । तथाआवामित्यपिप्रकृतिप्रत्यययोगेनस्वतंत्रएवशब्दः । एवंवयंइत्याद्यपीत्यूह्यं । नचैतददृष्टचरमितिवाच्यं । यथावसंतेवसंतइत्यादिवाक्यगतवसंतादिशब्दानांवसंतादिकालेरूढिमंगीकृत्यवाक्यसमन्वयपक्षेवसंतइत्यकारांतवसंतशब्दस्यसप्तमीभवति । पदसमन्वयन्यायेनवसंतिश्चवसंस्ततइतियोगवृत्त्याभवद्वाचकत्वपक्षेवसंतइत्येतत्हेवसंतेइत्येवमिकारांतवसंतिशब्दस्यसंबुद्ध्येकवचनमितिस्वतंत्रएवशब्दोभवति।तद्वदितिसंप्रदायविदः। स्वातंत्र्यस्यनिमित्तत्वमुपपादयितुमाह ॥ कारकेष्विति। कर्तृकरणयोस्तृतीया कर्मणिद्वितीयेत्यादिना विभक्तीनांकर्त्रादिकारकेष्वेवविधानादितिहिशब्दार्थः। ननुकथमेतत्। द्व्येकयोर्द्विवचनैकवचने द्वित्वैकत्वयोरेतेस्तः। बहुषुबहुवचनं बहुत्वेएतत्स्यादित्येवंकेवलैकत्वादिसंख्यायामेवविभक्त्युक्तेर्विभक्तीनांसंख्याश्रितत्वात्कथंकारकेषुविभक्तयोवर्ततइत्युच्यतइत्यतआह ॥ संख्याविशेषणत्वेनापीति। संख्याविशेषणकत्वेनापीत्यर्थः ॥ निमित्तत्वादिति। कर्त्रादिकारकाणामेवेतिशेषः । तथाचकेवलसंख्यायामेवविभक्त्यवृत्तेरेकत्वादिसंख्योपेतकर्त्रादिकारकेष्वेवतत्सद्भावेनसंख्यारूपविशेषणयुक्तकर्त्रादिकारकाणामेवविभक्तिवृत्तौनिमित्तत्वात्कारकेषुविभक्तयोवर्ततइत्युक्तंयुक्तमितिभावः । केचित्तुनिराश्रितकेवलसंख्या

यामेवविभक्त्ययोगात्कर्त्रादिकारकाश्रितैकत्वसंख्यायामेवविभक्तिवृत्तिर्वाच्या । एवंचकारकाश्रितासंख्येतिसंख्यांप्रतिविशेषणत्वेनकारकाणामेवसंख्यायांविभक्तिवृत्तौनिमित्तत्वादुक्तंयुक्तमित्याहुः । अस्त्वेवंकारकेषुसर्वविभक्तिवृत्तिस्तथापिस्वातंत्र्यस्यविभक्तिवृत्तौकथंनिमित्तत्वमित्यतआह ॥ कारकंचेति । क्रियांकुर्वद्धिकारकमितिवचनादितिभावः । सर्वकारकाणां इंद्रियाणां । प्रधानक्रियासु ज्ञानलक्षणासु । अवांतरक्रियासु सन्निकर्षलक्षणासु ॥ युक्तेति । स्वातंत्र्यरूपनिमित्तेनेतिशेषः ॥ तत्रेति । प्रधानक्रियावांतरक्रियाजनकत्वेनकारकभूतेहरावित्यर्थः । नन्वेवमपिद्वित्वादिसंख्यायानिर्भेदेहरावभावात् । द्व्येकयोरित्यादिनोक्तानांद्वित्वादिविवक्षयोक्तद्विवचनादीनांभगवतिवृत्त्ययोगइत्यतआह ॥ एकत्वेद्वित्वेत्यादि । एकत्वेतिप्रसंगादुक्तं । केचित्तुभेदरहिततयैकत्वसंख्योपेतेपिहरौद्वित्वबहुत्वसंख्यायास्सत्त्वादितिबुद्ध्याविविच्ययोज्यमित्याहुः । सत्त्वात् विशेषबलेनेतिशेषः॥ तर्हीति । यदिसर्वेशब्दाहरावेववर्तंतेतर्हीत्यर्थः । अन्यत्र जीवादौ । मूलेतत्संबंधादचित्स्वपीत्यस्यजीवसंबंधाज्जडेष्वपिशब्दाःप्रवर्तंते । अभिमान्यधिकरणन्यायेनेत्यर्थः। यदितत्संबंधाज्जीवादिषुशब्दाःप्रवर्तंते।तर्हिमंचाःक्रोशंतीत्यादाविवजीवादौशब्दानांलक्षणाप्रसंगइत्याशंक्यतत्संबंधलब्धनिमित्तेनेत्युक्तंनिमित्तमेवोपपादयति॥ नचात्रेति । उच्यतइत्यनंतरं इत्याहेतिशेषः । नन्वेवमपिमुख्यवृत्त्यलाभएवेत्यतउपचारेणेत्यस्यार्थमाह ॥ परमंमुख्यवृत्त्यपेक्षयेति ॥ हीनयावृत्त्येति ।

तथाहि। शब्दानांवृत्तिर्द्विविधा। मुख्यामुख्यभेदात्। आद्यापिद्विविधा। परममुख्यमुख्यभेदात्। परममुख्यवृत्तिरपिमहायोगमहारूढिभेदेनद्विविधा। मुख्यवृत्तिरपियोगरूढिभेदाद्विविधा। अमुख्यवृत्तिरप्युपलक्षणागौणीचेतिद्विविधा। एवंचभगवतिविद्यमानमहायोगमहारूढिलक्षणपरममुख्यवृत्त्यपेक्षया याहीनावृत्तिर्योगरूढिलक्षणामुख्यवृत्तिस्तयेत्यर्थः। तथाचोपचारपदंनामुख्यवृत्तिप्रभेदरूपोपचारपरमितिभावः। तिङःपदत्वाभावात्तिङ्पदानीत्ययुक्तमित्याशंक्यप्रत्ययग्रहणेतदंतशब्दस्यापिग्रहणमितिपरिभाषयातिङंतान्यस्मीत्यादिपदान्येवतिङ्पदशब्देनोच्यंतइत्याशयेनव्याचष्टे॥ **तिङंतंपदानीति**। ननुतिङंतपदानांकथंहरौवृत्तिरित्यतआह॥ **अस्मदादिष्विति**। उक्तरीत्याऽ(हमा)स्मदादीनांभगवतिवृत्तौसत्यामस्मदादिषूपपदेषुसत्सु अस्मद्युत्तमः युष्मद्युपपदेसमानाधिकरणेस्थानिन्यपिमध्यमः शेषेप्रथमः इत्यादिसूत्रैर्विहितानां अस्म्यसिभवतीत्यादीनांतिङंतपदानांभगवतिवृत्तेःसुलभत्वादित्यर्थः॥ **सर्वगतंइति**। आदित्यादिसर्वगतइत्यर्थः। भिन्नेतिचशब्दोऽपिशब्दार्थइत्यभिप्रेत्यभिन्नोपीत्युक्तं॥ **अभेदनिमित्तेति**। अहमादिशब्दप्रवृत्तौपरोक्तजीवाभेदरूपनिमित्तनिरासायेत्यर्थः। नन्वहमादिशब्दस्यजीवादिष्वपिवृत्तौनिमित्तभूतस्याहेयत्वादेर्भगवत्यपिसद्भावात्कथंमुख्यपरममुख्यत्वादिनाविभागइत्यतआह॥ **अयमत्राभिप्रायइति**॥ **पिंडीभूतंइति**। नियामकतयांतःप्रविष्टविष्णुनासंवलितइत्यर्थः॥ **पिंडविषयमिति**। नियामकतयांतःप्रविष्टपरमात्मनियम्यजीवप्रतिपादकमित्यर्थः। दहतिशब्दं दहतीतिशब्दं। काष्ठंदहतीतिप्रयोगादितिभावः॥ **अमुख्यमंशमिति**। अंतर्भावितविष्णुर्हिजीवस्तत्रजीवरूपममुख्यांशमित्यर्थः। अयंप्रकारःपरस्यापिसंमतइत्याह॥

परेरपीते । इदं चेतनं । आनंद जडं । अहशब्दवाच्याहमथस्यपराश्चिदाचत्सवलनात्मकत्वागोकारादितिभावः ॥ स्वगतभेदवर्जितमिति । स्थानभेदप्रयुक्तभेदशून्यमित्यर्थः । तेषां चेतनानामचेतनानांच । व्यये देहनाशादिरूपेनाशे जातेप्यव्ययमित्यर्थः । एकपदस्यैक्यार्थत्वेऽविभक्तमित्यनेनपुनरुक्तिपरिहारायार्थमाह ॥ सर्वोत्तममिति । पूर्वग्रंथफलितार्थवदनुत्तरग्रंथमवतारयति ॥ श्रुतिस्मृत्योरित्यादिना ॥ परस्परमिति । विभक्तेष्वितिसर्वपदार्थानांपरस्परंभेदउक्तइतिभावः ॥ प्रागेवपरिहृतेति । नचपरमार्थतोभेदाभावोव्यावहारिकस्सोस्तीतिवाच्यमित्यादिनाभेदस्यपारमार्थिकसत्यत्वोपपादनेनतच्छ्रुतीनांतत्त्वावेदकत्वस्योक्तत्वादित्यर्थः । एकवचनंबहुवचनार्थइत्यभिप्रेत्यविप्रराज्यरूपेष्वित्युक्तं । यज्ञोहिब्राह्मणानांराज्यं । ब्राह्मणैरंजनीयःशोभनीयः । ब्राह्मणैर्हियज्ञःशोभते । रंजरागे अपेक्षणीयोवा । तथाचविप्रप्रधानकेष्वितिफलितार्थोद्रष्टव्यः ॥ आरुभिर्दोषिभिरिति । दोषारच्छिद्रशब्दानांपर्यायत्वात् । अरादोषाःएषांसंतीत्यर्थे अरशब्दात्उण्प्रत्ययेयस्येतिचेतिरकारस्थाकारलोपेणित्त्वादादिवृद्धौसत्यांनिष्पन्नस्यउकारांतारुशब्दस्यतृतीयाबहुवचनं आरुभिरितिभवतीत्यभिप्रेत्यदोषिभिरितितदर्थउक्तइतिद्रष्टव्यं॥भजनीयइति । वनषणसंभक्तावितिधातोरितिभावः। कथमनेनशंकापरिहारइत्यतआह ॥ तदुक्तप्रकारइति । तदुक्तरीत्याऽसत्यभेदोपेतइत्यर्थः । परमस्वतंत्रः निरवधिकस्वतंत्र इत्यर्थः ॥ आर्तिइति । आर्तिर्दुःखंतद्वानार्तइत्यर्थः ॥ तद्बोधकाभावादिति । परमार्थसत्यत्ववाचकपदाभावादित्यर्थः ॥ परमार्थसत्यपरमिति । परमार्थसत्यभूतजीवब्रह्मैक्यपरमित्यर्थः ॥ तदनुसारेणेति । व्यावहारिकसत्यतापरभेदश्रु

त्यविरोधेनेत्यर्थः ॥ [७६।१२]अन्यथयितव्यमिति । अंतर्याम्यैक्यपरतयानव्याख्येयमित्यर्थः ॥ [७६।१२]अवांतरसत्यत्वमिति । अमुख्यसत्यत्वमित्यर्थः । प्रातिभासिकसत्यत्वस्याप्यमुख्यसत्यत्वात्तद्व्यावृत्त्यर्थमाह ॥ [७६।१२]व्यावहारिकेति ॥ [७६।१२]आदाविति । अवांतरसत्यत्वमित्यतःप्रागध्याहर्तव्यमित्यर्थः ॥ [७६।१२]ब्रह्मणासहेति । परब्रह्मणासहेत्यर्थः । सायुज्यभाजांब्रह्मणासहभोगसद्भावादित्यवधेयं ॥ [७६।१३]अनंगीकारादिति । ब्रह्मात्मकत्वमाप्तस्याविद्यायानष्टत्वेनतत्कार्यस्यकामस्यापिनष्टत्वादितिभावः । [७६।१३]एतदिति । सर्वान्कामानितिपदमित्यर्थः । उक्तरीत्यामुख्यार्थस्यबाधितत्वादितिभावः ॥ [७६।१४]प्रयोजनाभावादिति । नच कामावाप्त्यनंगीकारएवप्रयोजनमितिवाच्यं । सिद्धेस्यप्रयोजनत्वेतदर्थंसर्वभेदनिवृत्तौलक्षणा तस्यांचसत्यांतद्विरोधाभावे नतस्यप्रयोजनत्वसिद्धिरित्यन्योन्याश्रयादितिभावः । ननुएतमानंदमयमात्मानमितिवाक्येनजीवपरमात्मनोर्भेदःप्रतीयते किंत्वानंदमयस्यकोशत्वेनतस्मादेवजीवस्यभेदप्रतीतेर्नैतदुदाहरणंयुक्तमित्यतआह ॥ [७६।१४]आनंदमयस्येति ॥ [७६।१४]अन्यत्रेति । आनंदमयोभ्यासादित्यधिकरणभाष्यानुव्याख्यानयोरित्यर्थः । अन्नस्यकामपदोक्तेच्छाभेदायोगादाह॥[७६।१५]काम्यतइति । तथा चकमुकांतौ । कांतिरिच्छा । ततःकर्मण्यण्णित्त्वादादिवृद्धौकामेतिरूपमितिभावः॥ [७६।१५]कामश्चतदिति । काम्यंचतदित्यर्थः ॥ [७६।१५]लभ्यमिति । तथाचमध्यमपदलोपीसमासइतिभावः॥ [७६।१५]वक्ष्यमाणमिति । हावुहाव्वित्यादिनोत्तरत्रवक्ष्यमाणमित्यर्थः ॥ [७६।१६]पुष्टइति । स्वयंपुष्टस्सन्नित्यर्थः । पोषमित्यस्यार्थः ॥ [७६।१६]पुष्टमुचारणमिति । पुष्टंयथास्यात्तथेत्यर्थः ॥ [७६।१६]शक्करीष्वृक्ष्विति । शक्करीच्छंदोबद्धासुऋक्ष्वित्यर्थः । ऋच्यध्यूढंसामगीयतइत्युक्तेरितिभावः ॥ [७६।१८]स्फुटएवेति । जीवेशयो

ध्यातृध्येयभावोक्तेरितिभावः । नन्वेतत्कल्पेमुच्यमानस्यब्रह्मणएकत्वात्कथंब्रह्मबहुत्वमित्यतआह ॥ [७६।१८] अतीतानंतेति । ननुब्रह्मबहुत्वाभिधानान्यथानुपपत्त्यानास्यवाक्यस्यमोक्षविषयकत्वंकल्प्यं । यज्ञप्रसिद्धब्रह्माख्यर्त्विग्विषयत्वेनान्यथासिद्धत्वादित्याशंक्यनिराकरोति ॥ [७६।१८] नचवाच्यमिति ॥ [७६।१९] अनेकेषामिति । अस्मिन्कर्मणित्वंब्रह्माभवेति । यज्ञकांडेब्रह्मणएकत्वप्रसिद्धेरितिभावः । यज्ञभेदेनब्रह्मणामनेकत्वसद्भावात्कथमेतदित्यतउक्तं ॥ [७६।१९] एकस्मिन्यज्ञइति । ननुस्यादिदंदूषणंयद्यत्रवाक्येब्रह्मणामनेकत्वंश्रूयेत । नचैतदस्ति । ब्रह्मात्वोवदतीतितृतीयपादेसकृदेवब्रह्मशब्दश्रवणादित्यतआह ॥ [७६।१९] अन्यथेति । ब्रह्मणांबहुत्वानंगीकारेब्रह्मात्वोवदतीतिवाक्येत्वइत्यस्यवैयर्थ्यंस्यात् । तथाहि । पादत्रयेपिकश्चिदित्यर्थकास्त्वशब्दास्तावच्छ्रूयंते तेषांविशेष्यांतरमपेक्षितं अतोविशेष्यतयाब्रह्मेत्येतदेवसर्वत्रसंबध्यतइतिवक्तव्यं । तथाचब्रह्मणामनेकत्वंसिध्यति । ननुब्रह्मातिरिक्तऋत्विग्वाचिविशेष्यभूतंपदांतरंकिंचिदध्याह्रियतइतिचेन्न । तथात्वेतृतीयपादेत्वोब्रह्मेत्यस्यवैयर्थ्यंस्यात् । कश्चिद्ब्रह्मेतिहितस्यार्थः । इदंतुसजातीयब्रह्मणांबहुत्वांगीकारएवश्लिष्टंभवतिनान्यथा । अनेकेषुब्राह्मणेषुसत्स्वेवहिकश्चिद्ब्राह्मणइतिप्रयोगः । अतोब्रह्मणामनेकत्वानंगीकारेब्रह्मेत्येतावतैवपूर्तेस्त्वइत्यस्यवैयर्थ्यंस्यादितिभावः । ननुतथापिऋत्विक्परमेवेदंवाक्यं । नचयज्ञेब्रह्मबहुत्वानुपपत्तिरितिवाच्यं । यज्ञेहोतापोताप्रशास्तोद्गातेतिप्रधानाःऋत्विजश्चत्वारः । तत्रहोतैवब्रह्मेत्युच्यते । एतेषांचतुर्णांत्रयस्त्रयःशिष्याःसंति । एवंसतियज्ञेषोडशर्त्विजःप्रसिद्धाः । तथाचयेहोतृशब्दवाच्यब्रह्माख्यर्त्विगनुचराःशिष्याःसंति ते त्रयो ब्रह्माणोब्रह्मशब्दवाच्या ऋचांत्वइतिपादत्रयप्रतिपाद्या

अतस्त्वोब्रह्मेतिनव्यर्थमित्याशंकते ॥ [७६।१९] **ब्रह्मानुचरास्त्रयोपीति** । तेषांब्रह्मानुचराणांत्रयाणां । ऋक्रूपोषादीत्यादिपदेनगायत्र सामगान विष्णुरूपध्यानग्रहणं ॥ [७६।२०] **प्रसिद्ध्यभावादिति** । याज्ञिकप्रसिद्ध्यभावादित्यर्थः ॥ [७६।२०] **जातविद्येति** । पुराणविद्यो पयोगाभावादित्यर्थः । तथाचतृतीयपादेब्रह्मशब्देनप्रधानर्त्विग्भूतब्रह्मग्रहणेपितस्यपुराणविद्यावदनंयाज्ञिकप्रसिद्ध्यभावाद युक्तमितिभावः ॥ [७६।२१] **जक्षंभक्षेति** । तथाचजक्षन्नित्यस्यभक्षयन्हसन्वेत्यर्थोद्रष्टव्यः ॥ [७६।२२] **नतुतदेवेति** । अन्यथावृद्ध्यभावप्र संगइतिभावः । ननूदाहृतेयथोदकमित्यर्धेदृष्टांतमात्रकथनेनजीवेशयोर्भेदाप्रतिपादनादसंगतिरित्यतआह ॥ [७६।२२] **एवंमुनेरिति** । समुदायापेक्षमेकवचनमित्यभिप्रेत्यविजानतामित्याद्युक्तं । अन्येजीवाः । ननुयदापश्यःपश्यतेरुग्मवर्णकर्तारमीशंपुरुषंब्रह्म योनिं । तदाविद्वान्पुण्यपापेविधूयेतिपापवत्पुण्यस्याप्यपरोक्षज्ञानेनसर्वात्मनानाशःप्रतीयते । तदयुक्तं । तथाहि । अप रोक्षज्ञाननाश्यंपुण्यंकाम्यमेव नापरं । तच्चद्विविधं । इष्टमनिष्टंचेति । तत्रानिष्टपुण्यवदिष्टस्यापिपुण्यस्यनाशांगीकारेज्ञान स्येष्टविघातित्वेनापुरुषार्थत्वंस्यादतोव्याचष्टे ॥ [७६।२३] **पुण्यमनिष्टमिति** । अनिष्टं काम्यमित्यर्थः ॥ [७६।२४] **प्राप्ताक्षिकर्णफलत्वादि ति** । अक्षिकर्णयोःफलंविष्णुदर्शनंतच्छ्रवणंच । तदुभयंमुक्तैःप्राप्तमस्तीत्यर्थः ॥ [७६।२५] **मनोजवेष्विति** । मनोवेगेषु मनोधर्मे ष्वित्यर्थः । अत्रमुक्तानांजडमनसोऽभावाद्यत्स्वरूपभूतंमनस्तदेवात्रविवक्षितं । स्वरूपमनएवचास्मन्मतेसाक्षीत्युच्यते । प्र ज्ञादेस्तद्धर्मत्वंचविशेषवलादेवसमाधेयं । मनश्शब्दस्यसाक्षिपरत्वंचैकादशस्कंधतात्पर्योदाहृते दुःखेषुगृह्यमाणेषुमनआदि भिरिंद्रियैरितिप्रमाणेदुःखादीनांमनोग्राह्यत्वोक्त्यासिद्धमित्यवगंतव्यं । मनोजवेषु प्रज्ञादिगुणेष्वसमास्तारतम्योपेताअपि

सखायःपरस्परंप्रीतियुक्ताएवबभूवुः । नतुलोकवत्परस्परंद्वेषेर्ष्यादियुक्ताइतियोज्यं । यथोक्तं । अक्षरधियांत्वविरोधइति ।
तारतम्योपेतत्वमेवदर्शयितुमादघ्नास इत्यर्धःप्रवृत्तस्तंव्याचष्टे ॥ [७७।१] तत्रकेचिदिति ॥ [७७।१] आदघ्नासइति । तथाचऋचिआङ्
पूर्वकाद्दघ्नशब्दाज्जसि आज्जसेरसुगित्यसुगागमे आदघ्नासस्इतिजातेसस्यरुत्वेविसर्गेचादघ्नासइतियुक्तमितिज्ञातव्यं । न
नुप्रमाणेद्वयसच्दघ्नञ्मात्रचः प्रमाणार्थेएतेतद्धितप्रत्ययाःस्युरितिसूत्रेणविहितास्तद्धितप्रत्ययाःशब्दोपर्येवप्रसिद्धाः नतूपस
र्गोपरि अतःप्रकृतेउपसर्गभूतस्यआङःपुरःकथंदघ्नच्प्रत्ययइतिचेन्न । स्यादिदंयद्युक्तसूत्रविहितोयंदघ्नच्प्रत्ययस्स्यान्नचैवं किं
नामप्रमाणवाचीदघ्नशब्दइतिनोक्तदोषइतिसंप्रदायविदः । यथोक्तंसुधायां तरतमशब्दइवदघ्नशब्दोप्रत्ययोप्यस्तीति । तर्ह्य
संगतिरित्यतआह ॥ [७७।१] अर्शआदिभ्योजिति । अर्शआदिभ्योमत्वर्थेऽच्प्रत्ययस्स्यादितिसूत्रार्थः । मूलव्याधिवाचिनोऽर्श
स्शब्दादर्शःअस्यास्तीतिमत्वर्थेऽच्प्रत्ययेअर्शसइतिभवति । तद्वदत्रापिमत्वर्थेऽच्प्रत्ययेदघ्नएषामस्तीतिदघ्नाइत्यर्थः । स्पष्टं
तदर्थमाह ॥ [७७।१] बहुप्रमाणक्षीराब्धिमंतइति । सम्यगर्थकस्याङोर्थोबह्विति । दघ्नशब्दार्थःप्रमाणेति । तथाचबहुप्रमाणं
परिमाणमस्येत्यादघ्नंयद्वाआस्यशब्दस्य आभावः तथाच आ आस्यं प्रमाणं परिमाणं अस्येत्यादघ्नं । तस्येदंतात्पर्यं बहु
प्रमाणेति । आस्यपरिमाणेत्यर्थः । बहुप्रमाणंकिंयद्वंतोमुक्ताइत्याकांक्षायांक्षीराब्धीतिविशेष्यभूतान्यपदार्थोदर्शितः । त
थाप्यादघ्नासोबहुप्रमाणक्षीराब्धीत्यसंगतं अतोअर्शआद्यजंतत्वमंगीकृत्यसएषामस्तिस्थानमितिविग्रहाभिप्रायेणोक्तं ॥ क्षी
राब्धिमंतइति । ननुक्षीराब्धिस्सर्वान्प्रत्यस्तीतितद्वत्त्वंसर्वसाधारणंनासाधारण्येनमुक्तत्वद्योतकं अतस्तत्तात्पर्यमाह ॥

तत्क्रीडापरा[७७।१]इति । क्षीराब्धौक्रीडापराइत्यर्थः । यथोक्तंसुधायां । केचिदादघ्नासःआस्यशब्दस्याभावः । आस्यं परिमाणं अस्येत्यादघ्नं । अमृतंतदेषामस्तिस्थानमित्यर्थः । अर्शआदिभ्योऽच् । आस्यपरिमाणसुधानिधौविहरंतइतिदूरत्वमुच्यतइति । गंभीराः निश्चलाः ॥ दद्दर्शिरं[७७।३]इति । तथाचऋचि इरयोरइतिसूत्रेणइरयःइरइत्यस्यषष्ठीइरयइति तस्यरेइत्यादेशोभवतीत्युक्तत्वाद्दद्दश्रेइतियुक्तमितिभावः । नन्वक्षण्वंतइतिवाक्यस्यकुतोमुक्तविषयत्वं ज्ञापकाभावादित्यतआह ॥ अस्यमु[७८।३]क्तविषयत्वंचेति । अक्षण्वंतइतिवाक्यस्यमुक्तविषयत्वेनतैत्तिरीयभाष्योदाहृतागमेव्याख्यानादित्यर्थः । श्रुत्वाविष्णुंकर्णफलंप्राप्तत्वात्कर्णसंयुताः । अक्षण्वंतोदर्शनाच्चविष्णोर्मुक्तास्तुयेगणाः । तारतम्यंचतेषांतुश्रुतावुदितमंजसा । क्षीरसागरदघ्नास्तुकेचित्तिष्ठंतिमुक्तिगाः । उपास्थिताब्रह्मवनंकेचिदश्वत्थमंडलं । ऐरेह्रदेकेचिदपिदेवाएवसदाहरिं । नागभोगशयंमुक्तादद्दश्रेधिकमोदिनः । सागरादिस्थिताविष्णुंपश्यंतिक्वचिदेवहीत्येवमेतच्छ्रुतिव्याख्यानरूपागमेबहुशोमुक्तपरत्वश्रवणादितिभावः । जगद्व्यापारवर्जमितिक्रियाविशेषणं । जगद्व्यापारवर्जंयथास्यात्तथेत्यर्थः । तथाचतद्व्यतिरिक्तान्योग्यान्सर्वान्कामानवाप्नोतीत्यर्थः । हरेः सकाशात् । जीवस्येतिशेषः । नन्विदंज्ञानमुपाश्रित्येतिवत्जगद्व्यापारवर्जमित्यस्यापिभगवद्वाक्यत्वादुभयंपठित्वांतेभगवद्वचनमितिवक्तव्यं । तथानुक्त्वाइत्यादिचेतिपृथग्वचनंकिमर्थमित्यतआह ॥ अस्यापीति[७९।१] ॥ निर्णायकत्वा[७९।२]दिति । सूत्रेषुयेषुसर्वेपिनिर्णयास्समुदीरिताः । शब्दजातस्यसर्वस्ययत्प्रमाणश्चनिर्णयइतिब्रह्मसूत्राणांनिर्णायकत्वप्रसिद्धेरितिभावः । ननुश्रुत्याद्युदाहरणमात्रेणकथंभेदस्यव्यावहारिकत्वनिरासइत्यतोभिप्रायमाह ॥ मायामयंही[८०।१]

ति ॥ [७७।१६] अपरमुक्तिरिति । गौणीमुक्तिः सगुणमुक्तिरितियावत् । तथाचसगुणमुक्तौमायाभेदांगीकाराद्विषयमेवभवदुदा
हृतश्रुत्यादिकं । निर्गुणमुक्तौभेदानंगीकारात् अहंब्रह्मास्मीत्यादिकंनिर्गुणमुक्तौजीवब्रह्मणोःपारमार्थिकाभेदप्रतिपादनपरमि
तिभिन्नविषयत्वान्नविरोधइतिभावः ॥ [७७।१६] एतदिति । अपरमुक्तित्वेनत्वदभिमतसगुणमुक्तिव्यतिरिक्तायांनिर्गुणमुक्तिरूपपर
ममुक्तौप्रमाणाभावादित्यर्थः । ननुकथंमानाभावः यत्रत्वस्येतिवाक्यानामेवसत्त्वादित्यतआह ॥ [७७।१७] तद्वाक्यानांचेति ।
सगुणमुक्तिव्यतिरिक्तनिर्गुणमुक्तिप्रतिपादकतयाप्रतीयमानानांवाक्यानामित्यर्थः ॥ [७७।१] अविद्यामयीमिति । यत्रहिद्वैतमि
वेतीवशब्दस्यद्वैतप्रपंचेऽपारमार्थिकत्वरूपमायामयत्वार्थकत्वादितिभावः । मुक्त्यवस्थायांजीवस्यविज्ञातृत्वाभावादाह ॥
[७७।१३] प्राग्विज्ञातारमिति ॥ [७७।१५] वस्तुस्थितीति । केनकंपश्येत्नकेनापिकिमपिपश्यतीत्यादीत्युक्तरीत्येत्यर्थः ॥ [७७।१६] प्रश्नायोगादि
ति । प्रश्नार्थत्वायोगादित्यर्थः । उत्तराभावादितिभावः ॥ [७७।१९] परेणापीति । नकेनापिकिमपीत्युक्तत्वादितिभावः ॥ [७७।२०] नचेद
मिति । मोक्षानंतरंज्ञानंनास्तीतियत्तदित्यर्थः ॥ [७७।२१] दूषितत्वेपीति । मोक्षानंतरंज्ञानाभाववचनस्यमोहकत्वोक्त्यादूषितत्वे
पीत्यर्थः ॥ [७७।२१] प्रतिपादकस्येति । सिद्धांतयितुरित्यर्थः । वाक्यं यत्रत्वस्येतिवाक्यं । मैत्रेय्यादोषत्वोक्त्यनुरोधेनेतिशेषः ।
अन्यथयितुं प्रसंगार्थतयाव्याख्यातुं ॥ [७७।२२] मोक्षस्येति । अत्रैवमाभगवानितिमैत्रेयीवाक्यस्यमोक्षानंतरंज्ञानंनास्तीत्यस्यमोहक
त्वकथनमेवनार्थः । किंतुमोक्षानंतरंज्ञानाभावेतस्यापुरुषार्थत्वंस्यादित्यपुरुषार्थत्वापादनमपीत्यर्थः । अन्यथानिर्दलपूर्वपक्षक
रणेमैत्रेय्याअसुज्ञत्वप्रसंगादितिभावः । मैत्रेय्युक्तोत्तरंचकिमित्यनुव्याख्यानंहृदिनिधायाह ॥ [७७।२२] यदिचेति । उत्तरवाक्ये

यत्रत्वस्येतिवाक्ये । सिद्धांतो याज्ञवल्क्यस्य मैत्रेय्युक्तप्रसंगस्य ज्ञानाभावेमोक्षस्यापुरुषार्थत्वापादनस्य ॥ उत्तरंवक्तव्य मित्यादि । यदिमुक्तस्यज्ञानाभावएवयाज्ञवल्क्यसिद्धांतस्स्यात् । तदाज्ञानाभावेऽपुरुषार्थत्वंस्यादितिमैत्रेय्याकृतापादनस्य ज्ञानाभावेपिपुरुषार्थत्वंसंभवतीत्यपुरुषार्थत्वपरिहारेणतर्केऽप्रयोजकत्वोक्त्योत्तरंवक्तव्यंस्यात् । नचोक्तमित्यर्थः ॥ अभ्यु पगतत्वेति । ज्ञानाभावेऽपुरुषार्थत्वप्रसंगोयोमैत्रेय्योक्तः सयाज्ञवल्क्येनाभ्युपगतइत्यवगमादित्यर्थः । अयं यत्रत्वस्येत्या दिवाक्यसमुदायः । प्रतिपादकेन सिद्धांतयित्रायाज्ञवल्क्येन । अन्यथा यत्रत्वस्येत्यादेर्वस्तुस्थितिकथनपरत्वे ॥ पूर्वो त्तरेति । पूर्वमनुच्छित्तिधर्मेतिज्ञानादिधर्माणामनुच्छित्तिंप्रतिपाद्यवस्तुस्थितिकथनपरेणयत्रत्वस्येत्यादिनोत्तरेणवाक्येनज्ञा नाभावप्रतिपादनेयाज्ञवल्क्यवाक्यस्यपूर्वोत्तरविरोधःस्यादित्यर्थः ॥ व्याहत्यभिप्रायेणेति । तथाचमोहांतमित्यस्यचित्तभ्रं शरूपमंतंविनाशमित्यर्थोद्रष्टव्यः। विज्ञानघनइत्युक्तप्रकारेणजीवस्यज्ञानरूपत्वंवानप्रेत्यसंज्ञास्तीत्युक्तरीत्याज्ञानाभावोवेतिचि त्तविभ्रंशरूपंमोहंप्रापितवानित्युक्त्यातवव्याहतिःप्राप्नोतीत्यभिप्रायः। मुहवैचित्यइतिधातुः॥ उपादानप्रसंगादिति। मैत्रे य्येतिशेषः। कुतइत्यतआह ॥ व्याघातस्येति ॥ उभयाश्रितत्वादिति । वाक्यद्वयनिरूप्यत्वादित्यर्थः ॥ तद्वि षयमेवेत्यादि । मोक्षेज्ञानानंगीकारेमोक्षस्यापुरुषार्थत्वापादनरूपदोषोद्भावनंमैत्रेय्याभिप्रेतमित्यर्थः ॥ अन्योभिप्रायइ ति । मैत्रेयीवाक्यस्यैवमभिप्रायेसिद्धेसतियत्रत्वस्येत्यादियाज्ञवल्क्यवाक्यस्यवस्तुस्थितिकथनपरत्वरूपान्योभिप्रायोनदृश्य तइत्यर्थः । तथात्वेमैत्रेय्युक्तापुरुषार्थत्वरूपदोषस्यापरिहारप्रसंगादितिभावः ॥ उक्ताभिप्रायमेवेदमिति । यत्रत्वस्येति

वाक्यमस्मदुक्तरीत्याऽऽक्षेपाभिप्रायकमेवेत्यर्थः । अनुच्छित्तिधर्मेतितद्धर्माणामनुच्छित्तेःप्रस्तुतत्वादित्युक्तमयुक्तमित्याशंक
ते॥ [९८।४]नन्वनुच्छित्तिर्धर्मइति ॥ [९८।५]अनुच्छित्तिधर्मेति । विनाशाभावाख्यधर्मवानित्यर्थः॥ [९८।६]उक्तत्वादिति । तथाचपुनरुक्तिरि
तिभावः ॥ निर्विकारि[९८।६]त्वमिति । विनाशशब्देनविकारस्यविवक्षितत्वात्तदभावोऽविकारित्वमितियावत् अविनाशीतिप
देनोच्यते । अनुच्छित्तिधर्मेत्यनेनतुस्वरूपानाशरूपंनित्यत्वमुच्यतइतिनपुनरुक्तिरितिभावः ॥ [९८।६]तथापीति । यद्यप्येवंपु
नरुक्तिपरिहारः तथापिस्वरूपानाशरूपनित्यत्वप्रतिपादनायानुच्छित्तिरित्येतावतापूर्णत्वेनधर्मपदवैयर्थ्यमित्यर्थः । ननु
अनुच्छित्तिरित्येवोक्तौनउच्छित्तिःअनुच्छित्तिरितिनञ्समासेनोच्छित्तिरूपविनाशभिन्नत्वमेवप्राप्नोति नतुस्वरूपस्यानाशइत्य
तउक्तं ॥ [९८।६]बहुव्रीहिणैवेति । नविद्यतेउच्छित्तिर्यस्यासावनुच्छित्तिरितिबहुव्रीहिणैवस्वरूपानाशलाभादित्यर्थः । एवंपरप
क्षेऽनुपपत्तिंप्रदर्श्यमैत्रेय्याआक्षेपकरणेप्रसक्तिंदर्शयन्प्रकरणशुद्ध्याव्याचष्टे ॥ [९८।६]तस्मादित्यादिना । तस्मादित्यस्याऽऽपा
दनात्मकाक्षेपएवास्यवाक्यस्यार्थइत्युत्तरेणसंबंधः । आशंक्यास्यज्ञानहानिंमैत्रेय्यामोहमाहमां । भवानित्युक्तवत्याहि नाहं
मोहंवदामिते । इत्युक्त्वायाज्ञवल्क्योहिस्वरूपानाशमूचिवान् । ज्ञानरूपस्यविज्ञाननाशस्तन्नाशएवयत् । इतिशून्यमतो
च्छित्त्यै इत्यनुव्याख्यानंहृदिनिधायाह ॥ [९८।७]विज्ञानघनएवेत्यादिना । याज्ञवल्क्येनोक्तमित्यंतेनमैत्रेय्याआक्षेपकरणेप्रस
क्तिर्दर्शितेतिज्ञातव्यं ॥ [९८।७]प्रकरणमननुसंधायेति । भूतेभ्यस्समुत्थायेतिप्रकरणानुसंधानेवृत्तिज्ञानाभावस्यैवप्राप्तेरिति
भावः ॥ [९८।७]अन्यथाकल्पयसीति । सर्वथाज्ञानाभावोऽनेनोक्तइतिकल्पयसीत्यर्थः । पुनरानंदपूर्वकान् । धर्मानाहाप्यनु

च्छिन्नांस्तार्किकैर्विनिवारितानित्यनुव्याख्यानंहृदिनिधायाह ॥ विशेषगुणोच्छेदेति । अशेषविशेषगुणोच्छेदेत्यर्थः । निराकृतवान् अनुच्छित्तिधर्मेत्यनेनेत्यर्थः । आचिक्षेपमतंतच्चयस्मिन्नविषयादिकं । घ्राणादिभोगाभावस्यत्वनिष्टत्वहृदाश्रुतिरित्यनुव्याख्यानंमनसिनिधायाह ॥ अद्वितीयचैतन्येति ॥ अनिष्टप्रसंगंवक्तुमिति । यदिनिर्विशेषचैतन्यमात्रावस्थानंमोक्षस्स्यात्तदादर्शनाघ्राणादिभोगोनस्यादित्यनिष्टप्रसंगंयत्रत्वस्येत्यादिनावाक्येनवक्तुमित्यर्थः॥ तामादाविति । तत्रव्यतिरेकव्याप्तिमादाववादीदित्यर्थः । द्वयो भेदवतोः । भावो धर्मः तस्याः भेदाख्यद्विताया: ॥ धर्मीति । तदुपेतमित्यर्थः । तथाचद्विताशब्दादण्प्रत्ययेणित्त्वादादिवृद्धौद्वैतमितिरूपमितिभावः । द्वित्वेन भेदेन ॥ स्वार्थिकोऽणिति । तथाचद्वीतशब्दात्स्वार्थिकाण्प्रत्ययेणित्त्वादादिवृद्धौद्वीतमेवद्वैतमित्यर्थः ॥ तत्रभवमिति । विरुद्धधर्मद्वयोपेतवस्तुनोविद्यमानमित्यर्थः । तथाचात्र तत्रभवइतिसूत्रेणभवार्थेऽण्प्रत्ययइतिभावः ॥ अनेकत्वसंख्योच्यतइति । द्वित्वसंख्यामारभ्यपरार्धपर्यंतसंख्यासंग्रहोनेकत्वसंख्येत्यनेनकृतइतिज्ञातव्यं ॥ तत्रभवमिति । अनेकत्वसंख्योपेतेवस्तुनिविद्यमानमित्यर्थः । पुनःप्रकारांतरमाह ॥ द्वित्वसंख्ययेति । द्वित्वरूपसंख्ययाइतेयुक्तेवस्तुनिभवमितिव्युत्पत्त्याद्वैतंभेदएवेत्यर्थः । ननुयत्रहिद्वैतमिवेतीवशब्दाद्भेदस्यमिथ्यात्वंप्रतीयतइत्यतः अस्वातंत्र्यादिवेत्युक्तेनद्वैताभावतःक्वचिदित्यनुव्याख्यानंमनसिनिधायाह ॥ तत्रभेदिनामिति । तथाचयत्रहिद्वैतमिवभवतीत्यस्यपराधीनोपिभेदोयत्रवर्ततइत्यर्थोद्रष्टव्यः॥ इदानींप्रसंगमाहेति । वन्हिमत्त्वादेवधूमवत्त्वंअन्यथातन्नस्यादितिवत् । यदाद्वैतसद्भावस्तदैवदर्शनादिभोगोदृष्टइति

व्याप्तमुक्तवदानीमन्यथातन्नस्यादातप्रसगमाहत्यर्थः । आत्मनः स्वस्य । ननुविशेषबलेनकर्तृकर्मभावविरोधःपरिहर्त
व्यइत्यतउक्तं[७८।१९]निर्विशेषत्वेनेति । त्वयातदनंगीकारादितिभावः । प्रसंगत्रयस्यविपर्ययेपर्यवसानमाह ॥ [७८।१९]भ
वितव्यंचेति । इतिविज्ञातुरविज्ञानमित्यत्रइतीत्यनंतरंशेषंपूरयति ॥ [७८।२२]इत्थंनेनोक्तमिति । अत्र नाखिलज्ञाप
कोविष्णुरज्ञेयोनियमेनहि ॥ तज्ज्ञानार्थंहिवेदानामखिलानांप्रवर्त्तनमित्यनुव्याख्यानोक्तरीत्यायेनेदंसर्वमित्युक्तेश्वरज्ञानाभा
वस्यानिष्टत्वंद्रष्टव्यमित्याशयेनभोगाभावोविज्ञातुरविज्ञानंचेतिद्वयमेवोक्तमित्यवधेयं ॥ [७८।२३]यस्सदुःखीत्यादि । तथाचयस्स
दुःखी सजीवइतिकीर्तितः । यस्सदुःखीबंधमोक्षयोःपात्रंच सजीवइतिकीर्तितः । सः अहमितिस्वेनवेद्यएवेतियोजनाद्रष्टव्येत्य
र्थः ॥ [७८।२४]सर्वावस्थास्विति । ननुकथमयमर्थोलभ्यते । उच्यते । विशेषणसंगतैवकारस्येतरपदार्थतावच्छेदकेएवकारसमभि
व्याहृतपदार्थतावच्छेदकव्याप्यत्वमर्थः । यथाशंखःपांडुरएवेत्यत्रशंखत्वंपांडुरत्वव्याप्यं । यःशंखस्ससर्वदापांडुरएव ।
नत्वपांडुरइत्यर्थोलभ्यते । एवंयोजीवःसोहमितिस्वेनवेद्यएवेतिविशेषणसंगतैवकारमहिम्नाजीवत्वं अहमितिस्वेनवेद्यत्व
व्याप्यं । योजीवस्ससर्वदाऽहमितिस्वेनवेद्यएवेत्यर्थलाभात्ससर्वावस्थास्वित्युक्तमितिद्रष्टव्यं । नन्वहमित्येवयोवेद्यइत्यह
मितिवेद्यमुद्दिश्यसजीवइतिकीर्तितइतिजीवत्वंविधीयतइतियथाश्रुतैवयोजनाकिंनस्यादित्यतआह ॥ [७८।२४]अन्यथेति ॥
[७८।२४]व्यभिचारादिति । तदात्मानमेवावेदहंब्रह्मास्मीतिवाक्येईश्वरस्याप्यहमितिवेद्यतायाउक्तत्वेनतत्रजीवत्वाभावाद्व्यभि
चारस्स्यादित्यर्थः ॥ [७८।२५]परेऽज्ञानेइति । केवलाज्ञानइत्यर्थः ॥ [७८।२६]नचदुःखंयुक्तमिति । सर्वदुःखविमुक्तास्तेगुणमात्रस्व

रूपिणइतिमुक्तानांनिर्दुःखत्वावगमादित्यर्थः । यदीच्छानैवतत्रास्तीत्येवतत्कल्प्यतेमृपेत्यनुव्याख्यानंमनसिनिधायाह ॥ नचदिदृक्षादीति । द्रष्टुमिच्छादिदृक्षाआदिपदेनाघ्राणादीच्छाग्रहणं । अहमिदंरूपादिकंद्रक्ष्यामीत्यादीच्छायांसत्यामपितज्ज्ञानाभावोदुःखातिशयहेतुः । मुक्तस्यतुरूपादिदर्शनेच्छायाएवाभावेनतज्ज्ञानाभावोनदुःखहेतुरितिनचवाच्यमित्यर्थः । कुतोनवाच्यमित्यतआह ॥ अप्रामाणिकत्वादिति । सयदिपितृलोककामोभवति कामान्नी कामस्ययत्रासाः कामाइत्यादिश्रुतिभ्योमुक्तानांकामशब्दवाच्येच्छासद्भावावगमेनकामाभावस्याप्रामाणिकत्वादित्यर्थः । अस्यवाक्यस्य यत्रत्वस्येतिवाक्यस्य ॥ विपर्ययेपर्यवसानादिति । विपर्ययपर्यवसानेनाद्वितीयचैतन्यमात्रस्यमुक्तित्वाभावावगमादितिभावः ॥ युक्तमत्रोदाहरणमिति । मोक्षानंतरमपिभेदप्रतिपादनायश्रुतीनामुदाहरणसमयेऽस्यवाक्यस्योदाहरणंयुक्तमित्यर्थः ॥७॥ मोक्षेकैमुत्येनभेदाभावंसाधयितुमाह ॥ ननुचयद्वैतमित्यादिना । अतोनपरस्परविरोधइत्यंतेन ॥ ज्योतिःशब्देनेति । अस्तमितायांवाचिकिंज्योतिरयंपुरुषइतिआत्मैवास्यज्योतिरितिवाक्येज्योतिःशब्देनेत्यर्थः । ज्योतिर्ज्ञानसाधनमितितदर्थः । यद्वैतदित्यत्रयत्वैतदितिपदच्छेदमभ्युपेत्य यत्नपश्यतीत्युक्तंतत् वैतत्तथैवेति ॥ इत्युक्तमिति । नबाह्यंकिंचनवेद नांतरमित्यनेनेत्यर्थः । विप्रतिषेधोविरोधः । ज्ञानवानेवेत्यंशमुपपादयितुमाह ॥ कुतइति । विपरिलोपो विनाशः ॥ अविनाशित्वादिति । अविनाशिजीवस्वरूपत्वादित्यर्थः । नपश्यतीत्युक्तमुपपादयितुमाह ॥ कथमिति । व्यवस्थोक्त्याविरोधःपरिहृतइत्याह ॥ अतइति । इत्यपि उच्यतइतिसंबंधः । एवंसुप्तौभेदाभावेलब्धेमोक्षेभेदाभावःकैमुत्यलब्धइ

त्याह ॥ [७९।९] एवंमविद्याकार्येति । भोगादिसद्भावइत्यत्रादिपदेनेश्वरज्ञानंस्वज्ञानंचग्राह्यं । तस्यभेदसापेक्षत्वादितिभावः ॥ [७९।११] एवंशब्दार्थइति । अनेनतद्द्वितीयंनेत्येवाहेत्येवशब्दसंबंधस्सूचितोभवति । अतएवोत्तरत्रवक्ष्यति भिन्नंनभवतीत्येवाहेति । शुक्लस्येत्यादिकर्तरिषष्ठी । शुक्लादिभिरित्यर्थः । अत्रशुक्लादिशब्दाःशुक्लादिरूपवद्वासुदेवादिभगवद्रूपवाचिनइत्याशयेनरूपवद्भिर्भगवद्रूपैरित्युक्तं ॥ [७९।१२] भेदःप्राप्तइति । स्थानभेदेनविरुद्धधर्माधिकरणत्वेनचभेदःप्राप्तइत्यर्थः ॥ [७९।१३] रूपंरूपवद्भेदश्चेति । वासुदेवादिरूपसमुदायस्यरूपवताभगवतामूलरूपिणाभेदोस्यरूपमितिषष्ठ्याप्राप्तइत्यर्थः । भगवान् मूलरूपी शुक्लादिकंरूपं शुक्लादिरूपोपेतंवासुदेवादिकंरूपमित्यर्थः ॥ [७९।१४] द्वैतमिति । अत्रनपरोक्तरीत्यायत्वैइतिपदविच्छेदः । किंतुयत्द्वैतमित्येव । परपक्षेऽस्मत्पक्षेचयद्वैतमित्येवश्रुतिपाठः । तत्रास्मन्मतेमहाव्याकरणसूत्रेणवानिरुक्तत्वाद्वातकारलोपोद्रष्टव्यइतिसंप्रदायविदः । स्वतः स्वस्मात् ॥ [७९।१७] चंद्रश्चंद्रादिति । अंगुल्यवष्टंभादिनेतिशेषः । एवंश्रुतिंसम्यग्व्याख्याय नतुतद्द्वितीयमस्तीतिचयत्तद्ब्रह्मेत्यादिमूलार्थमाह ॥ [७९।१८] इत्येवमियंश्रुतिरित्यादिना । शुक्लादिकंरूपं वासुदेवादिकं । भगवान् मूलरूपी ननुततोन्यद्विभक्तंयत्पश्येदित्येवश्रुतिपाठसद्भावात्तथैवोदाहर्तव्येयत्ततोन्यद्विभक्तत्वेनैवपश्येदितिवाक्यशेषादितिकथमुक्तमित्यतआह ॥ [७९।२०] अर्थानुवादोयमिति । ततोन्यद्विभक्तंयत्पश्येदितिवाक्यस्यैवार्थानुवादोयमित्यर्थः ॥ [७९।२०] शाखांतरेति । सदृशशाखांतरेत्यर्थः ॥ [७९।२१] उक्तरीत्येति । यद्यस्माद्भगवान्यज्जीवादिकं विभक्तं स्वतोविभक्तंभिन्नं पश्येत्तत्ततोन्यदित्येवमुक्तरीत्येत्य

र्थः॥ [७१।२१] अन्योर्थइति । यत्ततःस्वस्मादन्यद्विभक्तंपश्येत्तद्वितीयंतुनास्तीत्युक्तरीत्याद्वितीयमात्रनिषेधएववाक्यशेषस्यार्थइत्यर्थः ॥ [७१।२२] शेषवैयर्थ्यादिति । द्वितीयमस्तिततोन्यदित्यस्यवैयर्थ्यादित्यर्थः । निर्विशेषचैतन्यमात्रावस्थानमस्यार्थोनेत्यत्र नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइत्यस्यकथंहेतुत्वमसंगतत्वादित्यतआह ॥ [७१।२२] अत्रेति । स्वरूपकथनं वाक्यस्वरूपकथनमित्यर्थः । एवंरूपेवाक्ये तद्विरोधिप्रमेयस्योक्तत्वादितियावदितिभावः ॥ [७१।२३] संबंधकथनेनेति । द्रष्टुर्दृष्टेरितिषष्ठीप्रयोगेणज्ञानवत्त्वरूपविशेषप्राप्तेरित्यर्थः ॥ [७१।२३] उपचारोयमिति । द्रष्टुर्दृष्टेरितिसंबंधप्रयोगोघटस्यस्वरूपमितिवदुपचरितइत्यर्थः ॥ [७१।२३] अनुपपत्तीति । मुख्यार्थेऽनुपपत्त्यभावादित्यर्थः ॥ [७१।२४] वैयर्थ्याचेति । अद्रष्टुर्दृष्टेरभावादितिभावः ॥ [७१।२४] एतेनेति । क्रियारूपायादृष्टेर्द्रष्टृत्वाभावेनदृष्टेर्द्रष्टृत्वरूपविशेषणकथनस्यव्यर्थत्वेनेत्यर्थः ॥ [७१।२४] सामानाधिकरण्यमिति । द्रष्ट्र्याइतिभाव्येछांदसंलिंगव्यत्ययमंगीकृत्यद्रष्टुरित्येतद्दृष्टेरित्यस्यविशेषणमित्यर्थः । चेच्छब्दोयस्मादित्यर्थे ॥ [७१।२४] स्वरूपमात्रमिति । दृष्टिशब्दोक्तंज्ञानंयस्मात्त्वयाब्रह्मस्वरूपमात्रमित्यंगीकृतं । तदा तस्मात् तृच्प्रत्ययःकिमपेक्षया कस्यार्थस्यापेक्षयेत्यर्थः । द्रष्टृशब्दस्यकर्तरितृच्प्रत्ययेसतिनिष्पन्नत्वेननिर्विशेषचैतन्येचज्ञानकर्तृत्वरूपज्ञातृत्वस्यबाधितत्वेनार्थाभावाद्वैयर्थ्यमेवतृच्प्रत्ययस्यस्यादितिभावः ॥ ७ ॥ [७१।२५] गताःकलाइतिवाक्यइति । गताःकलाःपंचदशप्रतिष्ठादेवाश्चसर्वेप्रतिदेवतासु । कर्माणिविज्ञानमयश्चआत्मापरेव्ययेसर्वएकीभवंतीतिवाक्यइत्यर्थः । प्रतिष्ठाशब्दोमूलकारणवचनइत्यभिप्रेत्यस्वकारणानीत्युक्तं । काम्य

कर्मव्यावृत्त्यर्थेविदुषाकृतानिनिवृत्तानीत्युक्तं । निवृत्तकर्माणीत्यर्थः । विद्वान् ज्ञानीजीवः ॥ लक्षितेति[८।१३]लक्षणेति । मुख्यार्थबाधाल्लक्षणा । तस्याप्यर्थस्यपुनर्बाधेसतियालक्षणासालक्षितलक्षणा । तथाचलक्षितमर्थंद्वारीकृत्यलक्षणालक्षितलक्षणेत्यर्थः । नन्वत्रार्थस्यैवसर्वपदलक्ष्यत्वमर्थांतरलक्षकत्वंचोक्तं तत्कथं पदस्यैवलक्ष्यलक्षकत्वयोःप्रसिद्धेरितिचेत् सत्यं । अर्थस्यैव लक्ष्यत्वंलक्षकत्वंचेतिमतमाश्रित्येदमुक्तं । यथाहुः मुख्यार्थबाधेतद्योगेरूढितोथप्रयोजनात् । अन्यार्थोलक्ष्यतेयत्सालक्षणारोपिताक्रियेति । आरोपिताक्रियेत्यस्यशब्देऽध्यस्तोव्यापारइत्यर्थः । अत्रचलक्षकंनैकपदं । सिद्धांतेमत्यैक्यांगीकारेणैक्यरूपमुख्यार्थापरित्यागात् । अतस्सर्वपदमेवात्रलक्षकं । तथाचसर्वेप्राणिनएकीभवंतीत्यर्थस्यबाधेमत्यैक्यंलक्ष्यते । एवंसतिसर्वप्राणिमतयएकीभूताइत्यर्थलाभेतस्यापिबाधितत्वात्विषयैक्यंलक्ष्यते । एवंसतिसर्वप्राणिमतिविषयाएकीभवंतीत्यर्थोलभ्यते । एवंलक्षितलक्षणयावाक्यार्थेसिद्धेसत्यत्रानुपपत्तिर्नास्तीत्याशयेनोपपादयितुमुक्तंविषयैक्यार्[८।१३]थादिति । विषयैक्यान्मत्यैक्यमुपपद्यते मत्यैक्यान्मतिमतांसर्वशब्दोक्तानामैक्यमुपपन्नमितिशेषः ॥ एकीभवंतीति[८।१४]कथमिति । अभूततद्भावे कृभ्वस्तियोगेसंपद्यकर्तरिच्विरितिसूत्रेणाभूततद्भावएवच्विप्रत्ययविधानात्प्रकृतेरीश्वरेणस्थानैक्यस्यसर्वदासत्त्वेनाभूततत्वाभावादेकीभवंतीतिच्विप्रत्ययःकथमित्यर्थः ॥ सर्वेषांविशेषण[८।१५]मिति । गताःमुक्ताःपंचदशकलाःतथागताःमुक्ताःप्रतिदेवतासुप्रतिष्ठाःसर्वेदेवाःगताःव्यत्ययेनगतानिमुक्तानिकर्माणिगतोमुक्तोविज्ञानमयश्चआत्मेत्येवंकलादिविज्ञानमयांतानांसर्वेषां विशेषणमित्यर्थः ॥ प्राणाद्याः[८।१५]पंचदशकलादेवताइति । सप्राणमसृजतप्राणाच्छ्रद्धांखंवायुर्ज्योतिरापःपृथिवींद्रियंमनो

न्नमन्नाद्वीर्यंतपोमंत्राःकर्मलोकाःलोकेषुनामचेतिषट्प्रश्नोपनिषदुक्ताःकर्मव्यतिरिक्ताःप्राणाद्याःपंचदशकलाः । तद्देवतास्तु विष्णोःप्राणस्ततःश्रद्धातस्यारुद्रोमनोभिधः । तस्मादिंद्रस्त्विंद्रियात्मातस्मात्सोमोन्नदेवता । ततश्चवरुणस्सृष्टस्तस्मादग्निस्ततोवरः । आकाशदेवताविघ्नस्ततोवायोस्सुतोमरुत् । तस्मादग्निःपावकाख्यःप्रथमाग्नेस्सुतस्ततः । ततःपर्जन्यउद्भूतस्स्वाहातोमंत्रदेवता । उदकात्मकोबुधस्तस्याउषानामात्मिकाततः । ततःशनिःपृथिव्यात्मेतितद्भाष्योदाहृतप्रमाणोक्ताज्ञातव्याः । एतत्प्रमाणानुसारेणैवप्राणाच्छ्रद्धामितिश्रुतौक्रमोज्ञातव्यः ॥ [८।१६] अन्येचेति । सर्वेदेवाइतिसंबंधः । पंचदशकलादेवतातिरिक्ताइत्यर्थः ॥ विज्ञानमय[८।१६]आत्माचेति । जीवश्चेत्यर्थः ॥ वि[८।१७]भिन्नमतयइति । भगवन्मतिविषयविरुद्धविषयकमतिमंतइत्यर्थः । ऐकमत्यं एकविषयकबुद्धिमत्त्वं । विमतयः राजमतिविषयविरुद्धविषयकमतिमंतइत्यर्थः ॥ व्यक्ति[८।१८]स्थानापेक्षयेति । यत्रभगवान्व्यक्ततयास्तितादृशंयत्स्थानं । क्षीराब्धिशब्दोक्तश्वेतद्वीपानंतासनवैकुंठाख्यंतदपेक्षयेत्यर्थः ॥ मु[८।१८]ख्यार्थःस्यादिति । एकविषयबुद्धिमत्त्वस्यश्वेतद्वीपाद्येकस्थानत्वस्यचमुक्तेःप्रागभूतस्यमुक्तौसत्यांभावांगीकारादित्यर्थः । ननु विभेदजनकेऽज्ञानेइतिवाक्येस्पष्टंमुक्तौभेदाभावःप्रतीयतइतिचेत्तत्राह ॥ वि[८।१९]भेदेति । भेदहेतोरज्ञानस्य ॥ [८।१३]एवमेवेति । एकीभवंतीत्यत्रयथैकीभावशब्दएकविषयकबुद्धिमत्त्वार्थकोव्याख्यातएवमेवेत्यर्थः । अत्रभेदशब्दोविरोधवाची । मित्रभेदइतिदर्शनात् । एवंचविभेदजनकेभगवन्मतिविषयविरुद्धविषयकमतिजनकेभगवदज्ञानइत्यादिरूपेणव्याख्यानंद्रष्टव्यं । ननु भगवन्मतिविषयविरुद्धविषयकबुद्धिमत्त्वरूपभेदस्यसत्यत्वात्कथमसंतमित्यसत्त्वमुच्यतइत्यतआह ॥ [८।१३]असंतमभद्रमिति ।

सद्भावेसाधुभावेचेत्यादिवचनेनसच्छब्दस्यसाधुभावरूपभद्रवाचित्वादित्यर्थः । भगवद्विरोधस्यश्रुत्यादिनिंदितत्वेनामंगलत्वादितिभावः। हृदयादितिल्यब्लोपनिमित्तापंचमीत्याशयेनहृदयंसंकल्पमनुसृत्येत्युक्तं। बहुवचनमेकवचनार्थेसुपांसुलुगितिस्मरणादित्यभिप्रेत्यामीषाममुष्येत्युक्तं। श्रुतौततआएतुउपेतिपदच्छेदः । तत्राव्ययानामनेकार्थत्वादुपेत्येतदवधारणार्थमित्याशयेनतदेवेत्युक्तं। तात्पर्यार्थमाह॥ [८०।१४]ममापीति॥ यच्छ[८०।१७]ब्दस्यपूर्वत्रान्वयइति । येनेतियच्छब्दस्यसत्येनपंथाविततोदेवयानइतिपूर्वत्रान्वयइत्यर्थः । तथाचयेनदेवयानेनपथाआक्रमंतिसदेवयानःपंथाः। सत्येन परमेश्वरेण। विततो विस्तृतस्तिष्ठतीत्यर्थोद्रष्टव्यः ॥ [८०।१७]साक्षादैक्यार्थइति। कलादीनांसर्वेषांपरमात्मस्वरूपेणैक्यरूपेमुख्यार्थइत्यर्थः। ननूत्तरत्रकर्मणामेवब्रह्मैक्यंनसंभवतीत्युच्यतेतस्तदर्थंकर्माणीतिनयुज्यतइत्येववक्तव्यं नतुविज्ञानमयश्चेत्यतोदृष्टांतकथनायेदमित्यभिप्रेत्योक्तं॥ [८०।१९]विज्ञानमयस्यात्मनइवेति। ननुकर्मशब्देनदेवताग्रहणेतच्चैतन्यस्यब्रह्मणैक्यंतत्पक्षेस्त्येवेत्यतआह ॥ [८०।२०]कर्मशब्देनेति। कर्माणिविदुषाकृतानिनिवृत्तानीतिकर्मशब्दस्यनिवृत्तकर्मपरतयाव्याख्यातत्वादितिभावः । ननुएकीभवंतीत्यत्रैकीभावशब्दस्यकर्मपक्षेनिवृत्त्यर्थकत्वं विज्ञानात्मकशब्दोक्तजीवपक्षेऐक्यार्थत्वमित्यर्थद्वयंकल्प्यतइतिचेत्तत्राह॥ [८०।२२]नहीति। ननुपंचदशकलानामितिकथं। तद्धितार्थोत्तरपदसमाहारेच। तद्धितार्थेउत्तरपदेचपरतःसमाहारेचवाच्येदिक्संख्येएकार्थेनसमस्येते । संख्यापूर्वोद्विगुः। संख्यापूर्वोद्विगुसंज्ञःस्यादितिसूत्रेणात्रपंचदशानांकलानांसमाहारस्यवाच्यत्वेनसमाहारद्विगुसमासेद्विगोरितिङीषिपंचदशकलीनामितिभवेदित्यतआह॥[८०।२४]विशेषणंसमासइति। तथाचविशेषणंविशेष्येणबहुलं। भेदकंभेद्येनसमस्यतइ

तिसूत्रेणपंचदशचताःकलाश्चपंचदशकलास्तासांपंचदशकलानामितिकर्मधारयसमासइत्यर्थः ॥ पृथङ्निवृत्तिकथनमिति ।
कर्माणीत्यनेनकर्मणामितिशेषः । गमनमुक्त्वाएकीभावकथनमितिगमनैकीभावशब्दप्रयोगाभ्यांसूचितंदूषणमाह ॥ किंचेति ।
ननुकर्मणामेकीभावकथनंव्यर्थंस्यादित्येववक्तव्यं । विज्ञानात्मनश्चेतिव्यर्थप्रकृतानुपयोगादित्यतोविज्ञानात्मनश्चेतिपदप्रयोग
सूचितंदूषणमाह ॥ अपिचेति । विज्ञानात्मनश्चेत्यनेनैवसूचितंदूषणांतरमाह ॥ अथवेति ॥ सूचयतीति । कर्माण्येकी
भवंतीत्यस्यज्ञानेननिवृत्त्यभिप्रायकत्वेविज्ञानात्मनोपिनिवृत्तिप्रसंगादितिदूषणंस्फुटत्वादनुक्तमितिप्रागुक्तं इदानींतुविज्ञा
नात्मनश्चेत्यनेनसूचितमित्यर्थः ॥ तदर्थमिति । एतद्दोषसूचनार्थमित्यर्थः ॥ विरुद्धार्थमिति । विज्ञानात्मनोपिनिवृत्ति
प्राप्त्याविरुद्धार्थकंस्यादित्यर्थः ॥ तथात्रेति । कर्मणामपिकलात्वेनप्राणादिपंचदशकलासाम्येपिपंचदशकलानांगताइतिश
ब्देन कर्मणांत्वेकीभवंतीतिशब्दांतरेणनिवृत्तिकथनमयुक्तमित्यर्थः । ननुभवत्पक्षेपिकर्मणःकलात्वात्पंचदशकलाभ्यः
पृथगुक्तौप्रयोजनाभावएवेतिसाम्यमेवेत्यतआह ॥ अस्मन्मतेत्विति ॥ उक्तमिति । आथर्वणभाष्यइत्यर्थः ॥ प्रत्यव
रमिति । अत्यंतंनीचमित्यर्थः । समस्ततत्त्वाभिमानिदेवताभ्योऽत्यंतंनीचमित्यर्थः । किंतत्कर्मजडंविवक्षितं नेत्याह ॥
पुष्करइति । कर्माणीत्यत्रकर्मशब्देनोच्यतइत्यर्थः । वचनवृत्त्या रूढ्या ॥ गौण्यावृत्त्येति । एकीभूतेनिवृत्तेचपृथगभाव
रूपगुणयोगेनेत्यर्थः ॥ अस्मदुक्तलक्षणायामिति । मत्यैक्यादिरूपायामित्यर्थः । उपलक्षणागौण्योरुभयोरप्यमुख्यवृ
त्तित्वेनमुख्यार्थपरित्यागेनव्याख्यानस्यमतद्वयेपिसमत्वादितिभावः । ननुभवन्मतेएकीभवंतीत्यस्यकलादिषुसर्वत्रापिलक्ष

णैव । मन्मतेतुकर्मपक्षेगौण्यावृत्त्यानिवृत्त्यर्थकत्वेपिविज्ञानात्मनिजीवेस्वरूपैक्यरूपमुख्यार्थलाभइत्याशंकते ॥ **विज्ञानात्मनीति** ॥ **च्विप्रत्ययस्येति** । त्वन्मतेविज्ञानात्मनोब्रह्मैक्यस्यसंसारदशायामपिसत्त्वेनाभूततद्भावरूपच्विप्रत्ययमुख्यार्थस्यासंभवेनसंसारदशायामनाविर्भूतब्रह्मैक्योविज्ञानमयोमुक्तावाविर्भूतब्रह्मैक्योभवतीत्येवंच्विप्रत्ययस्यगौणार्थत्वंत्वयापिवाच्यमित्यर्थः । एवंचैकीभवंतीत्यस्यसर्वत्रापिगौणत्वमेवप्राप्तमितिनास्मन्मतवैषम्यमितिभावः ॥ **अधिकरणेति** । आधाराधेययोरित्यर्थः ॥ **मुख्ययैववृत्त्येति** । उपचारंविहायपरएवभवंतीतिमुख्ययैववृत्त्येत्यर्थः । अभिप्रेतार्थे ऐक्यरूपे ॥ **उपचरितप्रयोगेति** । अधिकरणत्वप्रयोगेत्यर्थः ॥ **नपुरुषोस्तीति** । तथाचपरएवभवंतीतिनिर्देशःस्यादितिपर्यनुयोगोनयुक्तइतिभावः ॥ **पुरुषएवेति** । पौरुषेयग्रंथेपुरुषएवपूर्वोत्तरानुसंधानेनपूर्वोत्तरविरोधोयथानस्यात्तथावाक्यार्थवदेत् । तथाचोपक्रमाद्यनुसरणंपौरुषेयग्रंथएववाक्यार्थनिर्णयायकर्तव्यं वेदेतुपुरुषस्यैवाभावादुपक्रमाद्यानुगुण्यमपिनानुसारणीयंस्यादित्यर्थः। इष्टापत्तिरितिचेत्तत्राह ॥ **गतंमीमांसाव्यसनेनेति** । ज्योतिरुपक्रमादित्यादिरूपमीमांसाशास्त्रस्योपक्रमाद्यानुगुण्येनवेदार्थनिर्णयपरत्वादितिभावः ॥ **पुरुषारोपणेनेति** । स्वाभिप्रायप्रवेशकर्तारंपुरुषंवेदकर्तृतयाऽऽरोपणेनेत्यर्थः । तथाचस्वतंत्रपुरुषपूर्वकत्वाभावेनापौरुषेयत्वेपिपुरुषाभिप्रायप्रवेशसद्भावेनपौरुषेयतुल्यत्वादितिभावः ॥ **तदनुसरणमिति** । उपक्रमाद्यानुगुण्यानुसरणमित्यर्थः ॥ **समंमिति** । तथाचवेदेपुरुषाभिप्रायप्रवेशसद्भावेनपौरुषेयवाक्यतुल्यतयापरएवभवंतीतिमुख्यप्रयोगंविनापरेऽव्ययइत्यधिकरणत्ववाचिसप्तम्यंतोपचरितप्रयोगकरणंनयुक्तमितिपर्यनुयोगःसंभवत्येवेत्यर्थः ।

ननुपरमात्मबुद्धिसारूप्यस्यमुक्तजीवेऽभावादाह ॥ **बुद्धिसारूप्यमिति** । ननुजीवस्यकथंभगवद्बुद्धिविषयविषयकत्वंसारूप्यं। तथात्वेभगवद्बुद्धसमस्तविषयकत्वप्रसंगादित्यतआह ॥ **तच्चेति** । बुद्धिसारूप्यमित्यर्थः । बुध्यते मुक्तजीवेन । ननुबुद्धिसारूप्यमेवेत्येवकारेणस्थानैक्यस्यापिव्यवच्छेदे एकस्थाननिवासोवेतिवक्ष्यमाणगत्यंतरस्यायोगादाह ॥ **अनभिमतेति** । तथाचस्वरूपैक्यरूपंयदस्मदनभिमतंतद्व्यावृत्त्यर्थमेवायमेवकारोनस्थानैक्यव्यावृत्त्यर्थइत्यर्थः । तत्रहेतुरेकस्थाननिवासोवेतिवक्ष्यमाणत्वादिति । अन्यथातद्विरोधापत्तेरितिभावः । एवकारस्यानभिमतव्यावृत्त्यर्थकत्वेदृष्टांतमाह ॥ **नरंचेति** । यमधर्मस्यनरनारायणहरिकृष्णसंज्ञाश्चत्वारःसुताः । तत्रनरनारायणौयमलौ । ततश्चनरंचनारायणमेवेत्यत्रैवकारोनसुतांतरव्यवच्छेदार्थः । हरिकृष्णयोरपिसुतयोःसद्भावात्। किंनाम अनभिमतस्यहरिकृष्णयोरादावुत्पन्नत्वस्यव्यवच्छेदार्थः । आदावुत्पन्नौनरनारायणावेवनान्याविति । एवंप्रकृतेपीत्यर्थः ॥ **सर्वदेति** । भगवतोव्याप्तत्वादितिभावः ॥ **ऐर्याव**र्त्यमाहेति । अनभिमतरूपंव्यावर्त्यमाहेत्यर्थः ॥ **वैरूप्यादिति** । दुःखादिसुखादिरूपविरुद्धधर्माधिकरणत्वादित्यर्थः ॥ **तदभावादिति** । मायानिवृत्तिरूपायांमुक्तौमायाकल्पितदुःखादेर्विरुद्धधर्मस्यनिवृत्तत्वादैक्यमुपपद्यतइत्यर्थः । विरूपतइतिभावप्रधानमित्याशयेनाह ॥ **विरुद्धधर्मत्वतइति** । द्वयोरपि मुक्तेश्वरयोरपि। मुक्तानामपिस्वयोग्यतानुसारेणपूर्णत्वादाह ॥ **निरवधिकत्वमिति** । निरवधिकपूर्णत्वमित्यर्थः । यथाक्रमंसंबंधेअल्पत्वस्यस्वातंत्र्यविरोधित्वाभावात्पारतंत्र्य

स्यचपूर्णत्वविरोधित्वाभावादाह॥ [८।१।१७] यथायोगमिति । ननुस्वातंत्र्यपूर्णतेल्पत्वेत्यत्र ईदूदेद्विवचनंप्रगृह्यं । ईदूदेदंतंद्विवचनां तंप्रगृह्यंस्यादितिसूत्रेण एदंतत्वात्प्रगृह्यसंज्ञायांप्लुतप्रगृह्याअचि प्लुताःप्रगृह्याश्चाचिपरेप्रकृत्यास्युः नसंधिंयांतीतियावदिति सूत्रेणसंध्यभावेगंगेअमूइत्यादिवत्स्वातंत्र्यपूर्णतेअल्पत्वेतिवक्तव्यं। पूर्णतेल्पत्वेतिकथंसंधिकरणमित्यतआह॥ [८।१।१८] रोदसीवेति। प्रकृतिभावः संध्यकरणं । यथाईदूदइतिसूत्रेणईदंतस्यप्रगृह्याश्रयप्रकृतिभावोक्तावपिमणीवादेर्नेतिवार्तिकेणमणीवरोदसीव दंपतीवेतिप्रकृत्यभावउक्तः। एवमेवैदंतस्यापिनप्रकृतिभावः। मणीवादेराकृतिगणत्वात् । एवंचपूर्णतेल्पत्वेतिप्रकृत्यभावो युक्तइत्याशयः ॥ ७ ॥ [८।१।१९] उपचारइति । स्थानैक्यादिनिमित्तइत्यर्थः ॥ [८।१।१९] तेनहीति । ब्रह्मैवभवतीत्यत्रभवनेब्रह्मेत्यस्यविशे षणत्वात्तत्संगतैवकारस्यायोगव्यवच्छेदकत्वात्तन्महिम्नेत्यर्थः ॥ [८।१।२०] ब्रह्मत्वमिति । वक्तव्यमितिशेषः । तच्चाब्रह्मत्वव्यावर्तकै वकारविरुद्धमित्याशयः ॥ [८।१।२२] तथाविधस्येति । यद्ब्रह्मानेनविदितंतदेवायंभवतीत्येवंविधस्येत्यर्थः । ब्राह्मणत्वं ब्राह्मणत्वजा त्याक्रांतत्वं ॥ [८।१।२३] उत्तरत्रेति । नहीत्युत्तरवाक्येप्रतिबंधापादनइत्यर्थः ॥ [८।१।२४] ब्राह्मणांतरत्ववदिति । अनेकब्राह्मणव्यक्तिसद्भा वेनतन्निष्ठानांब्राह्मणत्वानामपिप्रातिस्विकानांबहूनांसत्त्वादितिभावः॥ [८।१।२५] अनेकब्रह्मेति । ब्रह्मणएकत्वेनानेकब्रह्मव्यक्त्यभावा दित्यर्थः ॥ [८।२।१] अनेकब्रह्मसंभवादिति । बृंहितानेकव्यक्तिसंभवादित्यर्थः॥ [८।२।२] द्वितीयांतेनेति । ब्रह्मवेदेतिद्वितीयाविभक्त्यं तेनाद्येनब्रह्मशब्देनेत्यर्थः॥ [८।२।३] प्रकृतेति । पूर्वब्रह्मशब्देनप्रकृतस्यपरमात्मनःपरित्यागेऽप्रकृतस्यबृंहितरूपार्थस्यपरिग्रहइत्य

र्थः ॥ यत्तच्छब्दाभावेपीति । यद्ब्रह्मानेनविदितंतदेवभवतीतियत्तच्छब्दाभावेपीत्यर्थः ॥ तदर्थइति । उक्तरूपयत्तच्छब्दार्थइत्यर्थः ॥ तर्हिसंपूज्येति । अनेनोत्तरत्रोपयोगोभविष्यतीत्येतद्दर्शितंभवतीतिज्ञातव्यं । तत्र संपूज्येतिवाक्ये । जातिवाचित्वेनेति । अनेकब्राह्मणव्यक्तिवृत्तिब्राह्मणत्वजातिवाचित्वेनेत्यर्थः । मीमांसकैःपदानांजातौशक्तिरित्यंगीकृतं व्यवहारेभट्टनयइतिमयांगीकारादितिभावः ॥ एकार्थत्वमेवेति । नत्वनेकब्राह्मणव्यक्त्यर्थत्वमित्यर्थः । एवंचब्राह्मणोभवेदित्यस्यब्राह्मणत्वजातिमान्भवेदित्यर्थोद्रष्टव्यः ॥ साम्यमिति । तथाचब्रह्मभवतीत्यस्यब्रह्मत्वजात्याक्रांतोभवतीत्यर्थइतिसाम्यमित्यर्थः। नचबृंहितानेकव्यक्त्यंगीकारेब्रह्मणएवबृंहितत्वप्रतिपादकश्रुतिविरोधःशंक्यः । बृंहितत्वेपितारतम्यसद्भावात् । नचैतदहष्ट्याऽपलपनीयं । घटोदंचनस(रित्स)रस्समुद्रेषुजलपूर्णतायांतारतम्यदर्शनादितिध्येयं । ननुनसंपूज्येतिवाक्यसाम्य द्वितीयांतब्राह्मणशब्देनपूजितब्राह्मणेबुद्धिस्थेद्वितीयोपिब्राह्मणशब्दस्तमेवगमयति । तदभेदोक्तौप्रमाणविरोधरूपबाधकसद्भावात्। प्रकृतपूजितब्राह्मणव्यक्तिपरित्यागेनअप्रकृतब्राह्मणत्वजातिपरत्वंप्रथमांतब्राह्मणपदस्योक्त्वाब्राह्मणत्वजातिमान्भवतीतिव्याख्यायतइतिचेदेतदपिसमानमित्याह ॥ बाधकादिति ॥ समानमिति । यद्ब्रह्मानेनविदितंतदेवायंभवतीतिस्वज्ञातब्रह्माभेदोक्तौबाधकानांसद्भावात्प्रकृतंपरमार्थत्वंपरित्यज्याप्रकृतबृंहितार्थत्वंद्वितीयब्रह्मशब्दस्योच्यतइत्यर्थः ॥ बाधकानीति । स्वज्ञातब्रह्माभेदोक्तावित्यर्थः । संपूज्येतिवाक्यसाम्यमंगीकृत्योक्तं । वस्तुतस्तुसंपूज्येतिवाक्यापेक्षयात्रमहान्विशेषोस्तीत्याह ॥ किंचात्रेति ॥ पारतंत्र्यादिरूपंजीवभावमिति । यथोक्तं । अल्पशक्तिरसार्वज्ञंपा

रतंत्र्यमपूर्णता । उपजीवकत्वंजीवत्वमीशत्वंतद्विपर्ययइति ॥ [८।२।९] परंब्रह्माण्यपीति । नकेवलंब्रह्मशब्दवाच्याःकिंतुपरब्रह्मशब्दवाच्याश्चेत्यर्थः । ननुपरपरमशब्दयोरुभयोरप्युत्तमरूपैकार्थवाचित्वात् । प्रकृतिशब्दोक्तमहालक्ष्म्याःपरमब्रह्मशब्दवाचित्वोक्त्यापरब्रह्मशब्दवाच्यमुक्तेभ्यःकोविशेषइत्यतआह ॥ [८।२।१०] परंशब्दादिति । तथाचनात्रपरपरमशब्दौपर्यायतयैकार्थौविवक्षितौ किंनामपरशब्दादतिशयार्थेमप्रत्ययेनिष्पन्नोयंपरमशब्दः । तथाचपरब्रह्मशब्दवाच्यमुक्तापेक्षयामहालक्ष्म्याअतिशयद्योतकोभवत्येवायंपरमब्रह्मशब्दइतिभावः ॥ [८।२।१०] यस्मादेवमेतेषामिति । अमुक्तमुक्तप्रकृतिपरमात्मनांब्रह्मपरब्रह्मादिशब्दवाच्यत्वेनस्वाभाविकंतारतम्यमित्यर्थः । ननुसंसारिभिरप्यैक्याभावप्रतिपादनायनसंसारिणइत्यपिवक्तव्यमितिचेत्तत्राह ॥ [८।२।११] संसारिणस्त्विति ॥ [८।२।११] कैमुत्येति । प्रकृत्यादेःपरमात्मैक्याभावेसंसारिणांतदभावःकैमुत्येनैवसिद्धइत्यर्थः । तस्मान्नमुक्ताइत्यादौनञ्त्रयंश्रूयते । तत्रमुक्ताःविष्णुवैभवंनाप्नुवंति साप्रकृतिर्नाप्नोतीतियोजनायांएकस्यनञआधिक्यं । सामुक्ताश्चेत्येतेनाप्नुवंतीतियोजनायांनञ्द्वयस्याधिक्यंभवति । अतइत्थंयोज्यं । मुक्ताःसाप्रकृतिश्चेत्येतेक्वचित्कालेदेशेवाविष्णुवैभवंनाप्नुवंतीतिनेतिनकिंतुनाप्नुवंत्येवेति । केचित्तुचशब्देनसंसारिणोगृहीत्वानञ्त्रयस्यसार्थक्यमाहुः । नचसंसारिणःकैमुत्यसिद्धत्वात्ननिराकृताइतिटीकाविरोधइतिवाच्यं । कंठतोननिराकृताःकिंतुचशब्देनैवेतिव्याचक्षते । नक्वचिद्देशेकालेचेतिक्वाचित्कःपाठः । तत्रचअथवेत्यादिवन्निपातसमुदायरूपमेकमेवपदं । तथाचनञ्द्वयमेवप्राप्तमितिनानुपपत्तिरितिद्रष्टव्यं । तदसाधारणधर्मप्राप्तेरेवतदैक्यप्राप्तिरूपत्वेनविष्णुवैभवंनाप्नुवंतीतितदसाधारणधर्मप्राप्तिनिषेधेतदैक्याभावएवात्रोक्तइत्यव

धेयं । एवमुत्तरत्रापिद्रष्टव्यं ॥ किंतुसएवेति । किंत्विति शंकायां सएवैकःस्वतंत्रःपूर्णषड्गुणइतिवाक्यशेषःप्रवृत्तइत्यर्थः ॥ मितेःपरासीति । अपरिमितइत्यर्थः ॥ नाप्नुवंतीति । अशूव्याप्ताविति धातोरितिभावः ॥ अनागंतुकमिति । नैसर्गिकंस्वरूपमित्यर्थः । केवलः सर्वोत्तमः ॥ ५ ॥ व्याख्यानेनेति । अपीतइत्यपिप्रवेशमात्रंस्वमितिद्वितीयानिर्देशादिति व्याख्यानेनेत्यर्थः ॥ व्याख्यातमिति । अत्रापिब्रह्माप्येतीत्यस्यब्रह्मप्रविशतीत्येवार्थः । अप्येतीत्यस्यैक्यार्थत्वेब्रह्मणाऽप्येतीतितृतीयानिर्देशःस्यात् । नतुब्रह्मेतिद्वितीयानिर्देशइतिभावः । अत्राप्यप्ययशब्दस्यप्रवेशार्थत्वेकिंनियामकमित्यतआह ॥ नियामकंचेति । अप्ययशब्दस्यप्रवेशार्थत्वेनियामकं स्वंकुलायंयथापीतःपक्षीस्यादेवमीश्वरं । अप्येतिजीवःप्रस्वापे मुक्तौचान्योपिसन्सदेतिप्रमाणंचस्वमपीतइतिवाक्यव्याख्यानावसरएवोक्तमित्यर्थः । नन्वदर्शनविशिष्टप्राप्तिवाचकोप्ययशब्दस्तत्कथंतदन्येषामदर्शनमित्यदर्शनमात्रस्याप्ययशब्दार्थत्वमुच्यतइत्यतआह ॥ अदर्शनविशिष्टाप्राप्तिरिति । ननुयद्यदर्शनविशिष्टप्राप्तिरप्ययशब्दार्थस्तर्हिसर्वकार्यनाशरूपेप्रलयेकथमप्ययशब्दस्य सृष्टिस्थित्यप्ययेहेत्यादौप्रयोगइत्यतआह ॥ लयेपीति । ननुयदिप्रलयवाचकाप्ययशब्दस्यैतदेवनिर्वचनंतर्हिसकलकार्यप्रध्वंसःप्रलयशब्दान्नसिध्येदितिचेन्न । इष्टापत्तेः । तर्हिकुतस्तत्सिद्धिरित्यतआह ॥ प्रध्वंसस्त्विति । उत्पत्तिस्थितिसंहाराइत्यादिप्रमाणांतरगम्यःप्रध्वंसइत्यर्थः । जीवभावं पारतंत्र्यादिरूपं ॥ ५ ॥ अतोविरुद्धवत्प्रतीयमानान्यपिवाक्यानिसादृश्याद्यर्थान्येवयोजनीयानीतितत्त्वोद्योतवाक्यंहृदिनिधायाह ॥ अनयैवदिशेति । नन्वैक्यस्यसर्वागमविरुद्धत्वोक्त्या भेदेसर्वागमास्संतीतिकथंलभ्यते

येनायंतस्योपसंहारस्स्यादित्यतआह ॥ [६२।२१] भेदस्येति ॥ [६२।२२] तद्विरुद्धत्वेति । भेदप्रतिपादकसर्वागमविरुद्धत्वसंभवादित्यर्थः । तथाचतद्विरुद्धत्वोक्तौभेदस्यसर्वागमसिद्धत्वंप्राप्तमेवेतिभावः । आगमिकं आगमसिद्धं ॥ ७ ॥ ननुयुक्तिशब्दवाच्यानुमानस्यैकत्वात्कथंसर्वेत्युक्तमित्यतःप्रकारद्वयेनतदर्थमाह ॥ [६२।२४] प्रत्यक्षेत्यादिना । युक्तिश्चत्रिविधामता । व्याप्तिःप्रत्यक्षगायस्यायुक्तिगाऽऽगमगातथेत्यनुव्याख्यानंहृदिनिधायोक्तं ॥ [६२।२४] प्रत्यक्षेत्यादि । मूलानां मूलिकानांयुक्तीनामित्यर्थः ॥ [६२।२५] साधनेति । साधनानुमानदूषणानुमानरूपाणांवायुक्तीनामित्यर्थः । व्यक्तिभेदाद्बहुवचनमत्रेतिज्ञातव्यं ॥ [६२।२५] तदसिद्धत्वमिति । युक्त्यसिद्धत्वमित्यर्थः ॥ [६३।१] तदज्ञानवशाज्जगदित्यादि । जगत् वियदादिजडं । तद्ब्रह्म जगदादिरूपेणाज्ञानवशात्प्रतिभासतइत्यन्वयः । प्रातिभासिकरजतादिव्यावृत्त्यर्थमनादीतिविशेषणं । प्रागभावव्यावृत्त्यर्थभावरूपमित्युक्तं । ब्रह्मव्यावृत्त्यर्थमनिर्वचनीयमित्युक्तं । व्यापारं व्यापारयुक्तं ॥ [६३।२] स्वरूपेति । अहमितिस्वप्रकाशतयानित्यसिद्धप्रत्यक्चैतन्याभिन्नैक्यस्यापिप्रकाशप्राप्तिप्रतिबंधकमावरणमित्यर्थः । अतदाकारो दुःखादिः । अत्रविक्षेपस्यावरणकार्यत्वंज्ञातव्यं । नन्वज्ञानस्यभावरूपत्वमंगीकृत्यज्ञानाभावत्वानंगीकारे अज्ञानमविद्येत्यत्रनञर्थःकइतिचेदसुरादिशब्देष्विवतद्विरुद्धत्वमेवेतिवदामः । अज्ञानस्यज्ञानविरुद्धत्वमेवकुतइतिचेत्तत्राह ॥ [६३।२] तच्चेति । भावरूपमप्यज्ञानमित्यर्थः । तत् अज्ञानं ॥ [६३।४] एकमेववस्त्विति । अज्ञानाख्यमेकमेववस्तु तस्यस्वाश्रयव्यामोहनरूपव्यापारोयदातदाऽविद्येत्युच्यते । तदातुस्वाश्रयाव्यामोहनरूपव्यापारस्तदामायेत्युच्यतइत्यर्थः ॥ [६३।५] नसदिति । बाध्यत्वादितिभावः ॥ [६३।५] नासदिति । प्रतीतत्वादितिभावः ॥ [६३।५] नसदसदिति । विरोधादितिभावः ॥

किंतुसएवेति । किंत्विति शंकायां सएवैकःस्वतंत्र

अनिर्वाच्यमेवेति ।सदसद्विल र्थः ॥ व विश्वस्यारोपितत्वादेव। असौ ईश्वरः॥ नमुह्यतीति । तथाचमायायाःस्वाश्रयाव्यामोहकत्वेआश्रयस्याधिष्ठानयाथात्म्यज्ञानवत्त्वंनिमित्तमित्युक्तंभवति । ननुकल्पितविश्वद्रष्टुरीश्वरस्यकथंमोहाभावइत्यतआह ॥ ब्रह्मविवर्तरूपमिति । ब्रह्मण्यध्यस्तरूपंयज्जगदित्यर्थः । तथाचकल्पितंकल्पितत्वेनैवपश्यतीति नदोषइतिभावः । नन्वविद्यावच्छिन्नस्यब्रह्मणएवजीवत्वेसंसारोजीवएवकस्मात्प्रतीयतइतिचेन्न । एतन्मतेजीवब्रह्मणोर्बिंबप्रतिबिंबभावांगीकारात् । अविद्यारूपोपाधेश्चप्रतिबिंबपक्षपातित्वात् । जीवएवसंसारइत्येतद्दृष्टांतपूर्वकमुपपादयति ॥ यथादर्पणादिति । मुखमेव बिंबमेव । अवच्छेदो भेदः ॥ अहंकाराख्यंद्रव्यमिति । चिदचित्संवलनात्मकाहंकारस्यैव संसारत्वादितिभावः ॥ तच्चेति । अहंकाराख्यंद्रव्यमित्यर्थः । ज्ञानशक्तिं ज्ञातृत्वशक्तिं । क्रियाशक्तिं कर्तृत्वशक्तिं । तद्धर्माएव अहंकारधर्माएव ॥ सन्निधानादिति । अहंकाराख्यांतःकरणसन्निधानादित्यर्थः । ननुसाक्षादध्यासद्रष्टृत्वरूपं साक्षित्वमेवप्रत्यगात्मनिसत्यभूतोधर्मःप्राप्तइतिचेत्तत्राह ॥ तस्येति । अध्यासोद्विविधः सचमिथ्येतिदृष्टांतपूर्वकमाह ॥ यथारजतेति ॥ तच्चेति । मायावादिनइत्यर्थः ॥ बाह्याभ्यंतररूपइति । वियदादिरूपोदुःखादिरूपश्चेत्यर्थः ॥ प्रतीतिमात्रेति । प्रातिभासिकत्वादित्यर्थः । तथाचतस्यतत्त्वज्ञानोदयेनजगत्प्रतीत्यभावेतत्कल्पितत्वेनतत्प्रतीतिमात्रशरीरकस्यप्रपंचस्यापिनिवृत्तिर्भवतीतिभावः । ननुयस्यतत्त्वज्ञानंनोत्पन्नंसोन्योजीवएवप्रपंचप्रत्येताभविष्यति। तथाचतत्प्रती

तिशरीरकत्वान्नप्रपंचनिवृत्तिरित्यतआह ॥ अन्यस्येति । प्रत्येतुः ज्ञातुर्जीवस्य ॥ अभावादिति । तस्यापितेनैवक ल्पितत्वेनतस्यतत्त्वज्ञानोदयेतस्यापिनिवृत्तत्वादितिभावः । नन्वथापीश्वरःप्रत्येताभविष्यति । तथाचतत्प्रतीतिशरीरक त्वादनिवृत्तिःप्रपंचस्ययुक्तेतिचेत्तत्राह ॥ ईश्वरभेदस्यापीति । इदंब्रह्मायमीश्वरइत्येवंभेदस्यापीत्यर्थः । तथाचतस्यतत्त्व ज्ञानोदयेईश्वरस्यापिनिवृत्तत्वादितिभावः । अविद्यासु उपाधिभूतासु । विच्छेदमात्रं जीवानांब्रह्मणश्चभेदमात्रं । स्वरूपेण चैतन्यरूपेण । अपव्रज्यते अपवर्गवान्मुक्तोभवति ॥ ७ ॥ सच्छक्तीति । तथाचसच्छक्तिकंचिच्छक्तिकंचेतिद्विविधमित्य र्थः । उपादानकारणं परिणामिकारणं । मायिमतइवभास्करैकदेशिमतेऽविद्या नोपाधिः किंत्वंतःकरणमेवेत्याह ॥ अनाद्यं तःकरणेति । परिच्छिन्नं सदितिशेषः ॥ जीवेश्वरभावमिति । नन्वंतःकरणाख्योपाधिपरिच्छिन्नस्यचिच्छक्तिकस्यजी वेश्वरोभयभावःकथमितिचेन्न । उपाधिभूतेंतःकरणेपिवैचित्र्यस्यकल्पनीयत्वादितिभावः । यथोक्तंन्यायामृते । विचित्रांतः करणोपाधिपरिच्छिन्नंचिच्छक्तिकंब्रह्मजीवादित्वमापद्यतइति । नन्वीश्वरस्यसृष्ट्यादिकर्तृत्वांगीकारात्सएवसंसारःप्राप्तइति नसंसरतीत्ययुक्तमितिचेत्तत्राह ॥ केवलमिति । उपाधिसंबंधात् अंतःकरणाख्योपाधिसंबंधात् । नतुस्वतइतिभावः । क्रियावेशं सृष्ट्यादिकर्तृत्वं । औपाधिकः उपाधिजन्यः ॥ तत्रयस्येत्यादि । अस्यज्ञानकर्मसमुच्चयवादित्वादितिभावः ॥ स्वाभाविकाएवांशाइति । इदमत्राकूतं । ब्रह्मैकमेवस्वभावसिद्धंतत्त्वं । तत्परमार्थभूतमायासंबंधादीश्वरतामापद्यते । सचसर्वज्ञःसर्वेश्वरोजगज्जन्मादिकर्ता । जीवास्तुब्रह्मणोंशाएव वह्नेरिवविस्फुलिंगाः । अतएवब्रह्मणोभिन्नाभिन्नाःपरस्परमी

श्वराच्चभिन्नाएव । ब्रह्मतुसकलचेतनसमुदायात्मकमतिरिक्तंचेति । यथोक्तमनुव्याख्याने । ईशाख्यासमुदायेस्यादिति । औपाधिकाः अंतःकरणोपाधिनिमित्तकाः । ननुजीवानांब्रह्माभिन्नत्वेकथंदुःखाद्यनुभवआनंदाद्यनुभवश्चोपपद्यतइत्यत आह ॥ [८३।२४] केवलमिति ॥ [८३।२५] भेदस्त्विति । प्रतीयमानोभेदस्त्वित्यर्थः ॥ [८३।२५] नकल्पितइति । मायावादिरीत्येत्यर्थः ॥ [८३।२५] नचौपाधिकइति । प्रथमोपन्यस्तभास्करैकदेशिमतरीत्येत्यर्थः ॥ [८३।२५] नाप्यंशांशिभावेति । अन्येत्वित्यादिनोपन्यस्तद्वितीयभास्करैकदेशिरीत्येत्यर्थः । तर्हिभेदःकीदृशइतिपृच्छति ॥ [८३।२५] किंत्विति । उत्तरमाह ॥ [८३।२५] अतिरेकनिमित्तएवेति । भेदव्यवहारसंपादनपटुर्धर्मविशेषोतिरेकस्तन्निमित्तोभेदइत्यर्थः ॥ [८३।२५] अन्यत्समानमिति । केवलमज्ञानादिनिमित्तंदुःखादिकमानंदाद्यावरणंचनिवृत्तकर्मसमुच्चितेनैक्यज्ञानेननिवर्ततइत्येतत्समानमित्यर्थः ॥ ७ ॥ [८३।२६] क्रमापेक्षइति । बहुजीववादादिकंपश्चान्निराकुर्मइतिभावः ॥ [८४।३] आद्येदोषमाहेति । सर्वस्यकल्पकोजीवोऽमुकइतिनिश्चितः सइदानीमैक्यप्रवणो गुरुश्चेतिपक्षइत्यर्थः । एकाज्ञानपरिकल्पितत्वेहीतिमूलेएकाज्ञानेत्यत्रकर्मधारयप्रतीतिनिवारणायमध्यमपदलोपीसमासइत्याशयेनाह ॥ [८४।३] एकजीवाज्ञानेति । एकजीवाज्ञानपरिकल्पितत्वइत्युक्तेःसार्थक्यंवक्तुमाह ॥ [८४।४] केचित्खल्वित्यादिना । मायावादिनोवाचस्पतिप्रभृतयः ॥ [८४।४] उपाधीति । अविद्यारूपोपाधीत्यर्थः ॥ [८४।५] ब्रह्माश्रितमिति । एतन्मतेसर्वज्ञेब्रह्मण्येवाज्ञानं । तथाहि । प्रमाणतस्सर्वंजानीयात् । स्वभावसिद्धयाप्रज्ञयावा । नाद्यः । प्रमातृत्वस्याज्ञानसंबंधंविनायोगात् । द्वितीयेअसंगस्वरूपस्याज्ञानंविनाज्ञातृत्वायोगात् । यथोक्तं । स्वरूपतःप्रमाणैर्वासर्वज्ञत्वंद्विधास्थितं । तच्चोभयंविनाऽविद्यासंबंधंनैवसिध्यती ति ।

भ्रांत्यासर्वेजानीयादितिपक्षेपिभ्रांतेरज्ञानकार्यत्वादज्ञानसंबंधंविनाभ्रांतेरेवायोगादितिपक्षत्रयेसर्वज्ञेब्रह्मण्येवाज्ञानमितिभा
वः । अपरेविवरणकारादयः । जीवत्वंदुःखादिविशिष्टत्वं । ब्रह्मत्वंसार्वज्ञादिविशिष्टत्वं ॥ स्वरूपमात्रेति । उभयानुस्यूत
चिन्मात्राश्रितमित्यर्थः । आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवलेतितद्वचनादितिभावः । नन्वज्ञानस्योभयानुस्यू
तचिन्मात्राश्रितत्वेब्रह्मविहायजीवएवकुतस्तस्यसंसारापादकत्वमित्याशंक्योपाधेःप्रतिबिंबपक्षपातित्वादित्याशयेनाह ॥ जी
वभागपक्षपातीति । तत्रदृष्टांतमाह ॥ यथेति ॥ मुखमात्रेति । मुखप्रतिमुखानुस्यूतमुखमात्रेत्यर्थः ॥ प्रतिबिंबे
ति । तत्रैवमालिन्यादिकमापादयतीत्यर्थः । दर्पणरूपोपाधेर्बिंबसंबंधेनप्रतिबिंबजनकत्वमुक्त्वोभयानुस्यूतमुखमात्रसंबंधि
त्वंवदतोऽयमभिप्रायः । असंबद्धस्यदर्पणस्यप्रतिमुखजनकत्वासंभवाद्बिंबसंबध्यजनयतीतिवाच्यं । तन्नयुक्तं । बिंबत्वस्यप्र
तिबिंबसापेक्षत्वेनतदुत्पत्तेःपूर्वंतत्रबिंबत्वस्यैवायोगात् । अतउभयानुस्यूतमुखमात्रसंबंधेनैवप्रतिमुखजनकत्वमेवंप्रकृतेपी
ति ॥ तेनेति । एकाज्ञानपरिकल्पितत्वेचसर्वस्येतिवचनेनेत्यर्थः । परैः जीवेऽज्ञानानंगीकारिभिः । परिच्छेदेन अज्ञानादि
नापरिच्छेदकेन । उपाधिनेतियावत् । कवलीकृतं विशिष्टं ॥ निरस्तेति । चैतन्यमात्रमेवेत्यर्थः ॥ परिकल्पितत्वादे
वेति । अविद्याकल्पितत्वादेवेत्यर्थः । तथाचाविद्यासिद्धौतत्कल्पितजीवसिद्धिः तत्सिद्धौचतदाश्रिताविद्यासिद्धिरित्य
न्योन्याश्रयादित्यर्थः । यथोक्तंपरैः पूर्वसिद्धतमसोहिपश्चिमोनाश्रयीभवतिनापिगोचरइति ॥ वक्ष्यमाणइति । शि
ष्यादिबोधनंनयुज्यतइत्यादिर्वक्ष्यमाणइत्यर्थः । चैतन्यमात्रस्यशिष्याबोधकत्वादितिभावः ॥ तत्परिहृतंभवतीति ।

अयमभिसंधिः । कल्पकजीवस्यगुरुत्वपक्षेयदत्रदूषणमुच्यते उत्तरत्रशिष्याज्ञानपरिकल्पितमित्यंगीकारइतिशिष्यस्यकल्पकत्वपक्षेचयद्दूषणमुच्यते तदयुक्तं । यदिगुरुशिष्यशब्दाभ्यामविद्याविशिष्टचैतन्याभिप्रायेणदूषणंभवद्भिरुच्यतेतर्ह्यनुक्तोपालंभः । अन्योन्याश्रयेणमयातत्राज्ञानानंगीकारात् । ततश्चैकजीवाज्ञानपरिकल्पितत्वेशिष्याज्ञानपरिकल्पितत्वइत्ययमंशोव्यर्थःस्यात् । यदिचचैतन्यमात्रंगुरुशिष्यशब्दाभ्यामभिप्रेतंतर्हिचैतन्यस्यशिष्यादिबोधकत्वाद्यभावेनात्रशिष्यादिबोधनंनयुज्यतइतिकथनं उत्तरत्रसम्यक्ग्रंथाधिगमस्येतिसम्यग्ग्रंथाधिगंतृत्वकथनंचायुक्तंस्यादितियत्परैर्जीवेऽज्ञानानंगीकारिभिर्वादिभिर्दूषणमुक्तंतदेकजीवाज्ञानपरिकल्पितत्वे उत्तरत्रशिष्याज्ञानपरिकल्पितत्वइतिवचनेनपरिहृतंभवति । नह्यस्माभिस्त्वांप्रतिदूषणमभिधीयते किंनामयेऽविद्याविशिष्टचैतन्येजीवेगुरुशिष्यादिशब्दवाच्येऽज्ञानवादिनस्तान्प्रत्येवेत्यनेनसूचितत्वादिति । ननुसर्वज्ञब्रह्माश्रितंचिन्मात्राश्रितंचाज्ञानमितिपक्षद्वयंविहायजीवाश्रिताज्ञानपक्षएवकस्माद्दूषणमुच्यतेभगवत्पादैरित्यतआह ॥ पक्षद्वयस्येति । सर्वमिदंपरिकल्पितमितिजानतइत्युक्तस्यपरिकल्पितत्वज्ञानस्यावश्यकत्वमुपपादयति ॥ विदिततत्त्वोहीति । जीवजडात्मकप्रपंचस्याविद्यापरिकल्पितत्वमेवहितन्मतेतत्त्वं । तदज्ञानेतस्यगुरुत्वमेवनस्यात् । विदिततत्त्वस्यैवगुरुत्वात् । अतोगुरुत्वान्यथानुपपत्त्याजीवजडात्मकप्रपंचस्याविद्याकल्पितत्वज्ञानमावश्यकमितिसिध्यतीत्याशयः ॥ निश्चितत्वादिति । अनेनशिष्याःगुरुणाश्रेयोर्थेनप्रयतितव्याः । तेनपरिकल्पितयानिश्चितत्वात् । यद्येनकल्पिततयानिश्चितंनतत्तत्प्रवृत्तिविषयइत्यनुमानंसूचितंभवति ॥ तथापीति ।

दृष्टांताभावेनव्याप्त्यनिश्चयादुक्तानुमानेऽप्रयोजकतेतिभावः ॥ [८४।१२] **स्वपक्षइति** । तथाचास्मन्मतेस्वप्नेहेतोरभावात्साधन वैकल्यंस्यादितिभावः । ननुयदिपरप्रसिद्ध्यैवेदंदृष्टांताभिधानंतर्हिभवत्सिद्धांतेस्वाप्नस्यसत्यत्वात्तदीयदायार्थंस्वप्नादुत्थितो यतेतैवेत्यतआह ॥ [८४।१३] **तदीयेति** । अयतनंतु अस्मन्मतेयुक्तमितिशेषः । ननुप्रवृत्तौप्रवृत्तिविषयदर्शनंकारणं । तद स्तिप्रकृतेततस्तद्बोधनार्थंप्रवृत्तिर्युक्ता । स्वप्नादुत्थितस्यप्रवृत्तिविषयदर्शनाभावादेवतदीयदायार्थमप्रवृत्तिर्युक्ता । स्व प्नेतुप्रवृत्तिविषयदर्शनसद्भावादेवप्रवर्ततइत्याशंकते ॥ [८४।१४] **ननुचेति** ॥ [८४।१६] **दर्शनमात्रेणेति** । प्रवृत्तिविषयदर्शनमात्रेणे त्यर्थः । एतदुक्तंभवतीत्यादेरयमाशयः । प्रवृत्तिविषयदर्शनमात्रंनप्रवृत्तौकारणं । तथात्वेप्राच्यांप्रतीचीत्वारोपानंतरं तत्रप्रतीचीत्वंकल्पितमितिकल्पितत्वनिश्चयानंतरमपिप्रवृत्तिःस्यात् । प्रतीच्यांदिशिप्रवृत्त्यर्थिनःप्रवृत्तिविषयप्रतीचीत्वद र्शनस्यकल्पितत्वनिश्चयरूपस्यसत्त्वात् । अतःकल्पितत्वाज्ञानसहितंप्रवृत्तिविषयदर्शनंप्रवृत्तौकारणमितिवाच्यं । स्वप्ने त्वेतत्कारणसद्भावाद्युक्ताप्रवृत्तिः । प्रकृतेतुगुरौशिष्यादिदर्शनरूपविशेष्यसद्भावेपिविदिततत्त्वस्यैवगुरुत्वेनतदन्यथानु पपत्त्याशिष्यादिप्रपंचस्यकल्पितत्वज्ञानस्यैवसद्भावेनकल्पितत्वाज्ञानरूपविशेषणाभावेनकल्पितत्वाज्ञानसहितप्रवृत्तिविषय दर्शनरूपविशिष्टस्यप्रवृत्तिकारणस्याभावेनशिष्यादिबोधनेप्रवृत्तिर्नस्यादित्युक्तंयुक्तमेवेति । ननुप्रवृत्तौकल्पितत्वापरो क्षज्ञानाभावसहितंप्रवृत्तिविषयदर्शनंप्रयोजकमित्युच्यते प्रकृतेचगुरोःशिष्यादौकल्पितत्वापरोक्षज्ञानाभावसद्भावाद्युक्ताशि ष्यादिबोधनेप्रवृत्तिरित्याशंकते ॥ [८४।१९] **अपरोक्षेति** ॥ [८४।१९] **दिङ्मोहादाविति** । नेदमपिप्रवृत्तौप्रयोजकं । प्राच्यांप्रतीचीत्वा

रोपानंतरंसूर्योदयवत्त्वान्नेयंप्रतीचीतिकेनचिदाप्तेनोक्तेतद्वाक्यजन्यकल्पितत्वपरोक्षज्ञानेनापिप्रतीच्यांकार्यार्थीनप्रवर्ततइत्यनुभवसिद्धं । एवंचकल्पितत्वापरोक्षज्ञानाभावसहितप्रवृत्तिविषयदर्शनसद्भावात्प्रवृत्तिःस्यात् । नभवतिचप्रवृत्तिरतोव्यभिचारान्नेदमपिप्रयोजकमितिभावः । कल्पितत्वापरोक्षज्ञानाभावसहितस्यप्रवृत्तिविषयदर्शनस्यप्रवृत्तिजनकत्वमंगीकृत्यदूषणमुक्तं। वस्तुतस्तुनेदंप्रयोजकंगुरौत्वयावक्तुंशक्यते। तस्यापिकल्पितत्वापरोक्षज्ञानसद्भावात्। नचतस्यागमेनकल्पितत्वविषयकंपरोक्षज्ञानमेवास्तीतिवाच्यं । दशमस्त्वमसीतिवाक्येप्रयुक्तेऽहंदशमोस्मीत्यपरोक्षज्ञानंशब्दादुत्पद्यतइतित्वयांगीकृतत्वेनागमेनापिगुरोःकल्पितत्वापरोक्षज्ञानस्यैवजायमानत्वेनोक्तप्रयोजकाभावात्प्रवृत्तिरयुक्तैवेत्याह ॥ [८४।१९] किंचेति । ननुगुरोस्तत्त्वज्ञानाभावदशायांतावदकल्पितत्वज्ञानमस्ति । तज्जन्याकल्पितत्वसंस्कारस्यतत्त्वज्ञानदशायामपिसत्त्वेनतावन्मात्रादेवयुक्ताशिष्यादिबोधनेप्रवृत्तिरित्याशंकते ॥ [८४।१३] संस्कारादिति । अयं संस्कारः ॥ [८४।२०] वेगादिवदिति । यथावेगसंस्कारःशरंपातयतितद्वदित्यर्थः ॥ [८४।२०] बलादिति । प्रवृत्तीच्छाशून्यमपीत्याशयः ॥ [८४।२१] निश्चितार्थेति । तत्त्वज्ञानदशायांनिश्चितोयोयमर्थः शिष्यादेःकल्पितत्वरूपस्तदनुसंधानंप्रतिबध्यशिष्यादिबोधनेप्रवृत्तिंजनयतिसंस्कारइतिवक्तव्यमित्यर्थः। ओमितिचेत्तत्राह ॥ [८४।२१] ततश्चेति ॥ [८४।२१] घटतानामेति । निश्चितार्थानुसंधानाभावेपिभिक्षाटनादौप्रवृत्तिसंभवादित्यर्थः । अद्वैतंबोधयन्निितिहेतुगर्भविशेषणं । ब्रह्मैकमेवतत्त्वमितरन्मिथ्येत्येवमेकमेवाद्वितीयं नेहनानास्तिकिंचनेत्यादिनाशिष्यंबोधयन्गुरुःकथंकल्पितत्वा

नुसंधानहीनस्स्यात् । तदनुसंधानाभावेउक्ताद्वैतबोधनमेवानुपपन्नमितिभावः ॥ [८४।२३]कथंतइति । तथाचदृश्यत्वाद्घटादिव
दचेतनाएवेत्यर्थः ॥ [८४।२३]तत्कथमिति । तथाचदृश्यमानानांबहूनामचेतनत्वेनाचेतनानांचाकल्पकत्वनिश्चयादस्यगुरोरेवाज्ञा
नकल्पितमितिनिश्चयोयुज्यतएवेतिभावः॥[८४।२४]सोप्यचेतनइति। अन्यथाऽचेतनत्वसाधकदृश्यत्वहेतोस्तत्रव्यभिचारस्स्यादिति
भावः॥[८४।२४]तथेति।कल्पकजीवत्वेनेत्यर्थः॥[८४।२५]यद्यपिनिश्चयपक्षत्रयेति। ऐक्यप्रवणोगुरुरितिनिश्चयपक्षस्यदूषितत्वादैक्यप्रवणःशि
ष्यः भेदप्रवणोगुरुः भेदप्रवणःशिष्यश्चेतिनिश्चयपक्षत्रयदूषणावसानइत्यर्थः ॥ [८४।२५]एतदिति। बहूनांदृश्यमानत्वादित्यादिनाक्रि
यमाणंदूषणमित्यर्थः।कुतइत्यतआह॥[८४।२५]साधारणत्वादिति। बहूनांदृश्यमानत्वादस्यगुरोरेवाज्ञानकल्पितमितिनिश्चयोनसंभ
वतीतिदूषणस्यबहूनांदृश्यमानत्वादस्यशिष्यस्यैवाज्ञानकल्पितमितिनिश्चयोनसंभवतीतिशिष्यस्यकल्पकत्वपक्षेपिसाधारण
त्वादित्यर्थः । तथाचैक्यप्रवणोगुरुःकल्पकइतिपक्षदूषणानंतरमेवनवक्तव्यमितिभावः ॥[८४।२५]अत्रैवेति। ऐक्यप्रवणोगुरुरितिनिश्च
यपक्षदूषणानंतरमेवेत्यर्थः । नन्वनेनैवप्रकारेणशिष्यःकल्पकइतिनिश्चयपक्षोभेदप्रवणोगुरुःशिष्यश्चकल्पकइतिनिश्चयपक्षो
भगवत्पादैरेवकस्मान्ननिराकृतइत्यतःसाधारणत्वादित्युक्तमेवदर्शयति ॥ [८४।२५]एवंशिष्यादीति । तथाचबहूनांदृश्यमानत्वाद
स्यैवशिष्यस्याज्ञानेनपरिकल्पितमितिनिश्चयोनयुज्यते। आदिपदेनभेदप्रवणोगुरुरितिपक्षेपिभेदप्रवणानांगुरूणांबहूनांदृश्य
मानत्वादस्यैवभेदप्रवणस्यगुरोरज्ञानपरिकल्पितमितिनिश्चयोनयुज्यते तथाभेदप्रवणःशिष्यइतिपक्षेपिभेदप्रवणानांशिष्या
णांबहूनांदृश्यमानत्वादस्यैवभेदप्रवणस्यशिष्यस्याज्ञानकल्पितमितिनिश्चयोनयुज्यतइत्येवंशिष्यःकल्पकइतिनिश्चयपक्षःभेद

प्रवणोगुरुरितिचनिश्चयपक्षः भेदप्रवणःशिष्यइतिचनिश्चयपक्षः एवं गुरुःकल्पकइतिनिश्चयपक्षनिराकरणेयःप्रकारोनचबहूनांदृश्यमानत्वादित्यादिनोक्तस्तेनैवप्रकारेणोक्तरीत्यानिराकार्यइत्यर्थः। अत्रशिष्यःकल्पकइतिपक्षे शिष्याज्ञानपरिकल्पितमित्यंगीकारइत्यनेन भेदप्रवणोगुरुः शिष्यश्चकल्पकइतिचपक्षे सचैकोजीवोयदिभेदवादीत्यादिनोत्तरत्रयदूषणमुच्यतेभगवत्पादैस्तच्छिष्यादीनांकल्पकत्वनिश्चयपक्षएव । अत्रतुनिश्चयएवनोपपद्यतइत्युच्यतइतिमहान्भेदइतिज्ञातव्यं । पूर्वसामान्याकारेणगुरोःकल्पकत्वंनसंभवतीत्येवंपरत्वेन नचबहूनामितिमूलंव्याख्यायगुरुव्यक्तिविशेषस्यापिकल्पकत्वंनसंभवतीत्येवंपरतयाव्याचष्टे ॥ [६४।३६] अर्थवेति ॥ [६५।१३] विनिगमकाभावाच्चेति । गुरुव्यक्तिविशेषस्यैवकल्पकत्वमित्यत्रविनिगमकाभावाच्चेत्यर्थः । विनिगमकं प्रबोधानंतरमेकस्यैवावशिष्टत्वरूपं ॥ [६५।१५] मोपपादीति । मोपपद्यतामित्यर्थः ॥ [६५।१६] अनुमानेति । विप्रतिपन्नंजीवजडात्मकंसर्वं एकजीवाज्ञानपरिकल्पितंदृश्यत्वात्स्वप्नवदितित्वदुक्तानुमानेत्यर्थः ॥ [६५।१७] कल्प्यत्वप्रसंगादिति । तस्यापिसर्वांतःपातित्वादितिभावः॥ [६५।१७] व्यक्तिनिर्धारणेति । व्यक्तिविशेषनिर्धारणेत्यर्थः ॥ [६५।१७] अनुपपत्तेरिति। प्रतियोगिज्ञानाभावादितिभावः ॥ [६५।१७] अदोषइति । सामान्याकारेणकल्पकस्यप्रसिद्धत्वादितिभावः॥ [६५।१८] कल्पकसिद्धिरिति । कल्पकत्वस्यकल्पितत्वसापेक्षत्वादितिभावः॥ [६५।१९] दृश्यत्वादिति । तथाचतस्यापिकल्पितत्वप्रसंगेनांशेबाधइतिभावः ॥ [६५।१९] अन्यथेति । कल्पकस्यदृश्यत्वाभावइत्यर्थः॥ [६५।१९] अप्रसिद्धीति । एकजीवस्यज्ञानविषयत्वाभावेनतद्घटितसाध्यस्याप्यज्ञानादितिभावः । ननुमास्तुकल्पकजीवस्यवृत्तिविषयत्वरूपंदृश्यत्वं नचतद्घटितसाध्यस्याप्रसिद्धिरितिवाच्यं । तस्यकल्पकजीवस्यस्वप्रकाशत्वेनप्रसिद्धि

संभवात्साध्यविशेषणत्वोपपत्तेरुक्तदोषाभावादित्याशंकते ॥ **तस्येति** ॥ **स्फुरणमात्रेणेति** । वृत्त्यतिरिक्तस्वरूपप्रकाशमात्रेणेत्यर्थः ॥ **कल्पकंकल्पितत्वेति** । तथाचसर्वस्यकल्पकेनकल्पितत्वसिद्धौतस्यवृत्तिविषयत्वरूपदृश्यत्वेकल्प्यत्वापत्त्याकल्पकत्वायोगेनतस्यस्फुरणमेवान्येषांतुदृश्यत्वमितिविवेकसिद्धिः । तत्सिद्धौचस्फुरणमात्रेणतस्यविशेषणत्वोपपत्त्याऽप्रसिद्धविशेषणत्वाभावेनानुमानात्कल्पकेनकल्प्यत्वसिद्धिरित्यन्योन्याश्रयःस्यादितिभावः । शंकते ॥ **सर्वैरपीति** ॥ **मानसीक्रियेति** । अविद्यमानोपास्तिरित्यर्थः ॥ **तस्याइति** । अविद्यमानोपास्तेरनर्थहेतुत्वादितिभावः । ननुकर्तृकरणयोस्तृतीयेतिकर्तरितृतीयाविधानात्तेनेतितृतीययाभवितव्यं तस्येतितुकथमित्यतआह ॥ **कृत्यानामिति** । कृत्याः प्राङ्ण्वुलः । ण्वुल्तृचावितिसूत्रात्प्राक्येप्रत्ययाविहितास्तेकृत्यसंज्ञाःस्युः । तेषांचकृत्यानांप्रत्ययानांप्रयोगेकर्तरिषष्ठीवा विकल्पेनस्यादितिसूत्रार्थः । तथाचतव्यप्रत्ययस्यकृत्यप्रत्ययत्वेनतद्योगेतस्येतिषष्ठीयुक्तेतिभावः ॥ **वीप्सायामिति** । बह्वर्थसंग्रहोवीप्सेतिवचनात् बह्वर्थसंग्रहविवक्षायामित्यर्थः ॥ **तद्वैपरीत्यमिति** । यज्ञदत्तःसत्योदेवदत्तस्तुकल्पितःस्यादित्यर्थः ॥ **विकल्पेति** । विरुद्धधर्मद्वयालिंगितत्वेत्यर्थः ॥ **विरुद्धधर्मालिंगितमिति** । विरुद्धधर्मद्वयालिंगितमेकंवस्त्वित्यर्थः । तेनवस्तुतोगोत्वविरुद्धाश्वत्वालिंगितवस्तुसद्भावात् गोत्वाश्वत्वरूपविरुद्धधर्मद्वयालिंगितगवाश्वरूपवस्तुद्वयसद्भावाच्चकथमेतदितिचोद्यानवकाशइतिज्ञातव्यं । शंकते ॥ **नैतदेवमिति** ॥ **इष्टसाधनतेति** । मदज्ञानपरिकल्पितंसर्वं अहमेवपरमात्मेतिप्रतिपत्तिर्मोक्षरूपेष्ट

साधनत्वात्कर्तव्येत्येवमिष्टसाधनतावबोधनरूपमित्यर्थः ॥ राजाज्ञारूपामिति । अकरणेराजदंडभयात्तदाज्ञारूपंविधानमवश्यंकर्तव्यमित्यर्थः ॥ उक्तन्यायादिति । मांप्रतीदंमोक्षरूपेष्टसाधनतांबोधयतीतिनिश्चित्यैवंप्रतिपत्तयःकर्त्तव्याः । नचैवंसंभवति । आत्मनःसत्यजीवत्वनिश्चयाभावेमोक्षस्याप्यनिश्चयात् । नहिकश्चिदनिश्चितप्रयोजनायमहांतंक्लेशमनुभवतीत्युक्तन्यायादित्यर्थः । ननुप्रमाणंनास्तीत्यनेनकथंद्वितीयपक्षप्रतिषेधइत्यतःप्रमाणपदंनियामकपरमित्याशयेनोक्तं ॥ राजाज्ञारूपमिति ॥४॥ शिष्याज्ञानेति । स्वशिष्याज्ञानपरिकल्पितोभवतीत्यर्थः । शिष्यं स्वशिष्यं । कुतोनवाच्यमित्यतआह ॥ महावाक्यार्थेति । शिष्यबोधनरूपव्याख्यानाभावेतत्त्वमसीत्यादिमहावाक्यार्थभूतैक्यज्ञानाभावप्रसंगादित्यर्थः । ननुव्याख्यानाभावेमहावाक्यार्थाधिगमाभावःकुतः । श्रवणमननाभ्यामेवतदुपपत्तेरित्याशंकापरिहारायसम्यक्पदाभिप्रायमाह ॥ चतुर्भिरिति । आचार्यात्पादमादत्तेपादंशिष्यःस्वबुद्धितः । पादंसब्रह्मचारिभ्यःपादंव्याख्यानकौशलादितिवचनोक्तैश्चतुर्भिःप्रकारैरित्यर्थः । तथाचव्याख्यानाभावेएकप्रकारन्यूनतयासम्यङ्महावाक्यार्थाधिगमोनस्यादित्यर्थः ॥ कल्पकाव्यवस्थितिरिति । सर्वस्यापिशिष्यरूपैकजीवाज्ञानपरिकल्पितत्वेतस्यैवगुरुत्वप्राप्तौस्वशिष्याज्ञानपरिकल्पितत्वप्राप्त्यानतस्यकल्पकत्वं । तच्छिष्यस्यैवकल्पकत्वेतस्याप्येवमेवेतिकल्पकाव्यवस्थितिरित्यर्थः ॥ उक्तमिति । चतुर्भिश्चप्रकारैरित्यादिनेत्यर्थः ॥ परिकल्पितत्वप्राप्तेरिति । तथाचनमोक्षइतिशेषः । तथाहि । शिष्यादिबोधनरूपसाधनसंपत्तौस्वस्यकल्पितत्वप्राप्त्यानमोक्षः । कल्पितत्वाप्राप्त्यर्थंशिष्यासंपादनेव्याख्यातृत्वाभावेनसम्यङ्महावाक्यार्थाधिगमरूपसाधनाभावादेवनमो

क्षइतिमोक्षव्यवस्थानसिध्यतीतिभावः ॥ उपलक्षणमिति[६१।५] । शिष्यःकल्पकइत्यस्यापिशिष्यत्वोपलक्षितःकल्पकइत्येवार्थः ।
तथाचशिष्यबोधनेनगुरुत्वप्राप्तावपिप्राक्शिष्यत्वस्यस्थितत्वेनेदानींतदुपलक्षितत्वानपगमान्नकल्पकत्वापगमइतिकल्पकव्य
वस्थितिर्युक्ता । कल्पकत्वानपगमेचतस्यकल्प्यत्वाभावान्मोक्षव्यवस्थाचसेत्स्यतीतिभावः ॥ तर्ह्यनिश्चयपक्षएवापन्नइति[६१।५] ।
तथाचनचबहूनांदृश्यमानत्वादितिप्रागुक्तरीत्याशिष्यत्वोपलक्षितानांबहूनांदृश्यमानत्वादस्यैवशिष्यत्वोपलक्षितस्यकल्पक
त्वमितिनिश्चयोऽनुपपन्नइतिभावः ॥ ७ ॥ भेदप्रवणपक्षमिति[६१।५] । भेदप्रवणोगुरुःशिष्यश्चेतिनिश्चयपक्षमित्यर्थः । दृढसं
स्कारत्वात् दृढसंस्कारवत्त्वादित्यर्थः । वृत्तसंस्कारत्वादितिपाठेस्थितसंस्कारत्वादित्यर्थोद्रष्टव्यः । दृढोपिसंस्कारोनिवर्त्तिष्य
तइतिचेत्तत्राह ॥ पूर्वाभ्यासेनेति[६१।६] । पूर्वसंस्कारेणेत्यर्थः ॥ मोक्षश्रुतीति[६१।६] । अद्वैतज्ञानान्मोक्षइत्येवमर्थाःश्रुतयस्तावत्सं
ति । तत्रकल्पकस्यगुरोःशिष्यस्यवादृढायाअपिभेदवासनायाःक्षयोऽद्वैतज्ञानंचभविष्यतीतिकल्प्यते । अन्यथादृढायाअ
पिभेदवासनायाअनिवृत्तौ अद्वैतज्ञानाभावेचमोक्षश्रुत्यप्रामाण्यप्रसंगादित्यर्थः । कुतोनकल्पकइत्यतआह ॥ भेद
प्रवणत्वस्येति[६१।७] । भेदवासनानाशेनाद्वैतज्ञानांगीकारेभेदप्रवणत्वस्यापगतत्वात्भेदप्रवणःकल्पकइतिगतःपक्षइतिभावः ।
ननुभेदप्रवणोगुरुःशिष्योवाकल्पकइत्यस्यभेदप्रवणत्वोपलक्षितोगुरुःशिष्योवाकल्पकइत्यर्थः । तथाचभेदवासनाक्षयेनाद्वैत
ज्ञानदशायांभेदप्रवणत्वस्यप्राक्स्थितत्वेनतदुपलक्षितत्वानपगमाद्युक्तंकल्पकत्वमित्याशंक्यभेदप्रवणत्वोपलक्षितानांबहूनांगु
रूणांशिष्याणांवादृश्यमानत्वादस्यैवभेदप्रवणत्वोपलक्षितस्यगुरोःशिष्यस्यवाकल्पकत्वमितिनिश्चयोनयुज्यतइत्यनिश्चयपक्ष

एवापन्नः । सचमोक्षसाधनानुष्ठानासंभवइतिदूषितइत्यभिप्रायेणाह ॥ [६६१७] उपलक्षिततत्वपक्षेचेति । दोषस्येतिशेषः । मूले तेनभेदप्रवणेनगुरुणाशिष्येणवायथाकल्पितंतथैवभवतीतिहेतोस्तेनभेदप्रवणेनगुरुणाशिष्येणवाएकजीववादिनामद्वैतिनामंधंतमआख्योनित्यनिरयोभवतीतिकल्पनेसनित्यनिरयस्स्यादेवेत्युक्तं । तत्कुतइत्यतस्तदुपपादयति ॥ [६६१८] क्रियाकारकेति । क्रिया यज्ञादि । कारक मिंद्रियादि । फलं स्वर्गनरकादि । तथाचनित्यनरकस्यापिफलांतर्गतत्वादितिभावः । नन्वेतावता प्रबंधेन विप्रतिपन्नं एकजीवाज्ञानपरिकल्पितं दृश्यत्वादित्यनुमानस्यकिंदूषणमुक्तमित्यतआह ॥ [६६१८] अयमत्रसमुदायार्थ इति ॥ [६६१९] अतिप्रसंगेति । सर्वमिदंमदज्ञानपरिकल्पितमितिजानतःपुनःशिष्यादिबोधनंनयुज्यतइत्यनेनोक्तातिप्रसंगेत्यर्थः ॥ [६६१९] असंभवाचेति । नचबहूनामित्युक्तरीत्येत्यर्थः ॥ [६६१९] नागंधत्तेइति । अप्रसिद्धविशेषणत्वेनेतिभावः । ननुनिश्चयपक्षानुपपत्तावनिश्चयपक्षोऽनिश्चयपक्षानुपपत्तौनिश्चयपक्षश्चकुतोंगीकार्यइत्यतआह ॥ [६६१११] परस्परेति । परस्परविरोधोपेतपदार्थद्वयमध्ये एकस्यप्रतिषेधेऽन्यस्यैवप्राप्तिर्नतुप्रकारांतरेतृतीयेस्थितिरित्यर्थः । तथाचपरस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनांतरीयकत्वादितिन्यायादितियावत् ॥ [६६१११] व्यापकेति । गुरुत्वादीत्यर्थः ॥ [६६१११] व्याप्यनिवृत्तेरिति । कल्पकजीवनिवृत्तेरित्यर्थः । जीवस्यकल्पकत्वनिवृत्तेरितियावत् ॥ [६६१११] बाधितविषयमिति । उक्तरीत्यैकजीवाज्ञानपरिकल्पितत्वरूपसाध्याभावनिश्चयादृश्यत्वानुमानंबाधितविषयमित्यर्थः ॥ ५ ॥ ननुप्रपंचोयदीतिवाक्यंमायामात्रमितिपदबलेनद्वैतप्रपंचस्याज्ञानकल्पिततत्वमात्रेप्रमाणमितिप्रतीयते अतःकथमेकजीवाज्ञानपरिकल्पतत्वेप्रमाणतयोदाह्रियतइत्यतआह ॥ [६६११२] अत्रचेति ॥ [६६११२] एकस्यैवजीव

स्येति ॥ जीवःप्रतिबुध्यतइत्यत्रजीवइत्येकवचनसद्भावादितिभावः । ननुसत्तार्थकविदधातुव्याख्यानरूपभवतेरपिसत्तार्थक त्वात्सत्तार्थकस्यभवतेश्चपरस्मैपदित्वनियमात्कथंभवेतेत्यात्मनेपदप्रयोगः। प्राप्त्यर्थकभवतेरेवात्मनेपदित्वात्। प्रकृतेचप्राप्त्य र्थकत्वाभावादित्यतआह ॥ [८६।१६] व्यत्ययइति । परस्मैपदात्मनेपदानांबहुलंव्यत्ययोभवतीत्यर्थः। एवंचप्रकृतेसत्तार्थकत्वेप्यात्मनेप दित्वंयुक्तमित्यर्थः॥ [८६।१६] कादाचित्कीति। कादाचित्कसत्तालाभस्यैवोत्पत्तित्वादितिभावः। अथवाप्राप्त्यर्थएवायंभूधातुः । तथा चभवेतेत्यात्मनेपदित्वंतस्ययुक्तं। भूधातोःप्राप्त्यर्थत्वंचधातुसूत्रसिद्धमित्याह ॥ [८६।१७] अर्थवाभूप्राप्तावित्यादिना। भूइत्ययंधातुः प्राप्तौप्राप्तिरूपार्थेआत्मनेपदीभवन्वाविकल्पेनचुरादिःस्यात्।चुरादावाधृषाद्वेत्यधिकृत्यभूप्राप्तावात्मनेपदीतिपाठादित्यर्थः। ननुभूधातोश्चुरादिगणत्वेचुरादिगणस्य सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्योणिच्। एभ्यश्चुरा दिभ्यश्चणिच्स्यादितिसूत्रेणणिजंतताविधानात्। भावयेतेतिणिजंतःप्रतीयेतेत्यतउक्तं॥ [८६।१७] विकल्पितण्यंतस्येति।एवंचप्रकृ तेणिच्नजातइतिभवेतेतियुक्तमितिभावः। भूधातोःप्राप्त्यर्थत्वमेवदर्शयति ॥ [८६।१७] सत्तांप्राप्नुयादिति। सत्तामित्यस्ययोग्यतया लाभइतिद्रष्टव्यं। ननुतर्हिमूले उत्पद्येतेतिव्यर्थं तद्व्याख्येयाभावादित्यतआह ॥ [८६।१७] तस्यतात्पर्यमिति। सत्तांप्राप्नुयादित्यर्थकस्य भवेतेत्यस्यैवेदंतात्पर्यकथनमित्यर्थः । असतःसत्तासंबंधस्यैवोत्पत्तिरूपत्वादितिभावः । पूर्वंविदेर्भवतेश्चसत्तारूपैकार्थत्वमंगी कृत्यविद्येतेत्येतद्भवेतेतिव्याख्यायसत्तायाःकादाचित्कत्वलाभायोत्पद्येतेत्युक्तमितिव्याख्यातं । तथाभवेतेत्यस्यसत्ताप्राप्त्यर्थ कत्वमंगीकृत्यतत्तात्पर्यकथनपरत्वेनोत्पद्येतेत्युक्तमितिप्रकारांतरेणव्याख्यातं । अधुनाउत्पद्येतेत्येतत्प्रकारांतरेणव्याख्यातुं

विद्येतभवेतेत्यस्यैवाभिप्रायमाह॥ [८६।१७] यद्वेति । विद्यतिःसत्तार्थइत्यभिप्रेत्यभवेतेत्युक्तमित्यन्वयः । नन्वत्रापिविदेर्भवतेश्चसत्ता रूपैकार्थत्वमंगीकृत्यविद्येतेत्येतत् भवेतेतिपूर्ववदेवव्याख्यातं कोविशेषोयेनयद्वेत्युक्तमित्यतउक्तं ॥ [८६।१८] अर्थादुत्पत्तिर्लभ्यत इति । नपूर्वव्याख्यानद्वयइवोत्पद्येतेत्यनेनोत्पत्तिलाभोनोच्यतेकिंत्वर्थादेवेत्ययमेवविशेषइत्यर्थः । तथाहि । निवर्तेतेतिवि नाशस्यापाद्यत्वेनोक्तत्वात्तदापादकत्वेनविद्येतेत्यनेनोक्तसत्त्वस्यकादाचित्कत्वं उत्पत्तिरितियावत् । अर्थाल्लभ्यते । अन्यथो त्पत्तेरेवनिवृत्तिव्याप्यत्वेनसत्त्वस्यात्मादौव्यभिचारेणतद्व्याप्यत्वासंभवादापाद्यापादकभावोनस्यादितिभावः । तर्हिमूले उत्प द्येतेत्येतदुर्वरितंव्यर्थंस्यादित्यतआह ॥ [८६।१८] अधुनेति ॥ [८६।१८] अनेकार्थत्वादिति । क्रियावाचित्वमाख्यातुमेकैकोर्थःप्रदर्श्यते । प्र योगतोनुगंतव्याअनेकार्थाहिधातवइतिवचनादित्यर्थः ॥ [८६।१८] उत्पत्तिवाचीति । विदोत्पत्तावित्यपिधातुरस्तीत्यर्थः । यथोक्त मनुव्याख्याने विदोत्पत्तावितिह्यस्माद्धातोरिति । तथाचास्मिन्पक्षेउत्पत्तिःशब्दतएवलभ्यते नपूर्ववदर्थादितिभावः ॥ [८६।१८] इत्याहेति । इत्यभिप्रेत्यविद्येतेत्येतत्प्रकारांतरेणव्याख्यातीत्यर्थः ॥ अवश्यं[८६।१९]भावादिति । व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये । अनिष्टाननुकूलत्वेइतितर्कांगपंचकं । अंगपंचकसंपन्नस्तत्त्वज्ञानायकल्प्यते । अंगान्यतमवैकल्येतर्कस्याभासता भवेदितिकारिकावचनादितिभावः ॥ [८६।२०] प्रमाणेनेति । प्रत्यक्षादिप्रमाणेत्यर्थः ॥ [८६।२०] नापीति । प्रत्यक्षादिप्रमाणबाधादेवेति भावः ॥ विश्व[८६।२१]विस्तारइति । तथाचप्रपंचइत्येतत्प्रोपपदात्पचिविस्तारइतिधातोरूपंनभवतीत्यर्थः ॥ [८६।२१] जातीयरोर्थइति । प्रकारार्थइत्यर्थः । प्रकारवचनेजातीयरइतिसूत्रेणप्रकारार्थेजातीयरोविधानादित्यर्थः ॥ डप्रत्य[८६।२३]यइति । तथाचपंचन्शब्दा

तूप्रकाररूपेजातीयरोर्थेडप्रत्ययेडित्त्वाट्टिभूतस्यन्इत्यस्यलोपेपंचेतिरूपमित्यर्थः । तमेवजातीयरोर्थंदर्शयति ॥ [८६।२१] पंचविधंइ
ति । पंचप्रकारइत्यर्थः ॥ [८६।२२] मोक्षांगज्ञानेत्वादिति । मोक्षजनकज्ञानविषयत्वादित्यर्थः । यथोक्तं । पंचभेदांश्चविज्ञायवि
ष्णोःस्वाभेदमेवच । निर्दोषत्वंगुणोद्रेकंज्ञात्वामुक्तिर्नचान्यथेति ॥ [८६।२२] प्रकरणप्राप्तमिति । भेदइतिविशेष्यपदंप्रकरणप्राप्त
मित्यन्वयः । ननुकथंभेदःप्रकरणप्राप्तोयेनतस्यानादित्वाद्युपपादनंसंगतंस्यादित्यतआह ॥ [८६।२३] तथाहीत्यादिना ॥ [८६।२४] प्रभो
रिच्छयेत्यादि । निगडबद्धजीवप्रभ्वोः निगडप्रभ्वोः बद्धजीवनिगडयोश्चभेददर्शनात्प्रकृतेप्येवमितिभावः ॥ [८६।२५] लब्धंइ
ति । भावानामितिबहुवचनेनेत्यर्थः । बहुत्वस्यभेदव्याप्तत्वादितिभावः ॥ [८६।२५] ततएवेति । जीवानांभेदादेवेत्यर्थः । आव
रणानां आवरकाणां ॥ [८७।१] अर्थाल्लभ्यतइति । जीवानांभेदेप्यावरणस्याभेदे एकस्यतत्त्वज्ञानेनावरणनिवृत्तौसर्वेषामपिमु
क्तिस्स्यादितिभावः ॥ [८७।१] तेषांपंचानामपिभेदानामिति । अनादिमाययेतिप्रकृतेरनादित्वोक्त्याजीवेश्वरप्रतियोगिकप्रकृ
तिधर्मिकभेदस्यावरणादिजडांतरप्रतियोगिकभेदस्यचानादित्वंलब्धं । एवमीश्वरस्याजडत्वोक्त्याजीवजडप्रतियोगिकेश्वरध
र्मिकभेदस्यानादित्वंलब्धं । जडेश्वरप्रतियोगिकजीवधर्मिकभेदस्यपरस्परंजीवभेदस्यचानादित्वंकथंलब्धमित्यतइत्यादिविशे
षणेत्युक्तं । अत्रादिपदेनसुप्तइतिविशेषणंग्राह्यं । तथाचानादिमाययेतिमायाशब्दोक्तलिंगशरीररूपावरणस्यानादित्वंतावदु
क्तंतादृशानाद्यावरणेनजीवस्यसुप्तत्वोक्त्याआव्रियमाणस्यजीवस्याप्यनादित्वंलब्धं। अन्यथातस्यावरणत्वायोगात् । तेनेश्वर
प्रकृत्यादिजडप्रतियोगिकजीवधर्मिकभेदस्यानादित्वंलब्धं । तथापरस्परजीवभेदस्याप्यनादित्वंलब्धमितिद्रष्टव्यं । अतएव

विशेषणसामर्थ्यादित्युक्तं ॥ [८७११] अनादिर्नित्यत्वमिति । जीवेश्वरप्रकृत्यादिजडानांनित्यतयातत्स्वरूपभूतानांपंचानामपिभे
दानांनित्यत्वंचलब्धप्रायमितिद्रष्टव्यं ॥ [८७१२] सत्यत्वमिति । अनादित्वोक्तावज्ञानकार्यत्वरूपमिथ्यात्वाभावस्यलाभेऽर्थात्सत्य
त्वंलब्धमितिभावः । निवर्तेतेत्यस्येष्टापादनत्वंपरिहरति ॥ [८७१३] यदिचेति ॥ [८७१३] वैयर्थ्येति । अधिकारिणोभावादितिभावः ॥
[८७१३] इत्यादिरूपेणेति । यदिजडेश्वरयोर्भेदोनश्येत्तदेश्वरस्यजडत्वापत्त्यासत्यंज्ञानमित्यादिशास्त्रस्यविरुद्धार्थत्वापत्तिः । यदि
जडानांपरस्परंभेदोनश्येत्तदाविद्यायाअप्यविद्यात्वापत्त्यातमेवंविद्वानितिशास्त्रस्यविरुद्धार्थत्वापत्तिः । यदिजीवानांपरस्पर
भेदोनश्येत्तदापरस्परमैक्यप्राप्त्यापरस्परंसुखदुःखाद्यनुसंधानापत्तिः । यदिचजीवेश्वरयोर्भेदोनश्येत्तदेश्वरस्यदुःखाद्यनुभव
स्स्यात् । तथाचनिरनिष्टोनिरवद्यइत्यादिश्रुतिविरोधः । जीवस्यवासार्वज्ञाद्यनुभवःस्यात् । तथाचानुभवविरोधइत्यादिरू
पेणनिवर्तेतेत्यस्यानिष्टत्वंद्रष्टव्यमित्यर्थः ॥ [८७१४] प्रागुक्तेति । अनादित्वोक्त्याऽर्थाल्लब्धेत्यर्थः ॥ [८७१४] अनेनेति । अयमित्यनेने
त्यर्थः । उक्तार्थस्य पंचविधभेदस्य । नद्वैतंभ्रांतिकल्पितमित्युत्तरवाक्यानुरोधेनाविद्यमानपदंव्याचष्टे ॥ [८७१५] भ्रांतिकल्पितइ
ति ॥ [८७१५] विरुद्धोयंहेतुरिति । पंचविधोभेदोभ्रांतिकल्पितोनभवति । मायामात्रत्वादित्यत्रमायामात्रपदस्याऽऽविद्यकत्वा
र्थकत्वेनतस्योक्तसाध्याभावव्याप्तत्वाद्विरुद्धत्वमितिभावः ॥ [८७१६] प्रमाणस्योक्तत्वादिति । मायेत्युक्ताप्रकृष्टत्वात्प्रकृष्टंहिम
याभिधं । विष्णोःप्रज्ञप्तिरेवैकाशब्दैरेतैरुदीर्यतइतिप्रमाणस्योक्तत्वादित्यर्थः ॥ [८७१७] मूलविभुजादित्वादिति । तद्गणस्थत्वा
दित्यर्थः । तथाचमूलविभुजादिभ्यश्चेतिसूत्रेणकर्त्रर्थेकप्रत्ययइतिभावः । मूलविभुजादिगणेमात्रशब्दस्यपाठाभावादाकृति

गणत्वकल्पनस्यचागतिकगतित्वात्प्रकारांतरमाह ॥ घञर्थइति । इतिवार्तिकेनवेत्यर्थः । कर्तृकरणभावानांत्रयाणामपिघञर्थत्वात्प्रकृतेकर्त्रर्थेघञ्प्रत्ययइतिभावः । तथाचमाङ्मानेत्रैङ्पालने आभ्यांमूलविभुजादिभ्यश्चेतिसूत्रेणवाघञर्थेकविधानमितिवार्तिकेनवाकर्तरिकप्रत्यये ककारलोपे आदेचउपदेशेऽशितीत्यैकारस्याऽऽत्वेमात्रा अइतिस्थिते आतोलोपइटिचेतिधात्वाकारलोपेमात्रआमात्रेतिरूपमितिद्रष्टव्यं । धातुद्वयोपर्येकःप्रत्ययश्चाद्भुतमित्यादौदृष्टइत्यवगंतव्यं ॥ बहुव्रीहिरिति । मात्रशब्देनबहुव्रीहिरित्यर्थः । हिशब्दाभिप्रायमाह ॥ निरवद्यत्वंश्रुतीति । निरनिष्टोनिरवद्यइतिश्रुतीत्यर्थः । मूलेईश्वरेणज्ञातत्वहेतोरप्रयोजकत्वंपरिहृतं । इदमुपलक्षणं । ईश्वर(रक्षित)निरीक्षितत्वेपिभ्रांतिकल्पितंकिंनस्यादितिद्वितीयहेतोरप्यप्रयोजकत्वपरिहारोद्रष्टव्यइत्याशयेनाह ॥ एवमिति । इत्यतआहेत्येतद्व्याख्याति ॥ इत्यतआक्षेपात्परमिति । आक्षेपानंतरमित्यर्थः । आहेतिसंबंधः । प्रकारांतरेणयोजयति ॥ इत्याक्षेपइति ॥ पंचमीति । पंचम्यास्तसिल्इतिसूत्रेणपरमार्थादितिपंचम्यास्तसिलोजातत्वादितिभावः ॥ ल्यब्लोपेति । ल्यब्लोपेतत्कर्मण्यधिकरणेपंचमीवाच्या । प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । प्रासादमारुह्य । आसनेउपविश्यप्रेक्षतइतिवार्तिकार्थः । एवमत्राप्यपेक्ष्येतिल्यब्लोपेतत्कर्मणिपरमार्थतइतिपंचमीजातेत्यर्थः ॥ एतदिति । एवंश्रुतिव्याख्यानमित्यर्थः ॥ शंकितुरपीति । तर्ह्यद्वैतःसर्वभावानामितिव्यपदेशःकथमितिशंकितुर्मायावादिनोपीत्यर्थः ॥ व्यवहारतइति । व्यवहारदशायामित्यर्थः ॥ विवक्षितार्थेति । द्वितीयशून्यत्वरूपविवक्षितार्थेत्यर्थः । ननुनिर्धारणेह्येषाषष्ठीतिकुतः कर्तृक

र्मणोःकृतीतिसूत्रेणकर्तरिकर्मणिवाकिंनस्यादित्यतआह ॥ **लक्षणांतरेति** । सर्वभावानांकर्तृत्वकर्मत्वरूपार्थस्यप्रकृतेऽयोगे नसूत्रांतरप्राप्तेरसंभवादित्यर्थः । गवां मध्ये । प्रपंचस्य भेदपंचकस्य कल्पितत्वाभावेज्ञापकांतरस्यानुक्तत्वाद्वाक्य शेषाच्चेतिचकारोव्यर्थइत्यतआह ॥ **उक्तंवक्ष्यमाणेति** । द्वैतस्यभ्रांतिकल्पितत्वाभावेपरमेश्वरेणज्ञातत्वरक्षितत्वरूपं ज्ञापकंमायामात्रपदेनपूर्वमुक्तं । वस्तुस्थितिकथनपरत्वनिरासेनापादनत्वसमर्थनपरंयद्यादिशब्दरूपं ज्ञातेद्वैतंनविद्यतइ तिवाक्यशेषरूपं जीवेश्वरभिदाचेतिप्रमाणरूपंचज्ञापकांतरंवक्ष्यमाणंद्रष्टव्यं ॥ **वस्तुस्थितीति** । प्रपंचोविद्येतविद्यतइव दृश्यते । निवर्तेतइदानींनिवृत्त्यभावादुत्तरत्रनिवर्त्तिष्यते । केनचिदज्ञानादिनाकल्पितोविकल्पितोभेदःनिवर्तेतइदानींनिवृ त्त्यभावाद्विनिवर्तिष्यतेबाध्यतइतिवस्तुस्थितिकथनपरमेवैतन्नापादनरूपमित्यर्थः। ननुनिवर्ततइत्यंगीकारइतिवत्विद्यतइत्य र्थांगीकारइत्यपिवक्तव्यं । उत्तरत्रतस्यापिग्रहणादित्यतआह ॥ **वस्तुकथनस्येति** । वस्तुस्थितिकथनस्येत्यर्थः । तथाचनि वर्ततइत्यंगीकारइत्यस्यवस्तुस्थितिकथनपरत्वस्यांगीकारइत्यर्थोद्रष्टव्यः॥ **यदिशब्दसहितस्यचलिङ्इति** । कल्पितोयदि केनचिदित्यत्रनलिङ्श्रूयते तथापियदिशब्दबलात्कल्पितःस्यादितिलभ्यतइतिभावः। अतएवसुधायां यदिकेनचिदज्ञाना दिनाकल्पितःस्यादित्युक्तं । स्थानद्वये श्लोकद्वये ॥ **कथनद्वयमिति** । विद्येतनिवर्तेतेतिप्रसंगरूपेणकथनद्वयंलिङ्द्वयमि तियावदित्यर्थः । ननुलिङोप्येकत्वेनप्रसंगरूपेणकथनद्वयाभावात्यदिशब्दश्चेतिपाठे नयुज्यतइतिबहुवचनमनुपपन्नमेवेत्य तआह ॥ **लिङएकत्वेपीति** ॥ **धातुभेदेनेति** । विदसत्तायांवृतुवर्त्तनइतिधात्वोर्भेदेनेत्यर्थः । वृतुधातोरेवनीत्युपसर्गबलेन

निवृत्त्यर्थत्वमितिद्रष्टव्यं ॥ [८८।७] **समुदाययोरिति** । तत्तद्धातुसंबद्धयोर्लिङोरपीत्यर्थः । ननुविदिधातोरेवोत्पत्त्यर्थकत्वंनप्रत्ययस्यापि । तस्यकर्तृत्वार्थकत्वात् । एवंचप्रत्ययसहितस्यविद्येतेत्यस्योत्पत्त्यर्थकत्वाभावात् । विद्येतेत्यस्योत्पत्त्यर्थानंगीकारेइति कथमुक्तमतआह ॥ [८८।८] **अत्रशब्दइति** । विद्येतेतिशब्देनिविष्टस्यविदेर्धातोरित्यर्थः । तथात्वे बहुव्रीहित्वे ॥ [८८।९] **भावप्रधानइति** । उत्पत्त्यर्थत्वानंगीकारइत्यर्थः । उत्पत्त्यर्थानंगीकारमात्रस्ययद्यदस्तीतिवक्ष्यमाणव्याप्त्यभावोपपादकत्वाभावादाह ॥ [८८।१०] **सत्तार्थांगीकारेचेति** ॥ [८८।११] **व्याप्त्यावश्यंभवितव्यमिति** । व्याप्तिस्तर्काप्रतिहतिरित्यादिनातर्कस्यांगपंचकमभिधाय अंगान्यतमवैकल्येतर्कस्याभासताभवेदितिकारिकायामुक्तत्वेनव्याप्त्यभावेतर्कस्यप्रशिथिलमूलत्वापत्त्याऽऽभासत्वापत्तेर्व्याप्त्यावश्यं भवितव्यमितिभावः । ध्वंसव्यावृत्त्यर्थंभावस्येत्युक्तं ॥ [८८।१२] **अव्याप्येनेति** । सत्त्वस्यनिवृत्तिंप्रत्यव्याप्यत्वेनाव्याप्येनसत्त्वेनाव्यापकस्यनिवर्तनस्यापादनंनिवर्तेतेत्यनेनक्रियमाणंनयुज्यतइत्यर्थः । नन्वनादिसत्यताशब्दस्यप्रपंचशब्देनसापेक्षत्वेनसमर्थत्वात्तेनैवसमासोवक्तव्योनपरपदेन । सापेक्षमसमर्थवद्भवतीतिवचनात् । तथाचप्रपंचानादिसत्यतापरमितिवक्तव्यमित्यत आह ॥ [८८।१३] **अनादिसत्यत्वशब्दस्येति** ॥ [८८।१४] **नित्यसापेक्षत्वादिति** । उत्थिताकांक्षावत्त्वादित्यर्थः । सापेक्षमसमर्थवद्भवतीति वचनमनित्यसापेक्षविषयं । उत्थाप्याकांक्षास्थलविषयमितियावत् । अस्यतूत्थिताकांक्षावत्त्वादन्येनपदेनसमासेपिपूर्वपदेनाकांक्षानविहन्यते देवदत्तस्यगुरुकुलमितिवदित्यर्थः ॥ [८८।१५] **नोक्तविरोधीति** । तथाचनसहपठितव्यइत्यर्थः ॥ [८८।१६] **नञ्प्रश्लेषेति** । अज्ञातइतिनञ्प्रश्लेषेत्यर्थः । तथाचोपदेशादितिपादोदाहरणाभावेनञ्प्रश्लेषप्रदर्शनंनसंभवतीतिभावः । आंतरोपपत्तिः यद्या

दि शब्दवैयर्थ्यरूपा ॥ [८८।१८] चशब्दाइति । त्रयश्चशब्दास्तथाशब्दद्वयंचेतिशब्दपंचकंपंचानांभेदानांपरस्परसमुच्चयेवर्ततइत्य
र्थः । ननुप्रपंचोभेदपंचकइत्ययुक्तं । पंचद्दशतौवर्गेवा । वर्गार्थेपंचत्दशत्इतिनिपात्येतेइत्युक्तत्वेनभेदपंचकःपंचत्इत्येवव
क्तव्यं । ननुप्रपंचइति । अतःकथमेतदित्याशंक्यभेदपंचकइतिव्याख्यानंप्रपंचइतिमूलारूढंकरोति ॥ [८८।१९] भेदपंचकइतीति ॥
[८८।१९] पंचशब्दस्येति । तथाचप्रपंचइतियुक्तमितिभावः ॥ [८८।१९८] पूर्वप्रतिज्ञामिति । सोयंसत्यइत्यनेनकृतांसत्यत्वप्रतिज्ञामित्य
र्थः ॥ [८८।२१] नचासावितीति । भ्रांतिकल्पितत्वाभावएवसत्यत्वमितिभावः ॥ [८८।३५] प्रागुक्तेभ्यइति । मैत्रेयीशाखायांप्रागुक्तेभ्य
इत्यर्थः । कापालिकेभ्यः शैवादिभ्यः । मिथ्यातर्कैर्दृष्टांतैरित्यन्वयप्रतीतिवारणायकुहकेंद्रजालैर्दृष्टांतैरित्यन्वयइत्याह ॥
[८८।२५] कुहकेति । ननुकुहकैर्मिथ्याद्दष्टांतहेतुभिरित्यत्रकुहकैरिंद्रजालरूपैर्मिथ्यात्वसाधकैर्दृष्टांतैर्हेतुभिश्चेतिप्रतीयते । तदयुक्तं ।
तथात्वेब्राह्मणमंत्रयोर्विसंवादापत्तेः । ब्राह्मणेद्दश्यत्वादीनांहेतुत्वमुक्तं । कुहकेंद्रजालानांद्दष्टांतत्वमुक्तं । मंत्रेतुकुहकेंद्रजा
लानांद्दष्टांतत्वंहेतुत्वंचोच्यते । तत्रकुहकानामिंद्रजालानांमिथ्यात्वसाधनेद्दष्टांतत्वसंभवेपिहेतुत्वासंभावाद्दृश्यत्वादीनामेव
हेतुत्वादित्यतआह॥ [८९।१] अर्थादिति । यद्यपिकुहकानामिंद्रजालानांहेतुत्वमुक्तं । तथापितस्यबाधितत्वेनासंभवादर्थाद्दृष्टांतत्व
मेवतेषामुक्तंभवतीत्यर्थः । तथाचमिथ्यात्वसाधकैःकुहकैर्दृष्टांतैर्दृश्यत्वादिहेतुभिश्चेतिबुद्ध्याविविच्यमंत्रोयोज्यइत्युक्तंभव
ति ॥ [८९।३] तस्याभावइति । आत्म्यस्याभावइत्यर्थः । नन्वात्म्यरूपार्थाभाववाचिनोनिरःकथमात्म्यपदेनसमासइत्यतआह ॥
[८९।३] अर्थाभावइति । अर्थाभावरूपार्थेयदव्ययंतस्य अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययेत्यादिसूत्रेणमक्षिकाणाम

भावोनिर्मक्षिकमितिवदात्म्यस्याभावोनिरात्म्यमितिसमासोयुक्तइत्यर्थः ॥ [८१३]**तस्यभावइति** । निरात्म्यस्यभावोधर्मोनैरात्म्यमित्यर्थः । प्रकारांतरमाह ॥ [८१४]**स्वार्थेवेति** । तथाचनिरात्म्यशब्दात्स्वार्थेऽणप्रत्ययेणित्त्वादिकारस्यैकाररूपवृद्धौनिरात्म्यमेवनैरात्म्यमितिभवतीतिद्रष्टव्यं ॥ [८१४]**अवश्यंचैतदिति** । प्रपंचमिथ्यात्ववादिनांमायावादिनामेवनिंदापरमेतद्वाक्यंनबौद्धानामित्येतदेवावश्यमंगीकार्यमित्यर्थः । वैदिकेषु वेदप्रामाण्यवादिषु । तन्मध्यइतियावत् ॥ [८१५]**नहीति** । तेषांवेदाप्रामाण्यवादित्वादितिभावः ॥ ७ ॥ [८१६]**परिकल्प्यमिति** । जगदित्यर्थः ॥ [८१७]**सत्यद्वयमिति** । आरोप्यसत्त्वापेक्षयाऽधिकसत्त्वोपेतमित्यर्थः । सत्यंजगद्द्वयमपेक्षितमित्युक्तं तदुपपादयति ॥ [८१७]**अधिष्ठानेत्यादिना** । नन्वारोप्याज्जगतोधिकसत्त्वोपेतं ब्रह्मैवजगदारोपेधिष्ठानं अन्यत्किंचित्प्रधानंचभविष्यति अतस्तदर्थेसत्यजगद्द्वयंकस्मात्तदपेक्षितमित्यतउक्तं ॥ [८१७]**जगतएवेति** । जगता आरोप्येण । तथाचारोप्यजगत्प्रतियोगिकसादृश्याधिकरणमधिष्ठानंप्रधानंचजगदेवभवितुमर्हंनान्यदित्यर्थः । आरोप्यसादृश्यस्यावश्यकत्वंकुतइत्यतउक्तं ॥ [८१७]**अधिष्ठानेति** । नन्वारोप्यस्यात्यंतासत्त्वेननिर्धर्मकत्वात्कथंतत्सादृश्यमधिष्ठानप्रधानयोरपेक्षितमित्युच्यतइतिचेन्न । आरोप्यस्यकिंचित्प्रतियोगिकसादृश्यानाश्रयत्वेपिकिंचिन्निष्ठसादृश्यप्रतियोगित्वांगीकारात्तस्यचरूपादिवद्धर्मिसत्तासापेक्षत्वाभावात् । नन्वारोप्यसादृश्यंनामतद्गतभूयोधर्मवत्त्वं आरोप्यस्यचात्यंतासत्त्वेननिर्धर्मकत्वात्कथंतद्गतभूयोधर्मवत्त्वमधिष्ठानप्रधानयोरुच्यतइतिचेन्न । परमतेघटत्वादिजातिवदस्मन्मतेसादृश्यस्याखंडत्वेनतद्गतभूयोधर्मवत्त्वादिरूपत्वाभावादितिद्रष्टव्यं । यथोक्तंसुधायां । व्युत्पत्तिरपिहिसादृश्येनैवगम्यतइत्यत्रसादृश्यंहिपदा

र्थांतरमिति । पदार्थांतरमखंडमित्यर्थः । कुतोनयुक्तइत्यतआह ॥ पिण्याकेति । तिलयंत्रेणतिलादेःसकाशात्तिलनिष्प त्त्यनंतरंयत्पिष्टमवशिष्यतेतत्पिण्याकमुच्यते । गतस्येतिकर्मणिषष्ठी गतंप्रतीत्यर्थः । पिशाचस्येतिकर्तरिषष्ठी । पिशाचक र्तृकखारीपरिमिततैलदानप्रतिज्ञावदित्यर्थः । खारीतिपरिमितिविशेषः । खारीद्रोणोनिकुंजकइत्यभिधानात् ॥ अधिकोपातादिति । स्वापेक्षितापेक्षयाऽधिकस्यापातादित्यर्थः । यथाकेनचित्पिण्याकंदेहीतियाचितेसति तंप्रतिकिंपिण्या केनतेसहखारीपरिमितंतैलंदास्यामीतिकेनचित्पिशाचेनप्रतिज्ञातेसतिपिण्याकयाचकस्ययथाधिकलाभोजातस्तद्वत्परिदृश्यमा नस्यैकस्यजगतस्सत्यत्वमपेक्षमाणंमांप्रत्यस्यजगतोभ्रांतिकल्पितत्ववचनेनोक्तरीत्यासत्यभूतजगद्वयलाभेनापेक्षितादप्यधिक लाभोममजातइत्यविवेकितयापिशाचतुल्योभवानितिभावः । कुतोनास्तीत्यतआह ॥ सत्यंजगद्वयेति । तथात्वेगौरवंस्या दितिभावः ॥ अस्यैवेति । भ्रांतिकल्पिततयात्वयोच्यमानस्यास्यैवपरिदृश्यमानस्येत्यर्थः ॥ प्रमाणविरोधोवेति । तथाचप्रपंचोनभ्रांतिकल्पितःनिरधिष्ठानत्वान्निष्प्रधानत्वादात्मवत् । व्यतिरेकेणरजतवदित्याद्यनुमानविरोधोवाऽनेनमूले नोक्तोभवतीत्यर्थः । व्यतिरेकदृष्टांतमाह ॥ शुक्तिरजतेति । अप्रयोजकतापरिहारायविपक्षेबाधकतर्कमाह ॥ विपक्षेत्विति । अधिष्ठानप्रधानभूतेत्यादि । तथाचनिरधिष्ठानत्वनिष्प्रधानत्वलक्षणहेतूच्छित्तिप्रसंगइतिभावः । अन्यथाख्यातिवा दिनां तार्किकाणां ॥ तत्कथंप्रतीयमानसदृशेति । आरोप्यत्वेनप्रतीयमानस्यान्यत्रसत्त्वाभावेखलुतत्सदृशद्वयमपेक्षितं स्यात् नचैवं । किंत्वापणस्थरूप्यस्यैवात्रप्रतीयमानत्वेनारोप्यस्यान्यत्रसत्त्वांगीकारात्तत्सदृशमधिष्ठानमेकमेवांगीकार्यं । अ

तआरोप्यसदृशंसत्यद्वयंनापेक्षितमित्यर्थः । तर्हिमूलेकिमपेक्षितमितिवक्तव्यमित्यतआह ॥ [८।१।६] **किंत्विति** । असदेवरजतंप्रत्यभादित्युत्तरकालीनानुभवाच्छुक्तिरेवात्यंतासद्रजतात्मनाप्रतिभातीत्येवमभिनवान्यथाख्यातिवादिभिरस्माभिरारोप्यस्यान्यत्रसत्त्वानंगीकारादवश्यंतत्सदृशमधिष्ठानंप्रधानंचापेक्षितमेवेत्याशयेनपरिहरति ॥ [८।१।६] **मैवमित्यादिना** । ननुभ्रमस्यपुरोवर्तिनिशुक्तिकादौपूर्वानुभूतान्यत्रस्थितरजताभेदविषयकत्वस्यानुभवसिद्धत्वेनतदन्यथानुपपत्त्याऽऽरोप्यस्यान्यत्रसत्त्वमंगीकार्यमित्यतस्तदेवासिद्धं यदन्यथानुपपत्त्याऽऽरोप्यस्यान्यत्रसत्त्वंसिद्ध्येदित्याह ॥ [८।१।७] **यथाहीति** । अभिज्ञाकारं इदंरजतमित्यनुभवरूपं । भ्रांतरजतेपीत्यनंतरं इतियस्मादितिशेषः । तत् तस्मात् । तथाचसत्यरजतस्थलेभ्रांतरजतस्थलेचानुभवस्यैकप्रकारत्वेनमात्रयापिविशेषाभावाद्भ्रमस्थलेऽनुभवस्यपुरोवर्तिनिपूर्वानुभूतरजताभेदविषयकत्वांगीकारेसत्यरजतस्थलेप्यनुभवस्यतथात्वापत्त्यातस्याप्यन्यत्रसत्त्वंकल्पनीयंस्यादितिभावः । किंचभ्रमस्थलेइदंरजतमितिज्ञानस्यपूर्वानुभूतान्यत्रस्थितरजताभेदविषयकत्वे सोयंदेवदत्तइतिवत्तदिदंरजतमितिप्रत्यभिज्ञारूपंज्ञानमुत्पद्येत । इष्टापत्तिरितिचेत्तत्राह ॥ [८।१।८] **कस्यचिदिति** । भ्रमस्थलेतदिदंरजतमितिप्रत्यभिज्ञारूपंज्ञानंकस्यापिनोत्पद्यते किंत्विदंरजतमित्येव यदिकस्यचित्तादृशंप्रत्यभिज्ञारूपंज्ञानमुत्पद्यतइत्यंगीक्रियते तर्हितस्यबह्वनुभवविरोधेनभ्रांतित्वोपपत्तेर्नतस्यान्यत्रसत्त्वव्यवस्थापकत्वमितिभावः ॥ [८।१।९] **अन्यत्रसत्त्वाभावइति** । अत्यंतासत्त्वांगीकारेचेतिशेषः॥ [८।१।९] **कथंप्रतीतिरिति** । यदसत्तन्नप्रतीयतइतिव्याप्तेरितिभावः ॥

अत्रैवेति । पुरोदेशएवेत्यर्थः ॥ बाधकादिति । नेदंरजतमितिबाधकप्रत्ययसद्भावान्नपुरोदेशेसत्त्वमंगीकर्तुंयुक्तमित्यर्थः । तर्ह्यन्यत्रसत्त्वमपिनांगीकार्यं कुतइत्यतआह ॥ अन्यत्रेति । इह पुरोदेशे । निगमयति ॥ असत्त्वेपीति । रजतस्यात्यंतासत्त्वेपिप्रतीत्युपपत्तेरित्यर्थः । यदसत्तन्नप्रतीयतइतिचेत्तत्राह ॥ तादात्म्यवदिति । भ्रमस्थलेशुक्तिःसती रजतंसत् तादात्म्यमात्रमसदितित्वदंगीकारात्तत्रव्याप्तेर्व्यभिचारइतिभावः ॥ ७ ॥ याभ्रांतिस्सासाधिष्ठानेतिव्याप्तेःस्वाप्नपदार्थेषुव्यभिचारंवक्तुंतेषांभ्रांतिकल्पितत्वंतावत्साधयति ॥ स्वाप्नास्तावत्पदार्थाइत्यादिना ॥ प्रागूर्ध्वंचेति । स्वप्नात्प्राक्तदूर्ध्वंचेत्यर्थः॥तदैवेति । विद्युदादिवदितिभावः ॥ असंभावितत्वादिति । तत्कालीनेजन्मन्युपादानादेस्संभावितस्याभावादितिभावः । यथोक्तंसुधायां । नहितत्कालीनेजन्मन्युपादानंनिमित्तंचपश्यामइति॥ एवमपीति। उपादानादेःसंभावितस्यसत्त्वेपीत्यर्थः ॥ अंतरिति । देहांतरित्यर्थः । महतां गजतुरगादीनां । तदा स्वप्नदशायां ॥ उपरतत्वादिति । विषयज्ञानजननव्यापारविनिर्मुक्तत्वादित्यर्थः॥ बहिरस्वातंत्र्यादिति । तत्तदिंद्रियाधिष्ठानेनतत्तदिंद्रियविषयाणामेवमनोविषयकत्वेनमनसस्तत्तदिंद्रियाधिष्ठानेनैवबाह्यार्थज्ञानजनकत्वं नस्वातंत्र्येण । तत्तदिंद्रियानधिष्ठितत्वेनेतियावत् । बाह्येंद्रियाणांचतदोपरतत्वात्स्वातंत्र्येणैवबाह्यार्थज्ञानजनकत्वंवाच्यं । तच्चमनसोनयुक्तमितिभावः । तत्र काशीहेमंतयोः । तयोः मधुरावसंतयोः । आत्मैवाधिष्ठानमितिचेत्तत्राह ॥ आत्मनोभेदेनेति । आत्मनःसकाशाद्भेदेन तदसंभिन्नतयेतियावत् । स्वाप्नार्थानांगजादीनामुपलंभादित्यर्थः । ननुस्वाप्नपदार्थानामपीदंरजतमितिवदधिष्ठा

नसंभिन्नतयैवप्रतीतिरस्तीतिचेत्तत्राह ॥ [८१।२५] नहीति ॥ नविरोधं [९०।१३] इति । भ्रांतिकल्पितस्यैवाधिष्ठानसापेक्षत्वादितिभावः ॥
[९०।१४] वासनानामिति । उपादानभूतानामित्यर्थः । ननुस्वाप्नघटादिपदार्थोपादानानांवासनानामतींद्रियत्वेनोपलंभासंभवेपि
निमित्तकारणोपलब्धिःस्यादितिचेन्न । अदृष्टादेरेवनिमित्तत्वेनदंडादेस्तदनंगीकारात्तस्यचातींद्रियत्वायुक्तानुपलब्धिरित्या
शयेनाह ॥ [९०।१४] निमित्तंत्विति । ईश्वरादिकमित्यादिपदेनकालग्रहणं । नन्वतींद्रियवासनाकार्याणांस्वाप्नपदार्थानांकथमैंद्रियक
त्वंयुज्यते । स्वाप्नाःपदार्थाः अतींद्रियाः अतींद्रियकार्यत्वाद्व्यतिरेकेणघटादिवदित्यनुमानविरोधादितिचेन्न । अतींद्रियद्व्यणुक
कार्येत्र्यणुकेव्यभिचारादित्याह ॥ [९०।१४] अतींद्रियकार्यस्यापीति । अपिचैतानंतःपश्यतिबहिर्वा केनचतेकरणेनोपलभ्यंतइत्या
शंक्ययद्दूषणमुक्तंतदप्यतएवापास्तमित्याह ॥ [९०।१५] अतएवेति । वासनोपादानकत्वेनबाह्यपदार्थवैलक्षण्यादेवेत्यर्थः । तथा
चाल्पदेशेपिमहतांदर्शनसंभवान्नदेहविदारणं । नापिमनसोपलब्ध्यंगीकारेमनसोबहिरस्वातंत्र्यादित्युक्तदोषः । तेषांबाह्यप
दार्थत्वाभावेनस्वातंत्र्येणमनसस्तज्ज्ञानजनकत्वसंभवादितिभावः ॥ [९०।१५] मधुरादीति । काशीमधुरयोर्हेमंतवसंतयोश्चवासनाम
यत्वादितिभावः ॥ [९०।१५] अननुभूतत्वेनेति । अस्मिन्जन्मनीतिशेषः । सूक्ष्मत्वेनलयेसच्चप्राकृतैरुपचीयते । सृष्टिकालेयदात
न्नकुतःसंसारसंस्थितिरित्यनुव्याख्यानंमनसिनिधायोपपादयति ॥ [९०।१६] अन्यथेति । मनसःसादित्वइत्यर्थः ॥ [९०।१६] सादित्वेति ।
मनःपरंकारणमामनंतिसंसारचक्रंपरिवर्तयेद्यदितिवचनेनसंसारस्यमनोधीनत्वावगमान्मनसःसादित्वेसंसारस्यापिसादित्वप्र
संगः । नचेष्टापत्तिरितिवाच्यं । अनादिकर्मणाबद्धोजीवःसंसारमंडले । वासुदेवेच्छयानित्यंभ्रमतीत्यादिवचनविरोधादि

तिभावः ॥ [१०।१६] तच्चेति । मनइत्यर्थः ॥ [१०।१७] जन्मांतरेति । तथाचानादौसंसारेस्वशिरश्छेदानुभवसंभवेनतज्जन्यवासनायाअनादिम
नसिस्थितत्वेनस्वप्नेतद्दर्शनंयुक्तमितिभावः ॥ [१०।१७] वैधर्म्याच्चेति । स्वप्नादुत्थितस्यस्वप्नोयंनायंबाह्योगजइतिबाधकसद्भावात्स्वा
प्नस्यमिथ्यात्वंवक्तव्यं । प्रपंचस्यतुबाधकाभावरूपाद्वैधर्म्यान्नस्वाप्नादिवन्मिथ्यात्वं । किंतुसत्यत्वमेवेतिसूत्रार्थः । अनुभूतैक्येन
अनुभूतपदार्थैक्येन । ननुतर्हियाभ्रांतिस्सासाधिष्ठानेतिव्याप्तेर्बाह्यत्वेव्यभिचारोस्तु तत्राधिष्ठानाभावादित्यतआह ॥ [१०।१८] बाह्य
त्वारोपेचेति । बाह्यत्वारोपेऽधिष्ठानादिसत्त्वमुपपादयति ॥ [१०।१९] गजमद्रांक्षमिति । प्रतीति बाधकप्रतीतिः । उत्थितस्य स्वप्नादु
त्थितस्य । तथाचबाह्यत्वारोपेस्वाप्नगजादिकमेवाधिष्ठानमितिभावः ॥ [१०।११०] मनोरथस्येति । मनोरथेप्रतीयमानानांपदार्थानामपि
स्वाप्नवद्वासनामयत्वेनसत्यत्वान्नतत्राप्युक्तव्याप्तेर्व्यभिचारइतिभावः । वासनापरिणामः वासनोपादानकपदार्थानांसृष्टिः ॥
[१०।११०] पुरुषेति । मनोरथेवासनामयपदार्थानांसृष्टिःपुरुषप्रयत्नाधीनेत्यर्थः । ननुदेहात्मविभ्रमाभावेकुतःसंसाराभावप्रसंगइत्यतस्त
स्यसंसारकारणत्वमुपपादयति ॥ [१०।१११] देहात्मविभ्रमाद्धीति ॥ [१०।१११] रागद्वेषोदयइति । देहानुकूलप्रतिकूलयोरितिशेषः । [१०।११२] नै
षामिति । तेवैविदंत्यतितरंतिचदेवमायामितिपूर्ववाक्यं । तथाच एषांश्वसृगालभक्ष्ये । देहेममाहमितिधीर्देहात्म्यैक्य
भ्रमइतियावत् । नास्ति तएवदेवमायांविदंति अतितरंतिचसंसारमित्युक्त्या विशेषनिषेधःशेषविध्यनु(मा)ज्ञापकइतिन्या
येनयेषांममाहमितिदेहात्म्यैक्यभ्रमरूपाधीरस्ति तेसंसारंनातितरंतीतिनैषामितिवाक्येनार्थाल्लभ्यतइतिभावः । अत्र देहा
त्म्यैक्यभ्रमे ॥ [१०।११३] अधिष्ठानमिति । आत्म्यैक्यभ्रमेदेहोऽधिष्ठानमात्माप्रधानमित्यर्थः ॥ [१०।११३] सादृश्येति । अधिष्ठानप्रधान

योरित्यर्थः ॥ [१०।१३] उक्तव्याप्तीति । य़ाभ्रांतिस्साऽऽरोप्यसदृशाधिष्ठानप्रधानपूर्विकेत्युक्तव्याप्तीत्यर्थः । देहात्मनोः आरोप्ययोः ॥ [१०।१४] प्रातीतिकत्वेति । प्रातिभासिकत्वेत्यर्थः । ननुदेहात्मनोःप्रातीतिकत्वमिष्टमेव । नचदेहाद्युचितार्थक्रियाभावप्रसंगः । देहाद्यंतरेणतदुपपत्तेरित्यतआह ॥ [१०।१४] देहाद्यंतराभावादिति । आअविपालगोपालमितिपदच्छेदः । अविपालगोपालंमर्यादीकृत्येत्याविपालगोपालमित्यर्थः ॥ [१०।१५] अन्यत्रेति । जातमात्रामृगागावोहस्तिनःपक्षिणोझषाः । भयाभयस्वभोगादौकारणानिविजानते । अस्मृतौपूर्वदेहस्यविज्ञानंतत्कथंभवेत् । यदिदेहांतरज्ञानंदेहैक्यावसितिःकुतः । ममदेहइतिह्येव नदेहोहमितिप्रमेत्यादिनाऽनुव्याख्यानइत्यर्थः ॥ [१०।१५] कथंतर्हीति । देहात्म्यैक्याभावेदेहधर्मस्यमनुष्यत्वस्यकथमात्मनिप्रतीतिस्स्यात् । नचतथाप्रतीतिरेवनास्तीतिवाच्यं । मनुष्योहमितिव्यवहारान्यथानुपपत्त्यातदवगमात् । तथाचव्यवहारसिद्धप्रतीत्यन्यथानुपपत्त्यादेहात्मैक्यभ्रमसिद्धिरितिभावः ॥ [१०।१५] उपचारेणेति । तथाचचित्रलिखितेसिंहेसिंहइतिव्यवहारवदस्यौपचारिकव्यवहारत्वेन नतदन्यथानुपपत्त्याज्ञानंकल्पनीयमितिभावः । तथाचनतदुपपत्तयेदेहात्मभ्रमकल्पनेतिहृदयं । एकदेशस्थत्वादीत्यादिपदार्थमाह ॥ [१०।१६] भेददर्शनेपीति ॥ [१०।१७] तथेति । देहात्मनोरप्येकदेशस्थत्वंस्फुटतरविवेकाभावश्चास्तीत्येवमभिन्नतंतुपटसादृश्येनमनुष्योहमित्ययंव्यवहारइत्यर्थः ॥ [१०।१७] भ्रांतेरेवेति । देहात्मभ्रमस्यैवाभावादित्यर्थः । ननुदेहात्मविभ्रमाभावेउक्तरीत्यासंसाराभावप्रसंगइतिचेत्तत्राह ॥ [१०।१७] स्फुटभेदेति । देहात्मनोस्स्फुटतरविवेकज्ञानाभावादेवदेहानुकूलप्रतिकूलयोरागद्वेषादिद्वारासंसारोपपत्तिरित्यर्थः । ननुतर्हिस्फुटतरविवेकज्ञानवतांजीवन्मुक्तानांसंसारोपलंभोनस्यात् तेषाम

पिदेहसंरक्षणार्थंभिक्षाटनादौप्रवृत्तिदर्शनादित्यतआह ॥ [१०।३८] किंचेति ॥ [१०।३८] पुरोणेति । तथाच एषांश्वसृगालभक्ष्येदेहेम माहमितिधीर्नास्ति स्फुटतरविवेकज्ञानमस्तीतियावत् । तेवैविदंतीत्याद्युक्त्याऽन्येषांस्फुटतरविवेकज्ञानंनास्तीतिलभ्य तइतिज्ञातव्यं । अन्ये नरहरितीर्थाः ॥ [१०।३९] सादृश्येति । देहात्म्यैक्यभ्रमेऽधिष्ठानप्रधानयोःसत्त्वेपिसादृश्याभावेनो क्तव्याप्तिभंगेचोदितेऽनुव्याख्यानानुसारेणदेहात्मभ्रमएवनास्तीतिकुत्रव्यभिचारस्स्यादित्यभिधायकथंतर्ह्यहंमनुष्यइत्यादि व्यवहारइत्याशंक्यतस्यौपचारिकत्वमुक्त्वा उपचारेनिमित्तप्रदर्शनपरत्वेनदेहात्मनोरपीतिवाक्यंटीकाकारैर्व्याख्यातं । न रहरितीर्थास्तु देहात्म्यैक्यभ्रमेऽधिष्ठानप्रधानयोस्सद्भावेपिसादृश्याभावेनोक्तव्याप्तिभंगेचोदितेदेहात्म्यैक्यभ्रममंगीकृत्य तस्मिन्भ्रमेसादृश्योपपादनपरत्वेनदेहात्मनोरपीतिवाक्यंव्याचक्षतइत्यर्थः । तेषामनुव्याख्यानविरोधःस्पष्टइतिभावः ॥ [१०।२०] त्रितयेति । अधिष्ठानप्रधायोस्सद्भावेपिशंखपीतद्रव्ययोःनभोनीलद्रव्ययोः तिक्तद्रव्यगुडयोश्चसादृश्याभावात्त्रित याभावइत्यर्थः । इदंचैकसत्त्वेद्वयमिहनास्तीतिप्रतीतिसिद्धव्यासज्यवृत्तिप्रतियोगिकाभावाभिप्रायेणेतिद्रष्टव्यं । पीता दयइत्यादिपदव्याख्यानं[१०।२०]प्रभृतंथइति । तथाचपीतंचिरबिल्वं बिल्वस्यपीतत्वद्योतनायचिरग्रहणं । बहुकालीने बिल्वेपीतत्वदर्शनात् । नीलं वस्त्रादि । तिक्तं निंबादीतिद्रष्टव्यं ॥ [१०।२२] यद्यप्यत्रेति । तथाचसादृश्यमेवोपपादनी यं । नत्वधिष्ठानप्रधानयोस्सत्त्वमितिभावः ॥ [१०।२३] उपपादितमिति । शंखःपीतइत्याद्युक्त्याशंखादीनामधिष्ठानत्वमुक्तं । अन्यत्रविद्यंतइत्यनेनप्रधानं सादृश्यंचेतिवाक्येनसादृश्यमितित्रितयमप्युपपादितमित्यर्थः ॥ अतिप्रसंगेस्स्यादिति ।

घटेपिपटभ्रमस्स्यादितिभावः ॥ सोपाधिकेभ्रमेष्विति । विशेषदर्शनानिवर्त्यभ्रमेष्वित्यर्थः ॥ अल्पस्यापीति । यत्प्रधानंतदतिरिक्तगतत्वेनातिप्रसक्तस्यापीत्यर्थः । तथाचोपाधिरेवातिप्रसंगभंजकइतिभावः । सोपाधिकभ्रमानुदाहरति ॥ [१०।१२२] यथेत्यादिना । दंडशंखनभोगुडेषुदीर्घत्वशौक्ल्यनीलत्वमाधुर्यरूपविशेषदर्शनसद्भावेपिजलप्रवाहाद्युपाधिगतंवक्रिमादिकंगृहीत्वादंडादावारोप्यतइत्यर्थः । गुडतिक्तताभ्रमोयदिबालातिरिक्तस्यतर्हिगृह्यमाणारोपः यदिचबालस्यतर्हिस्मर्यमाणारोपः अदृष्टवशात्पूर्वजन्मानुभूततिक्ततांस्मृत्वागुडेआरोप्यतइतिद्रष्टव्यं ॥ [१०।१२४] एकेनैववाक्येनेति । स्वप्नेदेहात्मनोः शंखः पीतइत्यादिरूपेणेत्यर्थः । तथाचवाक्यभेदःकिमर्थइतिभावः । सर्वत्रोपपादनस्यैकप्रकारत्वेह्येकेनैववाक्येनोपपादनंकार्यंस्यान्नचैवमस्तीत्याह ॥ [१०।१२४] स्वप्नेहीति । स्वाप्नपदार्थानांवासनामयत्वेनसत्यत्वात् । भ्रांतिकल्पितत्वमेवनास्तीतितज्ज्ञानंप्रमानभ्रमः । बहिष्ठत्वमात्रमेवभ्रांतिकल्पितमितितज्ज्ञानंभ्रमरूपमित्येवंभ्रमाभ्रमयोस्सांकर्यमस्तीत्यर्थः । एवंच यत्रव्यभिचारश्चोद्यतेतेषांसत्यत्वमेवेत्येवंसमाधानंनान्यत्रवक्तुंशक्यतइतिभावः । सोपाधिको विशेषदर्शनानिवर्त्यःनिरुपाधिको विशेषदर्शननिवर्त्यः ॥ [१०।१२५] नशक्यमिति । सोपाधिकभ्रमेऽतिप्रसक्तस्यापिसादृश्यस्यभ्रमहेतुत्वात् निरुपाधिकभ्रमेप्रधाननिष्ठासाधारणचाकचक्यादिसादृश्यस्यैवभ्रमहेतुत्वादितिभावः ॥ [१०।१२६] सर्वत्रेति । अनेनमूलगतंनकुत्रापीत्येतदुक्ततात्पर्यकमितिद्रष्टव्यं ॥ [१०।१२६] एषांव्याप्तिरिति । भ्रांतेस्सदृशाधिष्ठानप्रधानपूर्वकत्वव्याप्तिरित्यर्थः । तथाचपरेणाप्यंगीकृतत्वान्नैतदुपपादनंभगवत्पादैःकर्तव्यमितिभावः । कथमंगीकृतेतिज्ञायतइत्यतआह ॥ [११।१] यदभाषतेति । संकरेणभाष्येउक्तमित्यर्थः । तदुदाहर

ति ॥ **स्मृतिरूपइति** । स्मृत्यारूप्यतेजन्यतइत्यध्यासस्यस्मृतिरूपत्वंवक्तव्यं । भ्रमजनकप्रधानस्मृतिहेतुभूतसंस्कारोद्बोधश्चाधिष्ठानेप्रधानसादृश्यंविनानसंभवतीतिस्मृतिरूपपदेनप्रधानाधिष्ठानयोस्सादृश्यमंगीकृतमित्यर्थः ॥ **अतएवेति** । भ्रांतेस्सदृशाधिष्ठानप्रधानपूर्वकत्वव्याप्तेरंगीकृतत्वादेवेत्यर्थः ॥ **प्रधानाभावमिति** । प्रधानज्ञानाभावमित्यर्थः । ज्ञातस्यैवप्रधानत्वात् तिक्ततायाश्चबालेनास्मिन्जन्मनिप्रागननुभूतत्वादितिभावः । आत्मनःप्रपंचारोपाधिष्ठानत्वेश्रुतार्थापत्तिमाह ॥ **सहीत्यादिना** ॥ **श्रूयतइति** । सच्चत्यच्चाभवत् तदात्मानंस्वयमकुरुतेत्यादावित्यर्थः । सा उपादानता ॥ **अधिष्ठानमेवेति** । इदमेवचोपादानत्वमितिभावः ॥ **नप्रधानमिति** । पूर्वपूर्वप्रपंचस्याप्यारोपितत्वेनाऽऽरोप्यप्रपंचादधिकसत्ताकत्वाभावान्नप्रधानत्वमित्यर्थः । सत्यत्वाभावेपिप्रधानत्वंसंभवतीतिवक्तुमाह ॥ **प्रधानंकिमित्यादिना** ॥ **स्वरूपेणेति** । अज्ञातत्वेनेत्यर्थः ॥ **उपयुज्यतइति** । भ्रमकारणंभवतीत्यर्थः ॥ **अज्ञातरजतस्येति** । पुरुषस्येत्यर्थः ॥ **कारणत्वानुपपत्तेरिति** । भ्रमापेक्षयाऽव्यवहितपूर्ववर्तित्वाभावादितिभावः ॥ **मिथ्यार्थस्यापीति** । सत्यत्वाभावेपीत्यर्थः ॥ **प्राधान्यमिति** । पूर्वपूर्वप्रपंचस्येत्यर्थः ॥ **तज्ज्ञानेति** । मिथ्याभूतपूर्वपूर्वप्रपंचविषयकभ्रमरूपज्ञानजन्येत्यर्थः ॥ **अनुपपत्तिरिति** । तदपेक्षयाप्रधानभूतस्यपूर्वप्रपंचस्याभावेनतदनुभवजन्यसंस्काराभावादितिभावः । नन्वथाप्यादिसृष्टौप्रधानभूतपूर्वप्रपंचाभावेनतदनुभवजन्यसंस्कारायोगेनारोपानुपपत्तिरित्यतआह ॥ **आदिसृष्टावपीति** ॥ **पूर्वसर्गेति** । सृष्टिप्रलयपरंपरायाइदंप्रथमताभावेनानादित्वादितिभावः । अतएवेत्युक्तंविशदयति ॥ **सिद्धविषयत्वादिति** । बीजांकु

रानवस्थावत्प्रामाणिकविषयत्वादित्यर्थः । सादृश्यं अधिष्ठानप्रधानयोः ॥ [११।१०] **निरधिष्ठानंत्वमित्यादि** । आत्मदृष्टांतेनप्र
पंचस्यभ्रांतिकल्पितत्वाभावसाधकमित्यर्थः ॥ [११।१०] **तर्कश्चेति** । यदिजीवजडात्मकंसर्वंजगद्भ्रांतिकल्पितंस्यात्तर्ह्यारोप्यसदृशा
धिष्ठानप्रधानपूर्वकमंगीकार्यंप्रसज्येतेतितर्कश्चेत्यर्थः ॥ [११।१०] **आभासइति** । अनिष्टत्वरूपांगवैकल्यादित्यर्थः । अंगान्यतमवै
कल्येतर्कस्याभासताभवेदितिकारिकावचनादितिभावः । आत्मत्वेनेत्यस्यैवविवरणं ॥ [११।११] **प्रत्यक्त्वेनेति** । अनात्मतयेत्यस्यव्या
ख्यानं [११।११] **पराक्त्वेनेति** ॥ [११।१३] **पक्षधर्मतामपीति** । अनेनात्मत्वेनज्ञातेऽनात्मत्वेनज्ञायमानस्यारोपोनक्वापिदृष्टइतिमूलार्थउक्तो
भवतीतिज्ञातव्यं । यत्यद्विरुद्धतयाप्रतीयतेतत् । तदारोपाधिष्ठानंनभवतीतिसामान्यव्याप्तौदृष्टांतमाह ॥ [११।१४] **यथेति** । यद्य
द्विरुद्धतयाप्रतीयतेतत्तस्मिन्नध्यस्तंनभवतीतिसामान्यव्याप्तौदृष्टांतमाह ॥ [११।१५] **यथेति** । अत्राप्रयोजकतापरिहारायविपक्षेबाध
कंतर्कमाह ॥ [११।१५] **विरुद्धाकारेति** । तस्य अध्यासस्य । ननुसच्चत्यच्चाभवदित्यादिश्रुत्यासर्वस्यापिप्रपंचस्यब्रह्मोपादानतयाश्रूय
ते । नचापरिणामिनस्सासंभवति । अतोऽविद्योपादानकप्रपंचारोपेब्रह्माधिष्ठानमेवेतिसिध्यतीतिपूर्वोक्तांश्रुतार्थापत्तिंदूषय
ति ॥ [११।१६] **आत्मनइति** ॥ [११।१६] **अन्यत्रेति** । जगद्रतेनरूपेणब्रह्मैवहितथोच्यतइत्यादिनानुव्याख्यानेतैत्तिरीयभाष्येचास्याःश्रुतेर
न्यार्थतायाउपपादितत्वादात्मनस्सर्वोपादानताश्रुतिस्तुनास्त्येवेत्यर्थः । नचात्मनीतिवाक्यस्यतद्विरुद्धतयाप्रतीयमानेतद्वि
रुद्धतयाप्रतीयमानस्यारोपोनसंभवतीत्युक्ताभिप्रायकत्वे नहिकश्चिदहंनभवामीतिभ्रांतोदृश्यतइत्युत्तरवाक्यंपुनरुक्तंस्यादि

त्यतउक्तं ॥ उक्तमभिप्रायमवुद्ध्वेति ॥ [९१।१७] चोदयेदिति । आत्मन्यनात्मभ्रमोनदृष्टइतिप्रतीतएवार्थेचोदनांशंकांकुर्यादि
त्यर्थः । तत्प्रकारमाह ॥ [९१।१७] आत्मनीत्यादिना । ननुजैनरीत्या आत्मनिकायपरिमाणत्वरूपमध्यमपरिमाणत्वज्ञानस्यभ्रम
त्वंकुतः वस्तुगत्याआत्माकायपरिमाणएवकिंनस्यादित्यतउक्तं ॥ [९१।१७] व्याप्तइति । तार्किकरीत्येदमुक्तं । अस्मद्रीत्योक्तमणावि
ति ॥ [९१।१७] एतदिति । आत्मन्यनात्मभ्रमोनदृष्टइत्येतत्कथमित्यर्थः ॥ [९१।१७] उक्तंविवृणोतीति । अनात्मशब्दस्याहंनभवामी
तिविवरणादित्यर्थः । तद्विरुद्धतया पराक्त्वेन । प्रतीयमानं वस्तु ॥ [९१।१९] अनुमानस्येति । आत्मानजगदारोपाधिष्ठानं तद्विरु
द्धतयाप्रतीयमानत्वात् । यथापर्वतोनसर्पारोपाधिष्ठानमितिप्रथमानुमानस्येत्यर्थः ॥ अप्रसिद्धविशेषणत्वमिति [९१।१९] । भ
वन्मतेजगदारोपस्यैवाप्रसिद्ध्यातद्घटितसाध्यस्याप्यप्रसिद्धत्वादितिभावः ॥ [९१।१९] परप्रसिद्ध्येति । तथाचजगदारोपाधिष्ठानं
नेतिप्रतिषेध्यस्यजगदारोपाधिष्ठानत्वस्यपरस्यतवमतेप्रसिद्ध्याप्यनुमानोपपत्तेरित्यर्थः ॥ [९१।१९] अन्यथेति । प्रतिषेध्यस्यपरप्रसि
द्ध्यनपेक्षायामित्यर्थः ॥ प्रतितंत्रसिद्धार्थस्येति [९१।२०] । स्वतंत्रएवसिद्धोर्थःपरतंत्रैर्निवारितः । प्रतितंत्रोयथान्यायेसर्वज्ञस्यप्र
माणतेतिकारिकावचनेनप्रतितंत्रसिद्धांतलक्षणंज्ञातव्यं । तथाचप्रतितंत्रसिद्धांतसिद्धस्येश्वरप्रामाण्यस्यकणादादिभिरीश्व
राप्रामाण्यवादिभिःक्रियमाणःप्रतिषेधोऽनुपपन्नःस्यादित्यर्थः ॥ [९१।२०] कस्मादिति । तथाचानुक्तोपालंभइतिभावः ॥ [९१।२१] सामा
नाधिकरण्यमिति । अनात्मरूपार्थस्यभ्रमत्वाभावादनात्मभ्रमपदयोःकथंसमानाधिकरण्यमित्यर्थः । (अध्यासादीत्या
दिपदेनभ्रमादिशब्दग्रहणं) । ननुपरैरेवमभ्युपगतत्वेपिभवद्भिःकथंतथाव्यवहारःकृतइत्यतआह ॥ [९१।२२] अस्यचेति । आत्मन्य

नात्मभ्रमएवायमित्यादिमूलस्येत्यर्थः । आत्मन्यनात्मारोपःपरैरंगीकृतइत्यत्रज्ञापकमाह ॥ [१।१२२] युष्मदस्मदित्यादिना ॥
[१।१२३] आत्मानात्मानाविति । अस्मत्प्रत्ययगोचरः प्रत्यगर्थइतियावत् । सआत्मा युष्मत्प्रत्ययगोचरः परागर्थइतियावत् ।
सोनात्मेत्यात्मानात्मनोरुपक्रांतत्वादित्यर्थः ॥ [१।१२३] अन्योन्यस्मिन्निति । आत्मन्यनात्मनोऽनात्मन्यात्मनइत्यन्योन्यस्मि
न्नित्यर्थः ॥ [१।१२३] अन्योन्यात्मकतामिति । तादात्म्यारोपाभिप्रायेण । संसर्गारोपाभिप्रायेणान्योन्यधर्मांश्चेत्युक्तं ॥ [१।१२५] बहुवच
ननिर्देशइति । तैरितिबहुवचननिर्देशइत्यर्थः ॥ [१।१२६] भ्रमएवेति । नतुतत्रसत्यांशोस्तीत्यर्थः ॥ [१।१२६] सत्यानृतेइति । अधिष्ठाना
ध्यस्तेत्यर्थः ॥ [१।१२६] मिथुनीकृत्येति । संवलितेकृत्वेत्यर्थः । व्यवहाराःप्रवर्ततइत्युत्तरेणान्वयः । अहंकर्ताभोक्ता अहंमनुष्यः
सन्घटः प्रकाशतेघट इत्यादयोव्यवहाराइतितदर्थः ॥ [१।१२६] योत्रानुक्तोपालंभंशंकमानस्याभिप्रायइति । आत्मन्यना
त्मारोपःपरैरनंगीकृतएवकस्मान्निराक्रियतइत्यनुक्तोपालंभंशंकमानस्यायमभिप्रायः। तथाहि । यदिप्रत्यक्त्वेनप्रतीयमानमंतः
करणावच्छिन्नंपरिच्छिन्नचैतन्यंपराक्त्वेनप्रतीयमानप्रपंचारोपाधिष्ठानंस्यात्तर्ह्येव नात्माजगदारोपाधिष्ठानंतद्विरुद्धतयाप्रती
यमानत्वादित्युक्तानुमानविरोधस्स्यात् नचैवं । किंतुसर्वतोव्याप्तमेव । तच्चस्वभावेनैकरसमप्यनंतोपाधिभिन्नं । तच्चनप्रत्य
क्त्वादिनाविरुद्धत्वेनप्रतीयते । यच्चप्रत्यक्त्वादिनाविरुद्धतयाप्रतीयमानमंतःकरणावच्छिन्नंपरिच्छिन्नंतस्यानधिष्ठानत्वात् ।
अतोनोक्तानुमानावकाशइति ॥ [१।२।१] उद्धाट्यदूषयिष्यामइति । तमिममभिप्रायं । स्यादेतत् । यद्यंतःकरणावच्छिन्नेत्यादि
नाग्रंथेनोद्धाट्यव्याप्तात्मस्वरूपानुविद्धतयाघटादीनांप्रतीत्यभावात् आरोपितस्याधिष्ठानानुविद्धतयाप्रतीतिनियमात् नहि

कश्चिदिदंशुक्लभास्वरंरजतमितिवदिदमात्मस्वरूपंघटइतिप्रत्येतीत्यादिनाग्रंथेनोत्तरत्रदूपयिष्यामइत्यर्थः । किंत्वित्यनंतरं
आदावितिशेषः ॥ आरोपितेऽनात्मनीति । तथाचाधिष्ठानत्वेपिसत्यत्वंनवक्तव्यमित्यर्थः ॥ तंपरित्यज्येति । आत्म
न्यनात्मभ्रमइतिवचनंत्वयात्यज्यतामित्यर्थः । कुतइत्यतआह ॥ इदमुक्तंभवतीति ॥ एवंसतीति । यथाकथंचिदेकस्यै
वसत्यतायाःप्राप्तत्वादितिभावः ॥ सिद्धांतस्येहानीति । सत्यद्वयप्राप्तेरितिभावः ॥ अस्त्वेवमिति । अनात्मैवसत्य
आत्मातुनसत्यइत्येवमस्त्वित्यर्थः ॥ अस्तीति । सत्यइत्यर्थः ॥ यत्सत्यमिति । सत्यतयायदायास्यतीत्यर्थः ॥ अस्मा
कमात्मेति । तत्रैवानात्मन्यात्मसंज्ञाक्रियतइत्यर्थः ॥ सोनात्मेति । तत्रैवात्मन्यनात्मसंज्ञाक्रियतइत्यर्थः । एतादृशवा
दिनोऽलौकिकत्वादेवपूर्वैर्वयात्यादाहेत्युक्तं । औद्धत्यादितितदर्थः । ननुस्वमते आरोपितस्यशुक्तिरजतादेरत्यंतासत्त्वेनाज्ञा
नोपादानकत्वाभावात् यद्यदज्ञानपरिकल्पितंतत्ततोभिन्नत्वेननदृश्येतेतिव्याप्तिग्रहणंशुक्तिरजतादौनसंभवतीत्यतआह ॥
स्वरीत्यात्विति । अत्यंतासतोपिशुक्तिरजतादेरधिष्ठानाज्ञाननिमित्तप्रतीतिकत्वांगीकारादितिभावः ॥ इत्येवोच्यतेति ।
यदधिष्ठेयंतदधिष्ठानाद्भिन्नत्वेननदृश्येतेत्येवयद्युच्येतेत्यर्थः ॥ छलेति । वक्ष्यमाणाभिप्रायेणप्रयुक्तयोरधिष्ठानाधिष्ठेयश
ब्दयोराधाराधेयभावरूपाभिप्रायांतरंकल्पयित्वादूषणादित्यर्थः । एवमुक्तेपिकुंडबदरादौकथंव्यभिचारपरिहारइत्यतआ
ह ॥ यैर्दज्ञानेनेति । रजतांतरंसत्यभूतंरजतमित्यर्थः ॥ दृश्यतइति । प्रमायामित्यर्थः । ननुभ्रांतावित्युक्तेपिनदोषप
रिहारः । समीपस्थयोःशुक्तिरजतयोरिमेरजतेइतिभ्रांतौशुक्तेर्भेदेनरजतस्यदर्शनादित्यतआह ॥ तदारोपितमितियाव

दिति । तथाचभ्रांतौ शुक्त्यारोपितरजतभिन्नंवास्तवंयद्रजतंतदेवशुक्तेर्भेदेनप्रतीयते नतुतत्रारोपितंयद्रजतंतदित्यर्थः ॥
[१३।११]दृश्यतएवेति । शुक्तेर्भेदेनरजतमित्यर्थः ॥ [१२।११]इदंमुक्तमिति । भ्रांतावितिविशेषणमुक्तमित्यर्थः । धर्म्यारोपे इदंरजतमि
तितादात्म्यारोपे । धर्मारोपे अत्ररजतत्वमितितन्निष्ठधर्मसंसर्गारोपइत्यर्थः । भिन्नत्वेनभेदेनेत्यनयोरर्थमाह ॥ [१२।१२]असंसृष्टत्वे
नेति ॥ [१२।१२]तर्कस्येति । यदिजगदात्मन्यारोपितंस्यात्तदाऽऽत्मनोभिन्नत्वेननदृश्येतेतितर्कस्येत्यर्थः ॥ [१२।१२]अनुमानस्येति । ज
गदात्मन्यारोपितंनभवति ततोभेदेनदृश्यमानत्वादित्यनुमानस्येत्यर्थः । तर्केविपर्ययपर्यवसानलब्धमिदमनुमानमित्यवगंत
व्यं । नचात्मन्यनात्मभ्रमःक्वापिदृष्टइतिपूर्वग्रंथेनगतार्थतांपरिहरति ॥ [१२।१३]प्रागिति । आत्मत्वानात्मत्वप्रकारकविरुद्धधर्मप्रती
तिरेवभ्रमासंभवेहेतुत्वेनोक्ताइदानींतुभेदप्रतीतिमात्रमेवभ्रमासंभवेहेतुत्वेनोच्यतइत्यर्थः । असिद्धिपरिहारायैवप्रत्यक्परा
ग्भावेनभेदप्रतीतेःस्फुटत्वादित्युक्तमित्यवगंतव्यं । अनुमानेऽप्रयोजकतापरिहारायबाधकंतर्कमाह ॥ [१२।१३]भेदेनप्रतीयेमानम
पीति । आदावित्यनंतरं एकमेवशुक्तिकाशकलमितिशेषः । तथाचतत्रव्यभिचारइत्यर्थः ॥ [१३।१]अनेनैवेति ॥ युगपदिति
विशेषणेनैवेत्यर्थः ॥ [१३।१]सर्वेति । आदौरजतत्वेनदृष्टंतत्पश्चाच्छुक्तिकात्वेनदृश्यतइत्युक्तःशुक्तिशकलेव्यभिचारपरिहारोपियु
गपदित्यनेनैवभविष्यति अतस्तदर्थंभ्रांतावितिनवक्तव्यमित्यर्थः । गतार्थतांपरिहरति ॥ [१३।२]प्रागिति । अनुमितं जगतोऽना
रोपितत्वमितिशेषः । अप्रयोजकत्वमाशंकते ॥ [१३।३]नन्विति ॥ [१३।४]धर्मित्वेनेति । अहंबाहुविध्यमितितादात्म्येनेत्यर्थः ॥
[१३।४]धर्मत्वेनेति । अहंबाहुविध्यवानितिबहुविधत्वरूपधर्मसंसर्गवत्त्वेनेत्यर्थः । ननुतर्हिनचात्मनिबाहुविध्यभ्रमःक्वापिदृष्टइ

त्येवकस्मान्नोक्तमित्यतआह ॥ [९३१५] परस्परमिति । आत्मापरस्परंभिन्नत्वेनदृश्यमानस्यजगतोधिष्ठानंनभवति । अभिन्नत्वादि त्यनुमानमत्रद्रष्टव्यं । अस्मिन्पक्षेभेदभ्रमइत्यस्यभेदसंसर्गभ्रमइत्यर्थोद्रष्टव्यः । नन्वेकस्यात्मनःकथंबहुविधप्रपंचारोपाधि ष्ठानत्वमित्यतआह ॥ [९३१७] तच्चेति । अनुमानानामनवकाशमुपपादयति ॥ [९३१७] अधिष्ठानत्वेनेति ॥ [९३१८] आंतरत्वादिनेति । प्र त्यक्पराग्भावरूपेणविरोधेनेत्यर्थः ॥ [९३१८] आत्मस्वरूपस्येति । व्याप्तात्मस्वरूपस्यैकत्वेप्युपाधिभेदभिन्नस्यबहुविधत्वादित्य र्थः । संभिन्नतया अनुविद्धतया । ननुघटादेरात्मानुविद्धतयाप्रतीतौतन्निष्ठज्ञानानंदाद्यसाधारणाकारानुवेधएवस्यान्नतुस दादिरूपसाधारणाकारानुवेधइतिचेन्न । अदृष्टकल्पनाप्रसंगादित्याह ॥ [९३१२] असाधारणाकारेति । असौ अनित्यत्वादिः ॥ [९३१३] किंनस्यादिति । तथाचसत्त्वादिकमपिघटधर्मएव नाधिष्ठानानुवेधइत्यर्थः ॥ [९३१३] पृथगिति । ब्रह्मव्यतिरेकेणपृथगनित्यत्वा दिधर्माणांघटेविद्यमानत्वेनानित्यत्वादिकंघटधर्मएव नाधिष्ठानानुवेधइतिकल्प्यते । सन्निति त्वधिष्ठानानुवेधएव घटादेर्ब्रह्म ण्यारोपिततयापृथक्ब्रह्मसत्ताव्यतिरेकेणघटधर्मभूतायास्सत्तायाअभावादित्यर्थः । ननुसन्घटइत्यत्रसत्त्वस्यघटगतत्वेनाधि ष्ठानत्वासंभवेपिप्रकाशतेघटइत्यत्रप्रकाशात्मकब्रह्मानुवेधएवेत्यंगीकार्यं । घटादेर्जडत्वेनप्रकाशस्यसत्तावत्तद्धर्मत्वायोगादित्य तआह ॥ [९३१४] प्रकाशेति ॥ [९३१५] उक्तत्रेति । उच्यते कथंप्रकाशेतेतिकोर्थइत्यादिनाग्रंथेनेत्यर्थः । तथाहि । घटःप्रकाशतइत्यस्यकोर्थः । किंप्रकाशरूपइति उतप्रकाशाश्रयइति यद्वाप्रकाशविषयइति नप्रथमद्वितीयौ । अनभ्युपगमात् । तस्मात्तृतीयएवांगीकार्यस्तत्रा पिप्रकाशोनचैतन्यं अप्रामाणिकत्वादतोवृत्तिरेववाच्या । तथाचप्रकाशतेघटइत्यस्यवृत्तिरूपज्ञानविषयोघटइत्यर्थकतयानाधि

ष्ठानभूतप्रकाशरूपब्रह्मानुवेधइतिप्रत्याख्यास्यामइतिभावः ॥ [३।१७] भेदोपीति । भेदस्यसत्यत्वेहिमिथ्याभूतस्यवास्तवकार्यकारि
त्वंनसंभवतीतियुक्तंस्यात् । नचैवं । भेदस्यापिमिथ्यात्वेनोपाधेःस्वानुरूपकार्यकारित्वसंभवादित्यर्थः ॥ [३।१७] तथाप्यनुपपत्तिरि
ति । प्रतीत्यनुपपत्तिरित्यर्थः । तामेवोपपादयति ॥ [३।१८] मिथ्याभूतस्यापीति ॥ [३।१८] घटाद्युपाधीति । उपाधीनांमिथ्यात्वेश
शविषाणायितत्वेनात्यंतासत्त्वापत्त्यानमिथ्याभूतभेदप्रतीतिजनकत्वंयुक्तमित्यर्थः । आरोपिताः आत्मनीतिशेषः ॥ [३।१८] सत्याए
वेति । व्यावहारिकसत्त्वोपेताइत्यर्थः ॥ [३।१९] अतादृशात्मनीति । अबहुविधेएकस्मिन्नात्मनीत्यर्थः । ननुमिथ्याभूतभेदहेतव
उपाधयोनैकस्मिन्नात्मन्यारोपिताः किंतूपाध्यंतरकृतभेदभिन्नआत्मन्येवातोनोक्तदोषइत्यतआह ॥ [३।१९] तदर्थमिति ॥ [३।१९] अनव
स्थेति । तेषामप्युपाधीनामुपाध्यंतरकृतभेदभिन्नआरोपितत्वंवाच्यं । पुनस्तत्राप्येवमित्यनवस्थेत्यर्थः ॥ [३।२१] नानुभूतइति
शक्यतेवक्तुमिति । तथाचज्वलनानुभवजनितसंस्कारस्तस्याप्यस्तीतिभावः । नन्वेवंजन्मांतरानुभवकल्पनस्यातिप्रसंगित्वे
जातमात्रस्यप्रवृत्त्युपयोगीष्टसाधनत्वानुमानांगभूता यत्स्तनपानंतदिष्टसाधनमित्येवंरूपाव्याप्तिःतत्स्मृतिरपिनकल्प्येतेत्यत
आह॥ [३।२१] प्रमितेहीति । अनन्यथासिद्धजीवनरूपकार्यस्यतत्रप्रमितत्वादितिभावः । तर्ह्यत्रापिकार्यंप्रमितमित्याशंक्यनिराकरो
ति ॥ [३।२२] नचेदानीमपीति । ननुदृश्यत्वाद्यनुमानेन तत्त्वमस्यागद्यागमेनचप्रमितइतिचेत्तत्राह॥ [३।२२] अनुमानागमयोरिति ।
प्रमाणबाधान्यार्थकल्पनाभ्यांनिराकृतत्वादितिभावः ॥ [३।२३] अतएवेति । अधिष्ठानप्रधानयोरभावादेवेत्यर्थः ॥ ७ ॥ अद्वैता

सिद्धेः अद्वैतहानेरित्यर्थः । ननुआरोपजनकाज्ञानारोपितार्थज्ञानयोरकल्पितत्वेपिनाद्वैतहानिः । तयोरात्मस्वरूपत्वांगीकारादित्यतआह ॥ [९३।२५] **नहीति** ॥ [९३।२६] **साक्षीति** । साक्षिरूपमित्यर्थः । साक्षिणश्चात्मत्वान्नाद्वैतहानिरितिभावः ॥ [९३।२६] **तस्यासंगत्वादिति** । असंगोह्ययंपुरुषइतिश्रुतेःसाक्षिणःस्वरूपेणासंगतयाऽविद्यासंबंधमंतरेणारोपितार्थसंबंधानुपपत्तेरित्यर्थः ॥ [९४।१] **कल्पितेति** । तथाचाविद्यावृत्तिप्रतिबिंबितचैतन्यस्यैवसाक्षित्वेनतस्यचविशिष्टत्वेनकल्पितत्वादारोपितार्थज्ञानस्यकल्पितविशिष्टसाक्षिस्वरूपत्वानंगीकारादद्वैतहानिरेवेतिभावः ॥ [९४।३] **नतथाज्ञानाज्ञानयोरिति** । अज्ञानंनास्तिज्ञानंनास्तीतिबाधकप्रत्ययोनास्तीत्यर्थः ॥ [९४।३] **नाज्ञासिषमिति** । शुक्त्यज्ञानमासीदित्यर्थः ॥ [९४।३] **अज्ञासिषमिति** । रजतज्ञानमासीदितियावदित्यर्थः ॥ [९४।४] **प्रतिज्ञेति** । ज्ञानाज्ञानयोरेकजीवाज्ञानपरिकल्पितत्वसाधिकाप्रतिज्ञेत्यर्थः । तथाचज्ञानाज्ञानयोः । पक्षकोटिप्रवेशेनैकजीवाज्ञानपरिकल्पितत्वसाधनेंऽशेबाधइतिभावः ॥ [९४।६] **कादाचित्कत्वेति** । कल्पकेनविनाकल्पितत्वेकादाचित्कतानुपपत्त्यासार्वकालिकत्वप्राप्तेरनिवर्त्यत्वंस्यादित्यर्थः ॥ [९४।६] **तथात्वेति** । कल्पकेनविनैवकल्पितत्वप्रसंगादित्यर्थः । तथाचतत्राज्ञानादीनांभ्रमोपादानत्वादिकल्पनमयुक्तमितिभावः ॥ [९४।७] **कूटस्थत्वेनेति** । निर्विकारत्वेनाकर्तृत्वादित्यर्थः ॥ [९४।७] **आत्ममात्रेति** । केवलात्मरूपस्यैवकल्पकत्वेनात्मनःसर्वदासत्त्वेनतन्मात्रानुबंधिनोज्ञानादेरपिसर्वदासत्त्वप्राप्त्याऽनिवृत्तिप्रसंगादित्यर्थः । कल्पकंमिथ्येतिद्वितीयपक्षंदूषयति ॥ [९४।८] **मिथ्यात्वेचेति** । मिथ्याभूतेन कल्पकेन ॥ [९४।८] **स्वेनैवेति** । अनवस्थापरिहारायस्वेनैवकल्पिततायामुच्यमा

नायामित्यर्थः ॥ [१४।६] तथात्वप्रसक्तिरिति । स्वेनैवकल्पितत्वप्रसक्तिरित्यर्थः । ननुसाद्यध्यासएवकल्पकापेक्षा । अज्ञानारो
पितार्थज्ञानयोरध्यासस्त्वनादिरेवेतिनतत्रकल्पकापेक्षेत्यतआह ॥ [१४।९] अनादित्वइति ॥ [१४।१०] ध्योघातइति । कल्पितत्वस्यदोष
जन्यधीमात्रशरीरत्वरूपत्वादितिभावः । सत्यं स्वरूपेणेतिशेषः ॥ [१४।११] अंतइति । अप्रामाण्यमिथ्यात्वव्यपदेशयोरन्यथाऽनु
पपन्नत्वादित्यर्थः । तस्य आरोपितार्थज्ञानस्य मिथ्यात्वं स्वरूपेणेतिशेषः । तथाच नचज्ञानाज्ञानयोरपिमिथ्याकल्पितत्वंदृ
ष्टमित्युक्तमसदितिभावः । यत्सन्निकृष्टकरणेनयज्ज्ञानमुत्पद्यतेसतस्यविषयइतिविषयलक्षणमभिप्रेत्यशुक्तिकाशकलेतदुप
पादयति ॥ [१४।११] ज्ञानस्येति । भ्रांतावित्येतत्भ्रांतित्वइतिभावप्रधानमभिप्रेत्यव्याचष्टे ॥ [१४।११] ज्ञानस्याप्रामाण्यइति । भ्रांता
वित्युपलक्षणमित्याशयेनोक्तं ॥ [१४।१२] मिथ्याव्यपदेशोचेति । अतएववक्ष्यति । भ्रांतित्वादाविति । कल्पनयातद्विषयस्य अ
वास्तवतयाज्ञानविषयस्येत्यर्थः । रजतस्यात्यंतासत्त्वेनज्ञानस्यतत्सन्निकृष्टकरणजन्यत्वाभावेनरजतादेर्वास्तवविषयत्वाभावा
दितिभावः ॥ [१४।१३] अन्यथेति । विषयवैपरीत्यस्यापिकारणत्वमनंगीकृत्यस्वरूपतोमिथ्यात्वस्यैवाप्रामाण्येमिथ्यात्वव्यपदेशेच
कारणत्वांगीकारइत्यर्थः ॥ [१४।१४] मिथ्याभूतस्येति । ब्रह्मव्यतिरिक्तत्वेनस्वरूपतोमिथ्याभूतस्यापीत्यर्थः । वृत्तिज्ञानस्य ब्रह्मवि
षयकचरमवृत्तिरूपज्ञानस्य ॥ [१४।१४] प्रसंगादिति । विषयवैपरीत्यस्यापिकारणत्वांगीकारेतुस्वरूपतोमिथ्यात्वसत्त्वेपिविषयस्य
ब्रह्मणोऽबाधिततयावैपरीत्याभावेननाप्रामाण्यादिप्रसंगइतिभावः । यथास्वरूपतोमिथ्यात्वसत्त्वेपिविषयवैपरीत्याभावेना
प्रामाण्याभावश्चरमवृत्तिरूपज्ञानेदृष्टइतिविषयवैपरीत्यस्याप्रामाण्यादौकारणत्वंदृष्टं एवंविषयवैपरीत्यसद्भावेपिस्वरूपमि

थ्यात्वाभावेनाप्रामाण्याभावः प्रामाण्यमितियावत् । यदिदृष्टस्स्यात्तर्ह्येवविषयवैपरीत्यमप्रयोजकीकृत्यस्वरूपमिथ्यात्वस्यै वाप्रामाण्यादौकारणत्वंवाच्यंस्यान्नचैवमस्तीत्याह ॥ [१४।३४]नचविषयोन्यथात्वइति । विषयस्यान्यथात्वे यथावस्थितार्थविषयकत्वाभावेनप्रामाण्यमेवनस्यादितिभावः । स्वरूपमिथ्यात्वेपिविषयवैपरीत्याभावात्प्रामाण्यंचरमवृत्तिरूपज्ञानेदृष्टं । विषयवैपरीत्येपिस्वरूपस्यसत्यत्वेनप्रामाण्यंकुत्रापिनदृष्टं । यदिकुत्रचिद्दृष्टंस्यात्तर्ह्येवविषयवैपरीत्यमप्रयोजकंस्यादितिफलितोर्थः॥[१४।३५]तन्मात्रेणेति।विषयवैपरीत्यमात्रेणेत्यर्थः । तदुपपत्तौ अप्रामाण्याद्युपपत्तौ॥[१४।३५]कल्पयतइति । अप्रामाण्यादौप्रयोजकत्वेनकल्पयतइत्यर्थः॥७॥[१४।३८]चिद्रूपावेति।वृत्तिप्रतिबिंबितचैतन्याभिव्यक्ताधिष्ठानचैतन्यरूपा या दृक्तद्विषयत्वंदृश्यत्वमित्यर्थः। ननुवृत्तिविषयत्वंनाम नज्ञानविषयत्वं।किंनाम वृत्तिजन्यफलाश्रयत्वं।ततश्चनब्रह्मणिव्यभिचारइतिशंकते॥[१४।१९]वृत्तिजनितेति॥ [१४।१९]तदभावादिति । ज्ञानव्यतिरिक्तज्ञाततायांमानाभावादितिभावः।आत्मन्यनैकांत्यमुपपादयति ॥[१४।२०]आत्मनोपीति॥ [१४।२०]वृत्तीति।वेदांतजन्यवृत्तीत्यर्थः । अन्यथावेदांतानांवैयर्थ्यंस्यात् । ब्रह्मजिज्ञासेत्यादौकर्मणिषष्ठी आत्मावाअरेद्रष्टव्यइत्यादौतव्यादिश्चनस्यादितिभावः॥ [१४।२०]चिद्रूपेति । अत्रचिद्रूपदृक्विषयत्वंकिंपरंपरयाविवक्षितंसाक्षाद्वा । नाद्यः । यथाअतींद्रियंधर्मादिकंपूर्वंनज्ञातं इदानींतु वेदांतेनज्ञातमित्यनुभवेनज्ञानावच्छेदकत्वेनवाऽज्ञानावच्छेदकत्वेनवाचिद्विषयत्वंतत्रास्त्येवंशुद्धंब्रह्मपूर्वंनज्ञातंइदानींवेदांतेनज्ञातमित्यनुभवेनज्ञाततयाअज्ञाततयावाचिद्रूपदृग्विषयत्वस्यब्रह्मण्यपिसत्त्वेनानैकांत्यप्रसंगात् । नद्वि

तीयः। तस्याप्रामाणिकत्वेनघटादावप्यस्माभिरनंगीकाराद्भागासिद्धिरितिभावः । द्वितीये अस्वप्रकाशत्वंदृश्यत्वमितिपक्षे ॥
[१४।२२] पूर्वोक्तेति । वेद्यत्वंकिंवृत्तिवेद्यत्वंविवक्षितंचिद्वेद्यत्वंवेतिपूर्वोक्तरीत्याविकल्पदोषापातइत्यर्थः । स्वरूपमात्रव्यवहारेस्वा
न्यसंवित्सापेक्षतायाएवसत्त्वेनासंभवःस्यादतःस्वातिरिक्तेत्युक्तं ॥ [१४।२३] संविदंतरेति । विशेषणोपनायकैकमेवाद्वितीयमित्या
दिमानांतरजन्यसंविदंतरेत्यर्थः॥ [१४।२३] निर्विकल्पकेति। अद्वितीयत्वादिविशिष्टव्यवहारेविशेषणोपनायकमानापेक्षासद्भावेपिनि
र्विकल्पकस्वव्यवहारे निष्प्रकारकस्वरूपमात्रव्यवहारइतियावत् तदनपेक्षआत्मेत्यर्थः ॥ [१४।२४] तथैवेति । घटत्वादिविशिष्टव्य
वहारेघटादेःस्वातिरिक्तसंविदंतरापेक्षत्वेपिन निर्विकल्पकव्यवहारेतदपेक्षेत्यसिद्धिरित्यर्थः ॥ [१४।२५] विवादादिति । एतावंतं
कालंसुखमहमस्वाप्समित्यौत्तरिकानुस्मृतिबलेनसुषुप्तौसुखादिविशिष्टतयैवानुभवसिद्ध्यानिर्विकल्पकात्मस्वरूपमात्रानुभव
स्यासिद्धत्वादितिभावः । नन्ववेद्यत्वंनामफलाव्याप्यत्वं अपरोक्षव्यवहारविषयत्वंतुवृत्तिविषयत्वेनभविष्यतीत्यतआह ॥
[१४।२५] कथंचिदव्याहतत्वेपीति । फलव्याप्यत्वस्यप्रागेवदूषितत्वात्कथंचिदित्युक्तं ॥ [१४।२६] विशेषणाभावेनेत्यादि । अपरोक्षव्य
वहारविषयत्वरूपविशेष्यसत्त्वमंगीकृत्यावेद्यत्वरूपविशेषणाभावेनेत्यर्थः । तथाचावेद्यत्वाभावेसपरोक्षव्यवहारविषयत्वंदृश्य
त्वमितिफलितोर्थः । एवंविशेष्याभावेनेत्यत्रापिविशेषणमवेद्यत्वमंगीकृत्यविशेष्यभूतापरोक्षव्यवहारविषयत्वाभावेनदृश्यत्व
निर्वचनेऽवेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वाभावोदृश्यत्वमितिफलितोर्थः । तथोभयाभावेनेत्यत्राप्यवेद्यत्वाभावेसत्यपरोक्ष

व्यवहारविषयत्वाभावोदृश्यत्वमितिफलितोर्थः । तथाचप्रथमपक्षेव्यर्थविशेष्यत्वस्य द्वितीयपक्षेस्वरूपासिद्धे स्तृतीयपक्षेव्यर्थविशेष्यत्वविशेष्यासिद्ध्योर्दूषणत्वकथनंसंगच्छतइतिद्रष्टव्यं ॥ **तस्यचोक्तंदूषणमिति** । वेद्यत्वमात्रस्यचब्रह्मणिव्यभिचाररूपंदूषणमुक्तमित्यर्थः ॥ **व्यर्थविशेष्यत्वमिति** । व्यावर्त्याभावादितिभावः । तर्हिनतद्विशेषणमितिचेत्तत्राह ॥ **विशेष्यासिद्धिश्चेति** ॥ **निराकरिष्यमाणत्वेनेति** । नचस्वरूपमन्यद्वाज्ञेयमित्यादिनेत्यर्थः ॥ **अज्ञातृत्वादिति** । आत्मनोनिर्धर्मकत्वेनतत्रज्ञातृत्वाभावाद्व्यभिचारइत्यर्थः । कल्पितज्ञातृत्वमादायव्यभिचारपरिहारेत्वाह ॥ **अहंकारस्येति** । तस्यापिपक्षनिविष्टत्वेनतत्राज्ञातृत्वाभावादितिभावः ॥ **वस्तुतइति** । वस्त्वंतरप्रतियोगिकोभेदइत्यर्थः । देशतःपरिच्छिन्नत्वाभावोपपादनायसर्वगतेष्वित्युक्तं । कालतःपरिच्छिन्नत्वाभावोपपादनायनित्येष्वित्युक्तं । आकाशादिष्वित्यादिपदेनप्रकृतिवर्णयोर्ग्रहणं । ननुसएवाधस्तात्सउपरिष्टात्ससर्वतः महतोमहीयान् अंतर्बहिश्चतत्सर्वंव्याप्य अजोनित्यश्शाश्वतइत्यादिश्रुत्या अविनाशितुतद्विद्धियेनसर्वमिदंततमित्यादिस्मृत्याचब्रह्मणोदेशतःकालतश्चापरिच्छिन्नत्वंसिद्ध्यतीतिचेत्तत्राह ॥ **श्रुत्यादिकंतूभयत्रसमानमिति** । कालश्चनित्यःप्रकृतिश्चनित्या यावद्ब्रह्मविष्ठितंतावतीवाक् गौरनाद्यंतवतीत्यादिश्रुतिः यत्तत्त्रिगुणमव्यक्तंनित्यंसदसदात्मकं। नकालादेःपरिच्छेदोदेशतःकालतस्तथेत्यादिस्मृतिःकालादेरप्यपरिच्छिन्नत्वेस्तीतिसमानमित्यर्थः । कालादेरपरिच्छिन्नत्वे साक्षिप्रत्यक्षंसदासर्वत्रदेशकालावित्यबाधितप्रतीतिश्चप्रमाणमित्यपिद्रष्टव्यं ॥ **असिद्धिरिति** । वस्त्वंतरप्रतियोगिकपारमार्थिकभेदवत्स्वरूपपरिच्छिन्नत्वस्यपक्षीभूतेजगत्यप्यभावादसिद्धिरित्यर्थः । अयंपटएत

त्तंतुनिष्ठात्यंताभावप्रतियोगीपटत्वात्पटांतरवदितिप्रागाशंकितमनुमानंदूषयति ॥ [९५।६]अस्येति ॥ निष्प्रतियोगि[९५।६]कत्वेनेति ।
असत्प्रतियोगिकत्वेनेत्यर्थः॥ बाधितं[९५।६]मिति। पटेऽसत्त्वाभावस्यैवप्रमितत्वादितिभावः॥ अ[९५।७]कार्यत्वेति । सर्वथाऽकार्यत्वस्य
विशेषनिषेधोशेषविध्यनुमापकइतिन्यायेनान्यकार्यत्वस्यवासिद्धेत्यर्थः ॥ [९५।८]एवंप्रयोगेति । पटादेस्सोपादानत्वेनतन्निष्ठात्यं
ताभावप्रतियोगित्वमुक्तानुमानेनयथासाधितंएवमाकाशादिकंपक्षीकृत्यायमाकाशादिरेतन्निष्ठात्यंताभावप्रतियोगीतिसाधयि
तुंनशक्यते।तस्यनिरुपादानत्वादितिभावः। भेदोमिथ्याभेदत्वाच्चंद्रभेदवत् विवादपदंभेदसंवेदनं भ्रांतिः भेदसंवेदनत्वाच्चंद्र
भेदसंवेदनवदित्यनुमानद्वयंदूषयति॥[९५।८]भेदत्वेति॥[९५।८]सबाधत्वेनेति।दृष्टांतेचंद्रभेदादौसाध्यव्यापकत्वा त्साधनवतःपक्षाद्व्यावृ
त्तत्वेनसाधनाव्यापकत्वाच्चेतिभावः॥[९५।९]तस्यापीति।भेदत्वादिहेतुनैवपक्षेसबाधत्वंसाध्यते।तथाचसाधनव्यापकत्वान्नायमुपाधि
रित्यर्थः॥[९५।९]मिथ्यात्वेनेति।तथाचसबा(ध्यत्वे)धतत्त्वेसाध्येमिथ्यात्वमुपाधिरित्यर्थः। यथामैत्रीतनयत्वेनश्यामत्वेसाध्येशाकपा
कजत्वमुपाधिःतस्मिन्साध्येश्यामत्वमित्यन्योन्योपाधिभावेनाप्यनुमानयोर्दुष्टत्वमेवंप्रकृतेपीतिभावः। विमतंतात्त्विकस्वांतर्भे
दहीनं मतत्वाद्गगनवदित्यनुमानंदूषयति ॥ स्वांतर्भेदही[९५।९]नत्वमपीति । विमतमित्यनेनवियदादिसमुदायस्यपक्षतया
भिप्रेतत्वात्समुदायःस्वांतर्भेदशून्योभवत्येव । स्वस्यस्वेनाभेदस्यैवसत्त्वेनभेदाभावात्सिद्धसाधनतेत्यर्थः । तर्हिस्वांतररिति
विशेषणंपरित्यज्यभेदहीनत्वमात्रमेवसाध्यतइतिचेत्तर्हिंगगनरूपेदृष्टांतेघटादिभेदस्यैवसत्त्वेनसाध्यवैकल्यंस्यादित्याह ॥ भे
दही[९५।१०]नत्वंमात्रेति । स्वांतर्भेदहीनत्वमित्यस्यतात्पर्यांतरमाशंक्यनिराकरोति ॥ [९५।१०]यथाकाशेति । जगत्समुदायोपिसमुदा

यिभूताज्जगतोभेदशून्यइत्यर्थः ॥ [९५।११] साधनइति । समुदायत्वहेतुनेतिशेषः । अत्राकाशस्यैकत्वेनसमुदितत्वात्यथाकाशसमु
दायइत्यादिकमयुक्तमितिदूषणंबहिरेवद्रष्टव्यमित्यभिप्रेत्यदूषणांतरमाह ॥ सिद्धसाधनमिति । तदुपपादयति ॥ [९५।११] समु
दायस्येति । समुदायस्यसमुदायिभ्योभेदाभावसाधनेऽभेदस्यैवप्राप्त्यासिद्धसाधनत्वादित्यर्थः । विमताआत्मानोदेवदत्ता
न्नभिद्यंते आत्मत्वाद्देवदत्तवदित्यनुमानंदूषयति ॥ [९५।१३] विमताइति ॥ [९५।१२] कल्पकैकजीवानिर्धारणइति । एकजीववादिमते
आत्मनःकल्पकैकजीवाभेदःसाधनीयः । कल्पकैकजीवानिर्धारणेचदेवदत्तान्नभिद्यंतइतिविशिष्यप्रतिज्ञा नोपपद्यतइतिभा
वः ॥ [९५।१२] असिद्धमेवेति । एकमेवशरीरंसजीवमन्यानितुनिर्जीवानीतिवदतैकजीववादिनापक्षीभूतानामात्मशब्दवाच्या
नांजडत्वांगीकारेणतेष्वात्मत्वजातेर्वाज्ञातृत्वस्यवाऽसिद्धत्वादितिभावः । अनेनजीवाःपरमात्मनस्तत्त्वतोनभिद्यंते आत्मत्वा
त्परमात्मवदित्यंतिमानुमानमपिप्रत्युक्तंवेदितव्यं । विमतानिशरीराणिदेवदत्तस्यैवभोगायतनानि शरीरत्वात्संमतदेवदत्त
शरीरवत् । एवंविमतानींद्रियाणिप्रत्येकंसमुदितानिचपक्षीकृत्यप्रयोक्तव्यमित्युक्तंदूषयति ॥ [९५।१२] सर्वशरीरादीनामिति ।
आदिपदेनेंद्रियाणांग्रहणं ॥ [९५।१३] साधनेपीति । भोगायतनत्वादिसाधकानुमानेपीत्यर्थः ॥ [९५।१४] परपुरप्रवेशेति । योगसामर्थ्येन
परपुरप्रवेशेनभोगसिद्ध्या ऐक्यासिद्धेरर्थांतरतैवेत्यर्थः ॥ [९५।१४] देवदत्तस्यैवेति । तथाचनपरपुरप्रवेशसिद्ध्यार्थांतरता । परपुर
प्रवेशस्थलेद्वयोर्भोगसद्भावादत्रपुनरेकस्यैवभोगसाधनादितिभावः ॥ [९५।१४] तद्भावसिद्ध्येति । ब्रह्मग्रहवद्देवदत्तस्येतरदेहेष्वधि
ष्ठातृत्वेनभोगसिद्ध्याऐक्यासिद्धेरर्थांतरत्वादित्यर्थः । नहिब्रह्मग्रहस्यस्वाधिष्ठितशरीरस्थजीवेनैक्यमस्तीतिभावः ॥ सर्व

[९५।१५]देतीति । सर्वशरीराणांसर्वदादेवदत्तस्यैवभोगायतनत्वंसाध्यते तथाचनदेवदत्तस्यब्रह्मग्रहसाम्यं । ब्रह्मग्रहस्यसर्वदातच्छ रीरेभोगाभावात् । तथाचऐक्यमेवसिध्यतीतिभावः ॥ [९५।१५]जाग्रत्त्वेति । जाग्रदवस्थायांसर्वदादेवदत्तस्यैवभोगायतनानीति साध्यतइत्यर्थः ॥ [९५।१५]दृष्टांतस्येति । दृष्टांतीकृतेदेवदत्तशरीरेउक्तसाध्याभावात्साध्यवैकल्यमित्यर्थः । उक्तसाध्याभावःकुत इत्यतआह ॥ [९५।१६]तत्रापीति । देवदत्तशरीरेपीत्यर्थः ॥ [९५।१६]ब्रह्मग्रहेति । तथाचजाग्रदवस्थायांसर्वदादेवदत्तस्यैवभोगायतनत्वं नास्ति ब्रह्मग्रहस्यापिभोगसद्भावादितिभावः ॥ ७ ॥ [९५।१७]समानइति । तथाचसत्यत्वेपिप्रमाणंनास्ति बाधकंचास्तीत्यर्थः ॥ [९५।१८]प्रामाणिकत्वेति । विमतंसत्यं प्रमाणदृष्टत्वात् अर्थक्रियाकारित्वादित्याद्यनुमानस्येत्यर्थः । सत्यत्वांगीकारेनकश्चिद्दोष इत्युक्तं कस्यापिदोषस्याभावमुपपादयितुमाह ॥ [९५।१८]नन्वित्यादिना । ननुप्रत्यक्षमिदानींविनाशाभावरूपंसत्यत्वंगृह्णात्येवेति चेत्तत्राह ॥ [९५।१९]सत्यत्वांतरेति ॥ [९५।१९]प्रकृतेति । इदानीमस्माभिःप्रपंचस्यत्रैकालिकनिषेधप्रतियोगित्वरूपबाध्यत्वापरपर्यायमे वमिथ्यात्वंसाध्यते नविनाशित्वरूपंसत्यत्वांतरं । तथाचभवद्भिर्मिथ्यात्वेबाधकतयोच्यमानंप्रत्यक्षंयद्यविनाशित्वरूपंसत्य त्वांतरंगृह्णीयात्तदाप्रकृतंयन्निरुक्तंमिथ्यात्वंतदविरोधित्वादनुपयुक्तमित्यर्थः । ननुदृश्यत्वाद्यनुमानतत्त्वमस्याद्यागमयोरेव बाधकयोस्सत्त्वात्कथंबाधकाभावइत्यतआह ॥ [९५।२०]अनुमानादेरिति । तर्कमात्रतःप्रत्यक्षबाधनइत्यादिनाकालात्ययापदिष्टो च्छेदप्रसंगनोपजीव्यप्रमाणविरोधेनचनिरस्तत्वादित्यर्थः । मिथ्यात्वग्राहिप्रबलप्रत्यक्षमेवबाधकंभविष्यतीतिचेत्तत्राह ॥ [९५।२०]प्रबलेति । ननूत्तरत्रबाधोभविष्यतीतिभाविबाधकशंकैवसत्यत्वग्राहिप्रत्यक्षस्यबाधिकाभविष्यतीत्यतआह ॥ [९५।२०]भविष्य

तीति । नन्विदानींसत्यतयागृह्यमाणस्यापिघटादेरुत्तरत्रविनाशात्कथंविनाशाभावरूपबाधाभावसाधकत्वंप्रत्यक्षस्येत्यतआह ॥ [१५।२३] नहीति । सतः प्रत्यक्षसिद्धसत्त्ववतः । सः कालत्रयसत्तानिषेधः । ननुवर्त्तमानकालेसत्तांगृह्णतःप्रत्यक्षस्यकथंकालत्रयसत्तानिषेधरूपबाधाभावावगाहित्वं । नहिप्रत्यक्षगृहीतैककालीनसत्ता । अनुमानग्राह्यकालत्रयसत्ताप्रतिषेधाभावरूपा । येनसाक्षाद्ग्राह्याभावावगाहित्वेनविरोधित्वंस्यात् । अतःकथमेतदितिचेत् । अत्राहुः । वर्तमानकालेसत्तांगृह्णतःप्रत्यक्षस्यनत्रैकालिकसत्ताप्रतिषेधाभावावगाहित्वेनसाक्षाद्विरोधित्वं किंनाम । त्रैकालिकसत्ताप्रतिषेधाभावव्याप्यभूतैककालीनसत्ताग्राहकतयातद्व्याप्यावगाहित्वेनैवयत्रैककालीनसत्ता । तत्रत्रैकालिकसत्ताप्रतिषेधाभावइतिव्याप्तेरिति । तन्न । तथात्वेवह्निरनुष्णइत्यादिस्थलेप्रतियोगिभूतोष्णत्वग्राहिप्रत्यक्षस्यसाक्षाद्ग्राह्याभावावगाहित्वेनविरोधित्वंसर्वसंमतंतदपिनस्यात् । तत्राप्यनुमानेनत्रैकालिकौष्ण्याभावःसाध्यते स्पार्शनप्रत्यक्षेणतुवर्त्तमानकालीनमेवौष्ण्यंगृह्यते तथाचत्रैकालिकानौष्ण्याभावव्याप्यभूतैककालीनौष्ण्यग्राहकत्वेनैवस्पार्शनप्रत्यक्षस्यविरोधित्वं नसाक्षादितिवक्तुंशक्यत्वात् । वस्तुतस्तुसाक्षाद्ग्राह्याभावावगाहित्वेनैवविरोधित्वं । नचप्रत्यक्षगृहीतैककालीनसत्तायाःत्रैकालिकसत्ताप्रतिषेधाभावरूपत्वाभावात्कथमेतदितिवाच्यं । स्यादिदं यदिसार्वदैशिकीसार्वकालिकीयासत्तातत्प्रतिषेधोबाधइत्येवंदेशकालयोरपिनिषेध्यकोटौप्रवेशःस्यान्नचैवं । किंतुसर्वस्मिन्देशेसर्वस्मिन्कालेचयासत्तातत्प्रतिषेधइत्येवमधिकरणकोटावेव । तथाचसत्ताप्रतिषेधमात्रस्यैवबाधत्वेनप्रत्यक्षेणचसत्तामात्रस्यैवगृहीतत्वेनसाक्षात्सत्ताप्रतिषेधाभावावगाहित्वेनैवविरोधित्वं । एतदेवाभिप्रेत्योक्तं तच्चेन्नोत्तरगोचरमित्य

नुव्याख्यानावतारिकावसरेभक्तिपादीयसुधायां घटादिसत्ताप्रतिषेधरूपस्यबाधस्यतत्सत्ताग्राहिणाप्रत्यक्षेणविरोधावश्यंभा
वादिति । निपुणतरमेतदुपपादितमस्मदाचार्यैस्तट्टिप्पण्यांतत्रैवानुसंधेयं । किंतुकालत्रयसत्ताप्रतिषेधइतिवाक्यमपिकालत्र
येयासत्तातत्प्रतिषेधइतिव्याख्येयं । स्वकालेह्यस्तितांगृह्णन्साक्षात्कारस्त्रिकालगं । प्रतिषेधंनिरुंधानोगृह्णात्येवात्यबाध्यता
मितिन्यायामृतकारिकाश्लोकस्याप्येवमेवाभिप्रायोवर्णनीयः । प्रामाणिकत्वानुमानंबाधकपरिहारेणसमर्थयितुमाशंकते ॥
[९५।२२] प्रामाणिकत्वातिरिक्तमिति ॥ [९५।२४] प्रामाणिकत्वातिरिक्तेति । अर्थक्रियाकारित्वरूपेत्यर्थः ॥ [९५।२४] अन्यथेति । प्रामा
णिकत्वातिरिक्तसत्यत्वाभावइत्यर्थः ॥ [९५।२४] प्रमाणप्रवृत्तीति । प्रपंचेप्रमाणंप्रवर्ततेशशविषाणेतुनप्रवर्ततेतत्कुतइतिपृष्टे प्रमाण
प्रवृत्तियोग्यतापादकंसत्त्वंप्रपंचेऽस्ति शशविषाणेतुनास्तीतिवक्तव्यं । अन्यथाप्रपंचस्यशशविषाणाद्यविशेषापत्त्याप्रमाणप्रवृ
त्तेरेवायोगादतःप्रमाणप्रवृत्तियोग्यतावच्छेदकत्वेनप्रामाणिकत्वातिरिक्तंसत्यत्वमंगीकार्यमितिभावः ॥ [९५।२४] प्रामाणिकत्वाभा
वादिति । अवेद्यत्वेनप्रमाणजन्यज्ञानविषयत्वाभावादित्यर्थः ॥ [९५।२५] केवलव्यतिरेकित्वोपपत्तेरिति । तत्रचशुक्तिरजता
दिकंदृष्टांतइतिद्रष्टव्यं । ननुतर्हिंव्यतिरेकेऽसाधारण्यंस्यात् । तथाहि । यत्रसत्यत्वाभावस्तत्रप्रामामाणिकत्वाभावइतिव्यतिरे
कव्याप्तौप्रामाणिकत्वाभावरूपसाध्यवत्त्वेनसपक्षभूतेब्रह्मणिसत्यत्वाभावरूपहेतोरवर्त्तमानत्वादित्यतउक्तं ॥ [९५।२५] असाधारण्य
स्यदूषणत्वाभावपक्षइति।नित्यव्यावृत्तगंधवत्त्वाद्भूःकिमनित्योतानित्यव्यावृत्तगंधवत्त्वाद्भूःकिंनित्यावेतिवत् सत्यव्यावृ
त्तप्रामाणिकत्ववत्त्वाद्विमतंकिंमिथ्या उतमिथ्याभूतरजतादिव्यावृत्तप्रामाणिकत्ववत्त्वात्।विमतंकिंसत्यंवेतिसांशयिकत्वेनसा

ध्यनिश्चयेप्रतिबंधकतयाऽसाधारण्यस्यदूषणत्वंवक्तव्यं । तत्रयद्येककोटौविशेषदर्शनाद्यनुकूलतर्कावतारस्तर्ह्यनुमितिर्भवत्येवेतिनासाधारण्यस्यदोषत्वं । एवंचप्रकृतेसत्यत्वाभावेशशविषाणाद्यविशेषापत्त्याप्रमाणप्रवृत्त्ययोगेनप्रमाणप्रवृत्तियोग्यतावच्छेदकत्वेनसत्यत्वस्यैवसिद्धिरित्यनुकूलतर्करूपविशेषदर्शनसद्भावेनसत्यत्वकोटेरेवसिद्ध्या संदेहानुपपत्तौसत्यत्वानुमितेरेवोत्पत्त्याऽसाधारण्यस्यादोषत्वेनकेवलव्यतिरेकित्वोपपत्तेरित्यर्थः । यथोक्तंमणौसुवर्णतैजसवादे । संशयःसत्प्रतिपक्षोवाऽसाधारण्यस्यदूषकतायांद्वारं । तच्चेहविशेषदर्शनादसंभवीत्यसाधारण्यंनदोषायेति । साधनवैकल्यमंगीकृत्यकेवलव्यतिरेकित्वोपपत्तेरित्युक्तं। वस्तुतस्तुतदेवनास्तीत्याह ॥ **ब्रह्मणश्चेति** ॥ **नेतीति** । शशविषाणवदसत्त्वप्रसंगोनेतिभावः। स्वस्मिन् स्वविषये । कारकता ज्ञानरूपक्रियाजनकता ॥ **परेणेति** । निर्विशेषवादिनापरेणकर्तृत्वकर्मत्वयोरेकत्रविरोधेनानंगीकारादितिभावः ॥ **एवंसिद्धिःस्यादिति** । स्वेनैवसिद्धिस्स्यादित्यर्थः ॥ **प्रमाणाभावेसत्यत्वंनस्यादित्यस्येति** । ब्रह्मणोप्रामाणिकत्वेशशविषाणवदसत्यत्वापत्त्यासत्यत्वसिद्धिर्नस्यादितिप्रसंगस्येत्यर्थः । सिध्यति सत्यत्वमितिशेषः । कुतोनुत्तरत्वमित्यतआह ॥ **सिद्ध्युपायांतरस्येति** । प्रामाणिकत्वाभावेपिप्रकारांतरेणतत्सिद्धिर्भविष्यतीत्येवंतत्सिद्धावुपायांतरमेवोत्तरत्वेनोपन्यसनीयं नतुप्रमाणेनविनासिद्धिरित्यर्थः ॥ **प्रकारद्वयेति** । स्वेनैवप्रकाशःप्रमाणेनविनाप्रकाशइतिप्रकारद्वयेत्यर्थः । नन्वथापिविमतंसत्यंप्रामाणिकत्वादित्यत्रतत्त्वावेदकप्रमाणदृष्टत्वंहेतुतयाविवक्षितं । अतत्त्वावेदकप्रमाणदृष्टत्वंवा । नाद्यइत्याह ॥ **तत्त्वावेदकेति** । परस्य मायावादिनः । प्रपंचावेदकप्रत्यक्षादि

प्रमाणानांतत्त्वावदेकत्वानंगीकारादित्यर्थः । नापिद्वितीयइत्याह ॥ अतत्त्वावेदकेति ॥ व्यभिचारीति । अ(तत्त्वे)सत्येशुक्तिरजतादावित्यर्थः ॥ असिद्धिरेवेति । प्रपंचेप्रमाणदृष्टत्वाभावादितिभावः ॥ उक्तत्वादिति । अनुमानादेःप्रत्यक्षबाधकत्वाभावादित्यर्थः ॥ अन्यथेति । बाधकाभावेप्यप्रमाण्योक्तावित्यर्थः ॥ एतेनेति । तत्त्वमस्यादिवाक्यानुमानरूपबाधकाभावेनेत्यर्थः ॥ भेदपरंपरयेति । भेदःकिंभेदिभ्यांभिन्नोवाऽभिन्नोवेत्यादिपरंपरयेत्यर्थः ॥ अपसिद्धांतइति । मिथ्यासत्ययोरभेदानंगीकारादितिभावः ॥ उक्तत्वादिति । पदार्थस्वरूपत्वाद्भेदस्येत्यादिनेत्यर्थः । जगतोभिन्नमभिन्नंवेत्यादिविकल्पस्तत्रापियुज्यतइतितत्त्वोद्द्योतवाक्यंमनसिनिधायाह ॥ किंचैवमिति । भिन्नत्वेभेदपरंपरयानवस्था अभिन्नत्वेऽपसिद्धांतः भिन्नाभिन्नत्वेव्याघातः उभयविलक्षणंचेद्ब्रह्मणएवानिर्वचनीयत्वमापततितमित्यर्थः । उक्तदोषान् ब्रह्मप्रपंचाद्भिन्नमभिन्नंवेत्यादिविकल्पदोषान् । दोषान् प्रपंचोब्रह्मणोभिन्नोभिन्नोवेत्यादिविकल्पदोषान् ॥ जडत्वादिति । अप्रकाशस्वरूपत्वादित्यर्थः ॥ प्रकाशांतरेणेति । वृत्तिरूपज्ञानाख्येनेत्यर्थः । चित्प्रकाशेति । अधिष्ठानचैतन्यरूपप्रकाशेत्यर्थः ॥ अधिष्ठानेत्यादि । आध्यासिकसंबंधेनेत्यर्थः । प्रकाशः प्रकाशरूपः ॥ अनभ्युपगमादिति । जडस्यप्रपंचस्यप्रकाशरूपत्वप्रकाशाश्रयत्वयोरनभ्युपगमादित्यर्थः । चैतन्यं अधिष्ठानचैतन्यं ॥ बाधकाभावादिति । सत्यत्वेकथंप्रकाशेतेत्यस्यकथंचैतन्यरूपप्रकाशविषयःस्यात् । चैतन्यरूपप्रकाशविषयोनस्यादितियावदितिह्यर्थः । त

थाचसत्यस्यापिचैतन्यरूपप्रकाशाविषयत्वेबाधकाभावेनतर्कस्येष्टापत्तिरितिभावः । ननुचैतन्याविषयत्वेघटादिव्यवहारएव नस्यात् व्यवहारस्यव्यवहर्त्तव्यज्ञानसाध्यत्वादित्येवंव्यवहारान्यथानुपपत्तिरेवबाधिका ततश्चतदन्यथानुपपत्त्याचित्प्रकाशविषयत्वमंगीकार्यमितिनेष्टापत्तिरित्यतोन्यथैवोपपत्तिमाह ॥ [९६।१३] **वृत्तीति** । वृत्तिरूपज्ञानविषयत्वेनैवेत्यर्थः । ननुचक्षुरादिजन्यवृत्त्यविषयेसुखादौकथंव्यवहारःस्यादित्यतआह ॥ [९६।१४] **चैतन्यस्यापीति** । साक्षिरूपचैतन्यस्यापीत्यर्थः । विषयित्वं सुखादिविषयकत्वं । तथाचसुखादेःसाक्षिविषयत्वेनव्यवहारःसंभवतीतिभावः । नन्वसंगोह्ययंपुरुषइतिश्रुत्यासाक्षिचैतन्यस्यासंगत्वावगमात्कथंतस्यचैतन्यस्यसुखादिविषयसंबंधइत्यतआह ॥ [९६।१४] **असंगश्रुतिस्त्विति** । असंगत्वश्रुतिस्त्वित्यर्थः । सत्यत्वेवृत्तिरूपप्रकाशविषयःकथंस्यादितिद्वितीयपक्षोप्ययुक्तइत्याह ॥ [९६।१४] **द्वितीयइति** ॥ [९६।१५] **करणसामर्थ्येनेति** । घटसन्निकृष्टकरणजन्यत्वेनैववृत्तेर्घटविषयकत्वोपपत्तेरित्यर्थः । असत्यत्वेतुचित्प्रकाशारोपितस्येत्यादिनोक्तमाध्यासिकसंबंधेनप्रकाशंदूषयति ॥ [९६।१५] **अध्यस्तत्वेनेति** ॥ [९६।१५] **जीवेध्यासपक्षइति** । जीवचैतन्यमविद्योपाधिकंसत्सर्वगतं अंतःकरणोपाधिकंतुपरिच्छिन्नमित्यंगीकृतत्वेनाविद्योपाधिकसर्वगतजीवचैतन्येऽध्यासपक्षेजीवचैतन्यस्यैकत्वात्स्वस्मिन्नध्यस्तःप्रपंचःस्वस्यसर्वदाप्रकाशेतेत्यर्थः ॥ [९६।१५] **नकदाचिदिति** । अधिष्ठानभूतब्रह्मणइंद्रियजन्यज्ञानाविषयत्वेनतदध्यस्तस्यप्रपंचस्यनकदाचिदपिप्रकाशःस्यादित्यर्थः ॥ [९६।१६] **सर्वदेति** । उक्तरीत्यायस्मिन्जीवचैतन्येऽध्यस्तःप्रपंचस्तस्यजीवस्यसर्वदाप्रकाशेतेत्यर्थः ॥ [९६।१६] **सर्वेषामिति** । घटाधिष्ठानभूतजीवचैतन्यस्यसर्वसाधारणत्वेनतत्रारोपितःप्रपंचःसर्वेषांप्रकाशेतेत्यर्थः । इदंचदूषणंनैकजीववादिनोमतेसंभव

ति । कल्पकजीवव्यतिरिक्तजीवानामभावादितिज्ञातव्यं ॥ [९६।१६] ब्रह्माधिष्ठानत्वेत्विति । तस्येंद्रियजन्यज्ञानाविषयत्वेनतत्रारोपितःप्रपंचःकस्यापिकदापिनप्रकाशेतेत्यर्थः । ननुप्रपंचस्यजीवएवाध्यासः नचसर्वदासर्वेषामुपलब्धिप्रसंगः दृष्टिसृष्ट्यंगीकारेणयदायस्यदृष्ट्यायज्जन्यतेतदातेनैवतद्गृह्यतइतिव्यवस्थोपपत्तेरित्यतआह ॥ [९६।१६] दृष्टिसृष्टिपक्षस्त्विति । कुतोनशक्यइत्यतआह ॥ [९६।१७] कल्पकैकेति । सुप्त्यादावित्यादिपदेनमूर्छाग्राह्या ॥ [९६।१७] प्रपंचाभावप्रसंगादिति । दृष्टिरूपकारणाभावेनोद्बोधकस्यासंभवेसर्वदासुप्तिप्रसंगेनकल्पकजीवसुप्त्यनंतरंप्रपंचाभावप्रसंगादित्यर्थः । नापिबहुजीववादिना दृष्टिसृष्टिपक्षोवक्तुंशक्यइत्यन्वयः । कुतइत्यतआह ॥ [९६।१७] प्रत्यभिज्ञासंवादयोरिति । दृष्टिसृष्टिपक्षे यावद्दृष्टिस्तत्पर्यंतमेवघटादेःसत्त्वेनदृष्टिनाशेतस्यनष्टत्वात्कालांतरेसएवायंघटइतिप्रत्यभिज्ञाभवतिसानस्यात् । तद्दृष्टिसृष्टस्यघटस्यतन्मात्रविषयत्वेनतद्विषयकज्ञानरूपःकथमपरस्यसंवादश्चस्यादित्यर्थः । प्रपंचस्यजीवेऽध्यासपक्षेब्रह्मण्यध्यासपक्षेचनानुपपत्तिः । नचसर्वदासर्वेषांप्रकाशःकदाप्यप्रकाशोवास्यादितिवाच्यं । यस्यांतःकरणवृत्तिर्यदाचक्षुरादिद्वाराप्रमातृचैतन्योपरूढासतीबहिर्निर्गत्यघटादिविषयाधिष्ठानचैतन्यगताऽविद्यांतिरस्करोति अनंतरंवृत्त्युपारूढंप्रमातृचैतन्यमधिष्ठानचैतन्येनैकीभवति तदैवतस्यैवघटप्रकाशोभवति अतोनसर्वदासर्वेषांप्रकाशः वृत्तेरेवातिप्रसंगभंजकत्वादित्याशंकते ॥ [९६।१८] अर्थोच्येतेति । अंतःकरणं प्रमातृचैतन्याधिष्ठितमितिपूरणीयं । अन्यथाऽविद्यानाशकत्वानुपपत्तेः । सर्वंचैतन्यमेकीभवतीत्युत्तरग्रंथास्वारस्याच्च । तथाहि । केवलायावृत्तेरविद्यानाशकत्वाभावात्केवलचैतन्यस्यचाज्ञानस्फोरकत्वेनाज्ञाननाशकत्वाभावाद्वृत्त्युपारूढचैतन्यस्यैवाज्ञान

नाशकत्वंवाच्यं । सूर्यकांतोपारूढायास्सूर्यदीप्तेस्तृणादिदाहकत्ववत् । यथोक्तंपरेण तृणादेर्भासिकाप्येपासूर्यदीप्तिस्तृणंद
हेत् । सूर्यकांतमुपारुह्यतंन्यायंचितियोजयेदिति ॥ [९६।१८] विषयगतामिति । विषयावच्छिन्नचैतन्यगतामित्यर्थः । जडस्या
प्रकाशस्वरूपत्वेनप्रकाशप्रसक्तेरेवाभावेनप्राप्तप्रकाशप्रतिबंधरूपावरणकृत्याभावान्नजडावरकाज्ञानमस्ति । यथोक्तमनुव्या
ख्याने । अप्रकाशस्वरूपत्वाज्जडेऽज्ञानंनमन्यतइति । अतस्तदवच्छिन्नचैतन्यएवाज्ञानमितितन्मतस्थितेरित्यर्थः ॥ [९६।१९] सर्वंचै
तन्यमिति । वृत्त्युपारूढंज्ञातृचैतन्यंघटादिविषयाधिष्ठानचैतन्यंचैकीभवतीत्यर्थः । अंतःकरणभेदेन अंतःकरणवृत्तिभेदेन ॥
[९६।१९] प्रतिकर्मव्यवस्थेति । अस्यज्ञानस्यायमेवविषयोनान्यइतिप्रतिज्ञानविषय व्यवस्थेत्यर्थः । यथोक्तंपरैः । स्वच्छेंतःकरणे
ऽशनिप्रसृमरेनेत्रादिमार्गोद्गतेतत्तद्वाह्यचयात्मनापरिणतेबिंबीभवंतीचितिः । एकाप्यर्थमनोविशेषकवशाद्द्वैतंप्रपन्नाहरत्यज्ञा
नंप्रकटीकरोतिविषयान्ज्ञातंमयेदंत्वितीति । अशनिप्रसृमरे विद्युत्समाने । नेत्रादिद्वारेणबहिरुद्गते तत्तद्घटादिबाह्यवस्तुस
मुदायात्मनापरिणते अशनिसमानत्वादेवतैजसत्वात्स्वच्छेंतःकरणे ऽतःकरणवृत्तौ बिंबीभवतीतिचितिःप्रमातृचैतन्यमिति
यावत् । स्वयमधिष्ठानचैतन्येनैकाप्यर्थमनोवृत्तिलक्षणव्यावर्तकवशात् विषयाधिष्ठानचैतन्यं मनोवृत्त्युपारूढंचैतन्यमिति
द्वैतं भेदं प्रपन्नासती विषयाधिष्ठानचैतन्यगतमज्ञानंहरति । पश्चादधिष्ठानचैतन्येनैकीभूतासती मयेदंज्ञातमितिवि
षयान्प्रकाशयतीतिश्लोकार्थः । अन्यत्रापिवृत्तिस्वरूपमुक्तं । यथातटाकोदकंकुल्यात्मनाबहिर्निर्गत्यकेदारान्प्रविश्यतद्व
देवचतुष्कोणत्वाद्याकारेणपरिणमतेंतद्वत्सावयवंतैजसमंतःकरणंचक्षुरादिद्वाराबहिर्निर्गत्यविषयंव्याप्यतदाकारंभवति । से

यंवृत्तिरिति ॥ [९६।२०] तेनैवदृश्यत्वोपपत्ताविति । सर्वदोपलब्ध्याद्यतिप्रसंगवारणायावरणभूताज्ञाननिवृत्तिद्वाराचैतन्याभिव्यक्त्यर्थमावश्यकेनांतःकरणवृत्तिसंनिकर्षेणैव तज्जन्यज्ञानेनैवेतियावत् प्रपंचस्यसत्यत्वेपिदृश्यत्वोपपत्तावित्यर्थः । ननुतस्यभासेत्यादिश्रुतस्याधिष्ठानचैतन्यस्यभासाप्रकाशेनेदंसर्वंघटादिजगद्भातीतिश्रुत्याचित्प्रकाशारोपिततयाजगत्प्रकाशोक्तेश्चैतन्येऽध्यस्तत्वसिद्धिरितिचेत्तत्राह ॥ [९६।२१] तस्यभासेति ॥ [९६।२१] अन्यविषयत्वादिति । तस्यहरेर्भासासर्वमिदंसूर्यादिकंविभातिप्रकाशते तथातदधीनसूर्यादिभासासर्वमिदंजगद्विभातिप्रकाशतइत्येवंभगवतःसूर्यादिप्रकाशकत्वादेरेवतदर्थत्वादितिभावः ॥ [९६।२१] अतीतादिषुचेति । तत्रचक्षुरादेःकरणस्यविषयसन्निकर्षाभावेनांतःकरणवृत्तेस्तत्रायोगेनतदज्ञाननिवृत्त्यनुपपत्तावधिष्ठानचैतन्यप्रकाशेनतत्प्रकाशानुपपत्त्यातज्ज्ञानंनस्यात्।तत्राप्युक्तविधवृत्त्याऽधिष्ठानचित्प्रकाशेनप्रकाशांगीकारेपरोक्षचित्संबंधेनातीतानामप्यापरोक्ष्यंस्यादितिभावः । ननुतथापिनजगतस्सत्यत्वंयुक्तं । तथाहि । यदिजगत्सत्यंस्यात्तर्हिब्रह्मजगच्चेतिसत्यवस्तुद्वयांगीकारापत्त्यागौरवंस्यादितिबाधकतर्कसद्भावादित्याशंकते ॥ [९६।२२] गौरवमिति ॥ [९६।२२] लघीयानिति । ब्रह्मसत्यंजगन्मिथ्येतिद्वैरूप्यांगीकारेगौरवापत्त्याशून्यवादिरीत्या आत्मनोपिमिथ्यात्वांगीकारेतिलाघवमित्यर्थः । प्रामाणिकत्वात् तत्सत्यंसआत्मेत्यादिप्रमाणसिद्धत्वादित्यर्थः । आत्मसत्यत्वं आत्मसत्यत्वांगीकारः ॥ [९६।२३] सम्ममिति । विश्वंसत्यमित्यादिप्रमाणेनविश्वसत्यत्वस्यापिप्रामाणिकत्वात्तदंगीकारेपिनगौरवंदोषावहमितिभावः॥ ७ ॥ तन्मतेपि केवलभेदमाचक्षाणानांमतेपि । ननुकेवलभेदवादिनांभेदाभेदवादिनामपिबहुजीववादित्वेनतन्मतंकस्मान्नदूष्यतइत्यतआह ॥ [९६।२४] शुद्धे

ति । केवलेत्यर्थः ॥ **सिद्धएवेति** । संमतएवातोननिराकार्यइतिभावः । तदंगीकृतंबहुत्वंस्वाभाविकमौपाधिकंवेविकति ल्प्याद्येदोषमाह ॥ **बहुत्वांगीकारइति** । बहुत्वस्यस्वाभाविकत्वांगीकारेसत्यत्वप्राप्त्याऽपसिद्धांतापातादित्यर्थः । द्विती यमाशंकते ॥ **यथाबिंबप्रतिबिंबयोरित्यादिना** ॥ **उपाधीति** । दर्पणाद्युपाधीत्यर्थः ॥ **सर्वव्यवस्थेति** । गुरुशिष्या दिव्यवस्था बद्धमुक्तव्यवस्थाचेत्यर्थः । आद्येऽपसिद्धांतादित्युक्तंदूषणंमूलसूचितमित्याह ॥ **हिशब्देनेति** । विपक्षे उपा धेःसत्यत्वांगीकारे । ननु मिथ्योपाधिकृतोभेदोनदृष्टइत्यत्रोपाधिकृतोभेदोवर्तते परंतुमिथ्योपाधिकृतोभेदोनास्तीतिमूला भिप्रायःप्रतीयते । तथात्वेभेदश्चोपाधितःकुतइत्यादिनाविरोधापत्तेस्तदभिप्रायमाह ॥ **उपाधिकृतएवेति** ॥ **नत्विति** । येनभेदश्चोपाधितःकुतइत्यादिस्ववचनविरोधःस्यादितिभावः । स्वाभाविकत्वमुपपादयति ॥ **दृश्यतेहीति** । बिंबप्रतिबिं बयोरभेदंसदृष्टांतंप्रत्यभिज्ञयोपपादयति ॥ **नन्विति** ॥ **यत्स्वलक्षणइति** । करचरणाद्यवयवसंनिवेशरूपयत्स्वलक्षणयु क्ततयाप्रतिपन्नइत्यर्थः ॥ **तथादर्पणतलेति** । यत्स्वलक्षणंमुखंग्रीवायांप्रतिपन्नंतत्स्वलक्षणमेवादर्शेप्रतिपन्नोस्मीतिप्रत्यभि ज्ञयाप्रतीयतइत्यर्थः । वस्त्वंतरत्वे प्रतिबिंबस्य । बिंबादत्यंतभिन्नत्वइत्यर्थः ॥ **दर्शयतीति** । पारमार्थिकंयत्प्रतिबिंब स्यबिंबैकरूपत्वंतद्दर्शयतीत्यर्थः । नभसोमध्यंगतमित्यन्वयः । तथाचात्रोद्यदादाविववारिस्थेप्रतिबिंबेप्यादित्यपदप्रयोगादि तिभावः । आदित्यपदस्यात्रानुवृत्तिसूचनार्थमेवसमग्रवाक्योदाहरणमितिज्ञातव्यं। वस्त्वंतरत्वे प्रतिबिंबस्यबिंबाद्भिन्नत्वे।तदा कारगर्भितो बिंबाकारगर्भितः । अंतर्गतबिंबाकारइत्यर्थः । इतिवाच्यं इत्येववाच्यं । प्रकारांतराभावादितिभावः । ननुक

थंप्रकारांतराभावः । यथावस्त्रादौप्रतिमुद्रायाःबिंबभूतमुद्रालांछितत्वमेवास्ति । नतुप्रतिमुद्रागर्भिततयावस्त्रादेःपरिणा
मः । एवमादर्शेपिबिंबभूतमुखलांछितत्वमेवास्तु नतुतद्गर्भिततयापरिणामइत्यतआह ॥ [९७।१३] **विरुद्धेति** । बिंबभूतमुद्रायाःप्र
तिमुद्रापेक्षयाविरुद्धपरिमाणत्वाभावोवस्त्रादीनांसंश्लेषश्चबिंबभूतमुद्रालांछितत्वोपयोगीतिष्ठतिनतथातत्रास्ति मुखप्रतिमु
खयोर्विरुद्धपरिमाणोपेतत्वात् । बिंबस्यादर्शसंश्लेषाभावाच्च । बिंबलांछितत्वानुपपत्त्यातदाकारगर्भितएवपरिणमतइति
वाच्यमित्यर्थः । अस्त्वेवंततःकिमित्यतआह ॥ [९७।१४] **तथासतीति** । दर्पणस्यबिंबाकारगर्भिततयापरिणतत्वेसतीत्यर्थः । परिण
तिः आदर्शपरिणामःप्रतिबिंबः । तदपाये बिंबसन्निध्यपाये । परिणतिरेवेत्येवकारस्यावतिष्ठेतैवेतिसंबंधः । तयोर्भेदांगीका
रादितिभावः । नचबिंबसन्निधेरादर्शपरिणामेनिमित्तकारणत्वेनतन्नाशेकार्यस्यापिनाशान्नावस्थानमित्यतआह ॥ [९७।१४] **नहीति** ।
दंडादिनाशेघटादिनाशादर्शनादित्यर्थः । नन्वस्त्वेवंबिंबप्रतिबिंबयोरभेदः किंततःप्रकृतइत्यतआह ॥ [९७।१५] **तदेवमिति** ॥ अं
गीकर्तव्यइतीति । तथाच नचोपाधिकृतोभेदःक्वापिदृष्टइत्युक्तमसदितिभावः ॥ [९७।१६] **सादृश्यप्रतीतिरिति** । बिंबप्रतिबिं
बयोरभेदसाधनायेतिशेषः । सिद्धिः सादृश्यप्रतीत्येतिशेषः । द्वितीयः प्रत्यभिज्ञारूपानुभवः । अन्यथा भेदस्यैवाप्रतीतौ ॥
[९७।१८] **कथमिति** । विरोधादितिभावः । गौणोऽमुख्यः । नचोद्यदादिप्रायपाठविरोधः । बिंबप्रतिबिंबभेदावगाहिप्रत्यक्षस्यप्रा
बल्येनप्रायपाठस्यापितेनबाधोपपत्तेरितिभावः । गौणव्यपदेशेनैवभेदावगाहिप्रत्यक्षबाधःकिंनस्यादित्यतआह ॥ [९७।१९] **व्यपदेश**

मात्रस्येति ॥ [१।१।१८] तत्प्रसंगादिति। आदित्योयूपइत्यभेदव्यपदेशआज्यांजननिमित्तौज्वल्यरूपसारूप्येणामुख्यः तथाचतस्या
प्यभेदव्यपदेशस्यादित्ययूपभेदावगाहिप्रत्यक्षबाधकताप्रसंगादित्यर्थः । आदर्शएवबिंबसन्निधिवशात्तदाकारगर्भितःपरिण
मतइत्यस्य तथासतिबिंबसन्निधिलब्धपरिणतिरेवतदपायेप्यवतिष्ठेतेत्युक्तदूषणंपरिहरति ॥ [१।१।१९] यथेति । आदर्शपरिणतिहेतुः
आदर्शस्यप्रतिबिंबाकारेणपरिणतौहेतुरित्यर्थः । तदपायो बिंबसन्निध्यपायः । गर्भितता आदर्शस्य । नहिनि
मित्तापायेकार्यनाशोस्तीत्युक्तदोषंपरिहरति ॥ [१।१।२०] यथेति । तदपाये मूषाग्निसन्निधानरूपनिमित्तकारणापाये । तथाच
निमित्तकारणनाशेनकार्यनाशोदृष्टइतिभावः । ननुसुवर्णरजतादौदृष्टांतेविद्यमानमपिनिमित्तकारणनाशेनकार्यनाशदर्श
नंनाद्रियतइत्यतआह ॥ [१।१।२१] दर्शनानादरइति ॥ [१।१।२२] स्थायित्वमपीति । बिंबसन्निधिलब्धपरिणतिरेवतदपायेप्यवति
ष्ठेतेत्येवंबिंबसन्निधिलब्धपरिणतेर्बिंबसन्निध्यपायेस्थायित्वमपिकस्यबलेनापाद्यते । निमित्तापायेपिकार्यानाशस्यैवदर्शना
दित्येवंदर्शनबलेनापाद्यतइतिवक्तव्यं । तदनादरेएतदपिनस्यादितिभावः । यथादर्शनं दर्शनानुसारेण ॥ [१।१।२३] समवा
यीत्यादि । समवायिकारणनाशात्कार्यनाशोयथा तंतुनाशात्पटनाशः । असमवायिकारणनाशाद्यथा तंतुद्वयसंयो
गनाशात्पटनाशः । निमित्तकारणनाशाद्यथा अपेक्षाबुद्धिनाशाद्द्वित्वनाशः । यथावामूषाग्निसंनिधाननाशेनसुवर्णादी
नांद्रवावस्थानाशइतिद्रष्टव्यं । तत्सन्निधिनाशात् तत्सन्निधीनांनाशादित्यर्थः । तथाचोपाधिनाशात् बिंबनाशात्
तयोस्सन्निधिनाशाच्चनाशोंगीकर्तव्यइतिप्रत्येकंसंबंधोद्रष्टव्यः ॥ [१।१।२४] निरुपाख्यःस्यादिति । तथात्वेहिसकलसामर्थ्य

विधुरत्वेनारोपजनकत्वंनस्यादितिभावः ॥ अशेषव्यवस्थेति । गुरुशिष्यादिव्यवस्थेत्यर्थः ॥ अनात्मतयेति । अहमर्थरूपात्माश्रितत्वेनात्मभिन्नतयेत्यर्थः । कल्पनादीत्यादिपदेनोक्तव्यवस्थाग्रहणं । ऐंद्रजालिकः पुरुषः ॥ पूर्वमिति । सादृश्यंचद्रव्यत्वादिकंकिंचिच्छंखादीनांपीतादीनांचास्त्येवेतिग्रंथानंतरमेवेत्यर्थः। स्कंधः प्रभेदः। आभ्यंतरो दुःखादिः। बाह्यः घटादिः ॥ भेदोस्तीति । सर्वोपिप्रपंचोसाधारणएवेतिभावः । आध्यात्मिको दुःखादिः । असाधारणः तन्मात्रवेद्यः। साधारणः सर्ववेद्यः । नयुज्यते द्विस्कंधचैतन्यवादिमते ॥ बाह्येति । त्रिस्कंधचैतन्यवादिमतइत्यर्थः ॥ ततएवेति । अधिष्ठानप्रधानयोरभावादेवेत्यर्थः । नन्वैंद्रजालिकपुरुषनिर्मितायांमायामय्यांसृष्टावधिष्ठानाद्यभावात्तदृष्टांतेनमायामय्यामीश्वरसृष्टावपितदभावःकिंनस्यादित्यतोदृष्टांतएवासंमतइतिवक्तुंप्रवृत्तस्यमायामयीसृष्टिरपीतिवाक्यस्यतात्पर्यमाह ॥ मायामयसृष्टावपीति । ऐंद्रजालिकसृष्टावपीत्यर्थः ॥ अत्रेति । बहुजीववादिमतनिराकरणावसरइत्यर्थः ॥ एवंतथ्यवस्तुद्वयंविनेति । अनेनारोप्येणसदृशमधिष्ठानं चशब्देनसूचितंसदृशंप्रधानंचेति तथ्यवस्तुद्वयंविनेति इतिशब्दाध्याहारेणमूलयोजनासूचिताभवतीतिद्रष्टव्यं । आंतरंयदसाधारणंतस्मिन् । तत्प्रदर्शयितुं तांव्यतिरेकव्याप्तिंदर्शयितुं ॥ अपि रभिव्यासाविति । भ्रमांतरस्यादिपदेनगृहीतत्वान्नसमुच्चयार्थत्वंसंभवतीत्यर्थः । तथाचस्वप्नमायादीत्यादिपदोक्तस्यासंकोचव्यंजनमपिशब्दार्थइतिभावः । उभयं स्वप्नमायेत्युक्तमुभयं । उभयत्राप्यधिष्ठानसद्भावमितियावत् ॥ पूर्ववदिति ।

सत्यत्वेप्रागूर्ध्वमुपलंभप्रसंगइतिदूषणपरिहारायेत्यर्थः ॥ **इत्युक्तमिति** । मानसवासनामयत्वोक्त्यापूर्ववत्परिहारोज्ञातव्यः। मूलं मूलिका। चीरं वस्त्रखंडः । अवयवाः एकदेशाः। व्याघ्रत्वादेरित्यादिपदेनबिडालत्वादिग्रहणं ॥ **यस्मादित्यर्थइति** । तथाचतेनेतिसंगच्छतइतिभावः ॥ **अवधारणेवेति** । अन्यथाव्याप्तिप्रदर्शनासिद्धेरितिभावः । ननुसदापदंव्यर्थं । नच मायावीमायामयंपरोक्षतस्तदानींजानातीतिव्यभिचारपरिहारायसदेत्युक्तमितिवाच्यं । दृश्यते पश्यतीत्यपरोक्षज्ञानोक्त्यैव व्यभिचारपरिहारात्तद्व्यर्थमेवेत्यतआह ॥ **सदेतिस्वरूपकथनमिति** ॥ **दृशिग्रहणमिति** । दृश्यतइतिदृशिग्रहणमित्यर्थः। कथंतेनव्यभिचारपरिहारइत्यतआह ॥ **दृशिर्हीति** । मायावीमायामयंपरोक्षतएवजानातिनापरोक्षतइतिनव्यभिचारइति भावः ॥ **साधनत्वख्यापनेनेति** । सहेतिशेषः । ननुकेनचिद्दृश्यमानमपिकस्यचिन्मायामयंभवत्येवातईश्वरेणदृश्यमान त्वरूपविशेषेणनमायेतिसामान्यतोमायामयत्वाभावःकथंसाध्यतइत्यतस्तदपिविशेषपरतयाव्याचष्टे ॥ **नेश्वरमायाकल्पि तमितियावदिति** ॥ **वक्रइति** । भावेनभावसाधनेऽभावयोर्व्याप्तेर्वक्रत्वादितिभावः॥ **उपन्यस्तइति** । नचमायाविनामा येतिश्लोकेनेत्यर्थः । प्रदर्शनमित्यनंतरंतेनेतिशेषः॥ **व्यभिचारनिरसनंचेति** । व्यतिरेकव्याप्तिप्रदर्शनेनसाध्याभाववतिहेत्व भावलाभाद्धेतोःसाध्यव्यभिचारनिरसनमपिकृतंभवतीत्यर्थः । अप्रयोजकतामाशंकते ॥ **नन्विति** ॥ **अवधारणानुपप त्तिरिति** । अवधार्यतामित्युक्तनिश्चयरूपावधारणानुपपत्तिरित्यर्थः ॥ **मायायालोकोपमत्वइति** । स्वाश्रयाव्यामोहक

त्वेनैंद्रजालिकार्थहेतुभूतमायासादृश्यइत्यर्थः ॥ [११।२] अदृष्टकल्पनाप्रसंगादिति । तेनदृश्यमानेतन्मायामयत्वस्यलोकेऽदृष्ट
स्यैवप्रपंचेकल्पनाप्रसंगादितिभावः ॥ [११।२] अलौकिकत्वइति । लोकमायाविलक्षणत्वेस्वाश्रयव्यामोहकत्वइतियावत् ॥ अ
[११।२] विद्यामयत्वापातादिति । मायायाःस्वाश्रयव्यामोहकत्वेऽविद्यात्वापत्त्याविश्वस्याविद्यकत्वप्रसंगादित्यर्थः । तथाचविय
दादिकंमायिकं दुःखादिकंत्वाविद्यकमितिविभागोनस्यादितिभावः ॥ [११।३] अप्रतिपक्षत्वादिति । मायाशब्दवाच्यप्रकृ
त्याद्युपादानकत्वादेःप्रपंचेऽस्माभिरंगीकृतत्वादितिभावः । नन्वेवमीश्वरमायाकल्पितत्वाभावसिद्धावपिनसर्वथामायामय
त्वाभावसिद्धिः । अन्यमायामयत्वस्यापिसंभवादितिचेन्न । परैरन्यमायामयत्वानंगीकारेणाप्रसक्तेः । प्रसक्तेश्वरमाया
मयत्वस्याभावसाधनेपरिशेषात्सर्वथाऽमायामयत्वमेवसिध्यतीत्याह ॥ [११।४] प्रसक्तेति । पूर्वमन्यमायाकल्पितत्वस्याप्रसंगादी
श्वरमायाकल्पितत्वाभावेसाध्येपरिशेषादमायामयत्वमेवसिध्यतीत्युक्तं । इदानींतुसर्वथाऽमायामयत्वमेवसाध्यतयाभि
प्रेतं ईश्वरपदंचसामान्येनमायावित्वाभिमतपुरुषपरमित्याशयेनाह ॥ [११।४] अथवेति । ईश्वरमादायपक्षेहेतूपपादनंद्रष्टव्यं ।
इतिप्रयोगः नचमायाविनेत्यनेनसूचितइतिशेषः ॥ [११।५] पुराणवाक्येनैवेति । व्याप्तिपक्षधर्मतोपपादनप्रयासनिरासायेतिशेषः॥
[११।५] व्याप्तिमिति । अन्वयव्याप्तिंव्यतिरेकव्याप्तिंचेत्यर्थः । तदुभयमप्युपपादयति ॥ [११।५] अधिष्ठानमित्यादिना । ननुदृशेःसा
क्षात्कारार्थत्वादधिष्ठानमापरोक्ष्येणपश्यतइत्यनुपपन्नं । तत्रारोपितमिथ्यादर्शनंनभवेदित्येतदपि नतन्मृषेतिनिगमनसूचि
तवक्ष्यमाणप्रयोगाननुगुणमित्यतआह ॥ [११।६] अधिष्ठानापरोक्षज्ञानवतेति । अत्रयत्किंचिदपरोक्षज्ञानवतादृश्यमानेशुक्तिर

जतेव्यभिचारवारणायाधिष्ठानेत्यध्याहृतं । शुक्तिलक्षणाधिष्ठानापरोक्षज्ञानवतादृश्यमानेरंगारोपितरजतेव्यभिचारवारणा यतत्रेत्युक्तं । यस्मिन्नधिष्ठानेऽपरोक्षज्ञानंतत्रेत्यर्थः ॥ [११।७] तदुभयनियमइति । व्याप्तिद्वयेव्यभिचाराभावःप्रदर्शितइत्यर्थः ॥ [११।७] अपरोक्षज्ञानइति । तथाचमूलेऽपरोक्षपदंगतार्थमितिभावः ॥ [११।८] ज्ञानमात्रेपीति । पश्यार्थैरित्यस्यज्ञानार्थैरितिवृत्तिकारै र्व्याख्यातत्वादितिभावः ॥ [११।८] प्रयोगादिति । दृशेःप्रयोगदर्शनादित्यर्थः । पाघ्राध्मेत्यादिनासूत्रेणदृशेःपश्यादेशविधाना दितिद्रष्टव्यं । तेनपश्यतेरेवज्ञानमात्रप्रयोगोनतुदृशेरतःकथमेतदितिनिरस्तं ॥ [११।८] अतएवेति । यतोदृशिर्ज्ञानसामान्यार्थको तएवेत्यर्थः ॥ [११।९] सामान्येनेति । विदिति ज्ञानसामान्यस्यैवोदितत्वात् । अन्यथासर्वापरोक्षदृगितिवक्तव्यं । नह्येकस्यव्या प्तिरन्यस्यपक्षधर्मतावक्तुंयुक्तेतिभावः । कथमित्यतस्तद्विवृणोति ॥ [११।९] सर्वात्मनेति । सर्वशब्दस्यार्थकथनमिदं । पश्यतीति । पक्षधर्मतांदर्शयतीतिसंबंधः । शुक्तिकांपश्यन् इदंत्वेनेत्यर्थः। सर्वेत्युक्तं सर्वात्मनेत्युक्तमित्यर्थः ॥ [११।११] किमपिसर्वात्मनेति। पलपरिमाणयुक्ततयेत्यर्थः । तथात्वेसार्वज्ञंस्यात् । एकंचतत्त्वतोज्ञातुंविनासर्वज्ञतांनरः । नसमर्थइतिवचनादितिभावः । असाधारणाकारस्य शुक्तित्वादिरूपाधिष्ठानगतासाधारणाकारस्य ॥ [११।१३] एतदिति । सर्वात्मनेत्येतद्विशेषणमित्यर्थः । अन्य थान्यूनतास्यादितिभावः ॥ [११।१३] आप्तवाक्यादिनेति । अपरोक्षभ्रमस्यपरोक्षविशेषदर्शनमात्रानिवर्त्यत्वादितिभावः ॥ [११।१३] असिद्धिपरिहारायेति । अस्मदादिषुसर्वात्मनाजगदधिष्ठानापरोक्षज्ञानाभावात्पक्षेहेतोरसिद्धिरित्याशंकायांपक्षेविष्णु

ज्ञानमादायहेतूपपादनार्थंविष्णुग्रहणं नतुहेतुशरीरप्रविष्टतयेतिभावः ॥ साधनत्वाभिव्यक्तीति । साधनत्वाभिव्यंजक पंचमीविभक्तिपूर्वकमित्यर्थः । तथांच लिंगस्यवचनंहेतुस्साधकत्वप्रकाशकमितिकारिकावचनात्साधकत्वाभिव्यंजकपंचमी विभक्त्यंतलिंगवचनरूपहेतुपूर्वकमितियावत् । साध्यं साधयितुंयोग्यंसाध्यंसाध्यधर्मविशिष्टधर्मिरूपंपक्षं निर्दिशतीति । हेतुपूर्वंपुनःपक्षवचोनिगमनंमतमितिकारिकावचनात्निगमयतीतिभावः ॥ सर्वात्मनेति।असाधरणाकारेणेत्यर्थः॥उक्तावि धयेति । सर्वात्मनेत्याद्युक्तविधयेत्यर्थः । एवमुक्तरीत्येत्यपिव्याख्येयं ॥ इदंचेति । अपरोक्षदृशइत्यादिनोक्तमनुमानमित्य र्थः । अप्रयोजकत्वशंकापरिहारायविपक्षेबाधकतर्कमाह ॥ अधिष्ठानयाथात्म्येति । इष्टापत्तिरितिचेत्तत्राह ॥ ततश्चे ति । ब्रह्मज्ञानेत्यतःपूर्वंविश्वभ्रमनिवृत्तिसाधनीभूतेतिशेषःकार्यः । सर्वापरोक्षविद्विष्णुरित्युत्तरार्थंप्रकारांतरेणव्याख्याति ॥ अनयैवदिशेति । तथाचप्रपंचस्सत्यः ईश्वरदृष्टत्वात् तत्स्वरूपवदितिप्रयोगोद्रष्टव्यः ॥ तद्दृष्टस्येति । ईश्वरदृष्टस्यस्व स्वरूपस्येत्यर्थः । अस्मिन्व्याख्यानेसर्वापरोक्षविदित्येतद्विपक्षेबाधकसूचनार्थमुक्तमित्यभिप्रेत्याह ॥ अन्यथेति । ईश्वरदृ ष्टस्यापिसत्यत्वाभावइत्यर्थः ॥ ईश्वरस्यापीति । सर्वापरोक्षविदोपीत्यर्थः ॥७॥ ननुभास्करमतेजीवब्रह्मणोर्भेदस्यसत्यत्वादे कमेवेतिकथमुक्तमित्यतस्तद्व्याचष्टे ॥ स्वंभावतइति । उपाधीनांभेदादित्यन्यथाप्रतीतिनिवारणायमयूरव्यंसकोमयूरव्यं सकइतिवन्मध्यमपदलोपीसमासोयमित्याह ॥ उपाधिकृतादिति । मयूरव्यंसकादित्वात् तद्गणस्थत्वात् । तस्याकृतिगण

त्वादितिभावः । ननूपाधिकृतभेदेनापिकथंशुद्धस्यसंसारइत्यतआह ॥ अनेकेति । तामेवाधिकाशंकांदर्शयति ॥ तथाहीत्यादिना ॥ उक्तदोषाइति । नचमिथ्योपाधिकृतोभेदःक्वापिदृष्टइत्यादिनोक्ताइत्यर्थः ॥ निवृत्त्यनुपपत्तिरिति । यतोज्ञानमज्ञानस्यतत्कार्यस्यवानिवर्तकमित्यंगीकारादितिभावः । सत्यंयतोज्ञानमज्ञानस्यतत्कार्यस्यवानिवर्तकमितिनियमेनाज्ञानकार्यत्वलक्षणमिथ्यात्वाभावेप्रपंचस्यज्ञानेननिवर्त्यत्वायोगइति । तथापिकर्मरूपसहकारिसामर्थ्यात्तत्समुच्चितंज्ञानंसत्यमपिनिवर्तयिष्यत्येव । दूरगमनादिनियमविशेषविशिष्टंसेतुदर्शनंब्रह्महत्यादेरिवेत्याशयेनाह ॥ ज्ञानकर्मसमुच्चयेति । इत्यधिकाशंकाप्रदर्शनार्थमितिसंबंधः ॥ तथाचबद्धानामित्यादि । जीवानामेवभावोनब्रह्मणइत्यनेनजीवब्रह्मव्यवस्थायाअसिद्धिस्सर्वदासंसार्येवब्रह्मेत्यनेनसूचिता । बद्धानामेवभावोनमुक्तस्येत्यनेनबद्धमुक्तव्यवस्थायाअसिद्धिरतस्तद्भावोपिनमुक्तिरित्यनेनसूचितेतिज्ञातव्यं । अवतिष्ठतइत्यनंतरमितीतिशेषः ॥ प्रतिसंबंधीति । उपाधिसंबंधःकस्येतिपृष्टेअस्येतिप्रतिसंबंधिकिमपिवक्तव्यमित्यर्थः ॥ जडस्येति । तथाचतदेवप्रतिसंबंधीतिभावः । तस्य उपाधिसंबद्धस्यजडस्य ॥ अनुपपत्तेरिति । व्यधिकरणत्वादितिभावः । ननुशुद्धातिरिक्तस्योपाधिसंबंधरहितस्यचेतनस्योपाधिसंबंधोभविष्यति । अतःकथंप्रकारांतराभावइत्यतआह ॥ उपाधिसंबंधरहितंहीति । तथाचयदुपाधिसंबंधरहितंतस्यैवशुद्धत्वेनशुद्धातिरिक्तस्योपाधिसंबंधरहितस्यचेतनस्यैवाभावादुपाधिसंबद्धस्यैवोपाधिसंबंधोंगीकार्यइत्यर्थः । अस्मात् जीवभेदनिमित्तोपाधिसंबंधात् ।

ननुकिंचिद्दूरंगत्वासउपाधिसंबंधःशुद्धस्येत्यंगीक्रियते अतोनानवस्थेत्यतआह॥ [१००।१२] अन्यथेति ॥ [१००।१२] अयमेवेति । प्राथमिकोजी
वभेदनिमित्तोपाधिसंबंधएवेत्यर्थः ॥ [१००।१३] अनादयएवेति । तथाचोत्पत्त्यप्रतिबंधकत्वान्नानवस्थादोषइतिभावः ॥ [१००।१४] कथंनानव
स्थेति । निमित्तनिमित्तिभावोपेतोपाधिसंबंधपरंपरयेत्यर्थः ॥ [१००।१४] द्वितीयेत्विति । निमित्तनिमित्तिभावमनंगीकृत्यउपाध्यं
तरसंबंधेउपाधिसंबंधस्यानंगीकारेसर्वेप्युपाधिसंबंधाःशुद्धएवेत्यापन्नं ततश्चतद्भावमापन्नस्यनमुक्तिरितिभावः ॥ [१००।१४] सिद्धेति ।
प्रामाणिकेत्यर्थः ॥ [१००।१७] अभ्युपगमादिति । तथाचतत्प्रतिबंधकत्वेनैवात्माश्रयत्वंदोषइतिभावः ॥ [१००।१७] अन्यथेति । निमित्तनि
मित्तिभावानभ्युपगमइत्यर्थः ॥ [१००।१८] स्वस्यैवाधाराधेयत्वेपीति । तथाचाधाराधेयभावप्रतिबंधकत्वेनैवात्माश्रयत्वस्यदोषत्व
मितिभावः । तदनंगीकारेबाधकमाह ॥ [१००।१८] अन्यथेति । नन्वन्याविशिष्टेकेवलेयज्ञदत्तेयज्ञदत्तस्यावर्तनात्तत्रतदंगीकारेआ
त्माश्रयत्वंदोषस्स्यादेव । नचैवंप्रकृते उपाधिसंबंधविशिष्टेउपाधिसंबंधांगीकारेणकेवलेउपाधिसंबंधरहितेस्वस्मिन्नुपाधिसंबं
धस्यावर्तनात् । तत्सद्भावानंगीकारादितियावत् । आत्माश्रयत्वंनदोषइतिशंकते ॥ [१००।१९] केवलइति ॥ [१००।२०] तर्हीति । अन्याविशिष्टे
केवलेयज्ञदत्तेयज्ञदत्तस्यावर्तनात्तत्रतदंगीकारेआत्माश्रयत्वंदोषश्चेत्तर्हिकुंडलविशिष्टेस्वस्मिन्स्वयंवर्तेत । तथाचप्रकृतइवतत्रा
प्यात्माश्रयत्वंनदोषःस्यात् । यदितत्रात्माश्रयत्वंदोषः तर्हिप्रकृतेपितथेतिभावः । नन्वन्यविशिष्टेस्वस्मिन्स्वस्यवृत्त्यसंभवे
पिस्वविशिष्टेन्यस्मिन्स्वयंवर्ततां । तथाचोपाधिसंबंधविशिष्टेऽन्यस्मिन्शुद्धेउपाधिसंबंधस्यवृत्तिःस्यादित्यतआह ॥ रूप

विशिष्टइति । रूपविशिष्टेऽन्यस्मिन्घटइत्यर्थः । तथाचतत्रात्माश्रयत्वंयथादोषस्तथाप्रकृतेपीतिभावः ॥ ७ ॥ उक्तदोषइति । सर्वोपाधिसंबद्धत्वात्तस्येत्युक्तदोषइत्यर्थः । रूपेण नीलिम्ना । ननुमिथ्योपाधीनांकथंजीवब्रह्मभेदहेतुत्वमित्यतआह ॥ उपाधीनामिति ॥ भेदस्यापीति । भेदस्यसत्यत्वेहिमिथ्याभूतोपाधीनांतद्धेतुत्वमनुपपन्नंस्यादितिभावः । ननुमिथ्याभूतभेदस्यकथंसत्यभूतबद्धमुक्तादिव्यवस्थाहेतुत्वमित्यतआह ॥ नमुमुक्षुरिति । परमार्थतेतितल्प्रत्ययःस्वार्थे । तथाचमुमुक्षुर्मुक्तइत्येषाव्यवस्थानपरमार्थेत्यर्थः । ननुशुद्धस्यैवोपाधिसंबंधांगीकारेतद्भावमापन्नस्याप्युक्तोपाधिसंबंधापत्त्यामुक्तत्वंनस्यादित्यतआह ॥ यद्यपीति ॥ तथापीति । तथाचोपाधिदर्शनादर्शनाभ्यामेवबद्धमुक्तव्यवस्था नतत्संबंधासंबंधाभ्यांयेनोक्तदोषःस्यादितिभावः । विच्छेदान् भेदान् ॥ अनेनेति । इतश्चमिथ्योपाधिर्नयुज्यतइतिप्रतिज्ञावाक्येनेत्यर्थः । उत्तरमाह ॥ यदीदमिति ॥ पूर्वोक्तदोषइति । निरधिष्ठानत्वादिरूपइत्यर्थः । परेण मायावादिना । निरधिष्ठानत्वादिदूषणानांनिरवकाशत्वेनापरिहार्यत्वंसुमतीनांज्ञातुंशक्यत्वान्मंदस्येत्युक्तं ॥ सार्थकमेवेति । नकेवलंपूर्वोक्तदूषणेनमिथ्योपाधिर्नयुज्यते किंत्वितश्चेत्युक्त्यापूर्वोक्तदूषणस्यापरिहार्यत्वसूचनादित्यर्थः ॥ उपोद्घातेतिप्रक्रियया विनेति । चिंतांप्रकृतसिद्ध्यर्थामुपोद्घातंप्रचक्षतइतिवचनात्प्रतिज्ञावाक्येनविनेत्यर्थः । कुतइत्यतआह ॥ अज्ञानस्येति । जीवईशोविशुद्धाचिद्भेदस्तस्यातयोर्द्वयोः ॥ अविद्यातच्चितोर्योगःषडस्माकमनादयइतिपरेणोक्तत्वादि

तिभावः । तथाचाज्ञानसिद्धौमिथ्योपाधिसिद्धिरितिद्विरुक्तस्यापिसिद्धिपदस्योत्पत्तिरेवार्थोनभवति । किंत्वज्ञानसिद्धावित्यत्रव्यवस्थितिःसिद्धिपदार्थः मिथ्योपाधिसिद्धिरित्यत्रतूत्पत्तिस्तदर्थइतिज्ञातव्यं । आरोपस्याज्ञानाधीनस्थितित्वमुपपादयति ॥ **अज्ञानंहीति** । तदुपपादयति ॥ **अस्यास्मिन्निति** । अस्मिन्विषयइत्यर्थः ॥ **उत्तरकालीनत्वादिति** । पूर्वसिद्धतमसोहिपश्चिमोनाश्रयोभवतिनापिगोचरइतिपरेणोक्तत्वात्तथाचान्योन्याश्रयइतिभावः ॥ **ज्ञानावरणमिति** । प्राप्तप्रकाशप्रतिबंधोह्यावरणमितिपरेणोक्तत्वादितिभावः । ज्ञानप्राप्ति र्ज्ञानप्रसक्तिः । अप्रकाशस्वरूपत्वादितिभावः । यथोक्तं । अप्रकाशस्वरूपत्वाज्जडेऽज्ञानंनमन्यतइति ॥ **निरुपाधिकेति** । जीवब्रह्मोभयानुस्यूतचिन्मात्रेत्यर्थः । आश्रयत्वविषयत्वभागिनीनिर्विशेषचितिरेवकेवलेतिवचनादितिभावः । प्रसक्तेरितिपंचम्याअन्वयाप्रतीतेराह ॥ **प्रसक्तेरितिहेतोरिति** ॥ **नमुक्तस्याज्ञानंदृश्यतइति** । तथाचतत्साधनेप्रत्यक्षादिप्रमाणबाधइतिभावः ॥ **मुक्तस्याज्ञानंसाधितमिति** । येनप्रमाणबाधस्स्यादितिभावः । किंत्वापादनंकृतमित्यन्वयः । आपादकप्रदर्शनपूर्वकमापादनप्रकारंदर्शयति ॥ **अज्ञानसंबंधस्येत्यादिना** ॥ **अन्यनिमित्तत्वइति** । स्वरूपातिरिक्तोपाधिनिमित्तत्वइत्यर्थः ॥ **शुद्धस्यैवाज्ञत्वइति** । स्वरूपमात्रनिमित्तकत्वेत्वित्यर्थः ॥ **यावत्स्वरूपमिति** । स्वरूपप्रयुक्तधर्माणांस्वरूपनिवृत्तिंविनानिवृत्त्यभावेनयावत्स्वरूपमवस्थानमावश्यकमित्यर्थः ॥ **कासंगतिरिति** । आपादनेप्रमाणबाधादेरलंकारत्वेनादूषणत्वादितिभावः ॥ **अतएवेति** । शुद्धस्यैवाज्ञत्वेत्वित्यादिनोक्तापादनोपपादनप्रकारसूचनार्थमेवेत्यर्थः ॥ **चैतन्यस्वरूपमात्रस्येति** । उभयानुस्यूत

चिन्मात्रस्येत्यर्थः । तस्यापि उभयानुस्यूतचिन्मात्रस्यापि ॥ शुद्धोपहितान्यतरत्वेति । शुद्धत्वेतत्राज्ञानोक्तौमुक्तस्यापि तदापत्तिः । उपहितत्वेउपाधिविशिष्टत्वेतत्राज्ञानोक्तौमिथ्योपाधिभिन्नस्यैवाज्ञत्वादित्युक्तत्वेनान्योन्याश्रयःस्यादितिभावः । नन्वज्ञानस्यसत्यत्वेप्यानंदादिवत्ब्रह्मणाभिन्नत्वान्नसद्वितीयत्वप्रसक्त्याऽद्वैतहानिरित्यतआह ॥ नहीति । अभेदाभावोप पादनायैवज्ञानात्मकेनेत्युक्तं ॥ तन्निवृत्त्यर्थज्ञानार्थस्येति । अज्ञाननिवृत्तिप्रयोजकंयदैक्यज्ञानंतदर्थस्येत्यर्थः । गतार्थताप रिहारायाह ॥ पूर्वत्रेति । अज्ञाननिवृत्तेरेवमुक्तित्वाद्व्याहतिरित्यर्थः । अतएवविरोधस्फोरणार्थमुक्तस्यापीत्यपिशब्दप्रयोगइ तिभावः । अतएवपूर्वमुक्तत्वव्याघातप्रसक्तेरितिशेषइत्युक्तमितिज्ञातव्यं । अज्ञानंननिवर्तते स्वाभाविकत्वादानंदादिवदि त्यभिप्रेतानुमाने निवर्तकाभावउपाधिरित्याशंकते ॥ नन्विति । साध्यव्यापकत्वमुपपादयति ॥ निवर्तकाभावादिति । साधनाव्यापकत्वमुपपादयति ॥ अज्ञानस्यत्विति ॥ तद्भावादिति । ज्ञानरूपनिवर्तकसद्भावादित्यर्थः । यतोज्ञानम ज्ञानस्यतत्कार्यस्यचानिवर्तकमितिपरैरुक्तत्वादितिभावः । सत्यत्वादेवनिवर्तकाभावोप्यनुमीयतइतिसाधनाव्यापकत्वंवक्तुंनि वर्तकाभावसाधकंसत्यत्वमेवासिद्धमितिशंकायांतत्साधयति ॥ यद्ब्रह्मणइत्यादिना ॥ स्वाभाविकत्वादिति । शुद्धस्यै वब्रह्मणोज्ञानांगीकारेतस्यस्वरूपमात्रप्रयुक्तत्वेनान्यनिमित्तकत्वाभावात्स्वाभाविकत्वमेवप्राप्तमित्युक्तत्वादितिभावः। सत्यस्य कुतोननिवृत्तिरित्यतआह ॥ सत्यमबाध्यमिति । अबाध्यस्यापिनिवृत्त्यंगीकारेकिंबाधकमित्यतआह ॥ बाधस्यैवेति ।

स्वाभाविकत्वात्सत्यस्येति । स्वाभाविकत्वहेतुसिद्धसत्यत्वोपेतस्येत्यर्थः ॥व्याघातापातादिति । सत्यमबाध्यंनिवृत्त्य प्रतियोगि तन्निवर्ततइत्यंगीकारेव्याघातप्रसंगादित्यर्थः। किमनेनोपाधेर्दूषणमुक्तमित्यतआह॥ सत्यत्वादेवेति। ततश्चसाधन व्यापकत्वमुपपादयितुमेतद्वाक्यमितिभावः । निवर्तकाभावसाधकंयत्सत्यत्वंतत्साधकेस्वाभाविकत्वानुमानेऽप्रयोजकतामा शंकते॥ स्वाभाविकस्यापीति।सत्यत्वं अनिवर्त्यत्वं॥ माभूदिति।तथाचनिवर्तकसद्भावएवास्त्विति भावः। एतेनेत्युक्तंविश दयति ॥ ब्रह्मणेति ॥ निरुपाधिकसंबंधवतइति । स्वाभाविकसंबंधवतइत्यर्थः । शुद्धस्यैवाज्ञानांगीकारेतस्यशुद्धब्र ह्मस्वरूपमात्रप्रयुक्तत्वेनतत्संबंधस्यान्यप्रयुक्तत्वाभावादितिभावः ॥ तत्प्रसंगादिति । निवर्तकस्यनिवृत्तेर्वाप्रसंगादित्य र्थः। स्वाभाविकत्वाविशेषादितिभावः। सत्यत्वमेव अबाध्यत्वमेव। तस्य सत्यत्वस्य । अज्ञानंननिवर्तते । स्वाभाविकत्वा दानंदादिवदित्यनुमानेनिवर्तकाभावस्यानुपाधित्वेपिब्रह्मत्वमेवोपाधिर्भविष्यति। अनिवृत्त्युपेतेआनंदादौदृष्टांतेविज्ञानमानं दंब्रह्मेत्यादिश्रुतेर्ब्रह्मत्वसद्भावेनसाध्यव्यापकत्वात् । साधनवतःपक्षाद्व्यावृत्तत्वेनसाधनाव्यापकत्वाच्चेत्येतदप्यनेनैवप्रत्युक्तमि त्याह ॥ ब्रह्मत्वमेवेति । आदिपदेननिवर्तकाभावोग्राह्यः। अनेनैवेत्युक्तंविशदयति ॥ अब्रह्मणोपीति । ब्रह्मवत्स्वाभा विकस्याप्यज्ञानस्यनिवृत्तौब्रह्मणोपिनिवृत्तिःस्यादित्यनुकूलतर्केणस्वाभाविकत्वहेतोरनिवृत्तिव्याप्यत्वनिश्चयेनपक्षेऽनिवृत्ति रूपसाध्यनिश्चयाद्ब्रह्मत्वरूपोपाधेःपक्षएवसाध्यव्यापकत्वभंगान्नतस्योपाधित्वमितिभावः। ननुब्रह्मणानिरुपाधिकसंबंधवतो प्यज्ञानस्यनिवृत्तिरस्तुब्रह्मणोनिवृत्तिर्मास्त्वितिविपक्षेबाधकाभावेनतर्कस्याप्रयोजकत्वान्नतेनस्वाभाविकत्वस्यानिवृत्तिव्या

प्यत्वनिश्चयइत्यतआह ॥ **निरुपाधिकसंबंधवतइति** ॥ **अनुमानमात्रेति** । धूमस्यापिप्रतिसंबंधिरूपवह्निव्यभि
चारप्रसंगइतिभावः ॥ **बीजांकुरादाविवेति** । बीजादंकुरमंकुराद्बीजमित्यत्रप्राप्तान्योन्याश्रयोयथापरिह्रियतेतथेत्य
र्थः । तस्माद्बीजादंकुरमुत्पन्नंतस्मादंकुरात्तद्बीजस्यैवोत्पत्तिर्नास्ति किंतुबीजांतरस्यैव । तस्माच्चबीजांतरादंकुरांतरस्येतिव्य
क्तिभेदात्तत्रान्योन्याश्रयःपरिह्रियते । नचात्रतथास्ति । जीवाज्ञानमिथ्योपाधिव्यक्तीनामेकैकत्वादित्याह ॥ **उच्यतइत्या
दिना** ॥ **उत्पत्त्यभावादिति** । तथाचोत्पत्त्यप्रतिबंधकत्वान्नान्योन्याश्रयादिर्दोषायेत्यर्थः ॥ **निमित्तनिमित्ति
भावस्येति** । निमित्तनैमित्तिकभावस्येत्यर्थः । तथाचनिमित्तनैमित्तिकभावप्रतिबंधकत्वेनान्योन्याश्रयस्स्यादेवेतिभा
वः ॥ **अन्यथेति** । अज्ञानमिथ्योपाध्योर्निमित्तनैमित्तिकभावाभावइत्यर्थः ॥ **आरोप्यत्वाभावप्रसंगेनेति** । उ
पाधेरित्यर्थः ॥ **उपपादितत्वादिति** । उपाधेर्मिथ्यात्वंनामारोपितत्वेनानिर्वाच्यत्वमेव आरोपश्चार्थज्ञानात्मकोज्ञाना
धीनस्थितिरेव । अज्ञानंह्यधिष्ठानमाच्छाद्यार्थज्ञानयोरुपादानंभवतीत्यादिनापूर्वमुपाधेरारोपितत्वस्याज्ञानसिद्ध्यधीनत्वे
नाज्ञानमिथ्योपाध्योर्निमित्तनैमित्तिकभावस्योपपादितत्वादित्यर्थः । जीवभेदे जीवब्रह्मभेदे ॥ **नत्विति** । यद्यहं
कारांतःकरणादिकमुपाधित्वेनाभिप्रेतंस्यात्तदाऽहंकाराद्युपाधिसिद्धेरज्ञानसिद्ध्यधीनत्वेनाज्ञानसिद्धौमिथ्योपाधिसिद्धिरित्यु
त्तरीत्यान्योन्याश्रयःस्यादितिभावः । अहंकारादिकंकुतोनोपाधिरित्यतआह ॥ **तदभावइति** । सुप्तावहंकारस्यप्र

विलयादितिभावः ॥ [१०।२।२०] भेदेति । जीवब्रह्मभेदेत्यर्थः । ननुसुप्तावहंकाराद्युपाध्यभावेपिजीवब्रह्मभेदोस्तु कोदोषइत्यतआह ॥
[१०।२।२०] नहीति । ननुसुषुप्तौजीवब्रह्मभेदएवनास्तीतिचेत्तत्राह ॥ [१०।२।२१] सुषुप्त्यादौचेति ॥ [१०।२।२१] भेदनिवृत्ताविति । शुद्धब्रह्मभावापत्तेरि
त्यर्थः । नन्वज्ञानस्यैवोपाधित्वेकिंलब्धमित्यतआह ॥ [१०।२।२१] तत्कथमिति । तथाचाज्ञानस्योपाधित्वेऽज्ञानसिद्धौमिथ्योपाधि
सिद्धिरित्युक्तमयुक्तं। स्वसिद्धेःस्वाधीनत्वाभावादतोनान्योन्याश्रयइतिभावः ॥ आरोपितत्वेनाज्ञानापेक्षायामिति [१०।२।२२] ।
जीवब्रह्मभेदहेतुभूताज्ञानरूपोपाधेरारोपितत्वेनारोपस्याज्ञानकार्यतयाऽज्ञानांतरापेक्षायांतस्याप्यारोपितत्वेनपुनरज्ञानांतरा
पेक्षायामनवस्था व्यक्तिद्वयांगीकारेऽन्योन्याश्रयता व्यक्तित्रयकल्पनेचक्रकं स्वस्यैवस्वारोपनिमित्तत्वांगीकारेआत्माश्रय
त्वमित्यर्थः । नन्वज्ञानस्यैवोपाधित्वांगीकारे उक्तरीत्यानवस्थादिकंभगवत्पादैरेवकुतोनोक्तमित्यतआह ॥ [१०।२।२२] एतच्चेति ॥
[१०।२।२४] उक्तदोषइति । शुद्धस्यैवाज्ञत्वेमुक्तस्याप्यज्ञत्वप्रसक्तेरित्युक्तदोषइत्यर्थः ॥ [१०।२।२४] भ्रांत्येति । ततश्चस्वरूपातिरिक्तान्यनिमित्त
कमेवेतिभावः ॥ [१०।२।२५] अज्ञानस्यैवेति । अधिष्ठानगतासाधारणाकारावरणेसत्यतदाकारप्रतिभासरूपभ्रमहेतुत्वादज्ञानसिद्धौ
भ्रमसिद्धिरित्यर्थः ॥ [१०।२।२६] परेणैवेति । शुद्धमेवब्रह्मभ्रांत्याऽज्ञमितिवदतापरेणैवभ्रमसिद्धावज्ञानसिद्धिरितिकोटेरंगीकृतत्वान्न
तत्रोपपादनापेक्षेत्यर्थः ॥ ७ ॥ अनादौकाले अतीतकाले । ननुतर्हिंशुकोमुक्तोवामदेवश्चमुक्तइत्यादिवाक्यानांकागतिरित्य
तआह ॥ [१०।३।४] शुकोमुक्तइत्यादयइति ॥ [१०।३।४] प्ररोचनार्थाइति । संसारापेक्षयामुक्तिस्समीचीनेतिप्ररोचनार्थाइत्यर्थः । तथाचा

र्थवादत्वान्नस्वार्थेतात्पर्यमितिभावः । हेत्वसिद्धिंपरिहरति ॥ **अपरिच्छिन्नत्वेत्विति** । एकस्यैव जीवस्य । शरीरैरुपाधिभिः शरीरलक्षणैरुपाधिभिः ॥ **वैयर्थ्यापत्तिरिति** । अतःपरिच्छिन्नत्वमेवांगीकार्यमितिभावः ॥ **रूपादिमत्त्वाच्चेति** । रूपादिमत्त्वाच्चानित्यत्वं । तथाद्दष्टत्वाल्लोकइतिसूत्रार्थः । भौतिकंत्वेवरूपादिव्याप्तंनाशेननोमतइत्युक्तत्वान्नेश्वरेव्यभिचारश्शंकनीयः । प्रसंगादाह ॥ **कालक्षणाश्चेति** ॥ **औपाधिकाइति** । तरणिपरिस्पंदाद्युपाधिनिमित्तभेदवंतइत्यर्थः । यथोक्तंवैशेषिकैः । आकाशादित्रयमेकैकमेवोपाधिभेदान्नानाभूतमिति । औपाधिकत्वेकोदोषइत्यतआह ॥ **किंचोपाधिरिति** । दूषणस्य उपाधेर्भेदकारित्वानुपपत्तिरूपस्य ॥ **अत्रापीति** । कालक्षणानामौपाधिकत्वेपीत्यर्थः ॥ **अनेनेति** । अनागताइति वत्सश्रुत्युदाहरणेनेत्यर्थः । अनुमानं जीवाःनानंताःपरिच्छिन्नत्वादित्यनुमानं ॥ **स्थानेति** । अवस्थानयोग्यप्रदेशेत्यर्थः। मूले **परमाणुप्रदेशेपीति** । वालाग्रस्यशतधाविभागेसत्येकोविभागोयावान्सूक्ष्मस्तावान्सूक्ष्मोजीवस्सचहृदयाकाशेतिष्ठति । तस्मिञ्जीवेऽनंतानिकर्माणि । कर्माणितानिचपृथक्चेतनान्येवसर्वशः । अचेतनशरीराणिस्वकर्मफलभांजिचेति । तानिचैवमित्यनंताःप्राणिराशयःपरमाणोरवस्थानयोग्यप्रदेशेसंतीतिज्ञातव्यं ॥ **अप्रतिघत्वेनेति** । स्वाधिष्ठितप्रदेशेऽन्यस्यावस्थानानापादकत्वंसप्रतिपद्यत्वं तदभावोप्रतिघत्वंतेनेत्यर्थः।पार्थिवादीनां पार्थिवादिशरीरोपपन्नानां॥ **उक्तस्यासंभावनामिति**। शरीरसहितत्वेनस्थूलानामप्यल्पदेशेऽवस्थानमसंभावितमित्यसंभावनाशंकांनिराकर्तुमित्यर्थः। ननुसभायाःप्रजा

धारत्वेनाधिकरणत्वात्तत्रसप्तमीस्यात् । नतुसभामितिद्वितीयेत्यतउक्तं ॥ [१०।३।१८] अधिशीङ्स्थासांकर्मेतीति । अधिपूर्वाणां शीङ्स्वप्ने ष्ठागतिनिवृत्तौ आसउपवेशने इत्येषांधातूनामाधारःकर्मसंज्ञस्स्यादितिसूत्रार्थः। अधिशेतेऽधितिष्ठत्यध्यास्तेवावैकुंठंहरिरित्युदाहरणं । तथाचप्रकृतेधिपूर्वष्ठागतिनिवृत्ताविति धात्वर्थाधारभूतायास्सभायाःकर्मत्वात्कर्मणिद्वितीयेतिसूत्रेणद्वितीयाजातेत्यर्थः । ननुमिथ्योपाधिकृतमिथ्याभेदवादिनांसत्योपाधिकृतसत्यभेदवादिनांचैक्यवादिनांनिराकरणानंतरंजीवानांस्वाभाविकानंत्येप्रमाणाभावादिकेशंकितेतत्परिहारायानागताइत्यादिवाक्यं अतोनंतदोषदुष्टत्वादित्यतःपूर्वं अन्योन्याश्रयादित्यनंतरमुदाहर्तव्यं अत्रोक्तौकिंनिमित्तमित्यतआह ॥ [१०।३।१९] आनंत्यइति । अनुमानविरोधः आनंत्याभावसाधकपरिच्छिन्नत्वानुमानविरोधः ॥ [१०।३।२१] इतिज्ञापयितुमपीति । नकेवलंयदुक्तंसंसारिणांसर्वदाविद्यमानत्वादितिमुक्तस्याप्यज्ञत्वप्रसक्तेरितिच तत्रैकजीववादीमन्यतइत्याद्याशंकानिरासार्थमित्यपिशब्दार्थः ॥ [१०।३।२१] अतएवेति । अनेकश्रुतिपुराणदर्शिभिरस्माभिरेवपरिहर्तुंशक्यंतेयतोऽतएवेत्यर्थः ॥ [१०।३।२१] अस्मत्पक्षइतीति । अनेकश्रुतिपुराणदर्शिनामस्माकंपक्षइत्यर्थः । तस्योपाध्यादेः । उपाधिसंबंधेन उपाधिसंबंधप्रयुक्तेन । नन्वेवंतर्हिमिथ्याभूतवस्तुपदयोर्व्याहतिरित्यतआह ॥ [१०।४।१३] ततोऽनिर्वक्तव्यस्येति । अनिर्वचनीयस्येत्यर्थः ॥ [१०।४।१४] कुतोनेतिचेदिति । मिथ्यावस्तुनोदुर्घटत्वंकुतोभूषणंनभवतीत्यर्थः ॥ [१०।४।१३] अर्थपर्यालोचनयेति । द्दष्टेरित्यस्यषष्ठीविभक्तित्वेऽर्थासंगतिःस्यादतस्तत्पर्यालोचनयानेयंषष्ठीविभक्तिरपितुपंचम्येवेतिप्रतिपत्तिर्भविष्यतीत्यर्थः ॥ [१०।४।१७] द्दष्टिसंकाशादित्युक्तमिति । बुद्धिक्षोभकरात्प्रतिपत्तिगौरवाच्छब्दगौरवस्यसह्यत्वादितिभावः । ननुबलव

च्छब्दस्यदृष्टिपदसापेक्षत्वेनतेनैवसमासोयुक्तो नप्रमाणपदेन । सापेक्षमसमर्थवद्भवतीतिवचनादित्यतआह ॥ नित्यसा पेक्षत्वादिति । तथाचप्रमाणपदेनसमासेपिपूर्वपदेनाकांक्षानविहन्यतेदेवदत्तस्यगुरुकुलमितिवत् । वचनंचानित्यसापेक्ष विषयमितिभावः । ननुयुक्तेरपिप्रमाणत्वात्पृथग्युक्तिग्रहणंव्यर्थमित्यतआह ॥ बलवत्तेति । तथाचबलवत्प्रमाणसद्भावापे क्षत्वादित्यर्थः । ननुद्वंद्वसमासपक्षेप्रमाणापेक्षत्वेनैवालंयुक्त्यपेक्षत्वंकिमर्थमित्यतउक्तं ॥ प्रमाणबलवत्त्वार्थमिति ॥ अनुमानस्याप्यपेक्षितत्वादिति । इदंप्रमाणं बलवदुपजीव्यत्वादित्यनुमानस्येत्यर्थः । द्वंद्वपक्षेप्रमाणशब्दाभिप्रेतार्थ माह ॥ प्रमाणशब्दश्चेति । यथाहि द्रौण्यस्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानामित्यत्रपांडवशब्दस्यपृथक्सत्त्वेन सामान्यवाचिनाकुरुशब्देनपांडवातिरिक्ताएवगृह्यंते तथाप्रकृतेपियुक्तिशब्दस्यपृथक्सत्त्वेनसामान्यवाचिनाप्रमाणशब्देन तदतिरिक्तप्रमाणमेवग्राह्यमितिभावः । एवंचप्रमाणबलवत्त्वार्थमित्यत्रप्रमाणयोःप्रत्यक्षागमयोर्बलवत्त्वार्थमितिव्याख्येयं । मध्यमपदलोपीसमासइत्यभिप्रेत्ययोजनांतरमाह ॥ बलवत्प्रमाणमूलेति । मूलकेत्यर्थः । केवलयुक्तेरसाधकत्वादिति भावः । बाह्यस्य वियदादेः । आंतरस्य दुःखादेः । तदसाधकत्वात् । सत्यत्वासाधकत्वात् ॥ अर्थक्रियावत्सत्प्रभेदाइ तीति । अर्थक्रियावत्अर्थक्रियाकारीतियावत् । यत्सत्तत्प्रभेदाइत्यर्थः । तथाचार्थक्रियाकारित्वात्सत्याइत्यर्थः । प्रत्यक्ष दृष्टेर्घटादिसत्यतागोचरत्वंप्रकारांतरेणोपपादयति ॥ सर्वज्ञानानांचेति । अर्थाव्यभिचारित्वं प्रामाण्यं ॥ संमतमिति । उभाभ्यामपिप्रामाण्यस्यस्वतस्त्वांगीकारादितिभावः । पूर्वग्रंथफलितार्थंवदन्नुत्तरग्रंथमवतारयति ॥ बाधकाभावइति ॥

[१०४।१८] अर्थद्वयमिति । प्रत्यक्षदृष्टस्यसत्यत्वेप्रमाणंनमृग्यते प्रत्युतमिथ्यात्वांगीकारएवप्रमाणमन्विष्यतइत्यर्थद्वयमित्यर्थः । भो
ज्यंभक्ष्ये । भक्षणार्हेवस्तुनिभोज्यमितिशब्दोनिपात्यतइत्यर्थः ॥ [१०४।१९] इत्यवेति । येनभोज्यमितिवक्तव्यंस्यादितिभावः ॥
[१०४।१९] स्रक्चंदनेति । अन्नादिकमित्यत्रादिपदगृहीतमित्यर्थः ॥ [१०४।२०] भोग्यमित्येवेति । स्रगादिवदन्नादेरपिभोगार्हत्वेनभोग्यत्वादि
तिभावः ॥ [१०४।२०] अनपेक्षेति । सत्यत्वेप्रमाणांतरस्यानपेक्षेत्यर्थः ॥ [१०४।२१] अपेक्षणीयमेवेति । सत्यत्वेप्रमाणांतरमित्यर्थः । तच्चना
पेक्षतइतिभावः ॥ [१०४।२३] अन्नमित्युपलक्षणमिति । पूर्वमन्नादिकमित्यादिपदप्रयोगादितिभावः । शंकते ॥ [१०४।२२] सत्यमिति ।
[१०४।२४] ज्ञाननिवर्त्यत्वानुपपत्तेरिति । तरतिशोकमात्मविदितिश्रुत्यादुःखादेर्जगतोज्ञाननिवर्त्यत्वंतावच्छ्रूयते । नचसत्यत्वेनिवृ
त्तिःसंभवति आत्मवत् । अतो यतोज्ञानमज्ञानस्यतत्कार्यस्यवानिवर्तकमितिवचनादज्ञानकल्पितत्वरूपमिथ्यात्वंविनानुप
पद्यमानंतदाक्षिपतीतिभावः । ननुप्रत्यक्षस्यानुमानादिकमेवबाधकमितिवदंतंप्रतिप्रत्यक्षस्यानुमानादिकंबाधकंनभवतीत्ये
वोक्तं । नतत्रकश्चिद्धेतुरुक्तइत्याशंकायामाह ॥ [१०४।२५] अयमभिप्रायइति । अनुमानादिनैवेत्येवकारंप्रयुंजानस्यायमभिप्रायोय
द्धेतुसूचनमित्यर्थः । तमेवदर्शयति ॥ [१०४।२५] प्रबलंहीति ॥ [१०५।१] अन्यथेति । प्रत्यक्षदृष्टस्यानुमानादिनाबाधांगीकारइत्यर्थः । ए
वमेवोत्तरत्राप्यन्यथेत्यस्यार्थोद्रष्टव्यः ॥ [१०५।२] दाहाद्यनुमानमेवेति । नेदंरजतंदाहच्छेदादिमत्त्वादित्यनुमानमेवेत्यर्थः । अनुमा
नविरोधश्चप्रबलप्रत्यक्षस्याकिंचित्करइत्यंगीकृतत्वादितिभावः ॥ [१०५।४] परीक्षितत्वेनेति । दाहच्छेदादिरूपविजातीयसंवादेना

प्रामाण्यशंकाशून्यतयानिश्चितत्वेनेत्यर्थः ॥ [१०।५।१४] **परीक्षांनामेति** । द्वितीयस्यप्रत्यक्षस्यबाधकत्वोपयोगिबलवत्त्वसंपादिकापरीक्षानामानुमानमेवेतितद्विरोधोकिंचित्करइतिभावः । तस्य परीक्षारूपानुमानस्य ॥ [१०।५।१४] **प्रत्यक्षंसाहाय्येनसामर्थ्यादिति** । प्रत्यक्षरूपसाहाय्यसामर्थ्यात् । तदानुकूल्यसद्भावाद्बाधकत्वंयुक्तमितिशेषः । तर्ह्येवमेवास्तुप्रकृतइत्यतआह ॥ [१०।५।१५] **प्रकृतेचेति** । दृश्यत्वाद्यनुमानादेःप्रत्यक्षसाहाय्याभावादित्यर्थः ॥ [१०।५।१५] **अनुमानादिनैवेतीति** । प्रत्यक्षसाहाय्यरहितेनकेवलानुमानादिनैवेत्यर्थः ॥ [१०।५।१५] **प्राक्चेति** । प्रत्यक्षागमरूपप्रमाणबलवत्त्वार्थयुक्तेरपेक्षितत्वात् तथाबलवत्प्रमाणमूलकयुक्त्यपेक्षत्वादित्येवंप्रकारद्वयेनतत्रयुक्तेरपिबाधकत्वस्योक्तत्वेनकेवलयुक्तेरप्रयोजकतायाउक्तत्वादितिभावः । आगमंविनेत्यागमग्रहणस्यप्रयोजनमाह ॥ [१०।५।१५] **भगवदवतारेष्विति** । रामकृष्णादिष्वित्यर्थः ॥ [१०।५।१५] **छेदभेदादिप्रत्यक्षस्येति** । तत्कालीनानामितिशेषः । ननुतत्रप्रत्यक्षस्यदौर्बल्यंआगमस्यप्राबल्यंचकथमित्यतआह ॥ [१०।५।१६] **विष्णुर्दोषवानितिप्रत्यक्षस्येति** । अयंभावः । कृष्णादीनांविष्णवतारत्वाज्ञानेयेषांकेषांचित्कृष्णादीनांदोषवत्त्वेनविष्णोस्तदभावप्राप्तेःकृष्णादीनां देवक्यांदेवरूपिण्यांविष्णुस्सर्वगुहाशयः । आविरासीदित्याद्यागमेनविष्णुत्वंज्ञात्वाकृष्णादिर्दोषीततश्चतदभिन्नोविष्णुरपिदोषीतिप्रत्यक्षेणोत्पत्तव्यं । तथाचसर्वस्याप्यागमस्यैकवाक्यत्वादुपजीव्यभूतोनिर्दोषत्वग्राहीयःप्रबलागमस्सएवविष्णुर्दोषवानित्युपजीवकस्यदुर्बलस्यप्रत्यक्षस्यबाधकइति । यथोक्तमनुव्याख्याने । आगमेनहिविष्णुत्वंज्ञात्वादोषोत्रकल्प्यते । नचेत्स्याद्दोषवानन्यइत्यादि । नन्वनुमानादिनैवेत्यादिपदेनार्थापत्तिमगृहीत्वाआगमग्रहणेआगमंविनाबाधोनदृष्टइत्यागमस्यबाधकतायाउक्तत्वात्पुनरागमेनबाधोनदृष्टइ

त्युक्तेव्याघातइत्यतउक्तं ॥ **प्राबल्याभावापेक्षयेति** । तथाचोपजीव्यतयाबलवदागमंविनानुपजीव्येनदुर्बलेनागमेनबाधो
नदृष्टइतिव्याख्यानान्नदोषइतिभावः ॥ **प्रागुक्तमिति** । तर्कमात्रतःप्रत्यक्षबाधनइत्यादिनेत्यर्थः ॥ **दूषितंचेति** । दृ
श्यत्वाद्यनुमानादिकंयच्चप्रमाणदृष्टानामपिपदार्थानांमिथ्यात्वकल्पनमित्यादिनोपजी व्यप्रमाणबाधादिनादूषितंचेत्यर्थः ।
प्रसंजनार्थं उपक्षेपार्थं । तदेवदर्शयति ॥ **नन्वित्यादिना** ॥ **दूरतोप्येवमिति** । अपिशब्दोऽवधारणे । अयंवृक्षोव
स्तुगत्यादीर्घोभवितुमर्हति । दूरस्थत्वादिदोषादेव । एवंह्रस्वतयादृश्यमानत्वादित्यनुमानेनबाध्यमित्यर्थः । केचित्तुयद्दूरतएवं
दृश्यतेतत्तत्परिमाणादावयथार्थमितिव्याप्तिसमुच्चायकोपिशब्दइत्याहुः ॥ **आगमेनेति** । प्रादेशपरिमितश्चंद्रमाइतिप्रत्यक्षं ।
अष्टाशीतिसहस्राणिविस्तीर्णोयोजनानितु । प्रमाणंतत्रविज्ञेयंकलाःपंचदशैवत्वित्यनुपजीव्येनाप्यागमेनबाध्यंदृष्टमित्यर्थः ॥
प्रत्यासत्तेःप्रागेवेति । समीपगमनात्प्रागेवेत्यर्थः ॥ **एवमुच्यतइति** । प्रत्यक्षदृष्टस्यानुमानेनानुपजीव्येनकेवलागमेनवाबा
धोनदृष्टइतिकथमुच्यतइत्यर्थः ॥ **प्रागेवेतिशेषइति** । उत्पत्त्यनंतरंबाधे इदंरजतमितिप्रत्यक्षसमानयोगक्षेमत्वेनतद्रीत्यैवप
रिहारोपपत्तेरस्यपृथक्करणंनस्यादितिभावः । वृक्षह्रस्वत्वादावित्यत्रादिपदेनचंद्रप्रादेशत्वस्यविवक्षितत्वात्तदनुसारेणाह ॥ **आ
गमस्याप्युपलक्षणमिति**। तर्हिदीर्घत्वनिश्चयइत्ययुक्तमित्यतस्तदनूद्यादिपदाध्याहारेणव्याख्याति॥ **दीर्घत्वनिश्चयोदीर्घ
त्वादिनिश्चयइति** ॥ **अर्थमात्रेति**। पदार्थस्वरूपमात्रेत्यर्थः। अन्यथात्वे प्रत्यक्षस्यपरिमाणादिविषयेऽयथार्थत्वे । ननुचंद्रप्रा

देशत्वादिप्रत्यक्षस्यापिस्तंभोयमित्यादिप्रत्यक्षवदेकाकारविषयत्वेनस्वार्थेपुरुषप्रवर्तकत्वसंभवात्कथमपटुत्वमित्याशंकायामे काकारविषयकत्वाविशेषेप्यस्यदोषजन्यतयानिश्चितत्वात्स्तंभोयमित्यादिज्ञानवैलक्षण्यमितिप्रदर्शयितुमुत्तरत्रजगत्प्रत्यक्षस्य सर्वापटुप्रत्यक्षवैलक्षण्यंचोपपादयितुंज्ञानप्रभेदंतावदाह॥ **इदमुक्तंभवतीत्यादिना**। सुषिः छिद्रं। नन्वेकाकारविषयेपिज्ञाने स्वार्थनिश्चायकत्वादिरूपोविशेषएवायंकिंनिबंधनइतिजिज्ञासायामाह॥**सचायंभेदइति**॥ **क्वचिदिति** । स्तंभोयमितिज्ञाने सवितृसुषिरज्ञानेचेत्यर्थः । संभावना अर्थाभावानिश्चयः । तथाचस्तंभोयमितिज्ञानमर्थाभावानिश्चयरूपसंभावनासद्भावात् स्वार्थनिश्चायकं सवितृसुषिरज्ञानंतुप्रागेवार्थाभावनिश्चयरूपासंभावनासद्भावान्नस्वार्थनिश्चायकमितिभावः॥ **क्वचिदिति** । सत्यरजतज्ञानेशुक्तिरजतज्ञानेचेत्यर्थः । रजतमिदमितिज्ञानानंतरंतस्मिन्ज्ञानेप्रामाण्याप्रामाण्यसंशयेनप्रामाण्यग्राहके साक्षिणिप्रतिबद्धेसतितन्निरासायसजातीयविजातीयसंवादरूपपरीक्षापेक्षायांयत्रसत्यरजतज्ञानेतत्प्रवृत्तिस्तत्स्वार्थनिश्चायकं परीक्षयाशंकापगमेऽप्रतिबद्धसाक्षिणातत्प्रामाण्यनिश्चयात्। यत्रचशुक्तिरजतादिज्ञानेपरीक्षापेक्षायामपिसापरीक्षानप्रवर्ततेत त्स्वार्थानिश्चायकमितितयोर्भेदोद्रष्टव्यः॥ **क्वचिच्चेति** । शैलाग्रस्थतरुपरिमाणादिज्ञानेसन्निहिततरुपरिमाणज्ञानेचेत्यर्थः । विपरीतसंस्कारोदोषनिश्चयः । तत्रदूरस्थत्वादिदोषस्यप्रागेवनिश्चितत्वेनशैलाग्रस्थतरुपरिमाणादिज्ञानंनस्वार्थनिश्चायकं । सन्निहिततरुपरिमाणादिज्ञानंतुप्राक्दोषनिश्चयाभावात्स्वार्थनिश्चायकमितितयोर्भेदइतिभावः ॥ **तत्राद्यमिति** । यत्रसं

भावना यत्रपरीक्षापेक्षायांतत्प्रवृत्तिः । यत्रचप्रागेवविपरीतसंस्काराभावश्चतदित्यर्थः ॥ द्वितीयमिति । यत्रासंभावना प
रीक्षापेक्षायांतदप्रवृत्तिः प्रागेवविपरीतसंस्कारभावश्चतदित्यर्थः ॥ मंदग्राहीति । रेखोपरेखाद्यविषयीकरणेनपदार्थस्वरू
पमात्रग्राहीत्यर्थः ॥ अनुमानागमाविति । दूरतोप्येवंदृश्यमानत्वादित्यनुमानं अष्टाशीतिसहस्राणीत्यागमश्चेत्यर्थः ।
तेन साक्षिप्रत्यक्षेण ॥ बाधकाविवेति । राजगौरवेणराजभृत्येनामात्यइवेतिभावः । यथाहुः । दुर्बलस्यप्रमाणस्यबलवाना
श्रयोयदा ॥ तदापिविपरीतत्वंशिष्टाकोपेयथोदितमिति । अस्य जगत्प्रत्यक्षस्य ॥ प्रतिभासतइति । ल्यब्लोपनिमित्तापं
चमी । प्रतिभासमारभ्य तदुत्पत्तिमारभ्येत्यर्थः । तथाचकिंप्रागेवदोषनिश्चयेनापट्वेवज्ञानमुत्पद्यतइतिपृष्टंभवतीतिद्रष्टव्यं ॥
कारणेति । अपटुत्वइत्यर्थः ॥ अनुमीयतइति । सवितृसुषिरशुक्तिरजतादिविषयप्रत्यक्षवदितिशेषः ॥ निश्चायक
तयैवेति । दोषाजन्यतयापटुतयैवसाक्षिणाऽवभासनान्नापट्वेवादितोज्ञानमुत्पद्यतइतिभावः॥ तदभावादिति । सवितृसु
षिरादाविवप्रागेवार्थाभावनिश्चयरूपकारणस्यशुक्तिरजतादाविवपरीक्षाप्रवृत्त्यभावरूपकारणस्यचाभावादित्यर्थः ॥ उपपा
दितमिति । मिथ्यात्वसाधकप्रमाणाभावस्यप्रागुक्तत्वादित्यर्थः । इदमुपलक्षणं । नापिजगत्प्रत्यक्षस्यसंदेहवदपटुत्वं ए
काकारविषयकत्वादित्यपिद्रष्टव्यं । तथाचजगत्प्रत्यक्षस्यसर्वापटुप्रत्यक्षवैलक्षण्यमितिभावः । ननु नचप्रत्यक्षदृष्टस्य प्रत्यक्षा
पटुत्वस्यैव प्रत्यक्षस्यहिदूर इतित्रिष्वपिवाक्येषुयदिप्रत्यक्षशब्देननिर्दोषार्थेंद्रियसन्निकर्षजन्यंप्रमाणरूपमपरोक्षज्ञानंवि
वक्षितं तर्ह्याद्यवाक्येतस्यप्रत्यक्षागमाभ्यांबाधोक्तिव्याघातः । बलवत्पदवैयर्थ्यंच द्वितीयवाक्येऽपटुत्वोक्तिव्याघा

तः । तृतीयवाक्येमंदग्राहितयापरिमाणादावन्यथात्वोक्तिव्याघातइत्यतआह ॥ अत्रसर्वत्रेति । त्रिष्वपि वाक्येष्वित्यर्थः । आदिशब्देनादिवाक्येबलवच्छब्दवैयर्थ्यंग्राह्यं ॥ ज्ञानंमानसमिति । मनोवृत्तिरूपमित्यर्थः । साक्षिरूपस्वरूपानुभवस्यविषयीकारितयापृथगुक्तत्वादितिभावः ॥ अज्ञानंभावरूपमिति । सिद्धांतेज्ञानाभावातिरिक्तंभावरूपमज्ञानंजीवस्वरूपाद्यावरकत्वोक्त्यन्यथानुपपत्त्यास्वीकर्तव्यं । ज्ञानाभावस्यावरकत्वायोगादितिसंप्रदायविदः । इदंचभावरूपाज्ञानंसत्त्वादिगुणात्मिकाप्रकृतिरेवेतिमंतव्यं । उपपादितमेतन्निपुणतरंतत्त्वसंख्यानटीकाविवरणेऽस्माभिः॥ आत्मनोभेदइति । जीवस्यभेदइत्यर्थः । ईश्वरादिप्रतियोगिकोजीवधर्मिकोभेदइतियावत् । जीवस्याहमितिसाक्षिसिद्धत्वेनतद्धर्मिकभेदस्यापिसाक्षिविषयत्वादितिभावः ॥ ज्ञानाद्यभावस्येति । समुदायापेक्षमेकवचनं । ज्ञानादिप्रतियोगिकाभावानामित्यर्थः । उत्तरवाक्यमवतारयति ॥ घटोदेरित्यादिना ॥ तन्मिथ्यात्वस्यापीति । बाह्यांतरजगन्निष्ठमिथ्यात्वस्यापीत्यर्थः ॥ साक्षिवेद्यमिति । प्रातिभासिकत्वादितिभावः । तस्य साक्ष्यनुभवस्य ॥ ऐंद्रियकत्वादिति । तथाचशुक्तिरजतादिज्ञानस्यैंद्रियकत्वेनसाक्षिवेद्यत्वाभावादित्यर्थः । ऐंद्रियकज्ञानस्यचयथार्थत्वनियमोनास्त्येवेतिभावः ॥ अधिष्ठानेति । शुक्तिरूपाधिष्ठानेत्यर्थः । तथाचान्यत्रानुपक्षीणान्वयव्यतिरेकौनस्तइतिभावः । अधिष्ठानग्रहणएवेंद्रियव्यापारस्योपक्षयकल्पकमाशंकते ॥ प्रतीतीति । रजतेनेंद्रियसंनिकर्षांगीकारेघटादिवत्सन्निकर्षात्प्राक्रजतस्यसत्त्वंवक्तव्यं तन्नसंभवति प्रतीतिमात्रशरीरकत्वांगीकारादितिभावः॥ अनिर्वचनीयेति । प्रातिभासिकेत्यर्थः । स्या

दिदं यदीदंरजतमित्यत्रप्रतीयमानंरजतंप्रातिभासिकंस्यात् नचैवं । प्रातिभासिकताया अनिर्वचनीयत्वेचरजतस्येत्यादि
नाप्राङ्गिराकृतत्वादितिभावः । ननुतर्हिप्रतीयमानंरजतंकीदृशमितिचेदसदेवरजतंप्रत्यभादित्युत्तरकालीनानुभवादसदेवेति
वदामः । तर्ह्यसतारजतेनेंद्रियस्यसन्निकर्षायोगात्कथंप्रतीतिरितिचेत्तत्राह ॥ अन्यथाख्यातिनयेत्विति । दोषवशाच्छु
क्तिरेवात्यंतासद्रजतात्मनाप्रतीयतइत्यभिनवान्यथाख्यातिवादिनामस्माकंसिद्धांतइत्यर्थः ॥ शुक्तिकेति । तथाचनासता
रजतेनसन्निकर्षोऽगीकृतइतिभावः ॥ शुक्तिकैवेति । दोषवशादितिशेषः ॥ उपपद्यतइति । रजतादिज्ञानस्यैंद्रियकत्वमि
तिशेषः ॥ विपक्षइति । प्रत्यक्षसिद्धस्ययुक्तिमात्रेणबाधांगीकारेकिंबाधकमित्याकांक्षायामित्यर्थः॥ इत्यादिनेति । भूत
चतुष्टयस्यपृथिवीत्वादृष्टेःपृथिव्याअपिपृथिवीत्वंनस्यादित्यादिनेत्यर्थः । अनुभवशब्देनसाक्षिणोपिगृहीतत्वात्तदपेक्षयान्य
स्यप्रबलस्यानुभवस्याभावादाह ॥ बाह्यापेक्षयोक्तमिति । अनुभवशब्देनबाह्यस्यापिगृहीतत्वात्तदपेक्षयेत्यर्थः । उभया
पेक्षयाचेत्तर्हिक्वचिद्बलवतासाक्षिणादुर्बलसाक्षिणोबाधइत्युक्तंस्यात् । नचतत्संभवति । मोक्षयोग्यानांसाक्षिणोयाथार्थ्यनि
यमांगीकारविरोधादितिभावः ॥ तस्यापीति । जीवचैतन्यस्याप्यहमितिसाक्षिप्रत्यक्षसिद्धत्वादित्यर्थः । तस्यैवब्रह्मत्वा
दितिहृदयं । नत्वात्मनोऽवेद्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वरूपस्वप्रकाशत्वांगीकारात्कथंतस्यसाक्षिसिद्धत्वमित्यतआह ॥
स्वयंप्रकाशएवात्मेतिचेति ॥ उत्तरत्रेति । नचस्वेनापिज्ञेयमित्यादिना उत्तरत्रेत्यर्थः ॥ आत्मानुभवेति । अहमि
त्यात्मस्वरूपावगाहिसाक्ष्यनुभवेत्यर्थः । वस्तुत्वादिनेत्यादिपदेनज्ञेयत्वंग्राह्यं । शुक्तिरजतादिदृष्टांतेनेतिशेषः ॥ सर्व

[१०।६।१५] स्येत्युक्तमिति । यद्यात्मव्यतिरिक्तंकिंचित्सत्यंस्यात्तर्ह्येवव्यभिचारःस्यादितिभावः । एवमनुमानंकुतोनसंभवतीत्यतआह ॥ [१०।६।१७] शुक्तिरजतादेरिति । शुक्तिरजतादौवस्तुत्वहेत्वभावेप्यादिपदोक्तज्ञेयत्वरूपहेत्वभिप्रायेणेदमितिज्ञातव्यं ॥ [१०।६।१८] व्यभिचारेति । घटादिप्रपंचेभवत्पक्षेव्यभिचारापरिहारादित्यर्थः ॥ [१०।६।१८] आपादनादिति । नैवमस्माभिरस्मद्रीत्योच्यते किंत्वात्मनोन्यस्यसर्वस्यत्वयामिथ्यात्वांगीकारेणत्वन्मतेव्यभिचाराभावात्त्वद्रीत्यैवशुक्तिरजतदृष्टांतेनात्मनोपिमिथ्यात्वंस्यादित्यापाद्यतइत्यर्थः । शून्यवादी सर्वस्यमिथ्यात्वांगीकारवादी। एवमनुमानं आत्मामिथ्या वस्तुत्वाद्रूप्यवदित्यनुमानं। तथाच सर्वस्यमिथ्यात्वंशून्यवादिनानांगीकृतमिति कथमेवमनुमानं घटादिप्रपंचेव्यभिचारापरिहारादितिशंकातंप्रतिनसंभवतीत्याशयः । परन्यायेनकिंचेत्युक्ताभिप्रायद्वयेज्ञापकमाह ॥ [१०।६।१९] अतएवेति । आद्याभिप्रायेमायिनांगीकारादित्यर्थः । द्वितीयाभिप्रायेशून्यवादिनांगीकारादित्यर्थोद्रष्टव्यः । वस्तुत्वाद्यनुमानस्यासिद्ध्यादिदोषानाशंक्यनिराकरोति ॥ [१०।६।१९] नन्वित्यादिना ॥ [१०।६।२०] तद्व्यवहारेति । आत्मावस्त्वित्यादिव्यवहारेत्यर्थः । केचित्तु आदिपदोक्तज्ञेयत्वरूपधर्मानंगीकारेआत्मव्यवहारएव नस्यात् व्यवहारस्यव्यवहर्तव्यज्ञानसाध्यत्वादितिभावइत्याहुः ॥ [१०।६।२०] सत्येति । पारमार्थिकेत्यर्थः ॥ [१०।६।२१] दृश्यत्वादेरपीति ॥ सत्यंप्रत्यक्षदृष्टस्यमिथ्यात्वकल्पनंबाधकप्रमाणाधीनमिति । तथाप्युपपद्यतेजगतोमिथ्यात्वकल्पनं दृश्यत्वाद्यनुमानस्य बाधकस्यसत्त्वादित्येवंप्रपंचमिथ्यात्वसाधकत्वेनत्वदुपन्यस्तस्यापिदृश्यत्वादेस्त्वन्मतेसत्यत्वाभावात् प्रपंचेसत्यभूतदृश्य

त्वाभावेनासिद्धिःस्यादित्यर्थः । ननुदृश्यत्वमिथ्यात्वयोर्नसहानवस्थानरूपोविरोधः । कुतइतिचेत्तत्राह ॥ [१०६।१२१] शु
क्तिरजतादाविति । तर्हिवस्तुत्वमिथ्यात्वयोरपिशुक्तिरजतादौसहदर्शनात्नविरुद्धत्वमितिसममेवेत्याह ॥ [१०६।१२२] सम
मिति । ननुवस्तुत्वमिथ्यात्वयोःशुक्तिरजतादौनसहावस्थानं । कुतइतिचेत्तत्राह ॥ [१०६।१२२] वास्तवमिति ॥ [१०६।१२२] तथेति । वास्त
वंशुक्तिरजतेनास्तीत्यर्थः । तथाचदृश्यत्वमिथ्यात्वयोरपिशुक्तिरजतादौसहदर्शनान्नविरोधइत्युक्तमसदितिभावः । यादृश
तादृशं कल्पितं । तत्र शुक्तिरजते । एवंचसहदर्शनमेवास्तीतिनविरोधइतिभावः । तथाभूतं कल्पितं । अनुमानं आत्म
मिथ्यात्वानुमानं । साश्रुति विश्वंसत्यमित्यादिश्रुतिः । अन्या तत्सत्यमित्यादिकाऽऽत्मसत्यत्वश्रुतिः । ननुब्रह्मसत्यत्वा
वेदकश्रुतीनामुपक्रमादिलिंगसचिवत्वात्पारमार्थिकसत्यतापरत्वमितिचेत्तत्राह ॥ [१०६।१२४] उपक्रमादिलिंगानीति । ज्ञापयंति
संति । अन्यपरतां तत्सत्यमित्यादिश्रुतीनामात्मातिरिक्तेवस्तुनितात्पर्योपेततां ॥ [१०६।१२५] नतुपारमार्थिकत्वमिति । श्रुतिप्रतिपा
दितात्मसत्यत्वस्यपारमार्थिकत्वंनव्यवस्थापयंतीत्यर्थः ॥ [१०६।१२५] श्रुतिरपीति । आत्ममिथ्यात्वसाधकयुक्त्यातत्सत्यमित्यादिकाऽऽ
त्मसत्यत्वपराश्रुतिरपिकिंनबाध्यतइत्यर्थः । अपौरुषेयी पुरुषमतिकल्पितानभवतीत्यर्थः ॥ [१०६।१२६] नतथेति । संभावितदोषा
नेत्यर्थः ॥ [१०६।१२६] नतथेतितुल्यमिति । नित्यत्वेनसंभावितदोषंनभवतीतितुल्यमित्यर्थः । श्रुतेरपौरुषेयत्वेनासंभावितदोष
त्वंपरेणोक्तमंगीकृत्यप्रतिबंधोत्तरमुक्तं । वस्तुतस्तुतदेवनास्तीत्याह ॥ [१०६।१२६] अपिचेति ॥ [१०६।१२६] कथमिति । आविद्यकत्वस्यैवदोष

त्वादितिभावः । शंकते ॥ **मिथ्यात्वमिति** । आत्मामिथ्येत्यनुमानेसाध्यभूतंमिथ्यात्वमिस्यर्थः ॥ **मायावादिरीत्येति**। तेनशुक्तिरजतादेःसदसद्वैलक्षण्यरूपानिर्वचनीयत्वांगीकारादितिभावः ॥ **शून्यवादिनइति** । शून्यवादीयद्येवमनुमानं प्रयुंजीतेतिपूर्वमुक्तत्वादितिभावः ॥ **अप्रसिद्धेति** । तेनसर्वस्याप्यसत्यत्वांगीकारेणानिर्वचनीयस्यवस्तुनस्तन्मतेऽप्रसिद्ध त्वादितिभावः॥ **तुल्यत्वादिति** । तत्रापिमिथ्यात्वमसत्त्वंचेन्मायिमतेदृष्टांतेसाध्यवैकल्यंअनिर्वचनीयत्वंचेत्सिद्धांतिनोमते ऽप्रसिद्धविशेषणत्वमित्यर्थः॥ **सत्यविवेकेति** । सद्भिन्नत्वरूपंमिथ्यात्वंसाध्यतइतिनदृश्यत्वानुमानेसाध्यवैकल्यादिदोषइत्य र्थः॥ **समानमेतदिति** । सद्भिन्नत्वरूपेमिथ्यात्वेसाधितेसाध्यवैकल्यादिदोषोनास्तीतिसमानमित्यर्थः॥ **किमुत्तरमिति** । अ प्रसिद्धविशेषणत्वानवकाशादितिभावः। योभ्रमःससाधिष्ठानइतिसामान्यसिद्धिः । नचात्मातिरिक्तंतदस्तीतिपरिशेषः ॥ त **दिदमुक्तमिति** । सामान्यसिद्धिपरिशेषाभ्यांविश्वभ्रमस्यात्माधिष्ठानकत्वमितिद्वितीयपक्षदूषणमपिशब्देनोक्तमित्यर्थः ॥ **दूषणांतरेति** । आत्ममिथ्यात्वानुमाने। नन्वात्मनोवस्तुत्वादिधर्मानंगीकारादसिद्धोहेतुरित्यादियद्दूषणंत्वयाभिधीयतेतस्य सर्वस्यविश्वमिथ्यात्वानुमानेपिसमीकरणसमुच्चयेपिशब्दइत्यर्थः ॥ **तच्चेति**। समीकरणंच । तर्हिदृश्यत्वादेरपिसत्यत्वाभावा दसिद्धिस्स्यादित्यादिनापुरस्तादस्माभिःप्रदर्शितमित्यर्थः । पुरस्तात् नचात्मन्यनात्मभ्रमःक्वापिदृष्टइत्यत्रोक्तमित्यर्थइति भावबोधेव्याख्यातं ॥ **परेणापीति** । वक्तव्यमितिसंबंधः॥ **अनुभवएवेति**। आत्मस्वरूपसत्यताग्राहीसाक्षिरूपानुभवएवेत्य र्थः। अनुमानस्य आत्ममिथ्यात्वानुमानस्य॥**प्रामाण्येति**।अनुमानप्रामाण्येत्यर्थः॥**प्रकृतेपीति** । ज्ञानाज्ञानसुखदुःखादिविष

यकानुभवेपीत्यर्थः।सत्यंप्रत्यक्षदृष्टस्यमिथ्यात्वकल्पनंबाधकप्रमाणाधीनमिति। तथाप्युपपद्यतेजगतोमिथ्यात्वकल्पनं। दृश्य त्वाद्यनुमानस्यज्ञाननिवर्त्यत्वान्यथानुपपत्तेश्चबाधकस्यसत्त्वादितिप्राक्शंकितं। तत्रानुमानंदूषयित्वोपसंहरति ॥ [१०७।१२] **नानुमाने नविश्वमिथ्यात्वसिद्धिरिति**। ननुतथापिज्ञाननिवर्त्यत्वान्यथानुपपत्तिरेवविश्वसत्यत्वावगाहिप्रत्यक्षस्यबाधिकाभविष्य तीत्यतआह ॥ [१०७।१२] **ज्ञानाद्बंधनिवृत्तिस्त्विति**। याप्रागनुमानादिनैवबाधोनदृष्टइत्यत्रादिपदगृहीतेत्यर्थः ॥ [१०७।१३] **असिद्धैवेति**। स्यादेवंयदिविश्वस्यज्ञाननिवर्त्यत्वंस्यात् नचैवंकिंनामप्रसादनिवर्त्यत्वमेव । यस्यप्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणेतिश्रुतेः। किंचबंधकोभवपाशेनभवपाशाच्चमोचकइतिश्रुतौभगवतोबंधनिवृत्तिसाधनत्वंतावच्छ्रूयते । साधनंचद्वि विधं। सिद्धमसिद्धंचेति। तत्रसिद्धंसव्यापारीकरणीयं।यथाकुठारादि। असिद्धंप्रयत्नेनोत्पाद्यं। यथायागादि। सिद्धंचसा धनंभगवान् अतःससव्यापारीकरणीयः। व्यापारश्चप्रसन्नतैव । व्यापारिव्यापारप्राधान्यविवक्षयाभवपाशाच्चमोचकः य स्यप्रसादादितिवाक्यद्वयमप्युपपद्यते । तच्चज्ञाननिवर्त्यत्वं सत्यस्यापिनिगडबंधादेरिवसंभवतीत्येवं यथादृष्टप्रसन्नःसन् राजाबंधापनोदकृत्। एवंदृष्टस्सभगवान्कुर्याद्बंधविभेदनमित्यनुव्याख्यानेउक्तमित्यर्थः। प्रत्यक्षसिद्धस्यबलवताप्रत्यक्षादि नाविनायुक्तिमात्रेणबाधोनास्तीतिप्रतिपादितं। तत्रविपक्षेबाधकाकांक्षायांभूतचतुष्टयस्येत्यादिनाबाधकंप्रागुक्तं। तत्रपृथि व्याःपृथिवीत्वाभावादेःसर्वमिथ्यात्ववादिनोऽभीष्टत्वादितीष्टापत्तौचोदितायां अनुभवसिद्धस्यबलवदनुभवंविनेत्यादिना प्रत्यक्षसिद्धस्ययुक्तिमात्रेणबाधांगीकारे आत्मनोपिमिथ्यात्वंस्यादित्यतिप्रसंगांतरमुक्तं। तत्रानेनैवातिप्रसंगेनालंकिंतर्कमा

त्रतइत्यादिनोक्तेनप्राचीनातिप्रसंगेनेत्यतआह ॥ **योलौकिकीमिति** ॥ **वैतालिकत्वमिति** । वेतालः पिशाचः । तत्समानधर्मवत्त्वंवैतालिकत्वमित्यर्थः । अन्यथालोकमर्यादानतिक्रमेणवैतालिकत्वानालंबनेपृथिव्याःपृथिवीत्वाभावादेरिष्टत्वादितिकथमाशंकेतेतिभावः ॥ **अर्थमिति** । अनुभवसिद्धस्येत्यनेनोक्तआत्ममिथ्यात्वरूपइत्यर्थः । दुर्घटत्वस्यचेत्यत्र चशब्दोप्यर्थः सचगर्हायां अपिःपदार्थेत्यादिसूत्रात् । अतस्तदभिप्रायमाह ॥ **अंगीकारानर्हस्यापीति** । आत्मनोमिथ्यात्वांगीकारेआपतितंदूषणमेवदर्शयति ॥ **घटादयइत्यादिना** । असाक्षित्वं असाक्षिकत्वं । अत्रसाक्षिशब्दःप्रत्येतृपरः। इष्टापत्तिंपरिहरति ॥ **नचक्रियेति** । क्रियाप्रतीतिरूपा ॥ **ध्वंशतेति** । अधिष्ठानारोप्यरूपध्वंशतेत्यर्थः। अवधिः पर्यंतः इदं पुरोवर्ति । एवं शुक्तिरेव । तथा रजताकारेण । नेत्यर्थः ॥ **दर्शनादिति** । दूषणमापततीन्यन्वयः । कर्तृत्वाभावो प्रमातृत्वमित्यर्थः । एवेत्युक्त्या आत्मनश्चेतिचशब्दोवधारणार्थइत्युक्तंभवति । इदमुक्तं घटादीनांद्रष्टृत्वमित्युक्तं । इत्यादीत्यादिपदंव्याख्याति ॥ **निरवधिकएवायमिति**। एतदनुरोधेनैवप्रागपिचभ्रमस्येत्याद्युक्तमित्यवगंतव्यं । सर्वमपीत्यत्रापिशब्दस्यविरुद्धपदेनान्वयइत्याह ॥ **विरुद्धमपीति** । ननुसर्वंभवत्वितिवक्तव्यमित्येतन्मूलेकथंलब्धमित्यतःस्यादित्यनंतरमंगीकार्यमितिशेषपूरणेनेत्याशयेनाह ॥ **स्यादिति** । प्रतीतेरपीत्यपिशब्दाभिप्रायमाह ॥ **आरोप्यवदिति** । अर्थज्ञानात्मकोभयविधभ्रमांगीकारादितिभावः । नन्वारोपरूपायाःप्रतीतेःसाक्षिरूपत्वांगीकारान्नाविद्यामयत्वमित्यतआह ॥

साक्षिरूपत्वेपीति । नन्वविद्यांविनाकुतःसाक्षिणआरोप्यसंबंधानुपपत्तिरित्यतस्तत्रहेतुरुक्तोसंगत्वेनेति । साक्षिणइति शेषः । असंगोह्ययंपुरुषइतिश्रुतेरित्यर्थः । तथाचाविद्यामयत्वमेवप्राप्तप्रायमितिभावः । ततःकिमित्यतआह ॥ अविद्याम य्याश्चेति । भूषणत्वादित्यस्यार्थमाह ॥ मिथ्यात्वस्येति । मिथ्यात्वोपपादकत्वादित्यर्थः ॥ मिथ्यात्वहानेरिति । मिथ्याभूतस्यप्रमाणापेक्षत्वेप्रामाणिकत्वप्राप्त्यामिथ्यात्वहानेरित्यर्थः । ननुमिथ्यात्वहानिभियामिथ्याभूतस्यप्रपंचस्यप्रमाणा नपेक्षत्वेपिप्रपंचनिष्ठंयन्मिथ्यात्वंतत्तावत्प्रमाणेनोपपादनीयमेव । तथाचाधिष्ठानंविनाभ्रमः द्रष्टृभावेप्यारोपरूपाप्रतीतिः स्यादित्यादिरूपोदोषःपरिहर्तव्यएव । अन्यथाद्रष्टारमधिष्ठानंचविनाभ्रमाद्यंगीकारेप्रपंचेमिथ्यात्वस्यप्रमाणेनोपपादयितुम शक्यत्वेनतदसिद्धिप्रसंगादित्यतआह ॥ तन्मिथ्यात्वस्यापीति । स्यादिदंप्रपंचमिथ्यात्वस्यप्रमाणेनोपपादनीयत्वं । य दिचप्रपंचनिष्ठंमिथ्यात्वंसत्यंस्यान्नचैवं । तस्यब्रह्मभिन्नत्वेऽद्वैतहानेः । नापिब्रह्ममात्रं । सोपाधिकनिरुपाधिकयोरैक्यायो गात् । अतस्तन्मिथ्याभूतमेवेत्यंगीकृतमितिनतत्प्रमाणेनोपपादनीयमितिनद्रष्टृभावेपिप्रतीतिरित्यादिदोषःपरिहर्तव्यइति भावः । किमनेनभूषणत्वांगीकारेणेत्यन्वयः । पूर्वघटादीनांद्रष्टृत्वमित्यादिकंपूर्वोक्तार्थप्रपंचनपरमितिव्याख्यायेदानींप्रका रांतरेणव्याख्याति ॥ अथवेति ॥ एकोतिप्रसंगइति । अप्रामाणिकंप्रमाणविरुद्धमपिविश्वमिथ्यात्वमंगीकृत्यदूषणमपि भूषणत्वेनांगीकुर्वाणस्यदुर्घटमप्यात्ममिथ्यात्वंस्यादित्येकोतिप्रसंगउक्तइत्यर्थः । ननुतत्रात्ममिथ्यात्वस्यदुर्घटत्वंनामकीदृश मित्यतआह ॥ तत्रेति । तथाचदुर्घटमपीत्यस्यतत्सत्यंसआत्मेतिश्रुतिविरोधादिनादुर्घटमपीत्यर्थोद्रष्टव्यः ॥ घटादीनामि

ति । दूषणमपिभूषणत्वेनांगीकुर्वाणस्यैवघटादीनांद्रष्टृत्वमित्यादिनाऽतिप्रसंगांतरमुच्यतइत्यर्थः । उपाधीनांभेदइत्यन्यथा
प्रतीतिनिरासायशाकपार्थिवादिवत्मध्यपदलोपीसमासइत्याशयेनाह ॥ उपाधिकृतइति । सुखदुःखादेर्मनोगतत्वेनहस्त
पादगतत्वाभावादाह ॥ तन्निमित्तकमिति । हस्तादीनांसुखदुःखादिभोगावच्छेदकत्वेनसुखाद्युत्पत्तौनिमित्तत्वादित्यर्थः ।
अत्रभोक्तुर्भेदोनदृश्येतेत्यनेनापादितेभोक्तृभेदाभावेउपाधिभेदांगीकारइत्युक्तोपाधिभेदस्यापादकत्वंप्रतीयते । तदयुक्तं । अ
प्रयोजकत्वात् । अतोत्रभोक्तृभेदोनस्यात्सर्वदेहगतसुखदुःखादिकमेकेनैवभुज्येतेत्युक्तापादनेयदिसर्वेषांजीवानामभेदःस्यादि
त्यापादकमध्याहार्यं । पुनरनुसंधानेअथमतमित्यादिनाप्रयोजकांतरशंकायांउपाधिभेदांगीकारइत्यादिकंतस्यव्यभिचारप्रद
र्शनार्थप्रवृत्तमित्याशयेनापादनप्रकारंदर्शयति ॥ अयमत्रापादनक्रमइति । अनुग्रहः स्रक्चंदनादिप्रियवस्तुसंबंधः ।
उपघातोऽप्रियवस्तुसंबंधः ॥ भोक्तृभेदोनस्यादिति । ननुतर्हिमूलेभोक्तुर्भेदोनस्यादित्येववक्तव्यं नदृश्यतेतिकिमर्थमुक्त
मितिचेन्न । भोक्तृभेदोनस्यादित्युक्तापाद्यस्यप्रामाणिकपरित्यागरूपानिष्टत्वज्ञापनार्थत्वादितिद्रष्टव्यं । भोक्तुर्भेदइत्यत्रभोक्तु
रित्यस्याभिप्रायंवक्तुमाह ॥ नचापाद्येति ॥ स्वरूपाभेदस्येति । चैतन्यैक्यस्येत्यर्थः ॥ भोक्तृरूपभेदाभावस्येति ।
उक्तरीत्याव्यवस्थयासुखदुःखभोक्तृदेवदत्तयज्ञदत्ताभिधरूपाणांभेदाभावस्यापाद्यत्वादित्यर्थः । नन्वेवमपीष्टापत्तिःस्यात् ।
वस्तुगत्याभोक्तुरेकत्वांगीकारेणभोक्तृरूपभेदस्याप्यभावादित्यतआह ॥ तदयंप्रसंगार्थइति । ननुदेवदत्तादेर्यज्ञदत्तादिगत
सुखदुःखादिविषयकानुमितिरूपानुसंधानसंभवेनेष्टापादनमित्यतआह ॥ अनुसंधानंनामेति । ननुसिद्धांतेतर्कस्यापाद्या

निष्टत्वंविपर्ययपर्यवसानंचसाध्यसाधकत्वोपयोगीत्यंगीकृतं । तथाचनजीवाःपरस्परसुखदुःखाद्यनुसंधातारस्तस्मात्स्वाभावि कैक्यवंतोनभवंतीतिविपर्ययेपर्यवसानंअनुसंधानाभावस्यस्वाभाविकैक्याभावेनव्याप्तिग्रहंविनानसंपद्यतइतितयोर्व्याप्तिग्र- होवक्तव्यः । नचसप्रकृतेसंभवति । आपादकभूतस्वाभाविकैक्याभावस्यपरेणक्वाप्यनंगीकारेणदृष्टांताभावादित्यतआह ॥

प्रसंगविपर्ययइति । यत्रस्वाभाविकैक्यंतत्रानुसंधानंयथायज्ञदत्तशरीराधिष्ठाताजीवइतिव्यतिरेकव्याप्तिरेवाश्रीयतइति दृष्टांताभावेनव्याप्तिग्रहानुपपत्तिरूपोदोषोनास्तीत्यर्थः ॥ **भेदसिद्धिमिति** । धर्मिभूतजीवभेदसिद्धिमित्यर्थः ॥ **धर्माणांभेदइति** । तथाचधर्मभेदाद्धर्मिभेदइत्यर्थः ॥ **विरोधइति** । तथाचविरुद्धधर्मभेदाद्धर्मिभेदइत्यर्थः ॥ **भिन्नाश्रयत्वमिति** । तथाचभिन्नाश्रयधर्मभेदाद्धर्मिभेदइत्यर्थः ॥ **एकस्यापीति** । तथाचरूपरसादिधर्माणांभेदेपिध र्मिणोघटस्यैकत्वेनभेदाभावेनव्यभिचारान्नधर्मभेदरूपव्यवस्थायाधर्मिभेदसाधकत्वमितिभावः ॥ **सुखादीनामिति** । तथाचसुखदुःखादीनांपरस्परविरहरूपत्वलक्षणविरोधाभावेनस्वरूपासिद्धिरितिभावः । ननुसुखदुःखादीनांपरस्परविरहरू पत्वलक्षणविरोधाभावेपिसहानवस्थानरूपोविरोधोभविष्यतीतिनासिद्धिरित्यतआह ॥ **कारणोपनिपातेसतीति** । सुख दुःखकारणानांयुगपद्देहसंबंधेसतितज्जन्यसुखदुःखयोःसहावस्थानसंभवादित्यर्थः । तथाचपुनरसिद्धिरेवेतिभावः । ननुतथा पिसुखदुःखादीनांवध्यघातुकभावेनविरोधोभविष्यतीतिनासिद्धिरित्यतआह ॥ **वध्यघातुकभावस्येति** । एकस्मिन्स्थाने

सतोरेवह्यहिमूषकयोर्वध्यघातुकभावोदृष्टोनभिन्नस्थानेसतोरित्येवंवध्यघातुकभावरूपविरोधस्यैकाश्रयत्वसापेक्षत्वेनवध्यघातुकभावविरोधोपेतसुखदुःखादिधर्मभेदस्यप्रत्युतधर्म्यभेदसाधकत्वेनविरुद्धत्वान्नधर्मिभेदसाधकत्वमितिभावः ॥ अन्योन्याश्रयत्वप्रसंगादिति[१०८।१८]। धर्मिभेदसिद्धौधर्माणांभिन्नाश्रयत्वलक्षणव्यवस्थासिद्धिः । तत्सिद्धौचतयाधर्मिभेदसिद्धिरित्यन्योन्याश्रयत्वप्रसंगादित्यर्थः । एतेनेत्युक्तंविशदयति ॥ [१०८।१९] व्यवस्थाशब्देनेति । यस्यसुखमुत्पन्नंतस्यैवतदनुसंधानभावोनान्यस्य यस्यदुःखमुत्पन्नंतस्यैवतदनुसंधानमन्यस्यतदभावइति सुखदुःखाद्यनुसंधानभावाभावयोरेवव्यवस्थाशब्देनविवक्षितत्वादित्यर्थः ॥ [१०८।१९] यच्चोक्तमिति । परेणस्वग्रंथइत्यर्थः । अंशानां जीवानां । अंशिनो ब्रह्मणः । भास्करमतेजीवब्रह्मणोरंशांशिभावांगीकारादंशानामित्याद्युक्तं । यत्रस्वाभाविकैक्यंतत्रांशानामनुसंधानमित्यस्यव्यभिचारमाह ॥ [१०८।२०] हस्तगतसुख(दुःख)स्येति । हस्तावच्छिन्नांशगतसुखस्येत्यर्थः । पादगतेनांशेन ॥ [१०८।२०] इष्टत्वादिति । तथाचानिष्टत्वरूपांगविकलत्वादाभासभूतस्तर्कइतिभावः । जीवानां अंशानां । तत्रोक्तंव्यभिचारंपरिहरति ॥ [१०८।२१] सुखादिकारणानामिति । स्रक्चंदनादिविषयाणामित्यर्थः । सुखादीनां तज्जन्यसुखादीनां ॥ [१०८।२१] हस्तादिसंबंधेपीति । सुखादिकारणविषयाणांहस्तादिनासंयोगःसंबंधः । सुखादीनांचहस्तादिनानिमित्तनिमित्तिभावइतिसंबंधोबोद्धव्यः । भोक्तुरेकत्वेनेत्यनंतरं अनुसंधानसद्भावादितिशेषः । यद्यपिसुखादिकारणीभूततत्तद्विषयसंबंधस्तज्जन्यसुखादिकंचहस्ताद्यवच्छेदेनैवास्ति अतस्तदवच्छिन्नांशानामनुसंधानेत्वयोच्यते । तथापिभोक्तुरेकत्वेनतत्तदंशानांस्वाभाविकैक्यसद्भावेनानुसंधानमस्त्येवेतिनव्यभिचारइतिभावः । पादगतसुखस्यहस्तग

तेनानुसंधानानंगीकारेबाधकमाह.॥ अन्यथेति । ननुयथापुत्रपादतललग्नकंटकोद्धरणायतदीयदुःखानुसंधानाभावेपिपि
तुःकृपयाप्रवृत्तिर्भवतितथात्रकृपयाप्रवृत्तिरुपपद्यते । तथाचनतदन्यथानुपपत्त्यानुसंधानंकल्पनीयमित्याशंकते ॥ नचपुत्रा
दाविवेति ॥ दुःखाद्यनुमानपूर्वकेति । रोदनादिनातदीयदुःखादिकमनुमायानंतरंजातयाकृपयातदीयकंटकोद्धरणादौ
पितुःप्रवृत्तिरुपलब्धा तथात्रानुपलंभादित्यर्थः । उपाधिभेदांगीकारइत्यादिमूलनिवर्त्यामाशंकामाह ॥ अथमतमिति ।
घटस्यघटेनाभेदेसत्यप्यनुसंधानाभावाद्व्यभिचारइत्यतश्चेतनत्वेसतीत्युक्तं ॥ प्रयोजकमिति । येनपरस्परानुसंधानंस्यादि
तिभावः ॥ एतेनेति । हस्तपादाद्युपाधिभेदेपीत्यादिनावाक्येनेत्यर्थः ॥आपाद्येति । उपाधिकृतभेदाभावसहितस्वरूपैक्य
रूपप्रयोजकस्यव्यभिचारादनुसंधानरूपापाद्याव्यापकत्वमुक्तंवेदितव्यमित्यर्थः ॥ विशेषणस्येत्यादि । स्वाभाविकैक्यवा
दिमतेभेदाभावस्यकेवलान्वयित्वेनपर्वतेतरत्वादौपर्वतेत्यस्येवोपाधिकृतेत्यस्यविशेषणस्यपक्षमात्रव्यावृत्तिप्रयोजकत्वेनानुमा
नमात्रोच्छेदकत्वाद्वैयर्थ्यमेवकस्मान्नोक्तं । आपाद्याव्यापकत्वंकस्मादुक्तमित्यर्थः ॥ साध्येति । आपाद्येत्यर्थः । उक्तप्रयो
जकेआपाद्याव्यापकत्वस्यस्फुटत्वात्तदेवोक्तमितिभावः ॥ क्वचिदिति । यत्रोपाधेःसाध्याव्यापकताग्राहकानुकूलतर्कोना
स्ति तत्रपक्षमात्रव्यावर्तकविशेषणवतोप्युपाधित्वमंगीकृतं । अनुकूलतर्कसद्भावेपक्षएवसाध्यव्यापकताभंगापत्तेः । अनुकूले
नतर्केणसनाथेसतिसाधने । साध्यव्यापकताभंगात्पक्षेनोपाधिसंभवइतिवचनात् । अतोबाधोन्नीतपक्षेतरत्वमुपाधिरिति

भावः ॥ वैयर्थ्यस्यो[१०९।२]पपादनीयत्वादिति । प्रकृतेचापादकस्यापाद्येनव्याप्तावनुकूलतर्कव्युत्पाद्यपक्षएवापाद्याव्यापकत्वं प्रयोजकस्योपपाद्योपाधिकृतेत्यस्यविशेषणस्यवैयर्थ्यमस्माभिरुपपादनीयंभवतीतिप्रयत्नगौरवमायाति । अतआपाद्याव्यापकत्वरूपंस्फुटदूषणमुपेक्ष्योपपादनीयदूषणाभिधानेऽकौशलंस्यादितितदेवोक्तमितिभावः ॥ [१०९।१४]तस्मिन्नपीति । बहुजीववादाभ्युपगमेपीत्यर्थः । ननुस्वीयसर्वोपाध्यपगमएवमुक्तिः । तथाचयज्ञदत्ताद्यभिधोपाधीनांदेवदत्तीयत्वाभावात्तदनपगमेपिदेवदत्तमुक्तिर्नविरुद्धेत्यतआह ॥ [१०९।१६]देवदत्तजीवस्येति । देवदत्ताभिधशरीरावच्छिन्नचेतनस्येत्यर्थः ॥ [१०९।१६]यज्ञदत्तादिर्जीवाभेदेनेति । यज्ञदत्ताद्यभिधशरीरावच्छिन्नचेतनाभेदेनेत्यर्थः । अनेनतस्यैवेत्येतदुक्ततात्पर्यकंज्ञातव्यं ॥ [१०९।१८]तत्किमिति । येनदेवदत्ताभिधोपाधिरेवदेवदत्तसंबंधी नयज्ञदत्ताभिधोपाधिरितिस्यादितिभावः । शंकते ॥ [१०९।१८]अभेदेपीति । देवदत्तयज्ञदत्तयोरित्यर्थः ॥ [१०९।१९]तर्हीति । देवदत्तयज्ञदत्तयोरुपाधिसंबद्धत्वेनतयोरभेदमंगीकृत्यपुनरुपाधिकृतभेदांगीकारेउपाधिसंबद्धस्यैवोपाधिसंबंध इत्युक्तंस्यात् उपाधिसंबंधंविनातत्कृतभेदासंभवादितिभावः। अस्त्वितिचेत्तत्राह ॥ [१०९।१९]तच्चेति । उपाधिसंबद्धस्यैवोपाधिसंबद्धत्वं तदुपाधिकृतत्वेआत्माश्रयत्वं उपाध्यंतरकल्पनेऽनवस्थेत्यत्रात्माश्रयत्वादिनानिराकरिष्यतइत्यर्थः । एतेनेत्युक्तंविशदयति ॥ [१०९।२०]उपाध्यपरामर्शइति । उपाध्यविवक्षायामित्यर्थः । तथाहि । जीवस्यैतत्त्वंनामेतरवैलक्षण्यं भेदइतियावत् । इदंचोपाधिसंबंधंविनानसंभवति । तथाचैतज्जीवेत्यस्यप्राङ्निष्पन्नोपाधिसंबंधकृतभेदवतोदेवदत्तस्येत्यर्थस्स्यात् । तस्ययज्ञदत्तादिभे

दकसर्वोपाध्यपगमोस्यदेवदत्तस्यमुक्तिरित्युक्तंस्यात् । तथाचतत्रोपाधेरेकत्वविवक्षायामात्माश्रयत्वमितिभावः । नन्वेतज्जी
वेत्युक्तिर्नप्राङ्निष्पन्नोपाधिसंबंधकृतभेदापेक्षयाकिंतुभाव्युपाधिसंबंधकृतभेदापेक्षयैव । तथाचोपाध्यपरामर्शइत्युक्तात्माश्र
यानवकाशइत्यतआह ॥ [१०।९।१०] भाव्यपेक्षयैवमुक्तिरिति । एवमुक्ति रेतज्जीवेत्युक्तिः ॥ [१०।९।११] दूषयिष्यंतइति । किंचोपाधिरात्म
नइत्यादिनेत्यर्थः । ननुप्राक् यदिचैकमेवब्रह्मेत्यत्रतद्भावमापन्नस्यापिनमुक्तिरितिमुक्त्यभावउक्तः इदानींयथाचैकेत्यत्रापि
नमुक्तिस्स्यादितिमुक्त्यभावएवोच्यतइतिपूर्वग्रंथेनगतार्थतेत्यतआह ॥ [१०।९।११] प्रागिति । यदिचैकमेवब्रह्मेत्यत्रसर्वदासंसार्येवब्रह्मे
तिप्राप्यस्यब्रह्मणएवसर्वदोपाधिसंबंधस्यप्रतिपादितत्वात्तद्भावमापन्नस्यापिनमुक्तिरितिप्रतिपादितं । अत्रचतस्यैवानंतोपाधि
संबद्धत्वादित्युक्त्याप्राप्तुर्जीवस्योपाध्यनिवृत्त्युक्त्यामुक्त्यभावउच्यतइतिभेदइतिभावः । ननुहस्तपादादिस्थलेऽनुसंधानेसत्य
प्युपाधिकृतभेदसद्भावात्व्यभिचारइत्यतआह ॥ औपाधिकभेद [१०।९।१३] सद्भावेपीति । नविश्लेषाद्विशेषइतिवचनानुसारेणसंश्ले
षोविश्लेषाभावइतिव्याख्येयं । एवमुत्तरत्रापि । तथाचविश्लिष्टोपाधिकृतभेदाभावसहितंस्वरूपैक्यमेवानुसंधानेप्रयोजकमि
त्यर्थः । एवंचहस्तपादाद्युपाधीनांसंश्लिष्टत्वेनविश्लिष्टोपाधिकृतभेदाभावसद्भावेनानुसंधानोपपत्त्यानव्यभिचारइतिभावः ॥
[१०।९।१६] शिरोगतस्यकबंधगतस्यचात्मनइति । ननुकबंधेषुपातयंतीतिचेष्टोक्त्याजीवसद्भावःसिद्धः । अक्ष्णांकर्तृप्रयोज्यत्वरूप
दर्शनकारणत्वोक्त्यातत्रापितत्सद्भावःसिद्धः । तथाचजीवस्याणुत्वेनकथमुभयत्रावस्थानं । नचजीवानांसांशत्वात्तद्युक्तमि
तिवाच्यं । देवादीनांसांशत्वेपिमानुषजीवानांतदभावात् । नचभारतयुद्धेहीदंकथ्यते । भारतयुद्धगताश्चोत्तमाएवातस्तेषा

मंशतोवस्थानंयुक्तमितिवाच्यं । मानुषजीवानामप्येवंभावस्यक्वचिदर्शनात् । द्वित्रिच्छिन्नगोधाशरीरेषुयुगपच्चेष्टायाःसर्वजनप्रत्यक्षत्वाच्चेतिचेदुच्यते । उत्तमानामंशतोवस्थानसंभवान्नानुपपत्तिः । मानुषादिविषयेत्वित्थं । अघटितघटकोभगवानच्छेद्यमपिजीवंबहुधाविच्छिद्यतत्तद्व्यापारान्कारयित्वापुनरैक्यमापादयतीतिनानुपपत्तिः । यथोक्तं । अच्छेद्यस्यापिजीवस्यवि(भागं)च्छेदंबहुधाहरिः । कृत्वाभोगान्प्रदायैवचैक्यमापादयेत्पुनरिति ॥ [१०९।१८] विश्लेषा(दिति)द्विशेषादिति । उपाधिविश्लेषलक्षणविशेषसद्भावादित्यर्थः । किमनेनोक्तंभवतीत्यतआह ॥ [१०९।१९] अस्यापीति । विश्लिष्टोपाधिकृतभेदाभावसहितस्वरूपैक्यरूपप्रयोजकस्यापीत्यर्थः ॥ [१०९।१९] आपाद्येति । कबंधेषुव्यभिचारेणानुसंधानरूपापाद्याव्यापकत्वादित्यर्थः ॥ [१०९।१९] वाच्यइतीति । नह्यव्यापकाभावेनाव्याप्याभावोदृष्टइतिभावः ॥ [१०९।२१] सर्वदेति । तथाचानुसंधानेसर्वदाविश्लिष्टोपाधिभेदाभावःप्रयोजकः । कबंधेषुतुपूर्वसंश्लेषसद्भावेनसर्वदाविश्लिष्टोपाधिकृतभेदाभावसद्भावाद्युक्तमनुसंधानमितिभावः । ननुगर्भिण्यागर्भस्यगर्भदशायांसंश्लेषसद्भावेनसर्वदाविश्लिष्टोपाधिभेदाभावसत्त्वेप्यनुसंधानाभावेनव्यभिचारान्नसमव्याप्तिरतोनायमुपाधिरित्याशंक्यनिराकरोति ॥ [१०९।२१] नचगर्भिण्याइति ॥ [१०९।२१] व्यापकत्वमात्रेणेति । आपाद्यभूतानुसंधानव्यापकत्वमात्रेणैवोपाधित्वोपपत्त्यासमव्याप्तेरनपेक्षितत्वादितिभावः । इतियस्तुब्रूयादितिसंबंधः । योगिनः सौभर्याद्याः ॥ [१०९।२२] उदाहृत्त्व्याइति । उक्तप्रयोजकस्यव्यभिचारस्थलत्वेनेतिशेषः । तथाचतत्रानुसंधानेसत्यपिसर्वदाविश्लिष्टोपाधिभेदएवास्तीतिव्यभिचारइतिभावः । यथोक्तं । नानादेहगभोगानुसंधानंयोगिनोयथा । नचेद्भोगानुसंधानंतदिच्छायोगिनःकुतइति ॥

[१०९।२२] अयंग्रंथइति । अनुसंधानेप्रयोजकांतरमाशंक्यकबंधादौव्यभिचारकथनपरउद्यतायुधेत्ययंग्रंथइत्यर्थः । व्यवधानं । यथा चैकेतिवाक्येन अनेन उद्यतायुधेतिवाक्येन ॥ [१०९।२४] अत्रास्येति । यथाचैकेतिवाक्येनातिप्रसंगकथनानंतरंकबंधादौ व्यभिचारोपन्यासोयुक्तइत्यर्थः । कथंनिरस्ताभवतीत्यतआह ॥ [१०९।२४] स्वरूपैक्येइति । सतीतिशेषः । संश्लिष्टानामंगु ल्याद्युपाधीनां । विश्लिष्टानां देवदत्ताद्युपाधीनां । हेतुत्वे हेतुत्वविषये । नविशेषइत्यस्यार्थमाह ॥ [१०९।२४] विशेषाभा वादिति । कबंधस्थलेउपाधिविश्लेषसद्भावेप्यनुसंधानदर्शनेनेत्यर्थः । तद्वत्प्रकृतेपीतिशेषः॥ [१०९।२५] विश्लिष्टेति । देवदत्तयज्ञद त्तयोरपिविश्लिष्टोपाधिकृतभेदसद्भावइत्यर्थः ॥ [१०९।२५] संसारावश्यंभावादिति । सुखदुःखाद्यनुसंधानस्यैवसंसारत्वेनतस्या वश्यंभावादित्यर्थः ॥७॥ भेदकत्वं भेदकारित्वं॥ [११०।१] अनुवर्त्ततइति । किंचेतिपूर्ववाक्यादित्यर्थः ॥ [११०।२] ब्रह्मणोजीवस्यवेति। अज्ञानरूपोपाधेर्ब्रह्मसंबद्धत्वस्यदेहादिरूपोपाधेर्जीवसंबद्धत्वस्यपरेणांगीकृतत्वादितिभावः ॥ [११०।२] अतिप्रसंगादिति । का श्मीरस्थेनमहारजनेनकेरलदेशवर्तिवाससोऽवच्छेदप्रसंगादित्यर्थः ॥ [११०।४] अतःप्रागिति । किंचोपाधिरितिग्रंथात्प्रागित्यर्थः । येनप्रश्नोनोपपद्येतेतिभावः । प्रकारांतरेणप्रश्नानुपपत्तिंशंकते ॥ [११०।४] तथापीति ॥ [११०।४] प्रसिद्धामितीति । तथाचसंदेहायोगेनत न्मूलकविकल्पप्रश्नानुपपत्तिरितिभावः । परिहरति ॥ [११०।५] नेति ॥ [११०।५] गुणेष्विति । केचिद्रूपादयोगुणाःव्याप्यवर्तिनःप्रसि द्धाः शब्दोविभागश्चाव्याप्यवृत्तिनौप्रसिद्धौ संयोगश्चगुणः अतोव्याप्यवृत्तिरव्याप्यवृत्तिर्वेतिसंदेहसंभवेनयुक्तस्तन्मूलको

विकल्पः प्रश्नइत्यर्थः । ननुतथापिपरेणसंयोगस्यप्रदेशवृत्तित्वमंगीकृतमितिनिश्चितत्वेनपुनःप्रश्नानुपपत्तिरित्यतउक्तं ॥ परां[११०।१५]गीकारस्यचेति । नन्वेकदेशग्रासांगीकारेआत्मनःसावयवत्वंकुतःप्रसज्यतइत्यतआह ॥ एकदेशोवयवइति[११०।१७] । सिद्धांतेपटेउपादानभूततंतुव्यतिरिक्तानामपिहस्तवितस्त्यादिरूपैकदेशानामंगीकारात्परमतइत्युक्तं ॥ तत्कथमिति[११०।१८] । एकदेशवृत्तित्वस्यप्रदेशवृत्तित्वरूपत्वेहिसावयवत्वापादनंसंगतंस्यान्नचैवमितिभावः ॥ एकाधिकरणत्वइति[११०।१८] । संयोगस्यस्वात्यंताभावसामानाधिकरण्यांगीकारेभावाभावयोरेकाधिकरणत्वप्राप्तेरित्यर्थः । सर्वविरोधानां । ज्ञानवाक्यस्ववचनस्वन्यायविरोधानां ॥ तन्मूलत्वादिति[११०।१९] । भावाभावविरोधमूलकत्वादित्यर्थः । तदेवोपपादयति ॥ भावाभावयोर्हीति[११०।१९] । परस्परप्रतिक्षेपात्मकत्वेन परस्परविरुद्धरूपत्वेन॥ तद्वाराऽन्येषामिति[११०।१०] । घटतदभावयोर्विरुद्धत्वादेवज्ञानतदभावयोर्घटोऽस्तिघटोनास्तीतिघटतदभावप्रतिपादकवाक्ययोश्चविरोधः । एवमन्यत्रापीतिभावः । तद्विरोधस्थित्यै भावाभावयोर्विरोधस्थित्यै । विरोधस्थितौसत्यामितियावत् । तच्छांत्यर्थमितिशेषः ॥ स्वाभाविकइति[११०।१०] । तथाचसंयोगस्यस्वात्यंताभावसामानाधिकरण्यमंगीकुर्वतापिविरोधपरिहारायस्वाभाविकऔपाधिकोवाएकदेशोंऽगीकार्यएवेत्यर्थः । अतएवाहुःपदार्थविदः । अग्रेवृक्षःकपिसंयोगीमूलेनेतिप्रतीतेरवच्छेदकभेदेनाविरोधइति । तत्रावच्छेदकशब्देनप्रदेशस्यैवाभिप्रेतत्वादित्यवधेयं ॥ प्रसंगसमुच्चयइति[११०।१२] । सावयवत्वापादनेनसहानित्यत्वापादनस्यसमुच्चयइत्यर्थः ॥ कृतेति[११०।१२] । द्वंद्वांतेश्रूयमाणस्यत्वप्रत्ययस्यप्रत्येकंसंबंधः । तथाचकृतंकृतत्वं । कृतकत्वमित्यर्थः । एवंचविनाशिता अनित्यता । कृतकत्वसावयवत्वादिप्रयुक्तेतितद

र्थोद्रष्टव्यः । शिष्यःशंकते ॥ [११०।१३] नन्विति । द्रव्यमवयवइत्युक्तेघटादेरप्यवयवत्वंस्यादतउक्तं ॥ [११०।१३] द्रव्योपादानमिति । ता
वत्युक्तेसिद्धांतेशब्दरूपगुणस्याप्याकाशंप्रत्युपादानत्वेनावयवत्वंस्यादतउक्तंद्रव्यमितीतिसंप्रदायविदः ॥ [११०।१४] तस्येति । सो
पादानकद्रव्यस्येत्यर्थः ॥ [११०।१४] सर्वैरिति । भवदादिभिरपीत्यर्थः ॥ [११०।१५] आरंभ्यारंभकत्वप्रसंगेनेति । तंतूनामिवेतिशेषः । तं
तुवद्धस्तवितस्त्यादिपरिमितैकदेशानामपिपटोपादानत्वेहस्तवितस्त्यादिपरिमितैकदेशोपादानस्यान्यस्याभावेनतंतूनामेवतदु
पादानत्वेवाच्येतंतूनामादौहस्तवितस्त्यादिपरिमितैकदेशानामारभ्योत्पाद्यपटारंभकत्वप्राप्त्याविरम्यव्यापारप्रसंगेनेत्यर्थः ।
पटोत्पादनेप्रवृत्तानामस्माकंनहस्तवितस्त्याद्येकदेशोत्पादनेनैवचारितार्थ्यंकिंतुपटोप्यस्माभिःकरणीयइतिमत्वाहस्तवितस्त्या
दीनुत्पाद्यपश्चात्पटस्तंतुभिरारब्धव्यइत्येवंस्थित्वाव्यापाररूपोविरम्यव्यापारश्चेतनधर्मोनाचेतनेषुतंतुषुसंभवतीतिभावः ।
आकाशस्य अव्याकृताकाशस्य ॥ [११०।१६] दृश्यंतइति । साक्षिणेतिशेषः । इहविहंगमःपततीत्यादिप्रत्ययस्यसाक्ष्युपनीताव्याकृ
ताकाशैकदेशाधिकरणकत्वस्यान्यत्रसमर्थितत्वादितिभावः । तदाश्रयेण तादृशैकदेशाश्रयेण । तन्मात्रेण तादृशैकदेशवृत्ति
तामात्रेण ॥ [११०।१७] अंगीकृतंस्यादिति । आत्मनइतिशेषः । तेषां परेषां । अतएवानित्यत्वप्रसंगोनास्मन्मतइत्यर्थः । अनित्यत्वा
पादनेइष्टापत्तिंपरिहरति ॥ [११०।१८] अनित्यत्वेचेति । तथात्वइत्यनंतरंआत्मनइतिशेषः॥ [११०।२१] तस्यापीति । उपाधिसंयोगोयदंशवृत्ति
स्तस्यापीत्यर्थः । तर्ह्यनित्यत्वप्राप्तिःकथंपरिहृतेत्यतआह ॥ [११०।२१] स्वाभाविकस्यैवेति । नतूपाधिकृतांशस्येत्यर्थः ॥ [११०।२२] एतेनैवे

ति । जीवब्रह्मभेदहेतुभूतेनैवेत्यर्थः ॥ [११०।२३] अपेक्षितत्वादिति । तथाचस्वापेक्षयास्वस्यैवपूर्वभावित्वप्राप्त्याआत्माश्रयत्वमि तिभावः ॥ [११०।२४] अपेक्षत्वादिति । अंशस्येतिशेषः ॥ [११०।२४] अनवस्थेति । अंशोपाधिसंयोगपरंपरयानवस्थेत्यर्थः । नन्वेतदुपाधिसं योगकृतेंऽशे उपाध्यंतरसंयोगः। उपाध्यंतरसंयोगकृतेंऽशेएतदुपाधिसंयोगइत्युपाधिसंयोगद्वयांगीकारान्नानवस्थेतिचेत्तर्ह्यन्यो न्याश्रयस्स्यादित्याह ॥ [११०।२५] उपाधिसंयोगद्वयेति ॥ [११०।२५] त्रयादीति । उपाधिसंयोगत्रयाद्यंगीकारइत्यर्थः ॥ [११०।२५] पूर्वपूर्वेति । एतदुपाधिसंयोगस्यांशवृत्तित्वोपपत्त्यर्थंयेउपाध्यंतरसंयोगाःब्रह्मणिकल्प्यंतेतेपूर्वपूर्वसंयोगाः । तदन्येउत्तरोत्तराः । तथा चपूर्वोपाधिसंयोगेनैवांशभेदस्यप्राप्तत्वात्उत्तरोपाधिसंयोगकल्पनावैयर्थ्यमित्यर्थः । संयोगपक्षे उपाधिसंयोगपक्षे । भेदक त्वानुपपत्तिः उपाधेर्भेदकारित्वानुपपत्तिः । तत्रहेतुः ॥ [११०।२६] कृतस्येति । उपाधिसंयोगस्यांशवृत्तित्वांगीकारेउपाधिसंयोगात्प्रा गेवांशःसिद्धः । अन्यथातस्यैतद्वृत्तित्वकथनायोगात्तथाचांशसिद्ध्यातद्भेदस्यापिसिद्धत्वेनोपाधिनापुनस्तत्करणायोगा दित्यर्थः ॥ [११०।२६] इतिवक्तुंशंक्यतएवेति । तथाचसावयवत्वापादनंव्यर्थमितिभावः ॥ [११०।२८] सेति । उपाधेर्भेदकत्वानुपप त्तिः । तस्यचावयवस्यौपाधिकत्वनिरासेनेत्यन्वयः । तत्रहेतुः ॥ [१११।१] आत्माश्रयेत्यादि । तदुपाधिकृतत्वइत्यादिनो क्तरीत्येत्यर्थः । दंडादिना दंडाद्युपाधिना । देवदत्तस्य विशेष्यभूतदेवदत्तस्वरूपस्य । तर्ह्युपाधेःकृत्याभावाद्वैय र्थ्यमित्याशयेनशंकते ॥ [१११।३] किंत्विति । उत्तरमाह ॥ [१११।३] दंडादीति । उत्पादयतीत्यनंतरंइत्येवेतिशेषः । तथाचविशे

ष्यभूतोदेवदत्तोविशिष्टंप्रत्युपादानं विशिष्टशुद्धयोश्चभेदाभेदौ । एवंचविशेष्यभूतदेवदत्तस्यविशिष्टाकारेणपरिणामेदंडाद्यु पाधिसंबंधोनिमित्तमित्येवनतुदेवदत्तेभेदकारीत्यर्थः। ननुदंडाद्युपाधिस्तावद्देवदत्तेवैशिष्ट्यमुत्पादयति। अदंड्यादिव्यावृत्तिरे ववैशिष्ट्यमित्यंगीकृतंवैशेषिकैः । व्यावृत्तिरेवचभेदः । एवंचदंडाद्युपाधेर्व्यावृत्त्यपरपर्यायवैशिष्ट्याख्यभेदकारित्वंप्राप्त मेवेतिकथमुपाधिकृतोभेदोनास्तीत्युच्यतइत्यतआह ॥ [१११३]व्यावृत्तिरेवेति ॥ [१११४]प्राक्स्थितामेवेति । अदंड्यादिव्यावृत्तेरन्यो न्याभावरूपायाःनित्यत्वेनवैशेषिकैरंगीकारात्दंडाद्यभावदशायामपिदेवदत्तेऽदंडिव्यावृत्तिसद्भावेनदंडाद्युपाधिसंबंधस्य प्राक्स्थितादंड्यादिव्यावृत्तिज्ञापकत्वमेवनकारकत्वमितिभावः । नन्वदंडित्वदशायामदंडिव्यावृत्तिःकथं । अन्योन्याभा वस्यप्रतियोगितावच्छेदकेनसहविरोधाद्दंडित्ववत्यदंडिव्यावृत्तेरयोगादितिचेदुच्यते । अत्यंताभाववदन्योन्याभावस्याप्य व्याप्यवृत्तित्वात्। नचात्यंताभावस्याव्याप्यवृत्तित्वेपितस्यप्रतियोगिसामानाधिकरण्याविरोधघटकावच्छेदकभेदवदिहान्यो न्याभावस्याव्याप्यवृत्तित्वेप्रतियोगितावच्छेदकसामानाधिकरण्याविरोधघटकंकिमपिनास्तीतिवाच्यं । कालभेदस्यैवेहस त्त्वात् । पूर्वमदंडिनोपिपश्चाद्दंडसंबंधदशायामदंडिव्यावृत्तेरपिसत्त्वेनादंडित्वादंडिव्यावृत्त्योःकालभेदेनाविरोधोपपत्तेः । यद्वायथानित्योपिघटात्यंताभावोभूतलेघटसद्भावदशायांभूतलासंसर्गितयाऽवृत्तिन्यायेनास्तिततोनविरोधः। घटापसरणेतु भूतलघटसंबंधध्वंसरूपव्यंजकसंपत्त्याप्रतीयतइत्यंगीकृतंतार्किकैः । एवमदंडित्वदशायांनित्यभूतादंडिव्यावृत्तिरपिदेवदत्ता संसर्गितयास्त्येवातोनविरोधः । साचदंडसंबंधरूपव्यंजकसमवधानेसतिप्रतीयतइतिद्रष्टव्यमिति । ननुदंडाद्युपाधिसंबंधेन

देवदत्तेपूर्वमविद्यमानंदंडित्वादिरूपमवस्थांतरंजायतइत्यनुभवसिद्धं । एवंचावस्थांतरापादकत्वमेवभेदकत्वमित्युपाधेरवस्थांतररूपभेदकारित्वसिद्धिरित्यतआह ॥ [१११।१४] नहीति ॥ [१११।१४] अत्रेति । सुखदुःखादिव्यवस्थोपपादनरूपेप्रकृतइत्यर्थः । कुतो नहिविवक्षितमित्यतआह ॥ [१११।१४] तस्येति । यथैकस्मिन्देहेबाल्ययौवनाद्यवस्थांतरापत्तौनदेवदत्तयज्ञदत्तगतसुखदुःखादिव्यवस्थोपपत्तिरेवमेकस्यैवशरीरलक्षणोपाधेर्देवदत्तेऽवस्थांतरापादकत्वप्राप्तावपिनतेनदेवदत्तयज्ञदत्तयोस्सुखदुःखादिव्यवस्थासिध्यतीत्येवमवस्थांतरापादकत्वरूपभेदकत्वस्यसुखदुःखादिव्यवस्थानुपयोगित्वादित्यर्थः । तर्हिव्यवस्थोपयोगिभूतंभेदकत्वं कीदृशमितिपृच्छति ॥ [१११।१५] किंनामेति । उत्तरमाह ॥ [१११।१५] युगपदिति । यद्युपाधिर्युगपदनेकत्वरूपभेदहेतुःस्यात्तर्ह्येवैतादृशोपाधिकृतभेदेनोक्तव्यवस्थोपपत्तिर्नान्यथा । एवंचदंडाद्युपाधिर्देवदत्ते नयुगपदनेकत्वरूपभेदहेतुरतोनदंडादेर्देवदत्तादौ युगपदनेकत्वरूपभेदहेतुत्वस्याभावादुपाधिकृतोभेदोनास्तीत्युक्तंयुक्तमितिभावः ॥ ७ ॥ [१११।१६] अप्रतिबंधकत्वादिति । हस्तपादाद्युपाधिभेदेपितद्गतसुखदुःखादिभोक्तुरेकत्वानुभवादितिभावः ॥ [१११।१७] भेदाभावादिति । त्वन्मतेब्रह्मेश्वरयोस्स्वाभाविकभेदाभावादित्यर्थः । उत्तरवाक्यगतापरिच्छिन्नयोरितिद्विवचनानुरोधादाह ॥ [१११।१८] द्वयोरपीतिशेषइति । उत्तरवाक्यगतकालतइत्यनुरोधादाह ॥ [१११।१९] नित्यत्वाच्चेत्यपीति ॥ [१११।२०] देशावच्छेदकत्वेनेति । देशमर्यादाकरणेनेत्यर्थः । महारजनं मंजिष्ठाद्रव्यं । तत्वस्त्रप्रदेशयोर्मर्यादाकरणेनभेदकमित्यर्थः । कालावच्छेदकत्वेन कालमर्यादाकरणेनेत्यर्थः ॥ [१११।२१] यौवनादिकमिति । यौवनादिकंपूर्वोत्तरकालमर्यादाकरणेनदेहभेदकारीत्यर्थः ॥ [१११।२२] द्वयोरिति । ईश्वरब्रह्मणोरित्यर्थः । सर्वग

तत्वादावित्यत्रादिपदेननित्यत्वंग्राह्यं ॥ [१११।१२]विवादइति । ईश्वरस्येतिशेषः ॥ [१११।१२]श्रुत्यादिसिद्धत्वादिति । आकाशवत्सर्व गतश्चनित्यः । अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः । नत्वेवाहंजातुनासं । विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोज गदित्यादिश्रुतिस्मृतिभ्यामीश्वरस्यसर्वगतत्वनित्यत्वयोःसिद्धत्वादित्यर्थः ॥ [१११।१२]अन्यथेति । उक्तश्रुत्यादिसिद्धस्यापीश्वरस र्वगतत्वादेरनंगीकारेईश्वरवद्ब्रह्मणोपिश्रुत्यादिसिद्धसर्वगतत्वादेरभावस्याप्यंगीकार्यत्वापातादित्यर्थः । ननूपाधेर्देशाव च्छेदकत्वकालावच्छेदकत्वरूपंप्रकारद्वयमनंगीकृत्यप्रकारांतरेणभेदकत्वमंगीक्रियतइतिचेत्तत्राह ॥ [१११।१३]द्वावपीति । ब्रह्मे श्वरयोरौपाधिकोभेदोस्तीतिपरोक्तमंगीकृत्यनहीतिवाक्येनोभयोरपिनित्यत्वाद्व्याप्तत्वाच्चनोपाधेर्भेदकत्वमित्युक्तं । वस्तुत स्तुतयोर्भेदएवनास्तीत्याह॥[१११।१२]ब्रह्मेश्वरभेदस्येति। ननुब्रह्मेश्वरव्यवस्थायाःप्रमाणसिद्धत्वात्तदन्यथानुपपत्त्योपाधेरपरिच्छिन्न भेदकत्वमन्यत्राद्दष्टमपिसिध्यतीत्यतआह ॥ [१११।१३]ब्रह्मेश्वरभेदस्येति ॥ [१११।१४]अन्यत्रोक्तमिति । प्रकृत्यधिकरणानुव्या ख्यानादावुक्तमित्यर्थः । सर्वोपाधिगतत्वादित्यापादकानुसारेणाह ॥ [१११।१५]सर्वोपाधिनिमित्तेति ॥ [१११।१५]अभिमानीति । अभिमा नीयोजीवःसः एवेतिशेषः ॥ [१११।१६]नियामकत्वेनेति । तथाचनाभिमानीतिभावः । यथोक्तं । तद्गतानांतुदुःखानांभोगोभिम तिरुच्यते । तदभावान्नाभिमानीभगवान्पुरुषोत्तमइति ॥ [१११।१६]अन्यथेति । नियमाकत्वेनसर्वोपाधिगतस्यापिदुःखादिभोगा पादनइत्यर्थः ॥ [१११।१७]भेदस्यमिथ्यात्वादिति । जीवेश्वरभेदस्यमिथ्यात्वादित्यर्थः । ननुसत्योपाधिकृतसत्यभेदवादिनांदूष णप्रकरणमिदं । तथाचतन्मतेऔपाधिकभेदस्यसत्यत्वेनभेदस्यमिथ्यात्वादितिभेदस्यमिथ्यात्वंकथमुच्यतेऽतोसदनुवादोय

मित्यतआह ॥ [१।१।१७] असत्त्वादित्यर्थइति । भास्करमतेऔपाधिकभेदस्यैवसत्यत्वंनस्वाभाविकभेदस्यातोभेदस्यमिथ्यात्वादित्य स्यस्वाभाविकभेदस्यात्यंतासत्त्वादित्यर्थोद्रष्टव्यइतिभावः ॥ [१।१।१७] अन्यथेति । भेदस्यस्वाभाविकत्वमंगीकृत्यसत्यत्वांगीकारइ त्यर्थः । शंकते ॥ [१।१।१७] स्वाभाविकस्येति ॥ [१।१।१८] तथेति । दुःखादिभोगवानित्यर्थः ॥ [१।१।१८] प्रागिति । उपाधिभेदांगीकारइतिवाक्य व्याख्यानावसरइत्यर्थः ॥ [१।१।१९] ततोन्यइति । आत्मीयतयानुभवादन्यइत्यर्थः ॥ [१।१।२०] भेदइति । आत्मीयतयानुभवोभोगो ज्ञान मात्रमनुसंधानमित्येवंरूपेणभेदइत्यर्थः ॥ [१।१।२०] भोगएवेति । नानुसंधानमित्यर्थः । ननुभोगापादनंमूलेनोपलभ्यतइत्यतउक्तं ॥ [१।१।२१] भोगापादनमेवेति । ईश्वरस्यसुखादिभोक्तृत्वांगीकारेश्रुतिविरोधमाशंकते ॥ [१।१।२१] अनश्नन्निति । किंचयद्यनश्नन्नित्यादि प्रमाणविरोधभीत्येश्वरस्यसुखादिभोक्तृत्वंनांगीक्रियते तर्हिप्रमाणविरोधभीरुणात्वयाद्वासुपर्णेत्यादिप्रमाणविरोधादेवाद्वैत मपित्यज्यतामित्याह ॥ [१।१।२२] अतएवेति ॥ ७ ॥ ननुदेशतःकालतश्चापरिच्छिन्नयोरितिमूलेदुःखिशुद्धब्रह्मणोरपरिच्छिन्नत्व मुच्यते । नचतत्संभवति । दुःखिनोजीवस्यापरिच्छिन्नत्वाभावादितिचेन्न । दुःखिपदस्येश्वरपरत्वात् । कथमीश्वरस्य दुःखित्वमित्यतआह ॥ [१।१।२२] ईश्वरस्येति ॥ [१।१।२३] पूर्वोक्तन्यायेनेति । सर्वोपाधिगतत्वाच्चैकस्यैवेश्वरस्यभेदस्यमिथ्यात्वाच्चेत्या दिनापूर्वोक्तन्यायेनदुःखिभूतजीवाभिन्नतयेश्वरस्यदुःखित्वंसिद्धमित्यर्थः ॥ [१।१।२३] तेनेति । दुःखिभूतेनेश्वरेणेत्यर्थः । दुः खिनः ईश्वरात् । ननुयदिचैकमेवब्रह्मेत्यत्रातस्संसार्येवब्रह्मेत्यनेनब्रह्मणोदुःखित्वमापाद्यजीवब्रह्मव्यवस्थानसिध्यतीत्यु

क्तं । संसारस्यदुःखित्वादिरूपत्वात् । तथाचतेनेदंपुनरुक्तमित्यतआह ॥ [१११।२५] पूर्वमिति ॥ [१११।२५] दुःखित्वादिति । उक्त
रीत्यातयोर्भेदाभावादितिभावः ॥ [१११।२५] ईश्वरगतेनेति । पूर्वोक्तन्यायेनदुःखिभूतेश्वराभिन्नत्वादितिभावः । ईश्वरगतेनेत्यु
क्त्यादुःखिपदस्यईश्वरपरत्वेनव्याख्यानेइदमप्येकंनिमित्तमितिसूचितमितिज्ञातव्यं । देशतःकालतश्चापरिच्छिन्नयोरिति
वाक्योक्तंब्रह्मणोदुःखित्वापादनंपरस्येष्टापादनरूपमितिदूषणांतरमाचार्यैरतइतिवाक्येनोच्यतइतिप्रतीतिवारणायाह ॥ य
[१११।२५] द्यपीति । अनिष्टैवेत्यन्वयः ॥ [१११।२६] व्यवस्थेति । जीवब्रह्मव्यवस्थेत्यर्थः ॥ [१११।२६] तयेति । ब्रह्मणोदुःखित्वापत्त्येत्यर्थः ।
मूलेऽतइत्यस्यब्रह्मणोदुःखित्वादित्यर्थः ॥ [११२।२] अन्यथेति । स्वाभाविकस्यापिनिवृत्त्यंगीकारइत्यर्थः । ननुयदिचैकमेव
ब्रह्मेत्यत्रैवसंसार्येवब्रह्मातस्तद्भावोपिनमुक्तिरितिबद्धमुक्तव्यवस्थाभावस्यपूर्वमुक्तत्वात्पुनरुक्तिरित्यतआह ॥ [११२।२] अस्यापी
ति । अत्रोच्यमानबद्धमुक्तव्यवस्थाभावस्यापीत्यर्थः । पूर्वंजीवब्रह्मणोर्भेदस्यमिथ्यात्वाज्जीवगतेनदुःखेनब्रह्मणोपिदुःखि
त्वात्तद्भावमापन्नस्यापिनमुक्तत्वमितिबद्धमुक्तव्यवस्था नसिध्यतीत्युक्तं । इदानींतुदुःखिभूतजीवाभिन्नस्येश्वरस्यब्रह्म
णश्चभेदस्यमिथ्यात्वेनेश्वरगतेनदुःखेनब्रह्मणोपिदुःखित्वापत्त्यातद्भावमापन्नस्यापिनमुक्तत्वमिति । पुनर्बद्धमुक्तव्यवस्थाभा
वइत्युच्यतइतिनपुनरुक्तिदोषइतिभावः॥ [११२।३] तदेवेति । प्रतिज्ञातमेवेत्यर्थः । विशिष्टपदस्येश्वरपरत्वप्रतीतिंवारयितुमाह ॥ [११२।४] उपा
धिनावच्छिन्नस्यजीवस्येति । स्वरूपेणशुद्धत्वंजीवस्याप्यस्तीत्यतोव्याचष्टे ॥ [११२।४] कालत्रयेपीति । अनेनव्याहतिरपिप्रकटिताभ

ति॥ [११२१५] यद्यपीत्यादि। यदिचैकमेवब्रह्मोपाधिभेदात्संसरतिमुच्यतेचेत्यादिना शुद्धस्यसंसारइतिपक्षेदूषणमुक्तं। उपाधिसंबद्धस्योपाधिसंबंधइत्यंगीकारेतदुपाधिकृतत्वेआत्माश्रयत्वमित्यादिनोपाधिनावच्छिन्नस्यजीवस्यसंसारइतिपक्षेचदूषणमुक्तमितिविवेकेनयोज्यं ॥ ७ ॥ ननुविशिष्टस्यसंसारइतिप्रथमपक्षदूषणमादावनुक्त्वाद्वितीयपक्षदूषणमादावुच्यते। तदयुक्तं । प्रथमातिक्रमेकारणाभावात्। नचाल्पत्वात्सूचीकटाहन्यायेनद्वितीयपक्षदूषणमादावुच्यतइतिवाच्यं । तर्हिशुद्धस्यसंसारोविशिष्टस्यवेत्येवप्रश्नस्यकर्तव्यत्वादित्यतआह॥ [११२१६] यद्यपीति । विशिष्टशुद्धयोर्मध्येउपाध्यवच्छिन्नजीवस्यैवसंसारःसंभावितत्याप्राप्तोनशुद्धस्यातस्तत्क्रमानुसारेणप्रश्नःकृतइत्यर्थः। तर्हिप्रश्नानुसारेणैवदूषणंकस्मान्नकृतमित्यतआह ॥ [११२१६] तथापीति। केचित्तुब्रह्मज्ञानेहिसत्यादौविशिष्टस्यप्राप्तिःपश्चाच्छुद्धस्येति प्राप्तिक्रमानुरोधेनेत्यर्थइत्याहुः। तन्न । ब्रह्मज्ञानेसतिविशिष्टस्यसगुणस्येश्वरस्यैवप्राप्तिरंगीकृतानजीवस्य प्रकृतेचविशिष्टपदस्योपाध्यवच्छिन्नजीवपरत्वेनव्याख्यानात्। ब्रह्मज्ञानेसतिजीवस्यजीवप्राप्त्यभावेनव्यधिकरणत्वात्। अत्रापिक्रमव्युत्क्रमयोस्तदेवनिमित्तमित्युत्तरत्रविशिष्टोन्यश्चेन्नित्योनित्योवेतिप्रश्नःक्रियते। तत्रादौनित्यत्वप्रश्नेचप्राप्तिक्रमस्यैवनिमित्तत्वमुच्यते। तदप्यसंगतंस्यादितिज्ञातव्यं । ननुशुद्धस्यसंसारइत्यत्रव्याहत्यापादनमयुक्तं । संसारस्यसादित्वेनकालभेदेनशुद्ध्यशुद्ध्योःसंभवेनव्याहत्यभावादित्यतआह ॥ [११२१८] नखल्वयमिति। ननुतथापिदुःखादिरूपसंसारस्यमिथ्यात्वान्मिथ्याभूतेनसंसारेणब्रह्मणःशुद्धत्वंनविहन्यते। आरोपितेननीलिम्नागगनस्यनीरूपत्वानपायादित्यतआह॥ [११२१८] नहीति॥ [११२१८] एतैरिति। भास्करैरित्यर्थः। एतेषांसत्योपाधिकृतसत्यभेदवादित्वेनदुःखादिरूपसंसारस्यै

तन्मतेसत्यत्वादितिभावः। ननुशुद्धंब्रह्मेतिनपुंसकलिंगस्यप्रकृतत्वाद्विशिष्टइतिकथंपुल्लिंगनिर्देशइत्यतआह ॥ [११२।९] संसाराधार इति । ननुसंसाराधारोविशिष्टःशुद्धोवातदन्योवेतिविकल्पमकृत्वाशुद्धादन्यःसएववेतिविकल्पकरणेकोहेतुरित्यतआह ॥ [११२।९] अत्रापीति । विरुद्धधर्माधिकरणयोरैक्यायोगेनविशिष्टस्यशुद्धादन्यत्वमेवादौसंभाविततयाप्राप्तं अतःप्राप्तिक्रमएवतत्रहेतुरित्यर्थः । तर्हिविकल्पानुसारेणैवकस्मान्नदूष्यतइत्यतआह ॥ [११२।१०] अल्पत्वादेवेति । द्वितीयपक्षदूषणस्याल्पत्वादेवेत्यर्थः । नन्वेवंतर्हिविशिष्टःशुद्धएववेतिभवद्भिरपिकथंप्रश्नःक्रियते व्याहतेस्तुल्यत्वात् । तस्याश्चप्रश्नदोषत्वात् । यथोक्तं प्रश्नदोषाहिचत्वारःस्वव्याहतिरसंगतिः । सिद्धार्थताचवैफल्यमिति । तत्राह ॥ [११२।११] परस्येति ।तथाचमायावादिनस्तावद्व्याहतभाषित्वंसंभावितं। तथाचतंप्रतितदनुसारेणव्याहतप्रश्नकरणेनास्माकंकश्चिद्दोषइतिभावः ॥ [११२।११] शुद्धस्यैवेति । कालत्रयेपिस्वव्यतिरिक्तशून्यस्यैवेत्यर्थः। अन्यश्चेदनित्योनित्योवेतिविकल्पमकृत्वानित्योऽनित्योवेतिविकल्पक्रमेकिंनिमित्तंविकल्पक्रमानुसारेणदूषणमनभिधायव्युत्क्रमेणदूषणाभिधानेचकिंनिमित्तमित्यतआह॥ [११२।१२] अत्रापीति। मोक्षशा(स्त्रवैयर्थ्यप्रसंगा)स्त्रावैयर्थ्यान्यथानुपपत्त्याशुद्धादन्यस्यविशिष्टजीवस्यनित्यत्वमेवसंभाविततयाप्राप्तमितिप्राप्तिक्रमएवविकल्पक्रमेनिमित्तं। द्वितीयपक्षस्यादौदूषणेचदूषणस्याल्पत्वमेवनिमित्तमित्यर्थः ।निमित्तशब्दापेक्षयातदेवेतिनपुंसकं। शैत्यंहियत्साप्रकृतिर्जलस्य दक्षिणान्नंतनुतेयोनआत्मेत्यादिवदितिज्ञातव्यं । प्राप्तिक्रमस्यसामान्येनपरामर्शात्तदेवेतिनपुंसकोपपत्तिःसामान्येनपुंसकमितिसूत्रादित्यप्याहुः । नन्वनित्यश्चेन्नाशएवतस्येतिकथमापाद्यापादकभावः । भेदाभावादित्यतआह ॥ [११२।१३] अत्रानित्यश्चेदितीति । तदेव पराभ्युपग

नमेव । तदेवदर्शयति ॥ [११२।१४] अनित्यश्चेदिति । तदेवानित्यत्वंहेतुत्वेनोपादायेत्युक्तंदर्शयति ॥ [११२।१४] अनित्यत्वादेवेति । अनित्यत्वादेवनमोक्षःस्यादित्यत्राप्रयोजकताशंकापरिहारायाभिप्रायमाह॥ [११२।१४] अयंभावइति । कुत इत्यतआह॥ [११२।१५] विनाशेति । सर्वोपाधिविगमंविनाजीवस्यविनाशेकारणांतराभावादित्यर्थः ॥ [११२।१५] ततश्चेति । विनाशेसतीत्यर्थः ॥ [११२।१५] नस्यादिति । पुरुषार्थान्वयिनएवाभावादितिभावः । ननुभास्करंप्रतिभेदस्यसत्यत्वापादनंनानिष्टं । सत्योपाधिकृतसत्यभेदवादित्वात्तस्येत्यतआह ॥ [११२।१६] स्वाभाविकत्वमिति।ननुब्रह्मणोन्यस्यजीवस्यनित्यतयासद्भावेपिभेदस्यस्वाभाविकत्वंकुतः औपाधिकत्वमेवकिंनस्यादित्यतउक्तं । मोक्षेपीतीत्याशयेनव्याचष्टे ॥ [११२।१६] सर्वोपाधीनामिति ॥ [११२।१६] मोक्षइति । विगमइत्यर्थः । तथाचमोक्षेपीत्यतःपूर्वंसर्वोपाधीनामितिशेषः मोक्षइत्यनंतरमपीत्यतःपूर्वंसतीतिशेषइत्युक्तंभवति । तथाचसर्वोपाध्यपगमदशायामपिविद्यमानस्यभेदस्यनोपाधिकत्वंयुक्तं । किंनामस्वाभाविकत्वमेवेत्याशयः ॥ [११२।१८] नकश्चिद्दोषइति । ब्रह्मणोन्यस्यजीवस्यनित्यत्वपक्षेसर्वोपाध्यपगमदशायामपिब्रह्मणोन्यस्यजीवस्यनित्यतयाभावेनभेदस्यस्वाभाविकत्वमितियोदोषउक्तस्सनेत्यर्थः । कथंनेत्यतस्तदुपपादयति ॥ [११२।१८] उपाध्यपगमइति ॥ [११२।१८] ब्रह्मस्वरूपत्वेनैवतस्यमुक्तौभावेनेति । उपाधीनांनाशेनोपाधिविशिष्टाकारस्यनष्टत्वेनतदुपाधिकभेदस्यापिनष्टत्वादितिभावः ॥ [११२।१८] भेदस्येत्यादि । तस्यैवाभावेनकस्यस्वाभाविकत्वंस्यादितिभावः । अभेदउपाधिभिन्नइत्यत्राभेदस्योपाधिभिन्नत्वमुच्यतइत्यन्यथाप्रतीतिनिरासायोपाधिभिन्नइत्येतद्व्याचष्टे ॥ [११२।१९] उपाधिनैवेति ॥

अन्योन्या[११२।२०]श्रयत्वापातादिति.। उपाधिसिद्धौजीवसिद्धिः। जीवसिद्धौतत्संबद्धोपाधिसिद्धिरित्यन्योन्याश्रयापातादित्यर्थः ॥ [११२।२१]तदभावादिति। यन्निमित्तांतरसहितंब्रह्मस्वरूपमुपाधिसंबद्धंतस्यनिमित्तांतरस्याभावादित्यर्थः॥ [११२।२१]अनवस्थादीति॥निमित्तांतरसद्भावांगीकारेतन्निमित्तांतरसाहित्यमपिब्रह्मस्वरूपमात्रस्यवक्ष्यमाणरीत्याऽसंभवात्पुनर्निमित्तांतरसहितस्यैवेतिवाच्यं। तन्निमित्तांतरसंबंधोप्येवमित्यनवस्था व्द्यादिकल्पनेऽन्योन्याश्रयत्वाद्यापातइत्यर्थः॥[११२।२२]नावच्छुद्धत्वमिति। यावत्पर्यंतमुपाधिसंबंधोस्तितावत्पर्यंतंब्रह्मणःशुद्धत्वंमाभूदित्यर्थः। सर्वसंमतमपिमयानांगीक्रियतइत्याशंकापरिहारायोक्तमितिचतत्पक्षइतीत्यभिप्रेत्यव्याचष्टे ॥ इति[११२।२४]चतत्पक्षइतीति ॥ [११२।२५]यथासंभवमिति। शुद्धस्यसंसारइतिपक्षेबद्धमुक्तव्यवस्थायाजीवब्रह्मव्यवस्थायाश्चासिद्धिः। विशिष्टंशुद्धस्वरूपमितिपक्षेप्युक्तव्यवस्थाद्वयासिद्धिः। विशिष्टःशुद्धादन्यस्सचानित्यइतिपक्षेबद्धमुक्तव्यवस्थायाअसिद्धिः। नित्यइतिपक्षेपिबद्धमुक्तव्यवस्थायाअसिद्धिः। मोक्षेपिभेदस्यस्वाभाविकत्वेनसत्त्वेनब्रह्मभावलक्षणमुक्तेरभावात्। जीवब्रह्मणोःस्वरूपमात्रस्याभेदः उपाधिनैवजीवोब्रह्मणोभिन्नइतिपक्षेपिजीवब्रह्मव्यवस्थायाःबद्धमुक्तव्यवस्थायाश्चासिद्धिरित्येवंसर्वेष्वपिपक्षेषुयथासंभवंव्यवस्थायाअसिद्धिरूहनीयेत्यर्थः ॥ ७ ॥ प्रसं[११२।२६]जंतीति। प्राप्ताभवंतीत्यर्थः॥[११३।१२]व्यवस्थयैवेति। वास्तवचंद्रेऽदर्शयन्नारोपितएवचंद्रेदर्शयतीत्यर्थः। तेन काल्पनिकभेदेन। ननुयस्यज्ञानमुत्पन्नंतस्यशुद्धब्रह्मभावलक्षणमुक्तिर्वक्तव्या। नचसासंभवति। तदानीमपिकेषांचित्संसारिणांसत्त्वेनब्रह्मणएवोपाधिसंबद्धतयाशुद्धत्वाभावात्। तथाचबद्धमुक्तव्यवस्थाऽसिद्धिरित्यतआह ॥ नचमि[११३।१३]थ्याभूतैरिति। विशेषः शुद्धत्वा

भावरूपः । नीलिम्ना आरोपितनीलरूपेणेत्यर्थः । तत् किंचोपाधिरित्यादिनोक्तंदूषणं ॥ तस्यैवेति [११३।१६] । संसारइतिशेषः ।
तर्हिशुद्धत्वहानिरित्यतआह ॥ नचेति [११३।१६] ॥ अपैतीति [११३।१७] । व्योम्नइवनीलिम्नेतिभावः ॥ निरस्तत्वादिति [११३।१८] । इतश्चमिथ्यो
पाधिर्नयुज्यतइत्यादिनाग्रंथेनेत्यर्थः । तथाचबद्धमुक्तव्यवस्थायाअसिद्धिरितिवाक्यशेषः । कथमसिद्धिरित्यतस्तामुपपाद
यितुमाह ॥ इदमुक्तंभवतीति [११३।१८] । उपाधि देहादिः । ननुपरेणोपाधिनिमित्तकर्मव्यवस्थयोपाध्यादिव्यवस्थेत्युक्तत्वेनतथैवानु
वादेकर्तव्येकर्मभेदादित्यनुवादःकथमित्यतोभेदशब्दोव्यवस्थापरइत्याह ॥ कर्मणांव्यवस्थानादिति [११३।११] । कुतइत्यतआह ॥
निरुपाधिकइति [११३।११] । देहाद्युपाधिरहितइत्यर्थः । क्रियावेशः कर्मकर्तृत्वं ॥ नियामकमिति [११३।१२] । उपाधिभेदेकर्मभेदःकथंप्रयो
जकइत्यर्थः । अन्योन्याश्रयादितिभावः । ननुकर्मणांस्वरूपानादित्वंकुतोनविवक्षितमित्यतस्तत्रहेतुमाह ॥ असंभवादि
ति [११३।१२] । कर्मणामुत्पत्तिमत्त्वेनस्वरूपानादित्वासंभवादित्यर्थः । द्विविधानादित्वंनविवक्षितमित्यत्रहेतुमाह ॥ प्रकृतानु
पयोगादिति [११३।१२] । इतःप्राचीनजन्मसंबंधिकर्मव्यवस्थामात्रेणोपाधिव्यवस्थोपपत्तौद्विविधानादित्वकथनस्यप्रकृतेउपाधिव्य
वस्थाकथनेऽनुपयोगादित्यर्थः । द्विविधानादित्वंनविवक्षितमित्यत्रहेत्वंतरमाह ॥ उत्तरविरोधाच्चेति [११३।१३] । द्विविधा
नादित्वविवक्षायामौपाधिकभेदसिद्धावित्यनेनोत्तरत्रोत्पत्तिप्रतिबंधकीभूतान्योन्याश्रयकथनंविरुद्धंस्यात् । स्वरूपाना
दित्वविवक्षायांतदसंभवादित्यर्थः । अनादिकर्मभेदादितिमूलार्थमाह ॥ ततश्चेति [११३।१३] ॥ यस्यकर्मणेतिवक्तुमिति [११३।१४] । य
स्यकर्मणायउपाधिरारब्धस्तस्यैवतदुपाधिगतसुखादिभोगोनान्यस्येतिवक्तुंयाकर्मव्यवस्थोच्यतेतस्याएवेत्यर्थः । यस्यजीव

स्यकर्मणेतिनिर्भेदेचैतन्येवक्तुमशक्यत्वादितिभावः । शंकते ॥ [११३।१४]चैतन्यस्येति ॥ [११३।१५]तदाश्रयेणेति ॥ औपा
धिकभेदाश्रयेणेत्यर्थः । तथाचयस्यकर्मणेतिवक्तुंशक्यतइतिभावः ॥ [११३।१५]एतदिति । कर्मभेदव्यवस्थापनमित्यर्थः ।
आशास्यतइतिसंबंधः । तत्रनिमित्तकथनंकर्मव्यवस्थेत्यादि । यस्यामुपाधिव्यवस्थायांकर्मव्यवस्थानिमित्ततयोपाधिव्यवस्थ
येत्यर्थः । तथाचकर्मव्यवस्थयोपाधिव्यवस्था । तयैवचकर्मव्यवस्था । आशास्यतइतिभावः ॥ [११३।१६]व्यवस्थांतरेणेति ॥
यस्यामुपाधिव्यवस्थायांकर्मव्यवस्थानिमित्तंतयैवोपाधिव्यवस्थयाकर्मव्यवस्था नोच्यते । किंनामोपाध्यंतरव्यवस्थये
त्यर्थः । द्वयोरुपाधिकर्मणोः ॥ [११३।१९]अनवस्थेति । उपाध्यंतरव्यवस्थापिकर्मांतरव्यवस्थयावाच्यासापिपुनरुपाध्यंतरव्य
वस्थयेतिकर्मोपाधिव्यवस्थापरंपरयाऽनवस्थेत्यर्थः ॥ [११३।१९]बीजांकुरवदिति । बीजांकुरानवस्थावदित्यर्थः ॥ [११३।२०]सिद्धविष
येति । अतस्सानदोषायेतिभावः । नन्वत्रापिचैतन्याभेदस्यप्रामाणिकत्वात्तत्रसुखादिसांकर्यरूपदोषपरिहारायकर्मोपाध्योः
कार्यकारणभावोंऽगीकार्यएवाऽतोनानवस्थादोषायेत्यतआह ॥ [११३।२०]चैतन्याभेदस्यैवेति । अप्रामाणिकत्वेनेत्यतःपरंतदुपपत्त्यर्थं
कल्प्यमानायाइतिशेषः । ननुदोषदुष्टत्वादित्यत्रदोषग्रहणमनर्थकं । दूषकप्रमाणदुष्टत्वादितिवक्तव्यत्वेनदोषेणदोषवत्त्वा
दित्यस्यासंगतत्वादित्यतआह ॥ [११३।२२]दोषशब्देनेति । तथैवसर्वयुक्तिविरुद्धंचेत्युक्तयुक्तिविरोधोपसंहारस्यकर्त्तव्यत्वाद्दोषश
ब्दस्यदूषकप्रमाणमात्रपरत्वंनसंभवतीत्याशयेनयुक्तयइत्युक्तमितिद्रष्टव्यं । ननुदिङ्मात्रसूचनार्थमपिकतिपयदोषावक्तव्या
एवेतिचेत्तत्राह ॥ [११३।२३]दिङ्मात्रसूचनस्येति ॥ [११३।२४]अवच्छिन्नस्येति । तत्तदुपाध्यवच्छिन्नस्यजीवसमुदायस्यपरिच्छिन्नत्वेने

त्यर्थः । ननुजीवस्यपरिच्छिन्नोपाध्यवच्छिन्नत्वंनोच्यते । येनसर्वगतत्वानुपपत्तिः । किंनामोपाधिरपिकश्चित्सर्वगतएवास्ति तदवच्छिन्नस्यजीवस्यसर्वगतत्वमुपपद्यतइत्यतआह ॥ [११३।२५] तथाविधेति । सर्वगतेत्यर्थः ॥ [११३।२५] सावयवत्वेनेति । जीवानामि तिशेषः । मध्यमपरिमाणवत्त्वेनसावयवत्वमितिभावः ॥ [११३।२५] शरीराव्याप्तिरिति । तथाचसर्वांगीणसुखाद्यनुभवोनस्यादि तिभावः ॥ [११३।२६] द्वितीयतृतीययोरिति । शरीरपरिमाणत्वपक्षेऽणुत्वपक्षेचेत्यर्थः । उपाधिर्देहः । उपहितोब्रह्मांशइति । उपाधिसहितएवब्रह्मांशोगच्छतीत्यर्थः ॥ [११३।२६] पूर्वमुपहितमिति । येनब्रह्मांशेनजीवेनसंबंधोऽभूत्तमित्यर्थः । तत्रैव स्थितं । स्थाने पूर्वतनस्थाने ॥ [११४।१] सुषिरत्वमिति । सुषिःछिद्रमस्यास्तीतिसुषिरंछिद्रवत्तत्त्वमित्यर्थः । छिद्रवत्त्वमितियावत् । ऊषसु षिमुष्कमधोरइतिसूत्रेणसुषिशब्दान्मत्वर्थेरप्रत्ययइतिद्रष्टव्यं ॥ [११४।२] उत्पत्तिविनाशेति । उपाधेःपूर्वोपहितब्रह्मांशभूतजी वपरित्यागेजीवस्यविनाशःप्राप्तः । उपाधेःपुनर्ब्रह्मांशांतरभूतजीवसंबंधेचोत्पत्तिःप्राप्तेत्यर्थः ॥ [११४।२] कृतहानीति । उपाधेःपूर्वो पहितजीवपरित्यागेतस्यजीवस्यतदुपाधिकृतकर्मणोहानिः । उपाधेरंशांतरसंबंधेब्रह्मांशांतरभूतस्यजीवस्योपाधिसंबंधात्प्राक् कर्मकरणाभावेनाकृताभ्यागमप्रसंगः । उपाध्यापादककर्माभावेप्युपाधिसंबंधप्राप्तिप्रसंगइत्यर्थः । योपि भास्करैकदेशी । भे दाभेदौ जीवेश्वरयोः ॥ [११४।३] व्यवस्थेति । सुखादिव्यवस्थेत्यर्थः । संकरः सुखदुःखादिसांकर्यं ॥ [११४।४] स्वकार्येति । सुखदुःखादिसांकर्य [११४।४] रूपस्वकार्येत्यर्थः ॥ [११४।४] भेदइति । तथाचाभेदकार्यंनिरुणद्धीतिभावः ॥ तर्हीति । विद्यमानस्याप्यभेदस्याजागलस्तनवत्कार्याक्षम त्वेनतदंगीकारस्यव्यर्थत्वादितिभावः । ननुभेदाभेदौतुल्यबलौ । नचाभेदप्रयुक्तसांकर्यापत्तिः । ईश्वराचिंत्यशक्त्यातत्परिहारो

पपत्तेरित्याशंकते॥[११४।१५]ईश्वरस्येति॥[११४।१५]भेदएवेति।जीवाभेदेईश्वरस्याचिंत्यशक्त्यभावापत्तेरितिभावः।ननुतत्त्वमसीत्यादिश्रुतिभे
दांगीकारंनसहतइतिचेत्तत्राह॥[११४।१५]श्रुतिरिति॥[११४।१६]प्रत्युक्तमिति।तत्त्वमसीत्यादिश्रुतेर्भेदपरत्वेनव्याख्यातत्वादितिभावः॥ अति
[११४।१६]रेकपक्षइति।अपरेतुमन्यंते।जीवाःब्रह्माभिन्नाःभेदस्तुनकल्पितोनचौपाधिकोनाप्यंशांशिभावनिमित्तः।किंत्वतिरेकनिमित्तए
वेतिप्रागुपन्यस्तःपक्षइत्यर्थः । एतेनेत्युक्तंविशदयति ॥ [११४।१६]पक्षद्वयोक्तेति । यथाभेदस्यस्वाभाविकत्वपक्षेऔपाधिकत्वपक्षे
चदोषउक्तः एवंजीवब्रह्मभेदव्यवहारसंपादनपटुभूतधर्मविशेषरूपातिरेकस्यापिस्वाभाविकत्वेस्वाभाविकस्यानिवृत्त्यंगीका
रेणमोक्षेप्यतिरेकरूपधर्मसद्भावप्राप्त्यातन्निमित्तभेदस्यापिप्राप्तेरभेदांगीकारविरोधादौऔपाधिकत्वेउपाधिसिद्धावतिरेकसि
द्धिः । तत्सिद्धौचतन्निमित्तभेदसिद्ध्याजीवसिद्धौतत्संबंध्युपाधिसिद्धिरित्यन्योन्याश्रयइत्यर्थः ॥ [११४।१८]ब्रह्मण्येवेति । अभेद
स्यब्रह्मस्वरूपत्वांगीकारेअभेदेश्रुतितात्पर्यांगीकारेब्रह्मण्येवश्रुतितात्पर्यमंगीकृतंभवतीत्यर्थः । अस्त्वितिचेत्तत्राह ॥ श्रुति
[११४।१९]गम्यत्वेसतीति । आदौब्रह्मणःश्रुतिगम्यत्वेसिद्धेसतीत्यर्थः । तदुपपादयति ॥ [११४।१९]शब्देनहीति । अन्यार्थ । अन्य
शेषत्वेन । अप्राधान्येनेतियावत्॥[११४।२०]चिंतेति । तात्पर्यचिंतेत्यर्थः । अस्तुब्रह्मणःश्रुतिगम्यत्वंकोदोषइत्यतआह॥ [११४।२०]नचेति।
नहीत्यर्थः । कुतोब्रह्मणःश्रुतिगम्यत्वंनास्तीत्यतस्तदुपपादयति ॥ [११४।२०]तथाहीत्यादिना ॥ [११४।२१]असंसर्गभेदरूपत्वादिति ॥
संसर्गभेदरूपत्वाभावादित्यर्थः ॥ [११४।२२]तयोरेवेति। संसर्गभेदयोरेवेत्यर्थः । नीलोत्पलमित्यादिकर्मधारयस्थलेसंसर्गोवाक्यार्थः ।

धवखदिरावित्यादिद्वंद्वस्थलेभेदोवाक्यार्थइतिद्रष्टव्यं । द्वितीयेकिंतत्रवचनवृत्तिरथगौणीतिविकल्प्यनाद्यइत्यादिनातस्याः गुणयोगनिमित्तत्वादित्यंतेनतन्निराकरणंमूलेलक्षणापीत्यपिशब्दसमुच्चेयकथनमितिद्रष्टव्यं । गतिः स्थितिः । जातिशब्दाइत्यादिकं जातिनिमित्तकाःशब्दाइत्यादिव्याख्येयं ॥ [११४।१२] ब्राह्मणइतीति । ब्राह्मणशब्दप्रवृत्तौब्राह्मणत्वजातिर्निमित्तमित्यर्थः ॥ [११४।१३] शुक्लइति । दंडीदेवदत्तः । शुक्लःमतुपोलोपेनअर्शआद्यजंतत्वेनवाशुक्लरूपवानित्यर्थः । तथाचदंडिनिशुक्लशब्दप्रवृत्तौशुक्लरूपगुणोनिमित्तमित्यर्थः ॥ [११४।१३] पाचकइतीति । देवदत्तेपाचकशब्दप्रवृत्तौपचनक्रियानिमित्तमित्यर्थः । द्रव्यशब्दाइत्येतत्स्वयमेवविवृणोति ॥ [११४।१३] यदृच्छानिमित्ताइति । अस्माच्छब्दादयमर्थोबोद्धव्यइतिसंकेतः । इच्छा तन्निमित्तकाः । द्रव्येपुत्रादौपित्रादीनांसंकेतेनप्रवर्तमानाःशब्दाःद्रव्यशब्दाः । सांकेतिकाडित्थडिबित्थादिशब्दाइत्यर्थः ॥ [११४।१४] असांकेतिकत्वादिति । वाच्यवाचकभावसंबंधस्यानादित्वेनसांकेतिकत्वाभावादित्यर्थः । वैदिकानांपदानामधुनातनास्तावन्नसंकेतयितारइतिपरस्यापिसिद्धं । परमेश्वरोप्यनादितोविद्यमानमेववाच्यवाचकभावसंबंधमादिकालेमहर्ष्यादीन्ज्ञापयतीत्यन्यत्रनिपुणतरमुपपादितमनुसंधेयं । यथोक्तमनुव्याख्याने । नित्ययोगोपिशब्दानामर्थेनैवनिषिध्यतइति । उक्तंचजैमिनिना । औत्पत्तिकस्तुशब्दस्यार्थेनसंबंधइत्यादि । औत्पत्तिकः स्वाभाविकइत्यर्थः ॥ [११४।१५] अतएवेति । प्रवृत्तिनिमित्तधर्मशून्यत्वेनसर्वशब्दावाच्यत्वादेवेत्यर्थः । तदेवविवृणोति ॥ [११४।१५] तस्याःगुणयोगेति । सिंहोदेवदत्तोऽग्निर्माणवकइत्यत्रसिंहाग्निशब्दाभ्यांतत्रत्यक्रौर्यपैंगल्यादिगुणानुपलक्ष्यतद्योगेननिमित्तेनदेवदत्तेमाणवकेचसिंहाग्निशब्दयोःप्रवृ

त्तिरितिगौणीवृत्तेर्गुणयोगनिमित्तत्वादित्यर्थः । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातुगौणतेतिगौणीवृत्तेर्लक्षितत्वादितिभावः ॥ [११४।१७]लक्ष्यत्वमपिनास्तीति । तथाचब्रह्मनलक्ष्यंकेनापिपदेनावाच्यत्वाद्वैधर्म्येणतीरवदित्यनुमानंसूचितंभवतीतिज्ञेयं ॥ [११४।१७]तथाचेति । वचनवृत्त्याद्यसंभवेनापदार्थत्वात्संसर्गभेदरूपत्वाभावेनावाक्यार्थत्वाच्चेत्यर्थः ॥ [११४।१९]उक्ताद्धेतोरिति ॥ प्रवृत्तिनिमित्तभूतजात्यादिधर्माभावरूपाद्धेतोरित्यर्थः । ततएव अवाच्यत्वादेव । आदिपदेनगौणीवृत्तिग्रहणं । अनेनापदार्थत्वमुपपादितमितिज्ञातव्यं ॥ [११४।२०]तत्प्रतिबद्धेति । तद्व्याप्तेत्यर्थः । निर्धर्मकत्वेनतदनुमापकासाधारणधर्माभावादितिभावः । ननूक्तरीत्याप्रमाणत्रितयनिरासस्यजातत्वादज्ञेयत्वादितिव्यर्थमित्यतआह ॥ [११४।२०]अज्ञेयत्वादिति ॥ सा[११४।२०]मान्ययुक्तिरिति । प्रमाणत्रयस्ययथावस्थितार्थज्ञानजनकत्वस्वाभाव्यात् ब्रह्मणश्चत्वयाऽज्ञेयत्वांगीकारान्नप्रमाणत्रयस्यापितत्रप्रवृत्तिरितिसामान्ययुक्तिरित्यर्थः । ननुजडत्वापातइतिकुतइत्यतआह ॥ [११४।२१]तथेति । ज्ञेयत्वंनामदृश्यत्वं तच्चजडस्यैवनचेतनस्यब्रह्मणइत्यंगीकृतं । तथात्वेमिथ्यात्वसाधकदृश्यत्वहेतोर्ब्रह्मणिव्यभिचारःस्यादित्याशयः । ननुशून्यवादिभिःशून्यस्यतत्त्वरूपत्वेनप्रामाणिकत्वांगीकाराच्छून्यत्वेकथमप्रामाणिकत्वंहेतुरित्यतःशून्यपदंव्याचष्टे ॥ [११४।२३]असदेवेति । ब्रह्मनलक्ष्यं अवाच्यत्वादित्यभिप्रेतानुमानेऽप्रयोजकतामाशंकते ॥ [११४।२३]नन्वित्यादिना । ननुअवाच्यत्वलक्ष्यत्वाभावयोर्व्यभिचारादर्शनेनव्याप्तिनिश्चयोपपत्तेर्नाप्रयोजकतेतिचेत्तत्राह ॥ [११४।२३]नचविपक्षइति । अवाच्यस्यापिलक्ष्यत्वमस्त्वित्यप्रयोजकतायांविपक्षेबाधकतर्कोवक्तव्यः । तंविनाकेवलव्यभिचारादर्शनमात्रेणैवनव्याप्तिनिश्चयइत्यर्थः । ननुकुतस्तन्मात्रेणैव

नव्याप्तिनिश्चयइत्यतआह॥[११४।२३]पक्षएवेति। अनुकूलतर्काभावदशायांसर्वशब्दावाच्यस्यब्रह्मणएवलक्ष्यत्वमस्त्विवतिपक्षएवव्यभिचारशंकनात् अप्रयोजकताशंकनादित्यर्थः॥[११४।२३]अतइति।विपक्षेबाधकाभावेनानुमानस्याप्रयोजकत्वादित्यर्थः।शून्यत्वं असत्त्वं। अतएवेत्युक्तंदर्शयति॥ [११४।२४]लक्षणेति।लक्षणयाशास्त्रगम्यत्वसंभवेनप्रामाणिकत्वान्नब्रह्मणोसत्त्वमित्यर्थः।ननुसिद्धंतुनिवर्तकत्वादितिवदतात्वयाशास्त्रस्यावरणनिवृत्तिप्रयोजकत्वमेवांगीकृतं नब्रह्मसिद्धिकरणत्वं तथाचकथंशास्त्रसिद्धत्वादित्युच्यतइत्यस्वारस्यादाह॥ [११४।२४]वस्तुतइति।नचैवंशास्त्रवैयर्थ्यं आवरणनिवर्तकत्वेनसार्थकत्वादितिभावः। असिद्धौ ब्रह्मणःसिद्ध्यभावे॥ [११५।१]सिद्ध्युपायस्येति । सिद्धिकरणस्यप्रमाणस्येत्यर्थः ॥ [११५।१]अन्यथेति । सिद्ध्युपायाभावेपिस्वप्रकाशतयासिद्ध्यंगीकारइत्यर्थः॥ [११५।१]सिद्धिप्रसंगादिति । द्वितीयपक्षदूषणमित्यन्वयः ॥ [११५।१]अंगीकारवादश्चायमिति । वाच्यत्वंलक्षणायांनोपयोगि किंनामवाच्यार्थसंबंधित्वेनप्रसिद्धिरेव अस्तिचसाप्रकृते । स्वप्रकाशत्वादितिपरेणचोदितेतदंगीकृत्यस्वप्रकाशत्वनिरासोयो नचेति वाक्येनकृतःसोंगीकारवादइत्यर्थः । वस्तुतस्तुकथमित्यतआह ॥ [११५।१]लक्ष्यत्वइति ॥ [११५।२]अन्यत्रेति । ननुवाच्यत्वंलक्षणायांकथमुपयोगीत्याशंक्यकिंप्रयोजकांतरमाशंकसेप्रयोजकत्वप्रकारमेववापृच्छसीत्यादिनातत्त्वप्रकाशिकायांसमर्थितत्वादित्यर्थः । तथाहि । शब्दावाच्यस्यापिलक्षणांगीकारेकिंलक्ष्यमितिप्रश्नस्यनिरुत्तरत्वंस्यात् । नचब्रह्मैवेतिब्रह्मपदमेववक्तुंयुक्तं । नहि गंगापदेनकिंलक्ष्यमितिप्रश्नस्यगंगैवेत्युत्तरं । अथतत्रपदांतरं । तेनापिकिंलक्ष्यमितिप्रश्नस्यनिरुत्तरत्वात् । अथकिंचित्पदमस्तिवाचकमितिचेत्तर्हिकिंपदांतरेणापराद्धं । यथोक्तं । किंतदित्यनवस्थितिरिति । तस्मादवाच्यत्वेलक्ष्यार्थोपस्थितेरेवायोगे

नलक्षणानसंभवति । नचस्वप्रकाशत्वात्तदुपस्थितिरितिवाच्यं । अवेद्यत्वंस्वप्रकाशत्वमित्यंगीकारादवेद्यत्वात्तदुपस्थितिरि तिसाधुभाषितमायुष्मतेतिवाच्यत्वस्यलक्ष्यत्वेउपयोगसिद्धिरिति ॥ [११५।३] **द्वावपीति** । कर्तृकर्मशब्दावित्यर्थः ॥ [११५।४] **एवमभ्युपग मइति** । कर्तृत्वकर्मत्वयोर्विरोधेनैकाश्रयत्वंनास्तीत्यभ्युपगमइत्यर्थः ॥ [११५।४] **एतद्वचनमिति** । कर्तृत्वकर्मत्वयोर्विरोधेनैकत्रास मावेशकथनमित्यर्थः । इत्यादिनेत्यादिपदेनतेवदंतीत्यस्यसंग्रहः ॥ [११५।५] **लक्षणविरोधादिति** । क्रियाश्रयःकर्ता । परसमवेत क्रियाफलशालिकर्म । कर्तर्यतिव्याप्तिवारणायपरसमवेतेत्युक्तं । कर्त्रन्यसमवेतेतितदर्थः । नचैवमात्माश्रयः कर्त्रन्यत्वेसती त्यत्रतात्पर्यात् । एवंचकर्तृत्वकर्मत्वलक्षणयोर्विरुद्धत्वात्कर्तृत्वकर्मत्वयोर्नैकत्रसमावेशइतिभावः । उतेत्यत्रापिकर्तृत्वकर्मत्व योरितिवर्तते ॥ [११५।७] **स्वाध्ययनेति** । स्वाध्यायोध्येतव्यइतिवाक्यंस्वाध्यायत्वावच्छिन्नस्याध्ययनंविधत्ते । तथाचविधायकत्वे नकर्तृत्वंप्राप्तंस्वाध्यायत्वावच्छिन्नस्यकर्मत्वविधायकस्यापिवाक्यस्यस्वाध्यायत्वावच्छिन्नत्वेनाध्ययनकर्मत्वप्राप्त्याकर्तृत्वकर्म त्वयोरेकत्रसमावेशोदृष्टइत्यर्थः ॥ [११५।७] **शब्दशब्दस्येति** । अयंशब्दइतिवाक्येशब्दत्वावच्छिन्नशब्दस्यवाच्यत्वमेकस्यास्यशब्द स्यवाचकत्वंप्रतीयते । तथाचवाचकशब्दस्यापिशब्दत्वावच्छिन्नतयावाच्यत्वप्राप्त्याकर्तृत्वकर्मत्वयोरेकत्रसमावेशःप्राप्तएवे त्यर्थः ॥ [११५।८] **स्वरूपपदार्थकत्वेति** । स्वाख्योयःपदार्थस्तदर्थकत्वेत्यर्थः । स्वंरूपंशब्दस्याशब्दसंज्ञेतिसूत्रं । शब्दस्यस्वंस्वयम पिरूपंअभिधेयमितितदर्थः । एवंचघटशब्दस्यघटरूपार्थघटशब्दोभयवाचकत्वेनयदास्ववाचकत्वंतदाकर्तृत्वकर्मत्वयोरस्ति समावेशइतिभावः । स्वाध्यायोध्येतव्यइत्यत्रशब्दशब्दस्येत्यत्रपरिहारंशंकते ॥ [११५।८] **तत्रभिन्नेकर्मणिसतीति** । कर्तृभूतवि

धिवाक्यादिव्यतिरिक्तेकर्मणिसतीत्यर्थः । तथाचस्वाध्यायोध्येतव्यः अयंशब्दइत्युभयत्रस्वभिन्नकर्मकत्वंस्वकर्मकत्वंचेत्यु भयकर्मकत्वमस्तिनकेवलंस्वकर्मत्वमितिभावः ॥ [११५१८] **कर्तृकर्माभेदस्येति** । उभयकर्मत्वेनयदास्वकर्मकत्वंप्राप्तंतदाकर्तृकर्मणो रभेदप्राप्त्याकर्तृत्वकर्मत्वयोरेकत्रसमावेशःप्राप्तएवेतिभावः । स्वाध्यायोध्येतव्यः अयंशब्दइत्यत्रचकर्तृकर्मभावोनविरुद्धइ त्याशंकते ॥ [११५१९] **एकदेशइति** । स्वाध्यायैकदेशःशब्दैकदेशश्चेत्यर्थः । भेदः कर्तृकर्मणोरितिशेषः । तथाचकर्तृत्वकर्मत्वयोर्नै कत्रसमावेशःप्राप्तइतिभावः । स्वाध्यायोध्येतव्योऽयंशब्दइत्युभयत्रतथासंभवेपिघटशब्दस्थलेनायंन्यायःसंभवतीत्याह ॥ [११५२०] **घटशब्दस्येति** । प्रयोगविशेषकालइतिशेषः । घटशब्दस्यघटरूपोर्थोघटशब्दश्चवाच्योभवति । तत्रयदाघटशब्दविवक्षयैव घटइतिप्रयुज्यतेएवंघटपटस्तंभकुंभादयइति । शब्दशास्त्रे तदाप्रयोगविशेषकालेघटशब्दस्यघटशब्दव्यतिरिक्तवाच्यस्या दर्शनेनसमुदायैकदेशिभावोनसंभवति अतस्तत्रकर्तृकर्माभेदःप्राप्तएवेत्यर्थइत्याहुः । वस्तुतस्तु एकदेशःकर्तासमुदायःकर्मे तिन्यायःस्वाध्यायोध्येतव्योऽयंशब्दइत्युभयत्रचसंभवति । वेदत्वावच्छिन्नःशब्दत्वावच्छिन्नश्चसमुदायःपृथगस्ति । स्वा ध्यायोध्येतव्यइतिवाक्यं अयंशब्दइतिशब्दश्चैकदेशः । घटशब्दस्थलेतुनैवंसंभवति । स्वंरूपंशब्दस्येतिन्यायेनघटइतिश ब्देनघटशब्दस्यैकस्यैववाच्यतयाघटशब्दातिरिक्तःसमुदायरूपोघटशब्दस्तदेकदेशभूतश्चैकोघटशब्दइतिसमुदायैकदेशिभा वायोगात् । एवंचघटशब्दस्यस्वव्यतिरिक्तार्थरूपवाच्यस्यसत्त्वेपिस्वव्यतिरिक्तसमुदायस्थानीयसजातीयशब्दांतररूपवाच्य स्यादर्शनान्नकर्तृकर्मणोर्भेदइतिभावः ॥ [११५२१] **प्रत्यक्पराग्भावेति** । प्रत्यक्त्वपराक्त्वयोर्दर्शनादित्यर्थः । कर्तृकर्मणोरिति

शेषः ॥ **एवमिति** । गमनादिरूपपरिस्पंदक्रियासुप्रत्यक्पराग्भावदर्शनेनकर्तृकर्मणोरैक्याभावइत्यर्थः ॥ **सर्वत्रेति** । धात्वर्थक्रियामात्रइत्यर्थः । तथाचज्ञानरूपधात्वर्थक्रियायांकर्तृकर्मणोरैक्योपपत्त्याऽस्मन्मतेविरोधाभावाद्युक्तंतैरित्यादिबहुवचनमितिभावः ॥ **ज्ञानंब्रह्मेति** । धात्वर्थक्रियारूपंयत्ज्ञानंतदात्मकंब्रह्मेत्यर्थः ॥ **नज्ञात्रिति** । तथात्वेक्रियायाःकर्तृत्वापत्तेःक्रियाकर्तृभावस्यचविरुद्धत्वादितिभावः ॥ **ज्ञानंचक्रियात्वाद्यद्यपिनस्वकर्मकमिति** । ब्रह्मणोज्ञानरूपधात्वर्थक्रियात्वंतावत्सिद्धं । ज्ञानंचक्रियात्वात्कर्मसापेक्षं । तच्चकर्मनतावदन्यत् । वास्तवस्यतस्याभावात् । अवास्तवस्यमुक्तावभावात् । अतःस्वकर्मकमेवतदितिवक्तव्यं । तन्नसंभवति । क्रियायाःकर्मत्वापत्तेः । क्रियाकर्मभावस्यचविरुद्धत्वादितिभावः ॥ **परनिरपेक्षमेवेति** । कर्मनिरपेक्षमेवेत्यर्थः ॥ **अतइति** । लक्ष्यार्थोपस्थितिसंभवादित्यर्थः ॥ **शून्यतेति** । असत्त्वेत्यर्थः ॥ **स्यादेतदेवंकथंचिदिति** । अभावेच्छादौसत्प्रतियोगित्वसविषयकत्वादेस्स्वभावत्वदर्शनेनविषयसापेक्षत्वस्यज्ञानस्वभावत्वेनस्वभावात्परनिरपेक्षमेवज्ञानमित्ययुक्तमित्याशयेनकथंचिदित्युक्तमितिमंतव्यं ॥ **जानातिरिति** । ज्ञाअवबोधनइतिधातुरित्यर्थः । तदर्थस्य ज्ञाधात्वर्थभूतस्यज्ञानस्येत्यर्थः ॥ **भाव्यमिति** । नह्यकर्तृकाक्रियालोकेदृष्टेतिभावः ॥ **इतिवचनमिति** । विविच्यज्ञेयवचनमित्यर्थः ॥ **तच्चेति** । दूषणसौकर्यमित्यर्थः ॥ **वक्ष्यामइति** । अतोज्ञातृज्ञेयाभावादितिमूलव्याख्यानसमयइत्यर्थः ॥ **स्ववृत्तीति** । यथाघटेज्ञानमि

त्यत्रज्ञानस्यघटेवृत्तिर्नामतद्विषयकत्वमेव । **एवंज्ञानरूपक्रियायाःस्वस्मिन्वृत्तिर्नामस्वविषयकत्वमेववाच्यंतच्चविरुद्धमि** त्यर्थः । अतएवज्ञानस्यस्वविषयकत्वाभावइतिवक्ष्यति ॥ **स्वरूपमित्यसंभावितमिति** । स्वरूपंज्ञेयमितिज्ञानरूपक्रिया त्मकस्यब्रह्मणोज्ञेयत्ववचनमसंभावितमित्यर्थः ॥ **स्वविषयत्वाभावइति** । स्ववृत्तिविरोधेनस्वविषयकत्वाभावेंगीकृतेस तीत्यर्थः ॥ **केवलान्वयव्यासीति** । यत्प्रमेयंतदभिधेयमितिव्याप्तिज्ञानंप्रमेयत्वादिरूपेणस्वविषयकमेवेतिवक्तव्यं । अ न्यथाकेवलान्वयित्वभंगापत्तेरितिभावः । शंकते ॥ **सर्वोपसंहारइति** । यत्प्रमेयंतदभिधेयमितिसर्वोपसंहारेणव्याप्तिग्र हेज्ञानस्वरूपंप्रमेयत्वेनरूपेणैवप्रविशति । नकेवलंज्ञानस्वरूपंज्ञानत्वेनरूपेणतत्रप्रविष्टमितिनकेवलान्वयव्याप्तिग्रहणानुपप त्तिरित्यर्थः ॥ **स्वविषयकत्वेसतीति** । सर्वोपसंहारेणव्याप्तिज्ञानेयथाकथंचित्स्वविषयकत्वेसिद्धेसतिज्ञानस्वरूपस्यप्रमेय त्वेनरूपेणैवप्रवेशोनज्ञानत्वेनेतिवैधर्म्यस्यानुपयुक्तत्वादित्यर्थः । तस्य ब्रह्मरूपज्ञानस्य ॥ **पारतंत्र्येति** । अन्येनज्ञेयत्वां गीकारेपराधीनत्वप्राप्तेरितिभावः । तच्चवक्ष्यामइत्युक्तंदर्शयति ॥ **नापिज्ञेयमस्तीत्यादिना** ॥ **स्वक्रियाविरोधभये नेति** । कर्मीभूतस्यस्वस्यक्रियात्वविरोधभयेनेत्यर्थः ॥ **किंचैवमिति** । ज्ञातृज्ञेयशून्यस्यापिब्रह्मणःस्वप्रकाशज्ञानरूपत्वां गीकारइत्यर्थः । शून्यस्य अत्यंतासतः । एवं ब्रह्मवत् ॥ **अस्माकंकुतइति** । अस्मान्प्रतिकुतःप्रमाणाच्छशविषाणादिसि द्धिरित्यर्थः । असदीयज्ञानागोचरत्वेऽस्मान्प्रतितत्सिद्ध्यसंभवादितिभावः ॥ **ब्रह्मणोपीति** । तस्याप्यस्मदीयज्ञानागोच

रत्वेऽस्मान्प्रतितत्सिद्धेरप्यसंभवादितिभावः । नन्वहमितिजीवस्यस्वप्रकाशतयानित्यसिद्धत्वात्तदभिन्नस्यापिब्रह्मणःस्व
प्रकाशतयानित्यसिद्धिर्युक्तेत्याशंकते ॥ [११५।२२] स्वयमेवेति । जीवएवेत्यर्थः । वयमेवब्रह्मेत्यपिक्वचित्पाठः ॥ [११५।२३] शून्येपीति ।
शशविषाणादिरूपासत्यपीत्यर्थः ॥ [११५।२३] उक्तरूपज्ञानतायाइति । ज्ञातृज्ञेयशून्यज्ञानरूपतायाइत्यर्थः ॥ [११५।२३] शून्येपिसंभवा
दिति । असत्यपिसंभवादित्यर्थः । नकश्चिद्विशेषइत्यनंतरमध्याहार्यमाह ॥ [११५।२३] ब्रह्मवादस्येति । क्रियारूपत्वमंगीकृत्या
प्याह ॥ [११५।२४] नाप्युत्पत्तिमदिति । उत्पत्तिमत्क्रियारूपंनभवतीत्यर्थः । येनतदुत्पत्तौकर्तृकर्मकारकापेक्षास्यादितिभावः ॥
[११५।२५] ब्रह्मज्ञानस्येति । नित्यभूतस्येत्यर्थः ॥ [११५।२५] तद्रहितस्यापीति । ज्ञातृज्ञेयरहितस्यापीत्यर्थः ॥ [११५।२५] सत्तेति । तथाचनब्रह्मवा
दस्यशून्यवादाविशेषइतिभावः ॥ [११५।२५] क्वापीत्यनेनेति । तथाचनचस्वरूपमन्यद्वाज्ञेयमित्यनेनास्यनपुनरुक्तता । नियमद्योत
नार्थत्वादितिभावः ॥ [११५।२५] नित्यानित्ययोरिति । ज्ञानयोरितिशेषः । नैतावन्मात्रमुक्तशंकापरिहारायपर्याप्तमित्यतआह ॥
[११५।२६] अयंभावइति ॥ जानातेरिति । ज्ञाअवबोधनइतिधातोरित्यर्थः ॥ [११५।२६] दृष्टहानिरिति । दृष्टस्यज्ञाधातुरूपत्वस्यहानिरदृष्ट
स्यधात्वंतररूपत्वस्यचकल्पनास्यादित्यर्थः ॥ [११५।२६] कथंक्रियानस्यादिति । तथाचनचब्रह्मज्ञानंक्रियारूपमित्युक्तमसदितिभावः ।
ननुज्ञायतेनेनेतिज्ञानमितिकरणेपिल्युटोविहितत्वात्करणस्यक्रियारूपत्वाभावादुक्तमसदित्यतआह ॥ [११५।२६] भावेहीति । धा
त्वर्थरूपक्रियायां अयंप्रत्ययो ल्युट्प्रत्ययः । हीत्यनेनल्युड्भावइतिस्मरणंसूचयति । तथाचज्ञाऽवबोधनेऽस्माद्भावेल्युट्

प्रत्ययेलशक्कतद्धितइतिसूत्रेणलकारलोपेहलंत्यमितिटकारलोपेयुकारस्ययुवोरनाकावितिसूत्रेणानादेशेज्ञाअनेतिजातेअकारस्यपूर्वरूपे(ज्ञप्ति)र्ज्ञानमितिभावएवायंप्रत्ययोद्रष्टव्यइत्यर्थः ॥ **नकरणादाविष्टइति** । तथात्वेब्रह्मणःकारणत्वापत्तेरितिभावः । ननुक्रियारूपत्वेपिनित्यत्वान्नकारकापेक्षेतिचेत्तत्राह ॥ **नचोत्पत्तावेवेति** । कुतोननियमइत्यतआह ॥ **अस्तीति** ॥ **सत्तायाइति** । असभुवीतिधात्वर्थभूतायाइत्यर्थः ॥ **अन्यथेति** । नित्यायाअपिसत्तायाःकर्तृसापेक्षतानंगीकारइत्यर्थः ॥ **लकारेति** । अस्धातोःकर्तरिलट्प्रत्ययेतस्यतिप्इत्यादेशेहलंत्यमितिपकारलोपेअस्तीतिरूपं । तथाचसत्तायाःनित्यत्वेनकर्तृसापेक्षत्वाभावेकर्त्रर्थेलट्प्रत्ययानुत्पत्तिप्रसंगेनास्तीतिरूपनिष्पत्तिर्नस्यादितिभावः ॥ **अविनाभावमात्रेणेति** । द्रव्यत्वसंयोगवत्त्वादाविवेतिभावः ॥ **द्वितीयपक्षेपीति** । किंचाभेदेश्रुतितात्पर्यमभिलषतामायावादिनावक्तव्यं । किमभेदोब्रह्मस्वरूपमुततत्तोन्यइति विकल्प्याद्योदूषितः । अतःपरमवशिष्टऽभेदोब्रह्मणोन्यइतिद्वितीयपक्षेपीत्यर्थः ॥ **भेदाभावएववक्तव्यइति** । ब्रह्मान्यस्याभेदस्यभावरूपत्वेसत्यत्वेऽद्वैतहानिः । मिथ्यात्वेमुक्तौतस्यनिवृत्तत्वेनजीवब्रह्मणोर्भेदापत्तेर्भेदाभावरूपएववक्तव्यइतिभावः । अभावरूपधर्माणांचसत्यत्वेपिनाद्वैतहानिः । अभावरूपाधर्माःनाद्वैतंनिघ्नंतीतिमंडनोक्तेरितिध्येयं । केनापि प्रमाणेन ॥ **प्रत्यक्षाद्यविषयत्वादिति** । तथाचतद्धर्मिकभेदस्याप्यप्राप्तिरितिभावः॥ **इत्युक्तमिति** । आगमंविनेश्वरस्यैवासिद्धेरित्यनेनोक्तमित्यर्थः । नन्वीश्वरस्यप्रत्यक्षाद्यविषयत्वेनतद्धर्मिकभेदस्यप्रत्यक्षानुमानाभ्यामप्राप्तत्वेपिद्वासुपर्णेत्यादिश्रुतिप्राप्तएवभेदोनेहनानास्तीत्यादिनाप्रतिषिध्यतइत्याशंक्यनिराकरोति ॥ **द्वासुपर्णे**

त्यादीति । तथाचसर्वासामपिश्रुतीनामेकवाक्यत्वेनस्वयमेवभेदंप्रतिपाद्यंपुनस्तन्निषेधेस्वव्याघातप्रसंगेनश्रुतीनामुन्मत्तवा
क्यत्वंस्यादित्यर्थः । ननुभवेदयंश्रुतीनांस्वव्याघातोयदिद्वासुपर्णेत्यादिश्रुतीनांभेदविधायकत्वंस्यात् । नचैवं । भेदानुवा
दकत्वांगीकारात् । तथाचद्वासुपर्णेत्यादिनाभेदमनूद्यनेहनानेतिनिषेधो नोक्तदोषइत्यतआह ॥ [११।६।६] अप्राप्तत्वादेवेति । भेदस्ये
तिशेषः । कथमप्राप्तिर्भेदस्येत्यतआह ॥ [११।६।८] अप्राप्तीति । तत्त्वमसीत्यत्रतदितीश्वरंधर्मीकृत्यत्वमसीतिजीवभेदाभावप्रति
पादनेईश्वरधर्मिकजीवप्रतियोगिकभेदप्राप्त्याभाव्यं । तथा त्वमितिजीवमनूद्यतदसीति । तथा क्षेत्रज्ञंचापिमांविद्धीतिजीवभे
दाभावप्रतिपादनेजीवधर्मिकेश्वरप्रतियोगिकभेदप्राप्त्याभाव्यं । साचनसंभवति । ईश्वरस्यप्रत्यक्षानुमानाविषयत्वेनतद्ध
र्मिकस्यवातत्प्रतियोगिकस्यवाभेदस्याप्राप्तेर्द्वासुपर्णेत्यादिश्रुतीनामनुवादकत्वायोगेनविधायकत्वमेववाच्यं । तथाचस्वव्या
घातप्रसंगेनतत्त्वमसीत्यादिश्रुतीनामुन्मत्तवाक्यत्वमपरिहार्यमितिभावः। ननुसदागमैकविज्ञेयत्वंप्रतिपाद्योपसंहारोपितथैवक
र्तव्यस्तथाचसदागमैरेवेतिकथमुपसंहारइत्यतएकशब्दार्थएवैवकारेणोच्यतेऽतोनदोषइत्याशयेनाह ॥ [११।६।९] एवेत्येकशब्दस्या
र्थइति । ननुसर्वस्माद्भिन्नत्वेनसर्वस्माद्विशिष्टत्वेनचेत्यत्रकथंतृतीया । नचकर्तृकरणयोस्तृतीयेतिसूत्रेणतृतीयेतिवाच्यं ।
तयोःकर्तृत्वकरणत्वयोरभावादित्यतआह ॥ [११।६।१०] उभयत्रेति । ज्ञेयत्वरूपप्रकारंप्राप्तोभगवानित्थंभूतस्तज्ज्ञापकेसर्वस्माद्भिन्न
त्वेसर्वस्माद्विशिष्टत्वेचतृतीयेत्यर्थः । नन्वाद्यपद्येसदागमैकविज्ञेयमित्युक्तत्वादत्राप्युपसंहारेविज्ञेयोभगवानितिवक्तव्येज्ञे
यइत्येववचनेकिंनिमित्तमित्याशंक्यवैलक्षण्य विशिष्टत्व रूपवीत्युपसर्गार्थस्यैवसर्वस्माद्भिन्नत्वेनसर्वस्माद्विशिष्टत्वेनेतिवि

शेषणद्वयेनोक्तत्वाद्विज्ञेयइत्यनुक्त्वाज्ञेयइत्येवोक्तमित्याशयेनाह ॥ [११६।१०] उभयमपीति । परिच्छेदांतेपिमंगलाचरणस्यावश्यं
कर्तव्यत्वज्ञापनायाह ॥ [११६।११] भगवानितिपूजार्थमिति । पूज्यत्वज्ञापनार्थमित्यर्थः ॥ ७ ॥ इतिश्रीमद्यदुपत्याचार्यपू
ज्यपादाराधकेनश्रीनिवासेनविरचितायांविष्णुतत्त्वविनिर्णयटीकाविवृतौवाक्यार्थदीपिकायांप्रथमः परि
च्छेदः ॥ ७ ॥ महालक्ष्मीर्यस्यपत्नीतनुजःपद्मसंभवः । भृत्यारुद्रादिकास्तस्मैजगद्भर्त्रेनमोनमः । मध्येपिमंगलाचरणस्या
वश्यंकर्तव्यत्वादेतत्परिच्छेदप्रतिपाद्यसमतीतक्षराक्षरत्वव्याख्यानपूर्वकंतद्धर्मयुक्ततयाहरिंनमति ॥ [११६।१२] कलत्रमिति । विश्व
मेवकुटुंबःपोष्यवर्गोयस्यासौतथोक्तस्तस्मै। शिष्याणांमनोव्याकुलीभावपरिहारायपरिच्छेदप्रतिपाद्यमाह ॥ [११६।१३] इदानीमिति ।
[११६।१४] विशेषणद्वयमिति । समतीतक्षराक्षरत्वं निर्दोषाशेषसद्गुणत्वंचेतिविशेषणद्वयमित्यर्थः ॥ [११६।१५] सामान्यतइति । सर्वज्ञं
सर्वकर्तारमित्यस्यसर्वोत्तमंसर्वदोषव्यपेतमित्यस्यचसर्वोत्तमत्वप्रतिपादकत्वेपिसमतीतक्षराक्षरत्वेनरूपेणविशिष्यतदप्रतिपा
दकत्वाद्द्वाविमावित्यस्यतुतत्प्रतिपादकत्वेपिकूटस्थइतिसर्वाणिभूतानीत्येवश्रूयते नतुलक्ष्मीरितिब्रह्मरुद्राद्याइतिच। क्षराक्षरश
ब्दव्याख्यानंचनक्रियतइतिभावः । अतएवब्रह्माशिवःसुराद्याश्चेत्याद्युदाहृतवाक्येषुलक्ष्मीब्रह्मरुद्रादीनांस्वपदेनोपादानस्य
प्रयोजनंवक्ष्यतीतिज्ञातव्यं । अत्र समतीतक्षराक्षरत्वादौ ॥ [११६।१६] प्राप्तानुपपत्तीति । यस्मात्परंनापरमस्तीतिमंत्रेसर्वस्यासत्त्वमु
च्यते। अतःकथंतस्यसर्वोत्तमत्वं। उत्तमत्वस्यप्रतियोगिसत्तासापेक्षत्वात्।तथा हिरण्यगर्भःसमवर्तताग्रइत्यादिश्रुतिषुब्रह्मादी
नामपिसर्वेश्वरत्वादिकमुच्यते तत्कथंविष्णोस्तदंगीक्रियते । उभयोस्तद्विरोधादित्येवंसमतीतक्षराक्षरत्वेप्राप्तानुपपत्तिपरिहा

रार्थं तथाविष्णोर्मानुषेषूत्पत्त्यन्यथानुपपत्त्यानिर्गुणत्वादिनाचननिर्दोषाशेषसद्गुणत्वंयुक्तमित्येवंनिर्दोषाशेषसद्गुणत्वेप्राप्तानुपपत्तिपरिहारार्थंचेत्यर्थः ॥ [११६।१८] **इदमिति** । शरीररक्षणमित्यर्थः ॥ [११६।१९] **स्वरूपेणेति** । स्वस्यरूपेणब्रह्मत्वशिवत्वरूपासाधारणधर्मेणेत्यर्थः । क्षरविनाशसंततदानयोरितिधातुमभिप्रेत्याह ॥ [११६।१९] **विनाशादिति** ॥ **नसंभवतीति**। नित्यत्वादितिभावः । ननु शरीरनाशेनजीवनाशव्यवहारःकथं अन्यनाशेनान्यनाशव्यवहारादर्शनात्प्रयोजनाभावाच्चेत्यतआह ॥ [११६।२०] **स्वविनाशेनेति** । स्वस्यद्रव्यस्यविनाशेनेत्यर्थः । स्वमज्ञातिधनाख्यायामित्यत्रज्ञातिधनान्यत्राचिनःस्वशब्दादिति व्याख्यातत्वेनस्वशब्दस्य धनवाचित्वादितिज्ञेयं ॥ [११६।२०] **लोकेदृश्यतइति** । द्रव्येनष्टेसत्यहंविनष्टोस्मीतिव्यवहारोदृश्यतइत्यर्थः। तथाचजीवस्यशरीरमपि स्वीयंभवतीतितद्विनाशेनजीवनाशव्यवहारःसंभवति । स्वस्वामिभावसंबंधरूपनियामकसद्भावादितिभावः । एवंचरूढोपचारत्वान्नप्रयोजनापेक्षेतिहृदयं। नन्वनेनक्षरशब्दःशरीरेमुख्यःब्रह्मादौतूपचारइतिप्राप्तंनमुख्यवृत्तिरितिचेन्न। क्षरशब्दस्य ब्रह्मादौरूढोपचारत्वांगीकारात् । मुख्यार्थातिरिक्तगुणयोगेनवृत्तिरुपचारः । तत्रप्रयोगबाहुल्यंरूढोपचारः । अतएवात्रप्रयोगबाहुल्यप्रदर्शनायलोकेदृश्यतइत्युक्तं । तथाचरूढोपचारस्याभिधातुल्यत्वान्मुख्यवृत्तितुल्यतैवेत्यभिप्रायः । यथोक्तं मणिकृता । रूढोपचारोप्यभिधातुल्यइतीतिसंप्रदायः । तत्परोहरिरित्यत्रतच्छब्दस्यसन्निहितलक्ष्मीमात्रपरत्वप्रतीतिनिरासायाह ॥ [११६।२१] **ताभ्यामिति** । क्षराक्षराभ्यामित्यर्थः । शक्तिंलक्षयति ॥ [११६।२२] **कार्योत्पत्त्याद्यनुकूलइति**। वन्ह्यादौ दाहजनकत्वशक्तिर्नामदाहादिकार्योत्पत्त्याद्यनुकूलोऽतींद्रियोवन्ह्यादिरूपकारणगतोधर्मविशेषइत्यर्थः । कारणधर्मःश

क्तिरित्युक्तेवन्ह्यादिगतसंख्यापरिमाणादिधर्मेष्वतिव्याप्तिःस्यात् । अतउक्तमतींद्रियइति । तावत्युक्तेवायुवनस्पतिसंयोगवत्प्रत्यक्षाप्रत्यक्षसंयोगस्याप्रत्यक्षत्वेनवन्ह्यादिगतेपरमाण्वादिसंयोगेऽतिव्याप्तिःस्यादतउक्तं।कार्योत्पत्त्याद्यनुकूलइति।कार्योत्पत्त्याद्यनुकूलोधर्मःशक्तिरित्युक्तेदाहाद्यनुकूलेकरतलानलसंयोगे उष्णस्पर्शेचातिव्याप्तिःस्यादतउक्तमतींद्रियइति। ननुविशेषपदंकिमर्थमितिचेदुच्यते।आत्मनिष्ठज्ञानादिजनकत्वशक्तेरपिलक्ष्यतयाअदृष्टेऽतिव्याप्तिस्स्यात्। तस्यापिज्ञानादिकार्योत्पत्त्याद्यनुकूलत्वादतींद्रियत्वात्कारणीभूतात्मधर्मत्वाच्च। अतोविशेषपदं । अदृष्टभिन्नोधर्मइत्यर्थः । ननुशक्तिविज्ञानसुखाद्यैर्गुणैरित्ययुक्तं। शक्तेस्सहकारिस्वरूपत्वेनसहकारिणोगुणत्वाभावात् । सुखस्यचदुःखाभावरूपत्वेनतस्यापिगुणत्वाभावादित्याशंक्य शक्तेःसहकारिव्यतिरिक्तत्वं सुखस्यचदुःखाभावरूपत्वाभावंचसमर्थयितुमाह॥[११६।२२] स्वरूपसहकारीति। वन्हिस्वरूप करतलानलसंयोगरूपसहकारिणोस्समवधानमेवदाहजनकत्वशक्तिः । नतुतद्व्यतिरिक्तावह्नौदाहजनकत्वशक्तिरस्ति । एवंहरिस्वरूपदेहेंद्रियादिरूपसहकारिसमवधानमेवस्रष्टृत्वादिशक्तिः । नतुतद्व्यतिरिक्तोहरौशक्तिनामकगुणोस्तीत्याशयः ॥ [११६।२३] सहकार्यभावमिति । कार्यंदेहःकरणमिंद्रियादिकंचनविद्यतइतिसहकार्यभावमभिधायेत्यर्थः ॥ [११६।२३] संबंधित्वेनेति । अस्यशक्तिरितिसंबंधित्वेनेत्यर्थः । तथाचस्वरूपातिरिक्ताशक्तिःसिद्धेतिभावः ॥ [११६।२४] उच्यतइति । बौद्धविशेषयोर्वैभाषिकसौत्रांतिकयोर्मतेदुःखाभावएवसुखंनतुभावरूपंसुखमस्ति । यथोक्तं । दुःखाभावंसुखंचाहुरिति । तथाचनतस्यगुणत्वमितिभावः ॥ [११६।२४] बाधकाभावादिति । सुखशब्देनभावरूपसुखाख्यगुणग्रहणेबाधकाभावादित्यर्थः । बाधकमाशंकते ॥ [११६।२४] सुखस्येति॥ [११६।२४] दुःखपक्षनिक्षे

पइति । विषसंपृक्तमधुवदित्यर्थः । तथाचयत्रसुखंतत्रदुःखमितिव्याप्त्यांसुखस्यदुःखसंभिन्नत्वेनपरमेश्वरस्यसुखांगीकारे दुःखमप्यंगीकार्यंस्यादित्याशयः ॥ [११६।२५] ज्ञानस्येति । अनिष्टपदार्थज्ञानस्येत्यर्थः । तत्पक्षनिक्षेपात् दुःखपक्षनिक्षेपादित्यर्थः । तथाचज्ञानरूपदुःखकारणांगीकारेकार्यभूतदुःखस्याप्यंगीकार्यत्वापत्त्याज्ञानरूपगुणस्याप्यभावस्यादितिभावः । नित्यं ज्ञा नमितिवर्तते । परमेश्वरश्चनित्यज्ञानः । अतोनतत्तस्यदुःखकारणमितिभावः । ननित्यमित्यत्रसुखमित्यनुवर्तते । परमेश्वर श्चनित्यसुखः । अतोनतद्दुःखाविनाभूतमितिनपरमेश्वरस्यसुखांगीकारेदुःखांगीकारप्रसंगइतिभावः । ननुज्ञानांगीकारेतस्य दुःखकारणत्वेनतदप्यंगीकार्यंप्रसज्यतइत्ययुक्तं । रागद्वेषरूपक्लेशसमानाधिकरणस्यैवज्ञानस्यदुःखकारणत्वांगीकारात् पर मेश्वरेचसक्लेशज्ञानाभावान्नदुःखप्रसक्तिरतोनज्ञानांगीकारेबाधकमितिचेत्तर्हिसक्लेशमेवसुखंदुःखाविनाभूतमितितादृशमेवसु खंदुःखपक्षनिक्षिप्तंपरमेश्वरेचतदभावान्नदुःखप्रसक्तिरतोनसुखांगीकारेकिंचिद्बाधकमस्तीतिसमानमित्याह ॥ [११६।२६] सक्लेशंज्ञान मिति । रागद्वेषरूपक्लेशसमानाधिकरणमित्यर्थः। यथोक्तं । समयपादीयसुधायांजैनमतानुवादसमये क्लेशोरागद्वेषाविति । ननुवीर्यशौर्ययोःप्रयत्ने औदार्यकारुण्यादीनामिच्छायामंतर्भावात्कथंपृथग्गुणत्वमित्यतआह ॥ [११७।१] एतेषामिति ॥ [११७।१] अनुभ वविरुद्धइति । सत्यपिप्रयत्नेनास्तिवीर्यंशौर्यंचसत्यामपीच्छायांनास्त्यौदार्यादिकमितिव्यवहारसिद्धोयोनुभवोवीर्यादेःप्रय त्नादिभेदावगाही तद्विरुद्धइत्यर्थः ॥ [११७।२] ससीमगुणत्वादिति । ब्रह्मापेक्षयालक्ष्म्याःकोटिगुणाधिकत्वेनससीमगुणत्वंद्रष्ट व्यं । ननुजीवस्वरूपस्यानादित्वात्कथमीश्वरोजीवस्यसर्गंकरोतीत्यतस्सर्गपदंव्याचष्टे ॥ [११७।३] सर्गोदेहसृष्टिरिति । ननुजीव

स्वरूपस्यसर्वदाविद्यमानत्वात्कथमीश्वरोजीवस्यस्थितिंकरोतीत्यतःस्थितिपदंव्याचष्टे ॥ स्थितिरिति । ननुजीवस्यनि
त्यत्वात्कथमीश्वरोजीवस्यक्षयंकरोतीत्यतःक्षयपदंव्याचष्टे ॥ क्षयोमरणमिति । देहवियोगइत्यर्थः । ननुद्वंद्वसमासेबंध
नानीतिस्यादित्यतउक्तं ॥ एकवद्भावश्चेति । सर्वोद्वंद्वोविभाषयैकवद्भवतीतिवचनादितिभावः । रमायादेहसृष्टिरूपस
र्गाभावेनहरेस्तत्प्रदत्वायोगादाह ॥ प्रादुर्भावइति । रमायाःभिन्नदेहाभावेनदेहाधिष्ठानेनावस्थानरूपस्थित्यसंभवादाह ॥
कदापीति । आज्ञांतर्गतिराज्ञांतर्वर्तमानत्वं । मुक्तामुक्तऋजुसाधारण्यव्यावृत्त्यर्थंनित्याविर्भूतेत्युक्तं । अयमर्थः । त्यब्नेर्ध्रुवे ।
ध्रुवंनियतंतस्मिन्नर्थेनेः नीत्युपसर्गात्परंत्यप्प्रत्ययोभवतीतिसूत्रार्थः । तथाचनित्येत्यस्यनियमेनसर्वदाकालत्रयेप्यनालोचनद
शायामित्यर्थः । तथाचकालत्रयेप्यनालोचनदशायांभगवदितरसर्वसाक्षात्कारइत्युक्तंभवति । तत्रानालोचनदशायामित्यने
नामुक्तऋजुसाधारण्यपरिहारः । मुक्तऋजुसाधारण्यपरिहारायकालत्रयेपीत्युक्तमितिज्ञातव्यं । ननुसर्गस्थितियतिज्योति
र्नित्यानंदानांचेष्टावत्क्षरसाधारणत्वात्सर्गःस्थितिर्यतिर्ज्योतिरित्यादिनाकथमक्षरासाधारणधर्मतयोच्यंतइत्याशंक्यपरिहर
ति ॥ यद्यपीति ॥ उक्तविधयेति । सर्गोदेहसृष्टिरित्याद्युक्तविधया अत्रसर्गःप्रादुर्भावइत्याद्युक्तविधयाचेत्यर्थः । त
स्यापि ईश्वरस्यापि । एतेषां क्षराणां ॥ इतरेतरेति । ईश्वरसृष्टानामेतेषामपीश्वरसर्गादिकर्तृत्वांगीकारेइतरेतराश्रयापत्त्यै
तेषामीश्वरसर्गादिकर्तृत्वंनसंभवतीत्यर्थः ॥ विषयभेदेनेति । ब्रह्मादीनांदेहसृष्ट्यादावीश्वरवशत्वमीश्वरस्यतुस्वप्रवृत्त्यादौ
ब्रह्मादिवशत्वमितिविषयभेदान्नेतरेतराश्रयइत्यर्थः । केचिद्विषयभेदेनेत्यस्यकल्पभेदेनेत्यर्थइत्याहुः । कप्रत्ययेननिर्दोषत्व

स्यकुत्सितत्वप्रतीतेराह ॥ [११७।१०]स्वार्थइति । तथाच निर्दोषएवनिर्दोषकइत्यर्थः । ननुतत्परोहरिरित्युक्तत्वादेकएवपरोहरि रितिपुनःसाध्यनिर्देशोव्यर्थइत्यतआह ॥ [११७।११]अतइति । तत्परोहरिरितिप्रतिज्ञायस्वातंत्र्येत्यादिनोपपाद्योपसंह्रियते । त थाचएकएवपरोहरिरित्येतन्निर्दोषकश्चसइत्यनंतरंयोज्यं । एवंचोपसंहाररूपत्वान्नवैयर्थ्यमितिभावः । उपसंहारत्वज्ञाप नायैवातइत्यध्याहारेणयोजितमितिज्ञातव्यं ॥ [११७।१२]स्वरूपग्रहणमिति । स्वेषांब्रह्मादीनांयेरूपाब्रह्मत्वशेषत्वाद्यसाधारणध र्मास्तद्युक्ततयाग्रहणमित्यर्थः ॥ [११७।१२]एतेनेति । ब्रह्माशिवःसुराद्याश्चेत्युदाहृतपरमश्रुतिविरोधेनेत्यर्थः ॥ [११७।१२]क्षराक्षरशब्दा विति । द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवचेत्येतद्वाक्यगतावित्यर्थः ॥ [११७।१२]जडजीवविषयाविति । क्षरशब्दोविना शिजडप्रतिपादकः । अक्षरशब्दोनित्यभूतजीवप्रतिपादकइत्यर्थः । संप्रति इदानीं ॥ [११७।१३]तत्तद्दर्शनाधिकृताभ्यइ ति । शाक्तादितत्तद्दर्शनप्रतिपाद्याभ्यइत्यर्थः ॥ [११७।१४]महालक्ष्मीवाक्यमेतदिति । अंभृणीवागात्मानंतुष्टावेत्यनुक्रम णिकावचनादितिभावः । अंभृणीमहालक्ष्मीः । ननुकृणोमीतिकथं । डुकृञ्करणेञकारोनुबंधार्थः । कृइत्येवधा तुः । अस्माल्लटितस्योत्तमपुरुषेमिपइत्यादेशेपकारलोपेउविकरणे । तस्मिन्परतःऋवर्णस्यगुणेरपरत्वे कर् उ मि इतिजा तेउकारस्यओकाररूपेगुणेकरोमीतिवक्तव्यत्वादित्यतआह ॥ [११७।१५]व्यत्ययोबहुलमितीति । इतिसूत्रेणेत्यर्थः ॥ विकरण [११७।१५]व्यत्ययइति । उविकरणस्यश्नुविकरणत्वेनव्यत्ययइत्यर्थः । तथाचकृधातोर्लटितस्यमिपि । श्नुविकरणेलशक्वतद्धित इतिशकारलोपेकृनुइतिस्थितेनस्यणत्वेउकारस्यओकाररूपेगुणेकृणोमीतिरूपमितिभावः ॥ [११७।१६]हिंसकायेति । शॄहिंसायामि

तिधातोरितिभावः । कथंहिंसकत्वमित्यतआह ॥ [११७।१६] पंचमंमुखच्छेदादिति । ब्रह्मणःपंचममुखच्छेदादित्यर्थः । अतएवब्र
ह्मद्विषइतियोज्यं ॥ [११७।१७] द्यावापृथिव्युपलक्षितानिति । द्युशब्देनोपलक्षिताऊर्ध्वलोकाः । पृथिवीशब्देनोपलक्षिताःपाताला
द्याअधोलोकाइतिद्रष्टव्यं । ननुपरोक्षेलिडितिसूत्रेणपरोक्षार्थएवलिटोविधानात्सराजातदाबभूवेत्यादिप्रयोगदर्शनात्प्रकृ
तेचाहमितिस्वकर्तृकावेशनस्यापरोक्षत्वेनपरोक्षत्वाभावादाविशामीतिवक्तव्यंनत्वाविवेशेतितत्राह ॥ [११७।१८] छंदसीति । परो
क्षार्थालुङादयस्त्रयःछंदस्यपरोक्षेपिभवंतीतिसूत्रार्थः । तथाचछंदस्त्वादत्रापरोक्षेप्याविवेशेतिलिडुपपत्तिरितिभावः ॥ [११७।१९] समु
द्रेअप्स्विति । अत्रसमुद्रशब्दोपांखातपरइत्यवधेयं ॥ [११७।२०] अनुचितमिति । गुरोर्नामनगृह्णीयाच्छिष्योभार्यापतेरपीतिवच
नादितिभावः ॥ [११७।२०] आपोनाराइत्यादिनेति । आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताःपूर्वंतेननारायणः
स्मृतइतिप्रमाणेनेत्यर्थः । नरोऽनाशात्परोहरिरितिद्वितीयस्कंधतात्पर्योक्तेर्नरोभगवाँस्तत्सूनवस्तत्पुत्राइत्यर्थोद्रष्टव्यः । अवे
त्युपसर्गार्थमाह ॥ [११७।२१] ईषदेवेति । यस्मिंस्तदक्षरइत्यत्र यच्चवस्त्वित्यत्रचानुवादत्वसिद्ध्यर्थंयस्मिन्यच्चेतियच्छब्दोऽध्याहृतइ
त्यवधेयं । तोयशब्दस्यतोयमापः कर्माणीतिकर्मनामसुपाठादाह ॥ [११७।२३] कर्मणेति ॥ [११७।२३] स्ववीर्येणवेति । स्वसामर्थ्येनवेत्यर्थः ।
तोयशब्दस्यवीर्यनामस्वपिपाठादितिभावः । विविधमितिवीत्यस्यार्थः । असमर्जेतिलिट्यप्यडागमःछंदस्त्वादित्यवधेयं ॥
[११७।२५] सिद्धैरिति । ओषधीनांपुरुषाणांपशूनांचचराचरांतर्गतत्वादोषधीभिरित्यादिपुनर्वचनंव्यर्थमित्यर्थः । ओषध्यादीनां

सोमलतादीनां । आदिपदेनगवादीनांग्रहणं । तेषांविशिष्टत्वोपपादनायंयज्ञांगत्वादिनेत्युक्तं । आदिपदेनगवादीनांक्षीरद्वारेणदेवतापूजांगत्वंग्राह्यं । यस्मिंस्तदक्षरइतिवदनुवादत्वसिद्ध्यर्थंयच्छब्दाध्याहारेणातइत्येतद्ब्रह्मवाचकत्वेनयोजयति ॥ [११७।२५] अतोयस्मादिति । अतःपरंनान्यदित्यत्रपरशब्दस्योत्तमार्थत्वेतन्निषेधस्यपरात्परमित्येननार्थतोगतार्थत्वादन्यार्थत्वेऽन्यदित्यनेनपुनरुक्तिप्रसंगादाह ॥ [११७।२५] परमतिशयेनेति ॥ [११८।१] उत्कृष्टादिति । उत्तमाद्ब्रह्मादेरित्यर्थः । विश्वंसमस्तंपूर्णंचेत्यभिधानादाह ॥ [११८।१] विश्वंपूर्णमिति । ऋतंयथार्थविज्ञानंसत्यंतत्पूर्विकाकृतिरितिप्रमाणानुसारेणऋतसत्यशब्दार्थावाह ॥ [११८।२] यथार्थज्ञानरूपमित्यादिना ॥ [११८।२] ज्ञानपूर्वक्रियावदिति । ज्ञानपूर्वकंकर्तेत्यर्थः ॥ [११८।३] अभिप्रेतार्थइति । रमादिदेवताभ्योविष्णोःपरमत्वरूपोर्थइत्यर्थः । इषुइच्छायामितिधातोरकारप्रत्ययेइकारस्यएकाररूपेगुणेचसतिनिष्पन्नएषशब्दइच्छावाचीत्यभिप्रेत्याह ॥ [११८।४] एषस्येच्छारूपस्येति । इच्छारूपत्वस्यसकलचेतनसाधारणत्वादाह ॥ [११८।४] सत्यकामस्येतीति ॥ [११८।५] असुन्निति । तथाचवयूअस्मादसुन्प्रत्ययेउन्इत्यस्यलोपेवयस्इतिसकारांतप्रातिपदिकसिद्धिः । पश्चात्सुप्रत्ययेतस्यलोपे अत्वसंतस्यचाधातोरितिसूत्रेणासंतत्वाद्दीर्घेवयास्इतिस्थितेसस्यरुत्वेविसर्गेचवयाःइतिभवतीतिद्रष्टव्यं ॥ [११८।७] लंध्यंवंतौस्थइति । इदानींप्राप्तवंतौस्थइत्यर्थः । मनसोजातइत्यत्रकर्तृप्रतीतेराह ॥ [११८।७] परमपुरुषस्येति । परमपुरुषस्ययन्मनस्तस्मादित्यर्थः । चक्षोरित्येतत्व्यत्ययेनोकारांतमित्यभिप्रेत्याह ॥ चक्षोः [११८।७] चक्षुषइति । ननुचक्षोःसूर्योअजायतेतिसंध्यभावःकथं सूर्योअजायतेत्यत्र एङःपदांतादति पदांतादेङोऽतिपरेपूर्वरूपमेकादेशःस्यादितिसूत्रेण अकारस्यपूर्वरूपेसूर्योजायतेतिसंधि

स्स्यादित्यतआह ॥ प्रकृत्यांतःपादमिति । पादस्यांतरंतःपादं ऋक्पादमध्यस्थएङ्प्रकृत्यास्यात् नसंधिंयातीति
यावत् । अतिअकारेपरे नतुवकारयकारपरेअतीत्यर्थः । सुजातेअश्वसूनृते । उपप्रयंतोअध्वरमित्याद्युदाहरणं ।
तथाचात्रवकारयकारपरस्याकारस्यपरतोऽभावेनकेवलस्याकारस्यैवविद्यमानत्वात्तस्मिन्परेओकाररूपस्यएङःप्रकृतिभावे
सतिपूर्वरूपाप्राप्त्यासूर्योअजायतेतियुक्तमितिभावः ॥ मूलेसमचिंतयदिति । एतेजायंतामित्यैच्छदित्यर्थः ॥ चिंतना
दिति । इच्छाविशेषादित्यर्थः । इदमित्येतद्व्यत्ययेनषष्ठ्यर्थमित्यभिप्रेत्याह ॥ अस्यजगतोऽग्रइति । उभयनिषेध
इति । परमपरंचनेत्युभयनिषेधइत्यर्थः ॥ इदंशब्दार्थस्यासत्त्वइति । इदंशब्दार्थभूतस्यसर्वस्यजगतोसत्त्वइत्यर्थः ।
तदेवनस्यादिति । तच्छब्दोक्तःप्रपंचएवनस्यादित्यर्थः । कुतः कस्मात् यस्मान्नाणीयइतिदृष्टांतवाक्याद्वैषम्यंदर्शयति ॥
विरोधाभावादिति । वाक्यशेषविरोधाभावादित्यर्थः ॥ ततःपुरुषादिति । तथाचततइत्यनेनावधितयाप्रपंचोनपरा
मृश्यतइतिभावः ॥ इदंशब्देनेति । तेनेदंपूर्णमितिवाक्येइदंशब्देनोक्तंविश्वमेवेत्यर्थः ॥ प्रधानतयाप्रकृतइति ॥ तेनेद
मितिवाक्येकर्तृवाचिनातेनेतिपदेनप्रधानतयाकर्तृत्वेनप्रकृतइत्यर्थः ॥ अप्रधानतयेति । भगवत्कर्तृकपूर्तिकर्मत्वेनाप्रधान
तयेदंशब्देनप्रकृतंविश्वमित्यर्थः ॥ एवमंगीकार्यमिति । तेनेदमितिवाक्येइदंशब्देनाप्रधानतयाप्रकृतविश्वमेवततोय
दुत्तरतरमित्यत्रततइत्यनेनपरामृश्यते। नतुतेनेतिप्रधानतयाप्रकृतः परमात्मेत्यंगीकार्यमित्याहेत्यर्थः॥ एतेनेति । ततइति

तच्छब्दस्यप्रपंचपरत्वस्यपरमपुरुषपरत्वेयस्मात्परंनेतिपूर्वापरवाक्यविरोधस्यचोपपादनेनेत्यर्थः ॥ [११८।१२२] ईशिनीभिरिति । ईशनंप्रेरणंतच्छीलाभिःशक्तिभिरित्यर्थः ॥ [११८।१२३] व्यवस्थयेति । कस्मिंश्चिद्देशेकस्मिंश्चित्कालेविष्णोःसर्वोत्तमत्वंकालांतरेदेशांतरेचब्रह्मादीनामितिव्यवस्थयेत्यर्थः ॥ [११८।१२४] अनिष्टत्वादिति । अनेनसर्वगतत्वमायामयशब्दादिभ्यइतिसूत्रेसर्वदेशकालावस्थासुभगवतएवसर्वेश्वरत्वोक्तेर्देशकालव्यवस्थयाविकल्पस्यभवतामनिष्टत्वादित्यर्थः ॥ [११८।१२५] तदधीनत्वादिति । दुःख्यादिशब्दजातमीश्वरेर्थवत् अन्यगतसु(दुः)खादीनांतदधीनत्वादितिसूत्रार्थः । यथोक्तं । दुःखिबद्धावराद्यास्तुतदधीनत्वहेतुतः । शब्दाब्रह्मणिवर्ततइति ॥ [११९।१३] शैवपुराणादीति । ननुशैवपुराणादौशिवादीनामदोषत्ववचनमादौअभाववचनंचास्तीत्याशंकाव्युदासार्थमित्यर्थः । वेदेष्वितिपुनर्वचनेनकथंतद्व्युदासइत्यतआह ॥ [११९।१४] तेषामिति ॥ [११९।१४] उत्तरग्रंथोवेति । वेदेषुसर्वेषुतेषांसर्वनामत्वानुक्तेश्चेत्युत्तरग्रंथोपक्रमवाक्यंचेत्यर्थः । उत्तरवाक्येपिवेदेष्वितिकिमर्थवक्तव्यमित्यतआह ॥ [११९।१४] तत्रापीति ॥ [११९।१४] तदेवेति । ननुशिवादीनांकथंसर्वनामवत्त्वानुक्तिःशैवपुराणादौतदुक्तेरित्याशंकाव्युदासार्थवेदेष्वित्युक्तमितिभावः । ननुविष्णोर्दोषावचनादेःकथंसर्वेश्वरत्वादिसाधकत्वं । कथंचब्रह्मादीनांदोषवचनादेस्सर्वेश्वरत्वादिबाधकत्वमित्यतोवाक्यतात्पर्यमाह ॥ [११९।१५] एतदुक्तंभवतीति । ननुईश्वरेणाज्ञानादिदोषरहितेनभवितव्यमित्ययुक्तं । अज्ञानादिमतोपीश्वरत्वेबाधकाभावादित्यतआह ॥ [११९।१५] तन्नजानातीति । ईष्टो नियामकः । तथाहि । ईश्वरत्वंनामेशनशीलत्वंनियामकत्वमितियावत् । एवंचप्रकृत्या

दिकंजगन्नजानातीतिपुनस्तस्यचेष्टइतिनयुज्यते । तज्ज्ञानाभावेतन्नियामकत्वासंभवादितिभावः । नन्वीश्वरेणप्रलयेऽवि
लुप्तज्ञानादिमताकुतोभवितव्यं । प्रलयेविलुप्तज्ञानवतोपीश्वरत्वेबाधकाभावादित्यतआह॥यश्चेति । तत् सर्वेश्वरत्वादिकं॥
तासांश्रुतीनामिति।ब्रह्मादिसर्वेश्वरत्वप्रतिपादिकानांहिरण्यगर्भःसमवर्तताग्रइत्यादिश्रुतीनामित्यर्थः॥इत रेप्येवमिति।
नशिवादीनांसर्वेश्वरत्वादिकंकिंतुविष्णोरेवेत्याहेत्यर्थः। गतिमाशंकते॥नचेति । वैषम्यमेवोपपादयति॥विष्णोरि ति।तथात्वे
सर्वनामवत्त्वे। शैवपुराणादिवचनव्यावृत्त्यर्थंवैदिकंवचनमित्युक्तं॥ श्रुत्यंतरविरोधेति। शिवस्यसर्वोत्तमत्वांगीकारे हिरण्य
गर्भःसमवर्तताग्रइत्यादिब्रह्मादिसर्वोत्तमत्वप्रतिपादकश्रुत्यंतरविरोधेप्राप्तेतत्परिहारोपायस्यशिवस्यहिरण्यगर्भादिसर्वनाम
वत्तस्याभावादित्यर्थः॥सर्वेश्वरत्वादिकमिति।निर्दोषत्वादिव्याप्यभूतमित्यर्थः॥ व्यापकाव्यावृत्तेरिति।सर्वेश्वरत्वादि
व्यापकस्यनिर्दोषत्वादेर्विष्णौसत्त्वादित्यर्थः॥ विरोधाभावाचेति। विष्णोस्सर्वेश्वरत्वांगीकारेशिवादिसर्वोत्तमत्वप्रतिपादक
श्रुत्यंतरविरोधपरिहारोपायस्यविष्णोःशिवादिसर्वनामवत्त्वरूपस्यसत्त्वेनविरोधाभावादित्यर्थः॥ जनितोतेति। सोमःपवतइ
त्यपूर्ववाक्यादत्रसोमइत्यनुवर्तते। तथाचसोमःविष्णोरुत विष्णोरपि। जनिता जनयिता उत्पादकइत्यर्थः। जनितामंत्रइतिनि
पातनात् । ननुवासुदेवस्यप्रादुर्भावएवयद्युत्पत्तिस्तर्हिजनितोतविष्णोरितिश्रुतिवचनविरोधःकथंपरिहृतइत्यतउत्पत्तिरित्यस्या

र्थमाह ॥ उत्पत्तिवचनार्थइति ॰। ननुब्रह्मादीनामित्येवास्तु तदन्येषामितिव्यर्थमित्यतआह ॥ विष्णोरपीति । ब्रह्मा
दीनांदेहोत्पत्तेरुत्पत्तिश्रुत्यर्थत्वेविष्णोरपिब्रह्मादिशब्दवाच्यानांपृथग्रूपाणांविद्यमानत्वेनतेषांदेहोत्पत्तेरुत्पत्तिशब्दार्थत्वप्राप्तौ
तस्यनान्योस्तिसर्गादिकर्तानिर्दोषकश्चसइत्युक्तविरोधप्रसंगादित्यर्थः ॥ तदन्येषामिति । ब्रह्मादिशब्दवाच्यविष्णुरूपे
भ्योऽन्येषामित्यर्थः । तर्हितदन्येषामित्येवास्तु ब्रह्मादीनामितिकिमर्थमुक्तमित्यतआह ॥ अविवादपदानामिति । तद
न्येषामित्येवोक्तौदेहोत्पत्तिमत्त्वेनविवादानास्पदानामस्मदादीनामपिप्राप्तेस्तद्व्युदासायब्रह्मादीनामित्युक्तमित्यर्थः॥ द्वैविध्ये
ति । विष्णूत्पत्तिवचनस्यप्रादुर्भावोर्थः ब्रह्माद्युत्पत्तिवचनस्यदेहोत्पत्तिरर्थइतिद्वैविध्यकल्पनमित्यर्थः । देहोनादिर्हरेरि
त्युक्तत्वात्तत्प्रतियोगित्वेनसादित्वमप्यत्रद्रष्टव्यमित्याह ॥ सादिश्चेति । ननुस्वरूपोत्पत्तेरेवमुख्योत्पत्तित्वेनदेहोत्पत्ते
रमुख्यत्वात्कथंदेहोत्पत्तिरेवमुख्योत्पत्तिरित्युच्यतइत्याशंक्यसमाधत्ते ॥ यद्यपीयमिति । ननुप्रादुर्भावापेक्षया
देहोत्पत्तेःकथंमुख्यत्वमित्यतस्तदुपपादयति ॥ देहात्मेति । देहात्मनोःस्फुटतरंविवेकमित्यर्थः । तथाचदेहात्मनोः
स्फुटतरविवेकाश्रयणेस्वरूपोत्पत्त्यपेक्षयादेहोत्पत्तिरप्यमुख्यैवभवति । तदनाश्रयणेतुदेहोत्पत्त्यास्वरूपस्यैवोत्पत्तिःप्राप्त
प्रायेतिप्रादुर्भावापेक्षयादेहोत्पत्तिर्मुख्येत्यर्थः । प्रादुर्भावस्यामुख्योत्पत्तित्वेकासानमुख्यवृत्तिरभिप्रेतेत्यतोगौणीवृत्तिरित्या
ह ॥ कदाचिदिति । स्वरूपतउत्पन्नेघटादावालोकादिनाऽभिव्यक्तेचघटादौ कदाचिदुपलभ्यत्वगुणयोगादित्यर्थः । न

नुभगवतोनिर्दोषत्वप्रतिपादनस्योत्तरपरिच्छेदप्रमेयत्वेनात्रतदभिधानमसंगतमित्याशंक्याह ॥ यद्यपीति । अयमर्थो भगवतोनिर्दोषत्वरूपः ॥ प्रसंगागतत्वादिति । समतीतक्षराक्षरत्वरूपंसर्वेश्वरत्वंशिवादीनांकिंनस्यादितिशंकायांतद्व्यापकीभूतस्यनिर्दोषत्वस्यतेष्वभावाद्विष्णौचतद्भावान्नतेषांसर्वेश्वरत्वं । किंतुविष्णोरेवेतिप्रसंगागतत्वादित्यर्थः ॥ ७ ॥ इतिश्रीमद्यदुपत्याचार्यपूज्यपादाराधकेनश्रीनिवासेनविरचितायांविष्णुतत्त्वविनिर्णयटीकाविवृतौवाक्यार्थदीपिकायांद्वितीयःपरिच्छेदः ॥ ७ ॥ विश्वोत्पत्त्यादिकर्तारमनंतगुणवारिधिं । दोषलेशविहीनंतंवेदव्यासंसदाभजे ॥ १ ॥ व्याचिख्यासिततृतीयपरिच्छेदप्रतिपाद्यविशेषणविवरणपूर्वकंतद्विशेषणयुक्तंहरिंनमति ॥ जगज्जन्मादीति ॥ अवद्यगंधेति । दोषलेशेत्यर्थः । गंधःसौरभ्यलेशयोरित्यभिधानात् ॥ निरंतरमिति । अंतरंव्यवधानंविना सदेत्यर्थः । यद्वाभगवद्गुणानांभगवताभेदशंकापरिहारायनिरंतरमित्युक्तं । निर्भेदमित्यर्थः ॥ क्रमप्राप्तमिति । सदागमैकविज्ञेयमित्याद्यपद्येनिर्देशक्रमप्राप्तमित्यर्थः । ननूत्तरत्रगुणसर्वस्वमूर्तिमत्त्वं सर्वदोषविवर्जितत्वोपपादकमित्युच्यते । तत्रदुःखादीनामपिगुणत्वेनपरमतेव्यवहारात्तदात्मकमूर्तिमत्त्वंकथंसर्वदोषविवर्जितत्वस्योपपादकंस्यादित्यतआह ॥ शुभेवचनइति । शुभधर्मवचनइत्यर्थः । तथाचगुणशब्देनदुःखादीनामप्रसक्तिरितिभावः । ननुदोषाभावोगुणइतिप्रसिद्धोलौकिकेष्वपीतिवचनात् अक्रौर्यंगुणः । आरोग्यंगुणइतिप्रयोगाच्चदोषाभावस्यापिगुणत्वेनगुणसर्वस्वमूर्तिमानित्यनेनैवसर्वदोषविवर्जितत्वस्यलब्धत्वाद्वर्जितःसर्वदोषैरितिपृथगुक्तिर्व्यर्थेत्यतआह ॥ दोषाभावस्येति ॥ भावाभावरूपतयेति । भावाभावरूपधर्मविवक्षयेत्यर्थः ।

मूर्तिर्देहः किमस्यविशेषणस्यप्रयोजनमित्यतआह ॥ [११९।२३] विग्रहवत्त्वादिति ॥ [११९।२४] इदमुक्तमिति । गुणसर्वस्वमूर्तिमानितिवि
शेषणमुक्तमित्यर्थः । तथाचप्राकृतविग्रहस्यैवदोषाविनाभूतत्वाद्भगवद्विग्रहस्यचातथात्वान्नोक्तदोषइतिभावः । यदधीनागु
णाश्चैवदोषाअपिहिसर्वशः ॥ गुणास्तस्यकथंनस्युःस्युर्दोषाश्चकथंपुनरित्यनुव्याख्यानंमनसिनिधायाह ॥ [११९।२४] उभयोरुपपादन
मिति । गुणपूर्णत्वनिर्दोषत्वयोरुभयोरुपपादनमित्यर्थः । तथाहि । द्वेधाहिवस्तुनप्राप्यते तत्रस्वातंत्र्याभावादाप्रेप्साभा
वाद्वा । द्वेधाचनहीयते। स्वातंत्र्याभावाद्वाजिहासाभावाद्वा । अस्तिचतावदीश्वरस्यसर्वतः स्वातंत्र्यं अस्तिचमयासर्वदाऽऽनं
दादिगुणवतादुःखादिदोषवर्जितेनचभवितव्यमितीच्छा । प्रेप्सावत्त्वादतःकथंतस्यानंदादिगुणपूर्णत्वंदुःखादिदोषदूरत्वं
चनभवति । अत्रैतेप्रयोगाः । ईश्वरःसर्वगुणपूर्णःसर्वदोषदूरश्चस्वतंत्रत्वात् । व्यतिरेकेणयज्ञदत्तवत् । ईश्वरोविप्रति
पन्नगुणवान्तत्रप्रेप्सावत्त्वेसतिस्वतंत्रत्वात् । योयत्रप्रेप्सावत्त्वेसतिस्वतंत्रः सतद्वान् यथासंप्रतिपन्नः । ईश्वरोन
विमतदोषवान् तज्जिहासुत्वेसतिस्वतंत्रत्वात् योयत्रजिहासावत्त्वेसतिस्वतंत्रःसतदभाववान् यथासंमतइति ॥ [११९।२४] एवमेवे
ति । अत्रापिगुणशब्दःशुभवचनः दोषाभावस्यगुणत्वेपिभावाभावरूपतयापृथगुक्तिः । उभयोपपादनंस्वतंत्रइति परमोवि
ष्णुरितिसाध्यनिर्देशइत्येवंवर्जितइतिवाक्ययोजनावदेवनित्यपूर्णेत्यादिवाक्ययोजनापिद्रष्टव्येत्यर्थः । निर्दोषश्चेत्कथंविष्णु
र्मानुषेषूदपद्यतेत्यस्यतर्करूपत्वंतावत्कथंशब्दबलादवगम्यते । तत्र चेच्छब्दस्यशंकार्थत्वेतन्नस्यादतोव्याचष्टे ॥ [११९।२५] चेद्यदीति ।
चेच्छब्दोयदीत्यर्थकइत्यर्थः । तथाचविष्णुर्यदिनिर्दोषः स्यात्कथंतर्हिमानुषेषूदपद्यत । मानुषेषूत्पत्त्यादिकंनस्यादितियावदि

त्यर्थोद्रष्टव्यः । मानुषेष्वितिविशेषणवैयर्थ्यमाशंक्यतदभिप्रायमाह ॥ [११३।२५] उत्पत्तिरेवेति । मानुषेषुतूत्पत्तिःसुतरांदोषव्याप्तेत्यर्थः । व्रणस्यप्रत्यक्षत्वेपिचिंतादेरांतरत्वेनपरप्रत्यक्षाविषयत्वाद्दृश्यतइत्ययुक्तमित्यतोव्याचष्टे ॥ [११३।२५] अनुमानेनदृश्यतइति । ज्ञायतइत्यर्थः । दोषाभावलक्षणकोट्युपस्थापकाभावात्कथंसंशयइत्यतआह ॥ [११३।२६] त्वद्वचनेनचेति ।(निर्दो)विदोषःसर्वदैवयइतित्वद्वचनेनेत्यर्थः ॥ [११३।२६] मर्त्यैःकिम्विति । अनेनापरैरित्यस्यत्वद्व्यतिरिक्तैरुद्रादिदेवैरित्यर्थइत्युक्तंभवति । मूलेहृदिशल्यमिवेति । यथाहृदिलग्नशल्यंशक्त्यासामर्थ्येनोद्ध्रियतइतिलोकेदृष्टंतथातमिमंसंशयरूपंशल्यंसमीचीनोक्तिसामर्थ्येनोद्धरेत्यर्थः । ननुस्त्रीपुंमलेतिकथं अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसेत्यादिसूत्रेसमासांताच्प्रत्ययांतानांपंचविंशतिशब्दानांनिपातितत्वेनस्त्रीपुंसमलेतिवक्तव्यत्वादित्यतआह ॥ [१२०।१] समासांतोविधिरनित्यइति । समासांताच्प्रत्ययविधानंक्वचित्स्यात्क्वचिन्नस्यादित्यर्थः ॥ [१२०।१] शुक्लशोणितमिति । शुक्लंरेतः शोणितंरक्तं तत्रस्त्रीमलंशोणितं । पुरुषमलंरेतइतिविवेकोद्रष्टव्यः । अभियोगआग्रहइत्यन्यथाप्रतीतेरभियोगशब्दार्थमाह ॥ [१२०।१] संबंधइति ॥ [१२०।१] तथोक्तइति । स्त्रीपुंमलाभियोगात्मेत्युक्तइत्यर्थः । तथाच स्त्रीचपुमांश्चस्त्रीपुमांसौ तयोर्मलंस्त्रीपुंमलं । स्त्रीपुंमलस्याभियोगः स्त्रीपुंमलाभियोगः । स आत्माकारणंयस्यस स्त्रीपुंमलाभियोगात्मा । स्त्रीपुंमलाभियोगात्मादेहोयस्यासौस्त्रीपुंमलाभियोगात्मदेहइतिविग्रहोद्रष्टव्यः । ननुसुखशब्दस्यनित्यनपुंसकत्वात्सुखामितिकथमुक्तमित्यतोविशेष्यनिघ्नत्वाददोषइत्येतत्सदृष्टांतमाह ॥ [१२०।२] विज्ञानमानंदमिति । विशेष्यभूतब्रह्मशब्दस्यनपुंसकत्वेनतद्विशेषणभूतानंदशब्दस्यनित्यपुंलिंगस्यापियथानपुंसकत्वंद्द

ष्टमेवंविशेष्यभूततनुशब्दस्यस्त्रीलिंगत्वेनतद्विशेषणीभूतसुखशब्दस्यापिस्त्रीलिंगत्वंयुक्तमित्यर्थः । ननुस्त्रीपुंमलाभियोगात्मे
त्यादिना कथंमानुषेषूदपद्यतेत्युक्तोत्पत्तिलक्षणदोषएवपरिहृतोनतुचिंताज्ञानश्रमदुःखादिदोषाःपरिहृताः । तथाच तथापी
त्यादिनाचिंतादिप्रदर्शनस्यगतिकथनमसंगतंस्यादित्यतोनचापरेत्यनंतरंशेषंपूरयति ॥ [१२।०१२] अंतएवेति । निर्दोषचैतन्यसुखरूप
देहवत्त्वादेवेत्यर्थः । एवंसति तथापीत्यादिना चिंतादिप्रदर्शनस्यगतिकथनंसंगतमितिभावः । सतामपिचकुत्रचिदितितात्प
र्यनिर्णयगतंवाक्यंहृदिनिधायपरेषामित्यस्यार्थमाह ॥ [१२।०१३] सज्जनानामिति । स्वरूपयोग्यतामतिक्रम्यसाधनानुष्ठातारएधमाना
स्तद्विट्त्वाद्भगवतइतिभावः । तथाचश्रुतिः । एधमानद्विळुभयस्यराजेति । उक्तंचभगवत्पादैः । एधमानद्विडित्येवविष्णोर्नाम
हिवैदिकमिति । स्वाधिकाराधिकोयत्नःकथंचिन्नोपपद्यते । कथंचिदधिकेयत्ने(दोषः) विघ्नःकश्चित्समापतेदितिच । असुरा
दीत्यादिपदेनसज्जनग्रहणं । ननुपूर्वमसुराणांसज्जनानांचप्रकृतत्वादुभयेषामपिमोक्षदौर्लभ्यंप्रतीयतेतदयुक्तं । सज्जनानांमो
क्षस्यप्रमाणप्रमितत्वेनदौर्लभ्यायोगादित्यतआह ॥ [१२।०१४] असुराणामित्यादि । तथाचासुराणांतमःप्राप्त्यामोक्षदौर्लभ्यंस्वरूप
योग्यतामतिक्रम्यसाधनानुष्ठातृणांसज्जनानांमोक्षविलंबएवदौर्लभ्यंनत्वसुराणामिवतदभावइतिभावः ॥ [१२।०१४] तेनेति । (व्रणा)
दुःखाज्ञादिदोषप्रदर्शनेनेत्यर्थः ॥ [१२।०१४] दौर्लभ्यमिति । असुराणांसज्जनानांचेतिशेषः । मूलेमिथ्यादर्शनदोषेणेत्यस्यमिथ्याभूतं
यद्व्रणादिकंतद्दर्शनजन्यदोषेणेत्यर्थोद्रष्टव्यः । मुक्तिंनयांतीत्यत्रसज्जनानामपिमुक्त्यभावःप्रतीयते सचप्रमाणविरोधादनुप

पन्नइत्यतःसज्जनपक्षेमुक्तिंनयांतीत्यस्याभिप्रायमाह ॥ [१२।०।१४] अत्यंतमविलंबेनेति । तथाचासुराणांसर्वथामुक्त्यभावएव । स
ज्जनानांत्वविलंबेनमुक्तिर्नभवतिकिंनाममिथ्यादर्शनदोषेणविलंबेनमुक्तिंप्रयातीत्येव । नतुसर्वथामुक्त्यभावइत्यर्थः । तमो
यांतिचेत्यत्रसज्जनानामपिकर्तृत्वप्रतीतिनिरासायशेषंपूरयति ॥ [१२।०।१५] तमोयांतिचासुराइति ॥ [१२।०।१५] अत्रेति । विष्णोर्नित्यपूर्णा
खिलगुणात्मकत्वप्रतिपादनावसरइत्यर्थः । केचिन्मायिनः । ततः परमात्मनः । मन्यंते तार्किकाः ॥ [१२।०।१६] द्विविधाइति ।
नचैवंभेदाभेदपक्षसांकर्यं । भेदाभेदपक्षेएकस्यैवानंदादेःपरमात्मनाभेदोभेदश्चांगीकृतः । एतन्मतेतु आनंदादयोगुणाद्वि
विधाः परमात्मस्वरूपभूतास्तद्भिन्नाश्चेति । तत्राद्यानामभेदः । द्वितीयानांवैषयिकानंदादीनांभेदएवेत्यंगीकारादितिद्र
ष्टव्यं ॥ [१२।०।१७] जात्यादीति । जातिःपरमात्मत्वादिरूपोधर्मः । आदिपदेनावयवादिग्रहणं । ननुगुणक्रियादीनांविष्णुस्वरूपत्वो
क्त्यानिर्गुणत्वात्यंतभेदपक्षयोर्निरासेपिभेदाभेदपक्षआनंदादिद्वैविध्यपक्षश्चकथंनिरस्तइत्यतोऽन्यदितिपदेनतदुभयपक्षनि
रासइत्याह ॥ [१२।०।१८] अन्यदितीति । ननुगुणादीनांपरमात्मनात्यंताभेदलाभेपिकथंपरस्परंभेदाभावोहेत्वभावादित्याशंकापरि
हारायोक्तस्यातइत्यस्यार्थमाह ॥ [१२।०।१८] अतइति ॥ [१२।०।१८] एकेनेति । यद्यदभिन्नाभिन्नंतत्तेनाभिन्नं । यथारामाभिन्ननारायणाभिन्नः
कृष्णोरामाभिन्नइतिव्याप्तिबलादानंदाद्यभिन्नविष्णवभिन्नोज्ञानादिरानंदाभिन्नइतिभावः ॥ [१२।०।१८] कथंतर्हीति । गुणानांभगव
तापरस्परंचात्यंताभेदांगीकारइत्यर्थः ॥ [१२।०।१९] वस्तुनःशक्तिरिति । वस्तुनोधर्मभूतोऽभेदेभेदकार्यकारित्वशक्तिमान्पदार्थो
विशेषइतियोज्यं । अन्यथागुणगुण्यादिपदार्थशक्तिरेवविशेषइतिप्राच्याग्रंथांतरविरोधापत्तेः । तत्रगुणगुण्यादिभेदव्यव

हारनिर्वाहकस्यगुणिनिष्ठस्यविशेषरूपपदार्थस्यातिरिक्तस्यैवप्रतिपादनादित्यवगंतव्यं । यथोक्तमनुव्याख्याने । भेदहीनेत्व
पर्यायशब्दांतरनियामकः । विशेषोनामकथितःसोस्तिवस्तुष्वशेषतइति ॥ [१२०।१०] तत्संभावनार्थमिति । एतादृशविशेषेऽसंभा
वनाशंकापरिहारार्थमित्यर्थः ॥ [१२०।१०] नहीति । स्वरूपत्वरूपधर्मस्यस्वरूपाद्भिन्नत्वेद्रव्याद्यंतर्भावोवाच्यः । सतुनसंभवति । तथा
हि । नतावत्स्वरूपत्वंद्रव्यं । गुणस्वरूपेपिसत्त्वात् । गुणेचद्रव्याभावात् । नापिगुणः । कर्मस्वरूपेपिसत्त्वात् । कर्म
णिचगुणाभावात् । नापिकर्म । सामान्यस्वरूपेपिसत्त्वात् । सामान्येचकर्माभावात् । नापिसामान्यं । विशेषस्वरूपेपिसत्त्वा
दित्येवंद्रव्याद्यंतर्भावासंभवेनषट्पदार्थातिरेकःस्यादित्याशयः। यथोक्तमनुव्याख्याने । षट्पदार्थातिरेकस्स्यादित्यादि । नस्व
रूपत्वसामान्यंकेनाप्यंगीकृतंक्वचित् । स्वरूपंचेदनुगतंव्यावृत्तंतत्रकिंभवेत् । किंव्यावृत्तमितिप्रश्नेस्वरूपमितिकेवलं । स्यादु
त्तरंततोन्यच्चेत्तदेवस्वयमेवनइतिभक्तिपादीयानुव्याख्यानोक्तरीत्यास्वरूपत्वंनस्वरूपाद्भिन्नोधर्मोस्तीतिभावइत्यप्याहुः ॥ त्व
[१२०।११] प्रत्ययइति । स्वरूपस्यभावःस्वरूपत्वमितिभेदकार्यभूतोधर्मधर्मिव्यवहार(हेतु)(रूप)स्त्वप्रत्ययप्रयोगोस्तीत्यर्थः ॥ निर्वि
[१२०।११] षयइति । निरर्थकइत्यर्थः । अस्तुनिरर्थकःकोदोषइत्यतआह ॥ [१२०।११] अप्रयोगेति । त्वप्रत्ययस्येतिशेषः । निरर्थकशब्द
स्यप्रेक्षावताऽप्रयुज्यमानत्वादितिभावः ॥ [१२०।१२] अन्यत्रापीति । सत्त्वपदार्थत्वादावपीत्यर्थः । तथाचसत्त्वादिकमपिनातिरि
क्तोधर्मोस्तिअस्तिचत्वप्रत्ययः । अतोस्तितत्प्रवृत्तौकिमपिनिमित्तंसएवविशेषइतिभावः । किंतत्प्रमाणमित्यतआह ॥ [१२०।१२] यथो
क्तमिति । समयपादीयानुव्याख्यानेभगवत्पादैरित्यर्थः । इत्यादीत्यादिपदेनविशेषस्यार्थापत्तिसिद्धत्वप्रतिपादकं भेद

हीनेत्वपर्यायशब्दांतरनियामकः । विशेषोनामकथितइत्यादिवाक्यंग्राह्यं ॥ [१२०।१३]वैशेषिकाभ्युपगतादिति । नित्येष्वेवद्र
व्येष्वेववर्ततएवेतिविशेषाः । अंत्यव्यावृत्तिहेतुर्विशेषः । अजातिरेकवृत्तिश्चविशेषइतिगीयतइतिलक्षितादित्यर्थः ॥ [१२०।१४]न्याय
शास्त्रवाक्येनेति । ब्रह्मतर्कवाक्येनेत्यर्थः । ब्रह्मतर्कस्तर्कशास्त्रंविष्णुनायत्समीरितमितिवचनादितिद्रष्टव्यं । ननुपरव
लिंगंद्वंद्वतत्पुरुषयोरितिसूत्रादभेदश्चेत्यंतेऽभिहितत्वात्तदपेक्षयाभेदवर्जितइतिवक्तव्यत्वेनभेदवर्जितमितिनपुंसकलिंगानुपप
त्तिरित्यतोध्याहारेणयोजयति ॥ [१२०।१५]इतिपर्यायशब्दवाच्यंवस्त्विति ॥ [१२०।१६]भेदाभेदिनोरिति । सकाशादित्यर्थः ॥
[१२०।१६]चतुर्थपक्षोपीति । स्वरूपभूतानंदादीनामभेदसमानयोगक्षेमत्वात् आनंदादिभेदस्यचतार्किकांगीकृतगुणगुणिभेदस
मानयोगक्षेमत्वादितिभावः ॥ [१२०।१९]ब्रह्मादिनेति । अभेदोब्रह्मणा । भेदश्चभेदिनोर्भेदाभेदौचभेदाभेदिनोर्नाभिन्नाः । किंतु
भिन्नाएवेत्यर्थः । चशब्दसमुच्चेयमेवदर्शयति ॥ [१२०।२०]भेदस्येत्यादिना ॥ [१२०।२१]भेदपरंपरापातेनेति । सभेदःकिंभेदिभ्यांभि
न्नोऽभिन्नोवेत्यादिपरंपरयेत्यर्थः । अपरिहार्यत्वमेवज्ञप्तिप्रतिबंधकत्वोपपादनेनोपपादयति ॥ [१२०।२१]विशिष्टप्रतीतिसिद्ध्यर्थ
मित्यादिना । जीवब्रह्मणीअभिन्नेइत्यादिजीवब्रह्मादिविशेष्यकाभेदादिविशेषणकप्रतीतिसिद्ध्यर्थमित्यर्थः ॥ [१२०।२२]भेदांगी
कार्यइति । गुणगुणिनोरितिशेषः । अन्यथास्वस्मिन्नपिस्वविशिष्टप्रत्ययप्रसंगइतिभावः ॥ [१२०।२२]अप्रतीतइति । स्वरूपसच्चेदइ
त्यर्थः॥[१२०।२२]तद्धेतुरिति । विशिष्टप्रत्ययहेतुरित्यर्थः । अन्यथादंडपुरुषयोरभेदभ्रमदशायामपिदंडीतिविशिष्टप्रत्ययप्रसंगः । स्व

रूपसद्भेदस्यतत्रापिसत्त्वादितिभावैः । तत्प्रतीतिः भेदप्रतीतिः । नन्वंगीकृताभेदप्रतीतिः किंततइत्यतआह ॥ [१२०।२२] **नचेति** ।
[१२०।२२] **अविविक्ततयेति** । इतरसंकीर्णतयेत्यर्थः । तत्प्रतीति भेदप्रतीतिः ॥ [१२०।२२] **उपयोगिनीति** । जीवब्रह्मादिविशेष्यकाभेदादि
विशेषणकविशिष्टप्रतीत्युपयोगिनीत्यर्थः । तथात्वेसर्वमितिसर्वत्वादिनारूपेणदंडप्रतीतौसत्यांदंडीतिविशिष्टप्रत्ययप्रसंगादि
तिभावः ॥ [१२०।२२] **भेदस्यापीत्यादि** । जीवब्रह्मादेरभेदादेश्चभेदाप्रतीतौविशिष्टप्रत्ययायोगाद्भेदप्रतीतिरंगीकार्या । इतरसंकीर्ण
भेदप्रतीतेर्विशिष्टप्रत्ययजनकत्वायोगादितरासंकीर्णतयाजीवब्रह्माभेदानांभेदइत्यादिजीवब्रह्माभेदादिविशेषणकभेदविशे
ष्यकविशिष्टप्रतीतिरंगीकार्या । केवलंभेदइत्येवप्रतीतेरभावात् । इयंचविशिष्टप्रतीतिर्भेदस्यगुणगुणिनोश्चभेदाभावे नसंभ
वतीतिभेदोंगीकार्यः । नचाप्रतीतोभेदस्तद्धेतुर्भवतीतितस्यापिपुनर्विशिष्टप्रतीतिरंगीकार्येत्येवमादिरूपेणानवस्थेत्यर्थः ॥
[१२०।२३] **एवमनवस्थैवेति** । अभेदस्याभिन्नस्यभेदस्यभिन्नस्यगुणादेर्भेदाभेदयोर्गुणगुणिनोश्चयदिभेदाभेदावंगीक्रियेतेतदाभेदाभे
दयोर्भेदाभेदिभ्यांगुणगुणिभ्यांचपुनर्भेदाभेदोंगीकार्यः । पुनस्तत्राप्येवमितिभेदाभेदपरंपरयाऽनवस्थैवेत्यर्थः ॥ **सविशे**
[१२०।२४] **षाभेदइति** । भेदस्यगुणगुणिभ्यांभेदाभेदयोश्चभेदाभेदिभ्यामभेदमंगीकृत्यविशिष्टप्रत्ययरूपभेदकार्यनिर्वाहायविशेषों
गीकार्यइत्यर्थः । नविशेषणतामतिरित्यत्रस्यादित्यनुवर्ततइत्यभिप्रेत्यतदभिप्रायउक्तो[१२०।२५]**नज्ञायेतेति** । मेरुमंदरयोःसंबं
धाभावाद्गुणगुणिनोश्चसमवायरूपसबंधसद्भावेनतत्साम्याभावाद्युक्तंगुणिनोविशेषणतयागुणस्यज्ञानमित्याशंकते ॥ [१२०।२५] **संबंधे**

ति ॥ [१२०।२६] ससंबंधइति । गुणस्यगुणिनंप्रतिविशेषणतामतिमूलभूतःसंबंधइत्यर्थः ॥ [१२०।२६] संबंधीति । गुणगुणिरूपसंबंधीत्यर्थः । प्रतीतोवेत्यादौविशेषणतामतेर्मूलमित्यनुवर्तते ॥ [१२०।२६] स्वातंत्र्येणेति । गुणगुणिरूपसंबंध्यविशेषणतयेत्यर्थः ॥ [१२१।१] तत्रापीति । गुणगुणिरूपसंबंधिविशेषणतयाप्रतीयमानेसमवायरूपसंबंधेपीत्यर्थः ॥ [१२१।१] अनवस्थेति । यदिगुणगुणिरूपसंबंधिविशेषण तयासमवायरूपःसंबंधःप्रतीयतइत्युच्यते । तदासमवायसंबंधस्यगुणगुणिनोश्चपुनःसंबंधांतरंप्रतीयतइत्यंगीकार्यं । अन्यथा मेरुमंदरस्येवगुणगुणिनोस्समवायइतिगुणगुणिनौप्रतिसमवायसंबंधस्यविशेषणतयाप्रतीत्यनुपपत्तेः । अतोगुणगुणिनोःस मवायस्यचप्रतीयमानंसंबंधांतरमपिगुणगुणिसमवायानांसंबंधइतिगुणगुणिसमवायरूपसंबंधिविशेषत्वेनैवप्रतीयतइत्यंगीका र्यं । तत्रापिमेरुमंदरवद्विशेषणविशेष्यभावेनप्रतीत्यनुपपत्तिपरिहारायगुणगुणिसमवायानांसंबंधांतरस्यचपुनःसंबंधांतरप्र तीत्यपेक्षयाऽनवस्थास्यादित्यर्थः ॥ [१२१।१] अतिप्रसंगएवेति । गुणगुणिनोर्विशेषणविशेष्यभावप्रतीतिमूलभूतःसंबंधोयदिस्वा तंत्र्येणगुणगुणिरूपसंबंधिविशेषणत्वेनाप्रतीतएवविशेषणतामतिमूलंस्यात् । तदीयत्वेनाप्रतीतोपितद्विशेषणतामतिमूलंस्या दितियावत्।तथात्वेमेरुमंदरसंबंधित्वेनाप्रतीतस्यघटस्यापिमेरोर्मंदरंप्रत्यपिविशेषणतामतिमूलत्वंस्यादित्यतिप्रसंगएवेत्यर्थः॥ [१२१।१] तृतीयइति । अप्रतीतस्यैवसंबंधस्यगुणस्यगुणिनंप्रतिविशेषणतामतिमूलत्वपक्षइत्यर्थः।मूलसंबंधमज्ञात्वेत्यनंतरंनविशेषण तामतिरित्यनुवर्ततइतिसच्च[illegible] [१२१।१] संबंधमित्यादिना । विशेषणतामतिमूलभूतंसंबंधमित्यर्थः । अत्र

तस्यसंबंधस्यकुतोनविशेषणप्रत्यय... ...स्यात ॥ **संयोगादीनांहीति**। ज्ञातानामेवेत्येवकारव्यावर्त्यंदशे
यति ॥ [१२।१२] **नसत्तामात्रेणेति**। तथात्वेपिहितदंडेपिदेवदत्तेदंडीतिविशिष्टप्रत्ययःस्यात् । स्वरूपसतोदंडसंयोगस्यतत्रापिस
त्त्वादितिभावः। तथाचविशिष्टप्रत्ययमूलभूतसंबंधज्ञानेंगीकार्ये उक्तरीत्यानवस्थेतिहृदयं ॥ [१२।१३] **नानाविधइति**। आनंदंब्र
ह्मणइत्यादिसंबंधव्यवहारः गुणेषुबहुवचनव्यवहारो गुणिन्येकवचनव्यवहारः शब्दानामपर्यायत्वमितिनानाविधोव्यव
हारइत्यर्थः। मूलेव्यवहार्यमित्यस्यनानाविधव्यवहारविषयइत्यर्थः । दुस्तर्कैत्यत्रदुरित्युपसर्गस्यार्थमाह ॥ [१२।१४] **तर्कागोचर**
येति। बलवतइत्यस्यार्थः ॥ [१२।१४] **शक्त्येति** ॥ [१२।१४] **सविशेषइति** । येननानाविधव्यवहारोभवतिसविशेषइत्यर्थः । विशेषितो
गुण्यादेः ॥ [१२।१५] **भेदानवस्थेति**। भेदःकिंभेदिभ्यांभिन्नोऽभिन्नोवेत्येवंभेदपरंपरयानवस्थेत्यर्थः । तर्हिविशेषविशेषिभावानुप
पत्तिरित्यतआह ॥ [१२।१६] **तथापीति** ॥ [१२।१६] **विशेषपरंपरयेति** । विशेषविशेषिणोर्विशेषविशेषिभावघटकविशेषांतरांगीकारेतस्या
पिविशेषितोऽभिन्नत्वेविशेषविशेषिभावानुपपत्तेस्तत्परिहारायपुनर्विशेषांतरांगीकारेविशेषपरंपरयानवस्थेत्यर्थः ॥ [१२।१८] **गुणादि**
कमपीति। किंचनेत्यत्रत्यचनशब्दार्थइत्यवगंतव्यं। नानेवेत्यस्यार्थोभिन्नाभिन्नमिति । इवशब्दःस्वयंयत्समभिव्याहृ
तस्तद्विरोधिद्वितीयसंग्राहकोभवति। यथोक्तं । इवोभयेचसादृश्यइतिवाक्शब्दनिर्णयइति। अत्रचनानोक्त्वाप्रयुक्तइवश
ब्दोऽनानासंगृह्णातीत्यभिप्रेत्यभिन्नाभिन्नमित्युक्तमितिद्रष्टव्यं। ततो भगवतः॥ [१२।१९०] **तद्दर्शनमन्वेवेति** । तद्दर्शनानंतरमे
वेत्यर्थः ॥ [१२।१९०] **अधोगच्छंतीति**। नित्यनिरयंप्राप्नोतीत्यर्थः । ननुकथमनेननिर्गुणत्वादिपक्षनिरासलाभइत्यतआह ॥ **यदी**

[१२३।१०]त्यादिना । कथमनयाश्रुत्याविशेषोज्ञायतइत्यतोऽत्रऋग्भाष्यस्थंभगवत्पादवाक्यंप्रमाणयति ॥ [१२३।११]यथाहुरिति । इंद्रं वायूइमेसुताइत्यृग्व्याख्यासमयइतिशेषः । तदुदाहरति ॥ [१२३।१२]उक्त्वेति । तंदुर्दर्शंगूढमनुप्रविष्टमित्यादिनापरमेश्वरस्याने कान्धर्मानुक्त्वा एकमेवाद्वितीयमित्येवंपुनःपृथक्त्वस्यनिषेधाद्भेदादन्योविशेषोभगवतिश्रुत्यैवज्ञायते। अखंडत्वेधर्मकथनानु पपत्तेः । गुणानांभगवताभेदेचपृथक्त्वनिषेधायोगात् । किंचघटादौभेदादन्योविशेषः साक्षितश्चज्ञायतइतिश्लोकार्थोद्रष्ट व्यः । भिन्नस्थलइवाभिन्नस्थलेपिसंबंधःप्रतीयतेऽतोनात्रविप्रतिपत्तिःकार्येत्याशयेनमूलोक्तान्दृष्टांतान्स्वयंदृष्टांतैरुपपाद यति ॥ [१२३।१४]यथापक्षीत्यादिना । तत्रदेशः सर्वत्रेत्येतद्दृष्टांतेनविवृणोति ॥ [१२३।१४]यथापक्षीति । अत्यंतभेदस्थलेयथाप्रतीयतेत थेत्याशयः । पुरुषःस्वतंत्रइत्येतद्दृष्टांतेनविशदयति ॥ [१२३।१५]यथागुरुतंत्रइति । कालनित्यतेत्येतद्दृष्टांतेनस्फुटयति ॥ [१२३।१६]यथाका शस्येति ॥ [१२३।१६]नित्यताप्रतीयतइति । कालःसर्वदास्तीतिप्रतीतिबलादितिभावः ॥ [१२३।१७]पूर्वोक्तेति । अभिन्नत्वमभेदश्चेत्यादि नापूर्वोक्तेत्यर्थः ॥ [१२३।१७]अभेदादीनामिति । यथाअभेदभेदादेर्ब्रह्मादिनाभेदेपिजीवब्रह्मणोरभेदः गुणगुणिनोर्भेदइतिसंबं धिताप्रतीयतइत्यर्थः । ननुगुणारूपंयस्यासौगुणरूपस्तस्यगुणरूपस्येतिवक्तव्यं । ननुगुणरूपिणइतीनेःप्रयोगः । नबहुव्रीहि निर्वाह्येभवंतिमतुबादयइतिवचनात्अतआह ॥ [१२३।१७]कर्मधारयादिनिरिति । तथाचगुणाएवरूपंगुणरूपंगुणरूपमस्यास्तीति गुणरूपी । तस्यगुणरूपिणइतिविग्रहोद्रष्टव्यः ॥ [१२३।१८]निमित्तमिति । विशेषरूपंनिमित्तमित्यर्थः ॥ [१२३।१८]स्वगर्भेवेति । तदभिन्नएवेत्यर्थः । ननुदेशःसर्वत्रेतिदृष्टांते आ…कास्यसर्वाकाशसंबंधःप्रतीयतइत्युक्तंतन्नममसंमतमित्याशंकते ॥ देशः

काशंप्रत्याधारत्वंतन्नपरमतउपपद्यते । आकाशस्यपरेणावृत्तित्वांगीकारादितिभावः । उपचरितासप्तमीतिचेत्तत्राह ॥ [१२३।१९]बाधकेति ॥ [१२३।१९]उपचारेति । सप्तमीविभक्तेरितिशेषः । ननुपुरुषःस्वतंत्रइतिदृष्टांतेपुरुषस्यस्वसंबंधःप्रतीयतइत्युक्तं तदयुक्तं स्वतंत्रइत्यस्यपरतंत्रताव्यावृत्तिरेवार्थइतिचेत्तत्राह ॥ [१२३।१९]अतएवेति । स्वसंबंधांगीकारेबाधकाभावादेवेत्यर्थः । ननुकालनित्यतेतिदृष्टांतेकालस्यसर्वकालसंबंधित्वंप्रतीयतइत्ययुक्तंनित्यशब्दस्याविनाशित्वार्थकत्वादित्याशंकते ॥ [१२३।२०]नित्योऽविनाशीति ॥ [१२३।२०]सदातनेति । सदातनंसत्यमितिनित्यमेवोच्यतेबुधैरितिपर्यायत्वोक्तेरितिभावः । ननुनित्यशब्दस्यसदातनपर्यायत्वेपिकालस्यसर्वकालसंबंधःकथंनित्यशब्देनलब्धइत्यतआह॥ [१२३।२०]तस्येति। सदातनशब्दस्येत्यर्थः ॥ [१२३।२०]सर्वकालभाविवाचकत्वादिति । सर्वकालभाविवस्तुवाचकत्वादित्यर्थः । तथाचतत्पर्यायस्यनित्यशब्दस्यापि सर्वकालभावित्वार्थकत्वमेवेतिभावः ॥ [१२३।२१]उदाहृतश्रुत्यादीति । गुणक्रियादयोविष्णोःस्वरूपमित्यादिनोदाहृतश्रुत्यादीत्यर्थः । श्रुत्यादीनांमायाकल्पितगुणपरत्वादितिभावः । मुक्तानांचेत्युत्तरवाक्यस्यवैयर्थ्यमाशंक्यपरमंसाम्यमुपैतीतिश्रुतेर्मुक्तस्यभगवत्समानत्वावगमान्निर्दोषाशेषसद्गुणत्वलक्षणस्यमुक्तेऽतिव्याप्तिरित्याशंकापरिहारार्थमित्याह ॥ [१२३।२३]मुक्तस्यापीति । किमुतामुक्तस्येत्याशयः । येन साम्यापातेन । साम्यवाक्यंचनिर्दुःखत्वादिधर्मेणसाम्यपरमित्याशयः । यथोक्तं । दुःखाभावःपरानंदोलिंगभेदःसमामताइति ॥ मूले शतधृत्यंताइति । शतधृतिश्चतुर्मुखस्तदंताइत्यर्थः ॥ [१२३।२६]युवास्यादिति । युवा

स्यात्साधुयुवाध्यायकः। आशिष्ठोदृढिष्ठोबलिष्ठः तस्येयंपृथिवीसर्वावित्तस्यपूर्णास्यात्। सएकोमानुषआनंदइत्यादिकामानंदतारतम्यप्रतिपादनपरांतैत्तिरीयश्रुतिं सयोमनुष्याणांराद्धःसमृद्धोधिपतिरित्यादिकामानंदमर्यादाकथनपरांबृहदारण्यकश्रुतिंचोपादत्तइत्यर्थः॥ [१२२।१] **कोसौमोक्षइति**। संविच्छब्देनतत्साध्योमोक्षउपलक्ष्यतइतिसंविच्छब्दस्यपूर्वमोक्षलक्षकत्वोक्तेर्मोक्षज्ञानयोःसाध्यसाधनभावप्रदर्शनंलाक्षणिकपदप्रयोजनमित्युक्तत्वाच्चेतिभावः॥ [१२२।१] **उक्तलक्षणेति**। निर्दोषाशेषसद्गुणत्वादिलक्षणोपेतोयोभगवान्तत्संवित्साध्यत्वमित्यर्थः॥ [१२२।२] **परिहरतीति**। तथाचलिंगशरीरबंधरूपसंसारनिवृत्त्यनंतरंनिर्दुःखानंदानुभवएवमोक्षःसचोक्तलक्षणभगवत्संवित्साध्यइत्युक्तंभवतीतिद्रष्टव्यं॥ [१२२।३] **स्वंस्वरूपंख्यापयन्निति**। भगवत्स्वरूपस्येवाधिकार्युत्तममुख्यप्राणावतारभूतस्वस्वरूपज्ञानस्यापिभक्तानांमोक्षसाधनत्वादितिभावः॥ [१२२।३] **ग्रंथांतरादिति**। यस्यवायोर्देवस्यबळित्थेत्यादिवेदवचनेदिव्यानिक्रीडादिगुणयुक्तानित्रीणिरूपाण्युदितानितस्ययत्तृतीयंरूपंअमुनारूपेणअयंग्रंथःकेशवेविपयेतद्विषयतयाकृतइत्यन्वयः। तत्प्रतिपादकत्वात्तस्मिन्नर्पितइतितात्पर्यं। कीदृशंचास्यमूलरूपंकानिचतानित्रीणिरूपाणिकीदृशानीतितत्राह॥ **अलमित्यादिना**। तस्यवायोर्मूलरूपं अलंसम्यक्बट्बलात्मकं दर्शतंज्ञानरूपं भर्गोजगद्भरणगमनगुणं महत्महनीयंपूज्यं ततइत्थंभूतमेव। रूपत्रयावतारायभगवतानिहितंप्रेरितंअवतीर्णंच। तत्रयस्यप्रथमकंहनुमदाख्यंवपुःरामस्यवचांसिसीतांप्रतिनीतवत्। रामविषयकवचांसिमूलरामायणरूपाणिशिष्येषुनीतवद्वा। रामवचसियोनयोन्यायःआज्ञारूपस्तद्युक्तंवा। यस्यद्वितीयंवपुर्भीमनामकंपृक्षःपृतंसेनांक्षिणोतीतिपृक्षःउपपदांत्यतकारलोपः। कुरुपृतनाक्ष

यकरं । यस्यैतत्तृतीयंवपुःमध्वःमधुशब्दःसुखवाची । मधुद्यौरस्तुनःपितेतिप्रयोगात्वशब्दःशास्त्रापरपर्यायतीर्थवाची । तथाचमधुआनंदकरंआनंदरूपस्यहरेःप्रतिपादकंवातीर्थंशास्त्रंयस्य तन्निर्मात्रितियावत् । मध्वाभिधमिति । यथोक्तं । मध्वित्यानंदउद्दिष्टोवेतितीर्थमुदाहृतं । मध्वआनंदतीर्थस्यात्तृतीयामारुतीतनुरिति । स्वरित्यत्रेवउकारलोपोमंतव्यः । अन्यथामधुवेतिस्यादित्यवगंतव्यं । अतः परमाप्तप्रणीतत्वादयंग्रंथःसकलसुजनैरादरेणांगीकार्यइतिभावः । इत्येवंतत्वप्रदीपिकादिरूपाद्ग्रंथांतरादस्यश्लोकस्यार्थोवगंतव्यइत्यर्थः ॥ [१२२।४] अंतेपीति । स्वस्वरूपप्रतिपादनेनैवग्रंथोनपरिसमापनीय इत्याशयेनेतिभावः । सर्वदाऽपरोक्षीकृतभगवत्स्वरूपत्वाद्ग्रंथपरिसमाप्तिसमयेविशेषतस्तमपरोक्षीचकार अतोमूले **नारायणायत** इत्यपरोक्षनिर्देशइत्यवगंतव्यं । अंतेपिमंगलाचरणस्यावश्यंकर्तव्यतयाशिष्टाचारपरंपराप्राप्तत्वात्परिसमापितग्रंथोभगवांष्टीकाकारोंतेपिश्रीहरिनमनरूपंमंगलमाचरति ॥ [१२२।४] **आनंदसिंधवइति** । स्वांतंहृन्मानसं मनइत्यभिधानात्स्वांतंमानसं तत्रत्यंयद्ध्वांतमज्ञानं तस्यतन्निरसनइतियावत् । तिमिरारिः सूर्यः । तस्माइत्यर्थः । एतत्प्रकरणटीकाकरणजनितंपुण्यंस्वगुरवेसमर्पयति ॥ [१२२।५] **मयेति** । इदानींस्वगर्वंपरिहरति ॥ [१२२।६] **आनंदतीर्थेति** । व्याख्यानकर्मणि व्याख्यानकरणे । विशिष्टव्याख्यानकर्मणीत्युक्तत्वात्सुराअधिकारिणइत्युक्तंयुक्तं । यततइतियत्तदितिसंबंधः । हास्यं हासास्पदं । हासास्पदत्वेयतनंव्यर्थमित्याशंकते ॥ [१२२।७] **किनामेति** । उत्तरमाह ॥ [१२२।७] **भक्तीति** । आनंदतीर्थभगवत्पादेषु

भक्तिपराधीनस्यमम भक्तिपारवश्येनतद्वचनव्याख्यानेआग्रहविशेषयुक्तस्येतियावत् ॥ तदिति । सुराधिकारिकानंदतीर्थ वचसांव्याख्यानेयतनं विभूषण मलंकारएव । तथाचास्यग्रंथस्यभक्तिपरवशेनमयाकृतत्वंविचार्यसूरयोऽत्रनदोषान्विचारयेयुः । तद्भक्त्यातत्कारुण्यसरणिंप्रपन्नोहमपियत्किंचिद्वदन्महतांमान्यएवास्मीत्याशयइत्यशेषमतिमंगलं ॥ ७ ॥ यस्तत्त्वदेवान्संप्रेर्यकारयामाससत्कृतिं । गुर्वंतस्थानंदतीर्थहृद्गतंव्यासमाभजे ॥ श्रीयादवार्यसत्पादसेवकेनयथामति ॥ तत्त्वनिर्णयटीकायाविवृतिस्तदनुग्रहात् ॥ श्रीनिवासेनरचितानाम्नावाक्यार्थदीपिका ॥ व्यासपादार्पिताभूयात्सतांव्याख्योपकारिणी ॥ जयराजवचांसिक्वकचाहंमंदबुद्धिमान् ॥ तथाप्यस्मद्गुरुवरानुग्रहःकिंनसाधयेत् ॥ इतिश्रीमद्यदुपत्याचार्यपूज्यपादाराधकेनश्रीनिवासेनविरचितायांश्रीमद्विष्णुतत्त्वनिर्णयटीकाविवृतौवाक्यार्थदीपिकायांतृतीयः परिच्छेदः ॥ ७ ॥

अयं ग्रंथः कुंभघोणस्थेन टी. आर्. कृष्णाचार्येण मुंबय्यां निर्णयसागर-
मुद्रणालये मुद्रयित्वा प्रकाशितः शके १८२२.